स्वीकारात्। ननु रूपादिस्वीकारोऽप्यस्तीति चोद्ये सत्याह **भिन्नरूपाभिमतानामपि** इति। रूपादीनां भिन्नरूपतयाभिमतानाम्। **प्रकृत्यन्वयित्वात्** इति। यतो रूपादयो विकाराः प्रकृतिरूपेणान्विताः, प्रकृतिश्चैषां ब्रह्म। तच्च वाग्रूपमिति प्रतिपादयिष्यते। तेन रूपादयः सर्व एव शब्दरूपाः, त एव उपग्राह्या अस्येति। **शब्दोपग्राहितया** इति। शब्द उपग्राही [16]अस्येति शब्दनिबन्धना प्रतिपत्तिस्तस्येति शब्दतत्त्वम्। एतदुक्तं भवति। शब्देन हि तत् परिच्छिद्यते। तस्मिंश्च तत्परिच्छेदके ज्ञाने तद्रूपं सन्निविष्टमिति वस्तुनः शब्दाकारज्ञानोत्पत्तेः शब्द उपग्राही स्वीकर्ता तस्य भवति। अन्ये तु विपरीतं पठन्ति शब्दोपग्राहितया शब्दोपग्राह्यतया इति। तेषामुपग्राहयितुं शीलमस्येति शब्दोपग्राहि। शब्देनोपगृह्यते प्रतिपद्यत इति शब्दोपग्राह्यम्, शब्दस्वभावेनावतिष्ठत इति। शब्दतत्त्वमिति, इदमस्याविपरीतं रूपमिति। तां शब्दनिबन्धनां तस्य प्रतिपत्तिमाचष्टे। **स्थितिप्रवृत्तिनिवृत्तिविभागा हि** इति। स्थितिः मध्यावस्था, प्रवृत्तिः सर्गः, निवृत्तिः प्रलयः। त एव विभागाः। हि शब्दो यस्मादर्थे। यस्मादेते प्रविभक्तस्य ब्रह्मणो शब्देनाक्रियन्ते, परिच्छेद्यतामुपनीयन्ते इति। न ह्येते शब्दमनाश्रित्य शक्यन्ते निरूपयितुमिति। **तच्चाक्षरनिमित्तत्वात्** इति। ब्रह्माक्षरमित्यभिधीयते। अक्षराणि वर्णा अकारादयः। तेषां तद् ब्रह्म निमित्तमिति। कथमित्याह **प्रत्यक्चैतन्ये** इति। प्रतिपुरुषं यच्चैतन्यं ब्रह्मैव तत्। यथा वक्ष्यति **अन्तः** इति। न [17]बुद्धेर्विषयाभावगमनेन सन्निवेशः किन्तु बुद्धितत्त्वाव्यतिरेकात् इति। **सन्निवेशितस्य** इति। तद्धि न क्वचित् सन्निविष्टम्, केवलमविद्याविपर्यासवशात् तथोच्यत इति णिचा व्यपदिश्यते। **परसंबोधनार्था** इति, परान् संबोधयितुम्। **व्यक्तिः** इति वर्णसंघातः। अभिष्यन्दते प्रवर्तते। एतदुक्तं भवति। प्रतिपुरुषं सर्वे वर्णा बुद्धौ क्रमसंहारेण भेदतिरोधानेन वावतिष्ठन्ते, न तु तेन रूपेण परसंबोधो भवतीति बुद्धिस्तावत् प्राणेऽर्पयति, ते प्राणवृत्त्यनुगृहीताः स्थानकरणेभ्यो व्यक्ताः परसंबोधाय स्यन्दन्ते स्रवन्तीति यावत्। पूर्वं रूपादिषु सूक्ष्मशब्दानुगमेन ब्रह्मणि शब्दतत्त्वाभिधानम्। इह तु स्थूलवर्णाकारत्वेनाक्षरव्यपदेश इति

---

16. ACD om. अस्येति ...... शब्द उपग्राही.

17. Though all the Mss. have विषयाभाव°, it seems that विषयभाव° is required.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सूक्ष्मामर्थेनाप्रविभक्ततत्त्वामेकां वाचमनभिष्यन्दमानाम्।
उतान्ये विदुरन्यामिव च एनां नानारूपामात्मनि सन्निविष्टाम् ॥

विवर्ततेऽर्थभावेन। एकस्य तत्त्वादप्रच्युतस्य भेदानुकारेणासत्यविभक्तान्य-

---

विशेषः। एतमर्थमागमेन दर्शयति **सूक्ष्माम्** इति। बुद्धेरव्यतिरेकेण रूपतिरोधानात् क्रमाभावाच्च **सूक्ष्माम्**। **अर्थेन** अभिधेयेन। **अप्रविभक्ततत्त्वाम्** इति। अर्थो हि तस्यामवस्थायां बुद्धेरव्यतिरेकवर्ती शब्दश्च। शब्दार्थशक्तयः सर्वा एव तत्र यौगपद्येनासते। अत एवार्थादभेदात् स्वगताभेदाच्च **एका**। कस्यामवस्थायामित्याह **अनभिष्यन्दमानाम्** [इति]। यदा नाभिष्यन्दते, न व्यज्यते। **उतान्ये** इति, अप्येके विद्वांसः। **अन्यामिव** इति, अभिधेयात्। असत्यत्वाच्च भेदस्य **इव** शब्दः। **नानारूपाम्** इति स्वगतं भेदमाह। **आत्मनि सन्निविष्टाम्** इति, परमार्थतो व्यक्तापि वाग् बुद्ध्यधिष्ठानैवेति। अत एव चैकत्वं तस्या इति।

यदि तर्हि ब्रह्मैकं शब्दात्मकं तद्व्यतिरिक्तं चापरं न किंचिदस्ति ततश्चाभिधेयाभावाल्लोकसंव्यवहारोच्छेदः। अथ व्यतिरेकिण्योऽभिधेयमात्राः एकत्ववादावसाद इति चोद्ये समाधानार्थमाह **विवर्ततेऽर्थभावेन** इति। तद् व्याचष्टे **एकस्य** इत्यादिना। नात्रान्यरूपोपग्राहितेति एकस्याभिन्नस्यान्यरूपोपग्राहिता अन्यरूपस्वीकारः अन्यगतस्य रूपस्य स्वात्मनि सन्दर्शनं विवर्तः। ननु चैकत्वाद् ब्रह्मणोऽन्यद् वस्त्वेव नास्ति यस्य रूपं स्वीकुर्यात्, अस्ति चेद् विवर्तकल्पनावैयर्थ्यमिति **असत्यग्रहणम्**। अस्ति चासत्यरूपमेव। गवाद्यनेकाकारावभासोऽस्त्यापीति विभक्तग्रहणम्। असत्यमपि तद्रूपं [18]परस्य विभक्तमेवेति। अयं समुदायार्थः। असत्यस्य गवादेः विभक्तस्य परस्परव्यावृत्तरूपस्यान्यद् रूपम्, तस्य स्वीकार इति। अथवा यदि प्रतीयमानमसत्यं ब्रह्मैव सर्वशब्दानामर्थ इत्यभिधेयसंकरः स्यादिति चोद्ये विभक्तग्रहणम्। अपि तद्रूपं विभागेनैव तत्राकारो भवतीति। अथवा तत्त्वादप्रच्युतस्य इति वचनादन्यरूपोपग्रहेऽप्येकरूपतैव स्यात्। ततश्चानेकगवाद्यर्थावग्रहो न स्यादिति विभक्तग्रहणम्। प्रायेण च पदार्थाः पटादयोऽन्यस्य कुसुमादे रूपमुपगृह्णन्तः स्वरूपपरित्यागेन दृष्टाः, स्फटिकादयश्चोपरागरूपम्। इह तथा न इत्याह **तत्त्वादप्रच्युतस्य** इति। अन्यरूपोपग्रहेऽपि तत्स्वरूपाप्रच्युतिरिति। कथं भिन्नानेकजातीयपदार्थरूपं प्रतिपद्यत इत्याह **भेदानुकारेण** इति। यदि परमार्थतोऽनेकाकारताभ्युपगमः कुतोऽविरोधः। यतस्तु भेदप्रत्ययावभासयोग्यताप्रभा-

---

18. ACD om. परस्य विभक्तमेवेति। ...... अपि तद्रूपं.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रूपोपग्राहिता विवर्तः। स्वप्नविषयप्रतिभासवत्। उक्तं च। मूर्त्तिक्रियाविवर्तौ अविद्याशक्तिप्रवृत्तिमात्रं तौ विद्यात्मनि तत्त्वान्यत्वाभ्यामनाख्येयौ। एतद्धि अविद्याया अविद्यात्वम् इति। प्रक्रिया जगतो यतः। तत एव हि शब्दाख्यादुपसंहृतक्रमाद्

वाद् भिन्नमिव प्रत्यवभासते तदभिन्नमपि, तद्भेदमनुकरोति वेति। एतदुक्तं भवति। एकं [19]वस्तुस्वरूपमपरित्यजद् भेदानुकारेण मिथ्यानेकरूपावभासितं प्रतिपन्नं विवृत्तमिवेत्युच्यते। यथा रज्जुद्रव्यं विपर्यस्तदर्शनानामचेतनारूपमजहत् सर्परूपानुकारेण सर्परूपमित्युच्यते। अत एव तथा विपर्यस्य तां ब्रह्मणोऽनेकरूपाभिमाननिवृत्त्यर्थमाह **'एकस्य'** इति। एकमेव तदेवं प्रत्यवभासते। तेनासतः कस्यचिदुत्पादाभावान्न कार्यकारणभावः। अवस्थितस्यैकधर्मविनाशे परधर्माविनाशे परधर्मोत्पत्त्यभावान्न परिमाणतमः (परिणामोऽतः?) दर्शनाभिमानमात्रमत्र, न पुनः किञ्चिन्निवर्तते जायते वेति। कथं पुनरेकं सद् वस्तुरूपमजहद् अविद्यमानविभक्तानेकरूपतया प्रत्यवभासत इत्याह **स्वप्नविषयप्रतिभासवत्** इति। यथा स्वप्नावस्थायां ज्ञानक्षण एक एव भिन्नजातीयानेकपदार्थावभासी जायते। न च तस्य स्वरूपभानम्। अनुभवरूपत्वात्। उत्थितस्य च स्मरणात्। न च ते भिन्नरूपा विषयाकारा बहिः सत्यतः सन्ति। न च तेषामनेकत्वेऽपि ज्ञानस्यैकत्वविरोधः। न च ज्ञानस्यैकत्वेन तदपि निर्भागं भवति। न चाकाराणामेकत्वम्। न च ज्ञानस्य तत्स्वरूपाज्ज्ञेयरूपतया प्रतिभासनादिति। हेत्वभावान्नायं दृष्टान्तः। अनुमानविरोधं तूद्भावयता नैकान्तिकचोदनेयम्। एतेन तस्याप्यनैकान्तिकत्वम्। यदुक्तम्—न तर्हि शक्तयः सन्ति, तत्त्वान्यत्वाभ्यामनिर्वचनीयत्वात्, शशविषाणवदिति। अस्मिन् वस्तुनि प्रमाणमागमं पठति **मूर्त्तिक्रियाविवर्तौ** इति। देशभेदावग्रहरूपेणावस्थानं मूर्तिविवर्तः। उत्पादविनाशादिक्रियोपहितरूपावस्थानं क्रियाविवर्तः। **अविद्याशक्तिप्रवृत्तिमात्रम्** इति। यावदविद्या स्वकार्यं विपर्यासाख्यं न जनयति तावच्छक्तिरित्युच्यते। तस्याः प्रवृत्तिः विपर्ययः। तावत्तूपदर्शनम्। तत्र विपर्यास एवायं केवलः। न पुनरत्र वस्तु किंचिन्नास्ति इति मात्रग्रहणम्। एतदुक्तं भवति। अविद्यावशाद् विपर्ययः, तद्दर्शना बाला अविद्यमानावपि मूर्तिक्रियाविवर्तौ पश्यन्तीति। तौ इति विवर्तौ। **विद्यात्मनि** इति ब्रह्मणि। **तत्त्वान्यत्वाभ्याम्** इति एकत्वनानात्वाभ्याम्। **अनाख्येयौ** इति, अनिर्वचनीयौ। नैकत्वं विद्याविद्ययोर्विरोधात्। न नानात्वं परमार्थतो ब्रह्मव्यतिरिक्तवस्त्वभावात्। नन्वनिर्वचनीयत्वे सत्त्वात् तथा प्रत्यवभासनं कथं चानेकरूपतां प्रतिपत्स्यत इत्याह **एतद्धि** इति। अविद्याया अयमेव स्वभावो यत्तदभूतपरिकल्पनम्। एतच्चेन्न कुर्याद् विद्यैव स्यादिति। **प्रक्रिया** इति, प्रथमत उत्पत्तिः। **जगतः** इति सकलागमोप-

19. ABCD °रूपं परि°. But अपरित्यजत् is wanted here.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ब्रह्मणः सर्वविकारप्रत्यस्तमये संवर्तादनाकृतात् पूर्वं विकारग्रन्थिरूपत्वेनाव्यपदेश्याज्जगदाख्या विकाराः प्रक्रियन्ते। तथा ह्युक्तम्—

यः सर्वपरिकल्पानामाभासेऽप्यनवस्थितः।
तर्कागमानुमानेन बहुधा परिकल्पितः॥ (क)
व्यतीतो भेदसंसर्गौ भावाभावौ क्रमाक्रमौ।
सत्यानृते च विश्वात्मा प्रविवेकात् प्रकाशते॥ (ख)

लक्षणम्। **तत एव हि** इति, यथा प्रस्तुताद् ब्रह्मणः। [20]**संभृतक्रमात्** इति। प्रलयावस्थायां भेदसंहारात् तन्निबन्धनः क्रमो नास्ति। तदाचष्टे **सर्वविकारप्रत्यस्तमये** इति। सर्वशब्देन महाप्रलयमाह, तत्र न काचिन्मात्रापि शिष्यत[21] इति। **संवर्तात्**[22] इति, सकलविकारग्रामस्य तत्रैकीभावात्। अनेकस्यैकत्रोपसंहारः [23]संवर्तः। जनपदः संवर्तत इति यथा। **अनाकृतात्** इति। आकरणमाकृतम्। परस्परविवेकेन पदार्थावधारणम्। नपुंसके भावे क्तः। तदा च सर्वेषामेकत्रोपसंहारात् तन्नास्ति। विवेकेनानवधारणाच्च **अव्यपदेश्याद्**[24] इत्याह। **पूर्वम्**, विवर्तावस्थायाम्, ये विकारा ग्रन्थय आसन् तेन रूपेण तस्य वाच्यत्वम्। ग्रन्थिशब्दोऽन्यत्र यद्यपि विकारवचनः तथापि विकारशब्देन सह प्रयुज्यमानोऽपेक्षितप्रवृत्तिनिमित्तो द्रष्टव्यः। ते हि बन्धहेतुत्वाद् ग्रन्थय इव विकाराः प्रतीयन्त इति।

इदानीं सर्वस्यैव कारिकार्थस्यागमेनानुगमं दर्शयति **यः सर्वपरिकल्पानाम्** इति। प्रधानपरमाण्वादिपरिकल्पानाम्। **आभासेऽपि** इति, गोचरे। **अनवस्थितः** न गोचरतां प्रतिपद्यत इति यावत्। कथमनिबन्धनाः परिकल्पा इत्याह **तर्कागमानुमानेन** इति। लिङ्गमन्तरेण स्वयमुत्प्रेक्षाप्रतिभानं तर्कः। परतः श्रवणमागमः, परप्रतिपत्तिसाधनं लिङ्गतोऽनुमानम्। **बहुधा** इति, प्रधानं परमाणवो ज्ञानम्, तथा नित्यमनित्यमित्यादि। **परिकल्पितः** इति सत्यतस्तद्व्यतिरिक्तवस्त्वभावात् स एव तैरविद्यावशादेवं विकल्पितः। के पुनस्ते विकल्पा इत्याह **भेदसंसर्गौ** इति। एकत्वनानात्वे। तद्व्यतिरिक्तसंख्याभावादेकत्वमतिक्रान्तः। भेदाभावान्नानात्वम्। **भावाभावौ** इति, अस्तित्वनास्तित्वे। विवृत्तसंवृत्ताकारोपहितत्वात् सतो भावरूपताम्। सत्ताकारोपहितरूपनिराकरणरूपत्वादसतोऽभावरूपताम्। अथवा दृश्यमानस्यासत्यत्वादन्यस्यान-

---

20. ABCD have संभृतक्रमात् and so it has been adopted, but the text should really be उपसंहृतक्रमात् as Bhartṛhari's vṛtti has in W, W2, M and L.

21. A °मात्रा विशि°; L °मात्रावशिष्य°.

22. ABCD संसर्गात्.

23. ABCD संसर्ग.

24. ABCD अव्यपदेशात्.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अन्तर्यामी स भूतानामाराद् दूरे च दृश्यते।
सोऽत्यन्तमुक्तो मोक्षाय मुमुक्षुभिरुपास्यते ॥ (ग)
प्रकृतित्वमपि प्राप्तान् विकारानाकरोति सः।
ऋतुधामेव ग्रीष्मान्ते महतो मेघसंप्लवान् ॥ (घ)

वधार्यमाणत्वेन सत्तामतिक्रान्तः, उपलभ्यमानत्वाच्चासत्ताम्। **क्रमाक्रमौ** इति, भेदनिबन्धनत्वात् क्रमयौगपद्ययोः, अभिन्नत्वाच्च ब्रह्मणः। तथा विचारविषयत्वात् सत्यानृतयोः, विचाराविषयत्वाच्च तस्यासंभवः। यतो विचारो भिन्नधर्मविषयः ब्रह्मणश्चाभेदात् स नास्ति। कथं तर्ह्ययं भेदादिव्यवहार इत्याह **विश्वात्मा प्रकाशते** इति। यतो भेदादिरूपेणातद्रूपोऽप्याभासपरिग्रहेण प्रकाशते। तथा हेतुमाह **प्रविवेकात्** इति। यदा प्रकर्षेण विविच्यन्ते पदार्थव्यक्तयोऽविद्यावशाद् भेदेन च प्रत्यवभासन्ते। **अन्तर्यामी** इति। अन्तःस्थितो यमयति सर्वान् भावान् इत्यन्तर्यामी। स हि सकलभुवनव्यापित्वात् सर्वभूतान्तश्चरिष्णुः। तन्निबन्धेन च प्रवृत्तिनिवृत्ती पृथिव्यादीनां नियते। तथा चोक्तम्—

तस्या व्यापारशक्तिर्या पृथिव्यादिषु तिष्ठति।
नियतिः सर्वभूतानामन्तर्यामी स उच्यते ॥

इति। **आराद्दूरे च** इति। व्यापिन्यपि चास्मिन् आसत्तिविप्रकर्षौ दर्शनवशेनैव व्यवस्थाप्येते। यथाह **दृश्यते** इति। **सोऽत्यन्तमुक्तः** इति। संकल्पकल्पनाविरहात् स्वभावसिद्धत्वाच्च तस्य रूपस्यात्यन्तग्रहणम्। **मुमुक्षुभिरुपास्यते** इति। अविद्याग्रन्थयस्त्वेनं मोक्षायोपासते। यदाह—

'ओमित्येकाक्षरमुद्गीथमुपासीत'

इति। **प्रकृतित्वमपि** इति। य एते प्रधानपरमाण्वादयो विकाराणां महदादीनां प्रकृतित्वं प्राप्ताः तानप्यसावेवाकरोति जनयति। अत एव चैते विकारशब्देनोक्ताः। न तु तैः सांख्यादिभिर्विकारत्वमिष्टं तेषाम्। **ऋतुधामा** इति ऋतवो हेमन्तादयः षट्। तेषां सारभूतं तेजो ऋतुधामा। वर्षरात्रयः। संवत्सरो वा ऋतुः तस्य सारभूता वर्षा इति। **ग्रीष्मान्ते** इति। अन्यस्यापि सारभूतत्वादवच्छेदः। **मेघसंप्लवान्** इति। अन्यस्मिन्नपि काले मेघसंभवात् संप्लवशब्दः। यतो व्याप्तिः संप्लवः। व्यापकमेघान् जनयति। ते च मेघा विकारभूता अपि उदककार्यजननात् प्रकृतिभूता इति साम्यं दार्ष्टान्तिकेन। **तस्य** इति, ब्रह्मणः। तदेव हि शब्दरूपं ब्रह्म परिशुद्धावस्थायां प्रकाशरूपतया चैतन्यम्। तस्येति व्यपदेशिवद्भावेन [25]पृथक्त्वापदेशः। तस्य चायं विवर्तश्चै-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्यैकमपि चैतन्यं बहुधा प्रविभज्यते।
अङ्गाराङ्कितमुत्पाते वारिराशेरिवोदकम्॥ (ङ)

तस्मादाकृतिगोत्रस्थाद् व्यक्तिग्रामा विकारिणः।
मारुतादिव जायन्ते वृष्टिमन्तो बलाहकाः॥ (च)

त्रयीरूपेण तज्ज्योतिः परमं परिवर्तते।
पृथक्कृतीर्थप्रवादेषु दृष्टिभेदनिबन्धनम्॥ (छ)

तन्यं यत्त्रय्यन्तविदः परमात्मेत्याहुः। तच्चैकमपि **बहुधा** प्रतिशरीरमन्यान्यचैतन्यप्रक्लृप्तेः प्रविभज्यते, नानाभूतविषयावग्रहरूपेण वा ग्राह्यग्राहकसंवृतिभेदेन वा। कथमेकरूपस्य भिन्नरूपतेति अनुमानेन प्रतिक्षेपेऽनैकान्तिकप्रदर्शनम्। **अङ्गाराङ्कितम्**[26] इति। यथैकरूपस्य वारिराशेः समुद्रस्य **उत्पाते** सत्याह तस्योदकसंज्ञकाङ्गारमित्र माते रूपं दृश्यते तथाविद्यावशादनेकाकारप्रत्यवभासश्चैतन्यस्येति। **तस्मात्** इति, ब्रह्मणः। **आकृतिगोत्रस्थात्** इति। आकृतिः सामान्यम्, गोत्रः सादृश्यम्, तेन सामान्यसादृश्यस्थितादित्यर्थः। यथा हि जातिर्भेदेष्वनुगता तथेदमपि ब्रह्म सर्वविकारानुगतमिति। सांख्यानां सामान्यं परस्मिन् कारणे प्रतीतं सामान्यं मूलकारणं भेदानामिति। विकार(विकारा ?)व्यक्तिस्थानीयाः तेषामन्वितत्वात्। अत एवाह **व्यक्तिग्रामाः** इति। इदमपि च तेन सदृशमिति। **विकारिणः** इति, विकारान्तरयोनयः। यथा मारुताद् बलाहकाः। **वृष्टिमन्तः** इति, वृष्टियोनयः। ननूक्तमेतत् प्रकृतित्वमपि प्राप्ता[27]न् इत्यत्र। दर्शनभेदादिति केचित्। पूर्वत्र ऋतुधाम कारणम् इति। इह तु मारुता इति। यद्वा पूर्वत्र विकारान्तरहेतोः विकारजनकत्वं कथितम्, इह तु सामान्यतुल्यता कारणस्य कथितेति विशेषः। **त्रयीरूपेण** इति। ऋग्यजुःसाम[28]रूपेण। **तद्** इति ब्रह्म, ज्योतिः अन्तःप्रकाशः शब्दरूपतया ज्ञानरूपतया च। यथा वक्ष्यति प्रकाश इति। तदेव ब्रह्म ज्योतीरूपमृग्यजुःसाम[29]रूपेण व्यवतिष्ठते। **परमम्** इति, परिशुद्धम्। **पृथक्कृतीर्थप्रवादेषु** इति। य एते सांख्यादिप्रवादाः एते त्रयीरूपेण विवृत्ता (त्ताद् ?) ब्रह्मणः प्रस्तूयन्ते। तेषां हि दृष्टिभेदानां तदेव निबन्धनम्। यथा वक्ष्यति

तस्यार्थवादरूपाणि निश्रिताः। (Vāk. I. 8)

इति। न तु ब्रह्मतत्त्वनिबन्धनाः इति। कथं पुनरवसीयते न ब्रह्मतत्त्वनिबन्धना इति। तत्राह **शान्तम्** इति। सर्वप्रपञ्चविगमात्। यदाह **विद्यात्मकम्**

---

25. A °क्त्वोपदेशः. 26. BCD °रभकितम्; A °रभरितम्. 27. ACD प्राप्नोतीत्यत्र.
28. ACD °सामभूतरू°. 29. AD °सामभूतरू°.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

**शान्तविद्यात्मको योंऽशः तदुहैतदविद्यया ।
तया ग्रस्तमिवाजस्रं या निर्वक्तुं न शक्यते ॥ (ज)
सर्वतः परिवर्तानां परिमाणं न विद्यते ।
तस्या या लब्धसंस्कारा न स्वात्मन्यवतिष्ठते ॥ (झ)
यथा विशुद्धमाकाशं तिमिरोपप्लुतो जनः ।
संकीर्णमिव मात्राभिश्चित्राभिरभिमन्यते ॥ (ञ)**

इति । कथं पुनः परविरुद्धविवर्तनिबन्धनमित्याह **'तदुह'** इति । तदिह उहशब्दौ निपातौ पादपूरणार्थौ । तदेनच्छान्तमपि **तया** इति **अविद्यया ग्रस्तमिव,** गृहीतमिव । असत्यत्वाच्च ग्रासस्य इवशब्दोपादानम् । कयेत्युक्तम् । तत्राह **या निर्वक्तुं न शक्यते** इति । तत्त्वान्यत्वाभ्यामनिर्वचनीयतयेति । **सर्वतः** इति, दशस्वपि दिक्षु । **परि**[30]**वर्तानाम्** इति, मूर्तिव्यवच्छिन्नानां घटादीनाम्, **परिमाणम्** अवच्छेदः । स नास्ति । [31]कभिति धारास्ते परिवर्ता इत्याह । विद्यायामविद्यायां वा तदनेन परिवर्त[32]नात्, तद्विषयाणां परिमाणत्वेनापरिमाणत्वम् । तस्याः अविद्योदितम् । तत्र कृतसन्निधानतया यथा बुद्बुददेशेषूदकं सन्निहितमिति । का पुनः सेत्याह **या लब्धसंस्कारा** इति । लब्धप्रबोधा । **न स्वात्मनि** इति । यदा हि तस्याः शक्तयो लब्धपरिपाका भवन्ति तदानेन परिकल्पितेनात्मना भासनात् स्वरूपप्रच्युतिरिव तस्या असत्यरूपेणावस्थानादिति । यदि तत् स्वतः शान्तं कथमविद्यया ग्रस्तमिवेत्याह—**यथा विशुद्धम्** इति । आकाशस्य स्वतो विशुद्धया केशादिभिरसङ्कीर्णतां दर्शयति **तिमिरोपप्लुतः** इति । यथा तिमिरोपप्लुतचक्षुषः केशादिभिरसङ्कीर्णमपि सङ्कीर्णमिव मन्यन्त इत्यभिमानमात्रं तत् न वस्तु तथेति । **तथेदममृतं ब्रह्म** । अमृतमिति भावे क्तः । मरणादिक्रिया यस्य नास्ति इत्यमृतं प्रध्वंसाभावरहितम् । **निर्विकारम्** इति । द्रव्यान्तरे सम्भेदेन परिणामेन वा न विक्रियन्त इति संसर्गपरिणामानामनित्यभावमाह । गवादिविकारमात्रा न सन्ति सत्यनयेति कथयति **निर्विकारम्** इति । कथं पुनस्तत्र प्रत्यवभासत इत्याह **'अविद्यया'** इति । अविद्यावशादेव प्रत्यवभासाभिमानः । यद्दर्शयति अविद्यया कलुषत्वमिवापन्न इति । विवर्ता इत्याकारं दर्शयति । शब्दतत्त्वमित्यत्र हेतुमाह **ब्रह्मेदम्** इति । य एते शब्दाः तन्निर्विकारं ब्रह्म । **शब्द**[33]**निर्माणम्** इति । शब्दशब्देन सर्वे रूपादयो विकाराः शब्दरूपतया अभिधीयन्तेऽनेनेति । कर्तरि बहुलवचनाल्ल्युट् । शब्द-

---

30. ACD परिवर्तमानमिति.
31. B सिति.
32. BCD परिवर्तना.
33. ABCD निर्वाणमिति.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तथेदममृतं ब्रह्म निर्विकारमविद्यया।
कलुषत्वमिवापन्नं भेदरूपं विवर्तते॥ (ट)
ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम्।
विवृत्तं शब्दमात्राभ्यस्तास्वेव प्रविलीयते। (ठ)

एकमेव यदाम्नातं भिन्नशक्तिव्यपाश्रयात्।
अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनेव वर्तते।। २ ।।

यावद्विकारविकारिविषयमेकत्वरूपं पृथक्त्वरूपं वा सर्वं तत्प्रकृत्येकत्वानति-

---

रूपतया रूपादयोऽनेन निर्मीयन्त इति। तदनेन प्रकृत्यन्वय इति यदुक्तं तदाख्यातम्। **शब्दशक्तिनिबन्धनम्** इति। शब्दस्य या शक्तिरभिधाख्या सा निबन्धनमस्य। यदुक्तं स्थितिप्रवृत्तिनिवृत्तिविभागा इति तदाख्यातम्। **शब्दमात्राभ्यः** इति। तस्मिन् याः शक्तयः शब्द आसते ताभ्यो विवृत्त(त्ताः ?) शब्दाः। किं ब्रह्म। तास्वेव इति। तास्वेवेति प्रतिसंहारकाले शब्दशक्तिषु विलीयत इति। अथवा **ब्रह्मेदम्** इति विकारग्राममाह। अव्यतिरेकात्। ततः **शब्दनिर्माणम्** इति शब्दतत्त्वनिर्माणम्, तेन निर्मितत्वात्। **शब्दशक्तिनिबन्धनम्** इति, शब्दशक्तयो यतस्तत्रासते प्रलीयन्ते वा तत्रैवेति ॥ १ ॥

इदानीं ब्रह्मणः सर्वथा भेदरूपप्रतिषेधमाह। यतः सर्व एव वादिनः तत्त्वस्य भेददर्शनमाश्रिताः। सांख्याः प्रधानपुरुषभेदाद् द्वैतम्। वैशेषिकाः द्रव्यादिभेदेन षट्-पदार्थीम्। नैय्यायिकाः प्रमाणादिभेदेन षोडशपदार्थीम्। बौद्धाः स्कन्धपञ्चकम्। आचार्यस्तु ब्रह्मणो रूपप्रतिषेधेन तदव्यतिरिक्तत्वाच्च सर्वेषामेव भेदप्रतिषेधायाह **एकमेव** इति। एकशब्दो भेदप्रतिषेधवचनः। ततोऽन्यद्भिनत्तीति। किं पुनरत्र प्रमाणमित्याह **आम्नातम्** इति। आम्नायो वेदः। तत्र पठितमाम्नातम्। शक्तयोऽत्र घटादयः पदार्थाः, योग्यता वा। ते च भिन्नरूपाः। ते च तस्यात्मभूता एवेति शक्तिव्यपाश्रयेणापि न तस्य भेदः। अथवा यद्यभिन्नं कथमयं भेदव्यवहार इति चोद्ये सत्याह **'भिन्नशक्तिव्यपाश्र-यात्'** इति। यदि तर्हि ब्रह्मणो व्यतिरिक्ता भेदवत्यः शक्तयः कथं तर्ह्यभेद इत्याह **'अपृथक्त्वेऽपि** इति। शक्तिभ्यः सकाशादपृथक्त्वेऽपि पृथक्त्वेनेव वृत्तिः, न तु परमार्थतः पृथक्त्वमिति।

तद् विवृणोति **'यावद् विकारविकारिविषयम्'** इति। विकारः कार्यं विकारि कारणम्। अत्र वृत्तमेव वस्तु कार्यान्तरजनकमुक्तम्, न ब्रह्म। तेन व्यक्ते कार्यकारणभूते यद् व्यवस्थितम्। **एकत्वरूपं पृथक्त्वरूपम्**, तत्र भिन्नासु व्यक्तिद (षु ?) व्यक्त्यन्तराद् विवेकाप्रतीतावेकत्वम्। पदार्थान्तरोपनिधानप्रकल्पितमनेकत्वम्। तत्र

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्रमेणेत्येतदाम्नातम् । तद्यथा—सलिल एवैको द्रष्टाऽद्वैत एक एवाभवत् । तथा—सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् इति । पुनश्चाह—प्रणव एवैकस्त्रिधा व्यभज्यत इति । तथा—असद्वा इदमग्र आसीत् । किं तदसदासीत् । ऋषयो वाव तेऽग्रे तदसदासीत् ।

पृथक्त्वरूपम् इति पृथक्त्वशब्दो भेदरूपोपलक्षणाय । **प्रकृत्येकत्वानतिक्रमेण** इति । द्विविधमेकत्वं प्राकृतं वैकृतं च । तत्र वैकृतं यद् व्यक्तौ[1] कार्यकारणगतमेकत्वसंख्यायोगेन । प्राकृतं यद् ब्रह्मविषयं भेदव्यवच्छेदमात्रं न त्वेकत्वसंख्यायोगेन । तस्याः पृथक्त्वेऽपेक्षितत्वात्, तिरोहितभेदरूपत्वाच्च ब्रह्मणो व्यतिरिक्तसंख्याभावाच्च । एतदुक्तं भवति । यदेतदवभासते व्यक्ते कार्यकारणभूते एकत्वं भेदश्च तत् सर्वं ब्रह्मण एकत्वमनतिक्रमादवस्थितम् । न ह्येताः शक्तयोऽभेदब्रह्मरूपतया एतां जहतीति । द्वयं चात्र प्रतिपाद्यम्, ब्रह्मणश्चाभेदो व्यक्तीनां च तद्रूपानुषङ्गः । तदनेनाद्येन ब्रह्मणः खण्डलकद्वयेनैकत्वम्, द्वितीयेन च खण्डलकद्वयेनैकत्वं तद्रूपानुषङ्गश्च । **सलिल एव** इति । सलिलशब्देन ब्रह्मोच्यते । एको [2]भवति (अभवद् इति ?) विवर्तावस्थायाः पूर्वं प्रलयं भूतकालवाचिना दर्शयति, तद्व्यतिरिक्तसंख्याभावात् । कथमित्याह **अद्वैत** इति । द्वयोर्भावो द्विता, द्वितैव द्वैतम्, स्वार्थेऽण् । अभेदोपलक्षणार्थश्चाद्वैतशब्दः, न तु द्वित्वमेव निषिध्यते । एतदुक्तं भवति । भेदव्युदस्तेन रूपेण स्थितमिति । **तथासदेव** इति । तद्व्यतिरिक्तसत्ताभावात्, तयानाविष्टमसद् ब्रह्मैवोच्यते । एवशब्दोऽवधारणे । न ततोऽतिरिक्तमन्यदस्ति । **सौम्य** इत्यामन्त्रणम् । **अग्रे** इति विवर्तावस्थायाः पूर्वम् । **आसीत्** इति प्रलयावस्थायां पूर्ववदाह । एकत्वमिति भेदनिरासः । तदेवाचष्टे **अद्वितीयम्** इति । द्वितीयशब्दो भेदोपलक्षणाय । **प्रणवः** इति, ओङ्कारः । **एकः** इति भेदप्रतिषेधः । **त्रिधा** इति त्रिभिः प्रकारैः ऋग्यजुःसामरूपैः । **व्यभज्यत** इति विभागेनावस्थितः । [3]तदत्राविवृत्तं ब्रह्म प्रणवशब्देनोच्यते । ओङ्कारोऽपि हि स एव । यतो विवृत्तः प्रणवः ऋग्यजुःसामरूपेण स्थितः । तदेतानि त्रीणि तत्रान्तर्गतानि, यतः प्रणव एवानेकरूपेण विभक्तः । कथं चासौ विभक्तो भवति यदि तद्रूपानुषङ्गस्तेषु । तस्मादेकत्वं ब्रह्मणस्तद्रूपानुषङ्गश्च विकाराणां कथितः । तथाद्वैतसत्तायोगविरहाद् **असत्** । किं पुनस्तदित्याह **ऋषयो वा** इति । ऋषय इत्याह **प्राणाः** इति । सप्त प्राणा विकारभूतास्तस्य । ते च **असत्** इत्युक्ताः । यदा प्राणाः सर्वे चेतनावन्तः प्राणिनो विकारा उच्यन्ते ते चासदिति कथयता तस्यैकत्वं प्रकृतिरूपानुषङ्गश्च विकारेषु कथितः । कीदृशो भेदशक्तिव्यपाश्रयक

---

1. C व्यतिरिक्तो; L व्यक्ते. 2. B भवरिपि.
3. D om. तदत्र ...... सामरूपेण स्थितः.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

य ऋषयः प्राणाः इति। <u>भिन्नशक्तिव्यपाश्रयात्</u>। एकत्वस्याविरोधेन शब्दतत्त्वे ब्रह्मणि समुच्चिता विरोधिन्य आत्मभूताः शक्तयः। तद्यथा भिन्नार्थप्रत्यवभासमात्रायामेकस्यामुपलब्धावर्थाकारप्रत्यवभासमात्राः पृथिवीलोका इति। न हि ज्ञेयगतो वृक्षाद्या-

---

इत्याह **एकत्वस्य** इति। ब्रह्मण एकत्वविरोधमकुर्वत्यः। समुच्चिता इति, समुच्चयेन व्यवस्थिताः। भेदविषयत्वाच्च समुच्चयस्य भेदोऽर्थगृहीतः। तत्रैतत् स्यात् एकजातीयत्वेन ताः शक्तयो ब्रह्मण एकत्वं न विरुन्धन्तीत्याह **विरोधिन्यः** इति। विरोधिसदसत्-कार्योदयानुमीयमानवैलक्षण्या विरोधिप्रत्ययानुमीयमाना नानात्वाधानाः शक्तय इति॥ तत्रैतत् स्यात्—ब्रह्मण एकत्वात् तासां च वैलक्षण्याद् व्यतिरेकप्रसङ्ग इत्याह **आत्मभूताः** इति। तदव्यतिरिक्तास्ता इति यावत्। भेदनिरासश्चायं नैकत्व-कथनम्। शक्तय इति घटादयो वा पदार्थाः योग्यताः वा। तदाह परस्परविरोधिन्योऽपि शक्तयो ब्रह्मैकत्वमनतिक्रामन्त्योऽव्यतिरिक्ताः तत्रासत इति। कथं पुनरभिन्नस्य वस्तुनस्तद्रूपापरित्यागेन भिन्नरूपतेत्यनुमानविरोधेनागमस्याप्रामाण्य उद्भाविते ऽनैकान्तिकतामाह **भिन्नार्थप्रत्यवभासमात्रायाम्** इति। भिन्नस्य विलक्षणस्यार्थस्य प्रत्यवभासमात्राः प्रत्यवभासव्यक्तयो यस्यां बुद्धौ तस्या येऽर्थाः तेऽर्थानुरूपाः प्रत्यवभासाः प्रतिबिंबकाः, ते न बुद्धिरूपमेकत्वमतिवर्तन्ते। एतदाह—यथा नाना'विधानि प्रतिबिम्बकानि परस्परविलक्षणान्यपि न बुद्धेरेकत्वमभि(ति?)वर्तन्ते इति सांख्यीयः प्रकाशो वा दृष्टान्तः, स हि सर्वार्थ इति। येषामपि प्रत्यर्थनियता बुद्धयस्तेषामप्यनेकवस्त्वालम्बना बुद्धिर्दृष्टान्तः। तां चानेकाकारतामुदाहरणेनाह **पृथिवीलोकाः** इति। पृथिवीशब्देन चात्र नेयमवयविद्रव्यभूता महापृथिवी दृष्टान्तत्वेनोपात्ता यतस्तत्परिच्छेदिकाया बुद्धेरभिन्नाकारत्वान्न प्रकृतोपयोगः। यत्तु पृथिव्यवयवेषु वृक्षादिषु लोकावयवेषु च देवदत्तादिष्वनेकाकारि ज्ञानं तदुपात्तम्। तद् व्याचष्टे **न हि** इति। **वृक्षाद्याकारावग्रहः** इति। वृक्षादीनां पृथिव्यवयवानामवग्रहो ज्ञाने स्वीकारः। **ज्ञेयगतः** इति। ज्ञेयं विषयः। तत्संबन्धित्वादेवमुच्यते। अन्यथा आकारो ज्ञेयगतः तदवग्रहो ज्ञानगत इति न स्यात् संबन्धः। यद्वा अयमवग्रहो ज्ञानाविनिर्भागवर्तिनो ज्ञेयांशस्य न बाह्यस्य ज्ञेयस्येत्याह **ज्ञेयगतः** इति। ये तु ज्ञानगत इति पठन्ति तेषां सुगममेव। **ज्ञानस्यैकत्वेन** इति। न हि तानि प्रतिबिंबकानि विज्ञानस्याभिन्नरूपतां तात्त्विकीं विरुन्धन्ति। **आत्मभेदः** इति, स्वरूपभेदः। कथमवसीयमानभेदो नास्तीत्याह **तेषामेकज्ञानतत्त्वानतिक्रमात्** इति। न हि ते आकारा ज्ञानतत्त्वज्ञानस्य यद् वास्तवं

---

4. A नाना प्र°; CD नानि प्र°.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कारावग्रहो ज्ञानस्यैकत्वेन विरुध्यते। नास्याकारात्तदाकारस्यात्मभेदोऽस्ति तेषामेकज्ञानतत्त्वानतिक्रमात्। तदेवमपृथक्त्वं पृथक्प्रत्यवभासानामपि मिथः सर्वशक्तीनाम्। अपृथक्त्वेऽपि शक्तिभ्य इति। न खलु जातिव्यक्तिव्यवहारवदन्याः काश्चिच्छक्तयो ब्रह्मणो व्यतिरेकिण्यो विद्यन्ते। तत्तु प्रकाशवत्प्रकाश्यावग्रहाभ्यो बहिस्तत्त्वाभ्य इवात्ममात्राभ्यस्तादात्म्येऽपि सति पृथक्तत्त्वमिवावसीयते ॥ २ ॥

रूपं तदतिवर्तन्ते, अतिक्रामन्ति। **तदेवम्** इति प्रकृतेन संबन्धः। शक्तीनां घटादीनां योग्यतानां वा। पृथक्प्रत्यवभासयोगेऽपि। योग्यतानां पृथक्प्रत्यवभासकार्यत्वात् तथा व्यपदेशः। नास्ति पृथक्त्वम्, नास्ति भेद इति। न खलु जातिवद् इत्याशङ्का। पुनः कुत एवमुच्यते 'आकृतिगोत्रस्थात्' इति। जातिसादृश्यं ब्रह्मणः, तेन चानुगमाद्विकाराणामपि व्यक्तितुल्यतेति। तत्र यथा तयोर्भेदस्तद्वदिह नास्तीति। कथं तर्हीत्याह **तत्तु प्रकाशवत्** इति। **पृथक्तत्त्वमिवावसीयते** इत्यनेन संबन्धः। तद् इति ब्रह्म। **तु**[5](?) शब्दः पुनरर्थे। यथा सांख्यीयः प्रकाश एकः सर्वविषयाकारेण परिणममान एकाकारः। न च ता वृत्तयः काश्चन व्यतिरेकिण्यः तस्माद्बहिर्भूताः, अथ भिन्ना इव ततोऽवगृह्यन्ते। एवं ब्रह्मणोऽपि विकारमात्रा इति। **प्रकाश्यावग्रहाभ्यः** इति। अवगृह्यत इत्यवग्रहः। कर्मण्यप्[6]प्रत्ययः। प्रकाश्यं रूपादि अवग्रह आसामिति प्रकाश्यावग्रहाः। तद्रूपेण परिणामात् तेऽवगृहीताः। **बहिस्तत्त्वाभ्य इव** इति। बहिस्तत्त्वम् आस्यभाव (स्वभावः ?) आसामिति। **इव** इति, न च ता वृत्तयो बहिःस्वभावाः, अथ च ता व्यवसीयन्ते। **आत्ममात्राभ्यः** इति बुद्धिस्वरूपमाह। मात्रा इति वृत्तयः। तेन ताभ्यो वृत्तिभ्यो बुद्धिवृत्तिः। **तादात्म्येऽपि** इति। तत्स्वभावतायामपि। **पृथक्तत्त्वमिव** इति। पृथक् तत्त्वमस्येति बहुव्रीहिः। पृथक्स्वभावमिव **अवसीयते**। एतदुक्तं भवति—यथा प्रकाशो व्यतिरिक्ताभिर्वृत्तिभिः परिणममानस्ताभ्यस्ताभ्यो वृत्तिभ्यो व्यतिरिक्तोऽवसीयते ज्ञानकारणोऽन्तर्ज्ञेयत्वादिनां यथानेकाकारतया प्रत्यवभासमानस्तेभ्यस्तदात्मभूतेभ्य आकारेभ्यो बहीरूपत्वेनावच्छिद्यमानेभ्यः पृथगिवावसीयते ज्ञानात् तेषु पृथक्त्वाभिमानो ज्ञानेभ्यः पृथगिवावसीयते ज्ञानान्तरेषु पृथक्त्वाभिमानो ज्ञानेऽपि तेभ्यः पृथगभिमानः इति। तदेवं ब्रह्मणो रूपादीनां योग्यतानां च भेदः प्रतिषेधेनाख्यातः। ननु शक्तिषु तत्त्वान्यत्वव्यतिक्रम आख्यातः। तत्किमुच्यते अपृथक्त्वेऽपि इति। अपृथक्त्वं न एकत्वम्, अपि तु

---

5. ABCD om तु before शब्दः, but it is required; L. अपरस्तच्छब्दः, but L. has adopted the reading तत्तु and not तत्तत् in Bhartṛhari's vṛtti.

6. D कर्मण्यणप्र°.

Dr. Urmila Sharma Collection, Varanasi

अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः ।
जन्मादयो विकाराः षड् भावभेदस्य योनयः ॥ ३ ॥

कालाख्येन हि स्वातन्त्र्येण सर्वाः परतन्त्रा जन्मवत्यः शक्तयः समाविष्टाः कालशक्तिवृत्तिमनुपतन्ति। ततश्च प्रतिभावं वैश्वरूप्यस्य प्रतिबन्धाभ्यनुज्ञाभ्यां

भेदप्रतिषेधः, पृथक्त्वेनेव इति एकत्वप्रतिषेधः । तदुभयसमतिक्रम आख्यात इत्यविरोधः ॥ २ ॥

एवं ब्रह्मणो घटादीनां योग्यतानां च भेदाभावं प्रतिपाद्य कालस्यापि ततो भेदाभावं प्रतिपादयति । यतः कालो नाम नित्यः कश्चित् स्वतन्त्र एव सर्वपदार्थानां स कारणमित्यङ्गीकृतम्। **अध्याहितकलाम्** इति। अध्याहिताः अध्यारोपिताः कलाः यस्याः, कला इति भेदः, य एवेह सत्तादयः अतीतानागतवर्तमानभेदश्च सा, अध्याहितकलाम्। **यस्य** इति ब्रह्मणः। **कालशक्तिम्** इति। काल एव शक्तिः, ब्रह्मण एवेयं कालाख्या शक्तिः । ताम् **उपाश्रिताः**। तदधीनप्रवृत्तयः। **जन्मादयः** इति। जायतेऽस्ति विपरिणमते विवर्धतेऽपक्षीयते विनश्यति इति षडेते भावविकाराः । **भावभेदस्य** इति। भावः सत्त्वं[1] धात्वर्थः, तस्य भेदः पचादिक्रियाः तासाम्। **योनयः** इति। यतोऽयं क्रियाग्राम आस्वेव षट्स्वन्तर्भवति यतो भाववचनाः सर्वे धातव इति ।

तद् विवृणोति **स्वातन्त्र्येण** इति । स्वातन्त्र्यं कर्तृशक्तिः । पदार्थनिष्पादनोपसंहारयोग्या कर्तृशक्तिः । सान्यगताप्यस्तीत्यवच्छिनत्ति **कालाख्येन** इति । कालाख्यवस्तुगतेनं, तस्या एव वा काल इति संज्ञा । **शक्तयः** इति। पदार्थाः। **समाविष्टाः** इति। तदधीनवृत्तयो वर्तन्ते । तेन समाविष्टा इति लोके प्रतीतिः । **परतन्त्राः** इति। कारणान्तराधीनवृत्तयः । तेन नित्यत्वात् सदा सन्निधानेऽपि न सदा सर्वकार्यप्रसवः, कारणान्तराणां सदा असन्निधानात् । **जन्मवत्यः** इति । उत्पत्तिमत्यः । तेनायमाकाशादीनां न[2] कारणम्। समावेशार्थमेव स्पष्टयति **कालशक्तिवृत्तिमनुपतन्ति** इति । काल एव शक्तिः, तस्य वृत्तयः[3] सत्तादिकाः। प्रतिबन्धाभ्यनुज्ञाभ्याम् **अनुपतन्ति**। अनुविधीयन्ते[4] जन्मवन्तः। ततः **क्रमवानिवाभासोपगमः**, [5]विषयभावोपगमः। कस्येत्याह **वैश्वरूप्यस्य** इति। नानारूपतायाः। **प्रतिभावम्** इति। यदेतदेकस्मिन्नर्थे वैश्वरूप्यं नानारूपता यथैकस्मिन् वृक्षे किसलयादिवैचित्र्यम्, एकस्मिन् वा किसलये रक्तत्वमार्दवादिविशेषाः।

---

1. BCD सत्त्वाः.
2. D om. न before कारणम्.
3. D वृत्ति च सत्ता°.
4. C has a gap after अनुविधीयन्ते.
5. C om. विषयाभावोपगमः.

CC0. In Public Domain, Digitizagtion by eGangotri

शक्त्यवच्छेदेन क्रमवानिवाभासोपगमो लक्ष्यते। सर्वेषां हि विकाराणां कारणान्तरेष्वप्यपेक्षावतां प्रतिबद्धजन्मनामभ्यनुज्ञया सहकारिकारणं कालः। तस्य क्रमवद्भिर्मात्रारूपैः कर्तृशक्ति[6]र्विभज्यमाना विकारमात्रागतं भेदरूपं तत्राध्यारोपयति तुलासूत्र इव संयोगिद्रव्यान्तरगुरुत्वप्रतिबन्धकाले दण्डलेखावच्छेदम्। तत्रैवमभूता-

---

कथमित्याह **शक्त्यवच्छेदेन** इति। शक्तयः पदार्थाः, तेषामवच्छेदो नियमः। **प्रतिबन्धाभ्यनुज्ञाभ्याम्** इति। यतः काचिच्छक्तिः प्रतिबध्नाति यथैकस्मिन् वृक्षे प्रथमतः किसलयाभ्यनुज्ञा पल्लवस्य प्रतिबन्धः। ततः किसलयस्य प्रतिबन्धः पल्लवस्याभ्यनुज्ञा। तत इदं वैश्वरूप्यं पदार्थानाम् येन सक्रममिव प्रतिभासते। ब्रह्मणस्तदव्यतिरिक्तत्वात्, पदार्थव्यक्तीनां तस्य चाभिन्नत्वाद् इवशब्दोपादानम्। एतस्यैव स्फुटत्वप्रतिपादनायाह **सर्वेषां हि** इति। **विकाराणाम्,** जन्मवताम्। **कारणान्तरेष्वपि** इति। बीजादिषु। **अपेक्षावताम्** इति। तानि विनोत्पादाभावात् तेषां तत्रापेक्षा। **प्रतिबन्धजन्मनाम्** इति। येषामेवानेन प्रथमत उत्पत्तौ प्रतिबन्धः कृतः ते प्रतिबद्धजन्मानः। **अभ्यनुज्ञया** इति। पुनस्तदीयेनैवाभ्यनुज्ञानेन तेषामुत्पत्तिः। एकदाप्रतिबद्धाभ्यनुज्ञां कुर्वन् सहकारिकारणतां प्रतिपद्यते[7]। **सहकारिकारणम्** इति। नोपादानकारणम्। **तस्य** इति। ब्रह्मशक्तेः कालस्य। **कर्तृशक्तिः** इत्यनेन संबन्धः। **क्रमवद्भिः मात्रारूपैः** इति। य[8] एते विकारा व्यक्ता व्यक्तयः क्रमवत्यः। **कर्तृशक्तिः** इति। सहकारिकारणत्वेन कारणं कालः, तस्य या शक्तिः। **विभज्यमाना:** इति। परमार्थतो निर्भागः स्वतः कालः। तं तु तदनुग्रहात् क्रमवत्यो व्यक्तय उत्पद्यमानास्तस्य कालस्य क्रमेण व्यापारवतीमभिन्नां शक्तिं क्रमेण दर्शयति। तैस्तस्य क्रमेण कार्यभागस्य निष्पत्तौ कालस्यापि स भागो व्यवस्थाप्यते चतुर्युगमन्वन्तरसंवत्सरर्तुमासदिवसमुहूर्ताख्या अतीतानागतवर्तमानाख्या च। तदेवं कर्तृशक्तौ प्रविभज्यमानायां भेदवान् कालोऽवसीयत इति कर्तृशक्तिभेदं कालेऽध्यारोपयतीत्युच्यते। **विकारमात्रागतम्** इति। कार्यव्यक्तिष्ववस्थितम्। एवं नियतकार्योदयक्रमेणैव रूढेन लोको वसन्तादिभेदमपि नियतं क्रमेणागतमागमिष्यन्तं [9]चावस्यति। न चायं विभागः सत्य इत्यध्यारोपयतीत्युक्तम्। अतोऽनेनाध्याहितकलात्वं कालस्य सूत्रोपात्तमाख्यातम्। किं पुनरभिन्नस्य कार्यभेदनिबन्धनो भेदव्यवहारो दृष्ट इत्याह **तुलासूत्र इव** इति। तुलासूत्रस्थानमत्र तुलासूत्रशब्देनोक्तम्। तुलासूत्रस्थानेऽवच्छेदमध्यारोपयतीति संबन्धः। **दण्डलेखा** इति। तस्मिंस्तुलादण्डे या रेखा। कदेत्याह **संयोगि** इति।

---

6. L. प्रविभज्य°.

7. ABCD प्रतिपद्य तत्सह°. The text adopted i.e. प्रतिपद्यते। सह° is a tentative emendation. 8. BCD या एताः. 9. D व्याध्यवस्यति.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भूदित्यपूर्वापरस्य भावस्य पौर्वापर्यव्यवस्थाविकल्पे सति जन्मादयो विकारा षड् परिणामानां सत्ताविकाराणां योनय उपप्लवन्ते। जातिसमुद्देशे तु सत्ताविभागे न्यक्षेण भावविकारा वक्ष्यन्ते ॥ ३ ॥

संयोगिनः परिमितस्य गुडादिद्रव्यस्य यद् गुरुत्वं तस्य प्रतिबन्धकाले। तदनेनानुग्रहं दर्शयति। यास्तुलापटले समारोपितस्य द्रव्यस्य गुरुत्वादधःपततः प्रतिबन्धाधारत्वेन कारणस्य तुलादण्डस्य समधृना रेखाः प्रथमतः क्रियन्ते शक्तिभेदस्थानीयाः। तत्र तुलादण्डेंऽशावच्छेदं विभागमध्यारोपयन्ति पलमेतद् द्विपलमेतदिति। स चैवंकृतः पुनरप्यनुग्रहं द्रव्याणां करोत्येव। तुलासूत्रम् इति तु पाठे अवच्छिद्यते इत्यवच्छेदो दण्डलेखया विभज्यमानमिति समस्तमेतत्। दण्डलेखाया अवच्छेदनं विभागं कर्तनं वा गुरुत्वप्रतिबन्धानुग्रहेणाध्यारोपयति तुलासूत्रम्। एतदुक्तं भवति। यथाभिन्नस्य दण्डस्य कार्यभेदात् (भेदस्तथा?) कालेऽपि[10] युगादिभेदातीतादिभेदश्च। तं चाध्यारोपितं भेदं कालस्याङ्गीकृत्य जन्मादिविभागः। यदाह **तत्रैवम्** इति। एवं **पौर्वापर्यव्यवस्थाविकल्पे सति** इति संबन्धः। **अभूदित्यतीतः** कालः। नाभूदिति तद्व्यवच्छिन्नौ भविष्यद्वर्तमानौ। न चैतेऽतीतादयः काले संभवन्ति, अभिन्नत्वात्। यदाह **अपूर्वापरस्य**[11] इति। एवमस्येति कालरूपव्यवस्थाविकल्पे सतीति। अविद्यमानमपि सन्यतः पौर्वापर्यं कल्प्यते। ततश्च कोटिसंभवः। पूर्वमविद्यमानमात्मानं लभते जायते। ततः सत्ता[12]न्वयादस्ति। प्रतिलब्धसत्ताकं स्वारूपमजहद्धर्मयोस्त्यागोपादाने कुर्वद् विपरिणमते। अङ्गीकृतपरिणामः केनचिदङ्गेन स्वाङ्गाभ्युच्चयाद् वर्धते। तथा स्वाङ्गापचयेन क्षीयते। गृहीतक्षयः सर्वतो निवृत्त्या विनश्यतीति। एवं पौर्वापर्यविकल्पे सति एते षड् भावविकारा **उपप्लवन्ते** संभवन्ति। यदि कालस्य भेदोऽध्यारोपितः न सत्यः कथं कल्पितात् कालभेदाज्जन्माद्यर्थक्रिया। उच्यते। यथा सत्यतो न कालस्य भेदः तथा जन्मादयोऽपि न सन्ति अनादिनिधनत्वाद् ब्रह्मणः। तद्व्यतिरिक्तवस्त्वभावाच्च। यथैव त्वयमनादिः कालभेददर्शनाभ्यासः तथा तन्निबन्धनो जन्मादिक्रियाभ्यास इति। **सत्ताविकाराणाम्** इति। क्रियाविशेषाणां पचादीनामिति। **जातिसमुद्देशे** इति। तृतीयकाण्डे यत्र जातिर्विचार्यते। तस्य विस्तीर्णत्वादाह **सत्ताविभागे** इति। यस्मिन्नुद्देशे जातिरूपेण सत्ता विभज्यते। **न्यक्षेण** इति। आभिमुख्येन कार्त्स्न्येन वा। वक्ष्यन्त इति ॥ ३ ॥

---

10. A कालेऽपि. 11. ABCD अपूर्वस्यापरस्य. 12. BD सतोऽन्वया°.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एकस्य सर्वबीजस्य यस्य चेयमनेकधा ।
भोक्तृभोक्तव्यरूपेण भोगरूपेण च स्थितिः ॥ ४ ॥

एकस्य हि ब्रह्मणस्तत्त्वान्यात्वाभ्यां सत्त्वासत्वाभ्यां चानिरुक्ताविरोधिशक्त्युपग्राह्यस्यासत्यरूपप्रविभागस्य स्वप्नविज्ञानपुरुषवद् बहिस्तत्त्वाः परस्परविलक्षणा

एवं सर्वतो भेदप्रतिषेधमभिधायाभिन्नस्यापि सर्वतो भेदव्यवहारहेतुतामाह **एकस्य** इति । ननूक्तं प्रक्रिया जगतो यतः इति । उच्यते । सर्वहेतुता तत्र प्रदर्शिता, न तु स्थितौ सर्वभेदव्यवहारहेतुता । सा तु सनिदर्शना कथ्यते । **एकस्य** इति । [1]अभिन्नस्य यथाभिहितेन प्रकारेण । **सर्वबीजस्य** इति । भिन्नशक्तिप्रचितस्य । **इयम्** इति, प्रत्यक्षां स्थितिमाह । **अनेकधा** इति, भोक्त्रादीनां पृथगनेकप्रकारतामाह । **भोक्तृभोक्तव्यरूपेण** इति । भोक्ता कर्मात्मा, भोक्तव्या रूपादयः, भोगः परिच्छेदः । **स्थितिः** अवस्थानम् ।

तद् विवृणोति **एकस्य हि** इति । एकस्यापि **शक्त्युपग्राह्यस्य** इति सर्वबीजतामाचष्टे । शक्तय उपग्राह्याः[2] स्वीकर्तव्या अस्य तदाधारत्वात् । तासां च स्वरूपतामाह **तत्त्वान्यत्वाभ्याम**निर्वचनीयाः । न तत्त्वम्, ब्रह्मण अनेकत्वप्रसङ्गात् । पृथगनुपलंभान्नान्यत्वम् । विकल्पितत्वाच्च शक्तीनामुक्तेन न्यायेन । तथा **सत्त्वासत्त्वाभ्याम्**, तद्व्यतिरेकेणानवधार्यमाणत्वात् सत्त्वेनावाच्याः, भिन्नकार्योदयानुमीयमानसत्त्वाच्चासत्त्वेनावाच्याः । अनिरुक्ताः इति अनिर्वचनीयाः । अविरोधिन्यः इति, विरुद्धकार्यप्रसवानुमितविरोधा अप्येकस्मिन्नाधारे यौगपद्येन वृत्तेरविरोधिन्यः । एतेन यथोक्तेन प्रकारेणानिरुक्ताविरोधिन्यः शक्तयः इति सापेक्षत्वेऽपि गमकत्वात् समासः । **असत्यरूप** इति । प्रविभज्यन्त इति प्रविभागा भोक्त्रादयः तेऽसत्यरूपाः अस्य इति । [3]**भोक्तृभोक्तव्यभोगग्रन्थयः** इति । भोक्तृशब्देन परमात्मनो निःसृताः कर्मात्मानः ये कर्मणां कर्तारः फलानां च भोक्तार उच्यन्ते । रूपादयो भोग्याः तेषां परिच्छेदो भोगः । अत एव परमात्मनोऽविकारत्वाद् ग्रन्थयः । **विवर्तन्ते** इति । विवर्तो व्याख्यातः । **परस्परविलक्षणाः** इति । भोक्तुः कर्तृत्वेन भोक्तव्यस्य च कर्मत्वेन साधनत्वात् भोग्यस्वभावाद् वैलक्षण्यम् । यदि भोगादीनां

---

1. C ins. भिन्नशक्तिप्रचितस्य before अभिन्नस्य.

2. Though all the Mss. have परिग्राह्याः, the real text must have been उपग्राह्याः, because the samāsa शक्त्युपग्राह्यस्य is being dissolved.

3. All the Mss. have भोक्तव्यभोगग्रन्थयः. But भोक्तृ must have been the first term of the samāsa because that is what is explained first.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भोक्तृभोक्तव्यभोगग्रन्थयो विवर्तन्ते। तस्य च ग्रन्थ्यन्तर-रूपसमतिक्रमेण विवृत्त-ग्रन्थिपरिच्छेदस्येयमनेकधा लोकव्य[6]**वस्था प्रकल्पते ॥ ४ ॥**

प्राप्त्युपायोऽनुकारश्च तस्य वेदो महर्षिभिः ।
एकोऽप्यनेकवर्त्मेव समाम्नातः पृथक् पृथक् ॥ ५ ॥

ममाहमित्यहङ्कारग्रन्थिसमतिक्रममात्रं ब्रह्मणः प्राप्तिः। विकाराणां प्रकृतिभावा-

---

वैलक्षण्यमेकत्वाद् ब्रह्मणस्तेषां व्यतिरेकः प्राप्त इत्याह [4]**अबहिस्तत्त्वाः** इति। न च तेषां ब्रह्मणो बहिस्तत्त्वमस्तीति। किमेकस्माद् भिन्नलक्षणानामबहिर्भावो दृष्ट इत्याह **स्वप्नविज्ञानपुरुषवद्** इति। यथा स्वप्नविज्ञानमयः पुरुषः एकत्वमजहद्भेदोक्तौ[5] तद्-व्यतिरिक्तविषयाभावात्, एवं भोक्तव्यविषयावग्रहरूपेण भोग इति शक्तिनिबन्धनोऽप्ययं व्यवहारो न वस्तुनिबन्धनः। **अनेकधा** इति विवृणोति **तस्य च** इति। **ग्रन्थ्यन्तर-रूपसमतिक्रमेण** इति, भेदग्रन्थिरूपपरित्यागेन। **विवृत्तग्रन्थिपरिच्छेदस्य** च। ग्रन्थिरेव परिच्छेदः, परिच्छिद्यते विविच्यतेऽन्य इति। सोऽन्यतो विलक्षणो विवृत्तोऽस्य। एतदुक्तं भवति। देवरूपं विहाय मनुष्यरूपं स एव प्रतिपद्यमानश्च्युत्युपपत्तिव्यवस्थां कल्पयतीति। तथारूपस्वरूपताभावसमतिक्रमेण स एव शब्दरूपतया व्यवतिष्ठते। तथा तदुभयानुवर्तितया भोगो द्रष्टव्यः। असत्यत्वाच्च च्युत्युपपत्त्योरिवशब्दोपादानम्। **लोक**[6]**व्यवस्था** इति। येयमुत्पादादिव्यवस्था सावकल्पते इति ॥ ४ ॥

एवं प्राप्यब्रह्मणः स्वरूपं प्रदर्श्य प्राप्त्युपायं कथयति **प्राप्त्युपायः** इति। प्राप्ते-र्वक्ष्यमाणाया वेद उपाय इति। उपायत्वाच्च तस्य स्वरूपं वर्णयति **अनुकारः** इति। प्रतिच्छन्दकः। **तस्य** इति ब्रह्मणः प्रतीतिः। **महर्षिभिः** इति। शिष्टैः। **एकोऽप्य-नेकवर्त्मेव** इति, सामवेदादिमार्गेण। **समाम्नातः** इति। व्यवस्थापितः। **पृथक् पृथक्** इति मौनादिभेदेन।

मम-अहम्-इति यदास्याहङ्कारग्रन्थिर्विवृत्तो भवति तदाहम्प्रत्ययः, तत्पूर्वको मम-प्रत्ययः, ततस्तन्निबन्धनः संसार इति। मौलस्य [1]हेतोरहङ्कारस्य यः समतिक्रमः अति-वृत्तिः सा ब्रह्मणः प्राप्तिः। मात्रग्रहणं तदन्यमात्राणामप्यनिवृत्तावपि येन विरहिता मुक्ता अपि सन्ति तन्त्रीवीणां सोविधिमित्याहुः। **विकाराणाम्** इति। रूपादीनाम्। **प्रकृति-**

---

4. All the Mss. have बहिस्तत्त्वाः, but the explanation which follows makes it clear that the text must have been अबहिस्तत्त्वाः as adopted.

5. L has भेदेनोक्तः, but no Ms. has it.

6. L has लोके व्यवहारव्यवस्था in the Vṛtti.

1. BCD हेतोरहेतोरस्य.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पत्तिरित्यपरे। वैकरण्यम्, असाधना परितृप्तिः, आत्मतत्त्वमात्मकामत्वमनागन्तुकार्यत्वं परिपूर्णशक्तित्वं कालवृत्तीनामात्ममात्रास्वसमावेशः सर्वात्मना नैरात्म्यमिति प्राप्तिविकल्पाः। प्राप्त्युपायो ब्रह्मराशिः। यथाभ्युदयस्य दानतपोब्रह्मचर्यादिः। एवं ह्याह—

भावापत्तिः इति। सर्वभेदानुकार इति [2]व्यावृत्तो ब्रह्मस्वरूपेऽवतिष्ठते। पूर्वत्र मात्रासंभवोऽपीति विशेषः। **वैकरण्यम्** इति। करणादीनां चक्षुरादीनां बुद्धीन्द्रियाणां पञ्चानां तथा पाण्यादीनां कर्मेन्द्रियाणां पञ्चानां बुद्धिमनसोश्च निवृत्तिः। यतश्चक्षुरादिनिबन्धनो रूपादिव्यवसायः तत्पूर्विकाश्च समीहा अपि[3]वर्तन्ते, ततः तत्पूर्वः[4] संसारः। अतः करणनिवृत्तौ संसारनिवृत्तिः। **असाधना** इति। अबहिःसाधना। बहिरनुकूलविषयसाधनापि तृप्तिरस्तीत्यवच्छेदः। **तृप्तिः** इति सुखं यमानन्दमित्याहुः। **आत्मतत्त्वं** च यद् उपनिषत्सु वर्ण्यते—

यथेष्टया स्त्रिया परिष्वक्तो न किंचन वेद। (Bṛ. Up. 4.3.21.)

इति। **आत्मकामत्वम्** इति। न शब्दादीन् कामयते, तत्रौत्सुक्यविगमात्, अपि तु परमात्मानमेव, तदात्मकामत्वम्। **अनागन्तुकार्थत्वम्** इति। आगन्तुकाय परमर्थयत इत्यागन्तुकार्थः, तस्य भावः, तस्य नञा प्रतिषेधः। एतदुक्तं भवति। सर्वस्य भोक्तव्यस्य प्रकृतिपुरुषान्तरज्ञानम्, तस्येह भुक्तत्वान्न परमर्थयत इति। **परिपूर्णशक्तित्वम्** इति। अणिमाद्यष्टगुणैश्वर्ययोगात्। अणिमा, महिमा, गरिमा, लघिमा, प्राप्तिः, प्राकाम्यम्, ईशित्वम्, वशित्वम् यत्र कामोऽवसायिते इत्यष्टौ गुणाः। **कालवृत्तीनाम्** इति। कालस्य प्रतिबन्धानुज्ञालक्षणा वृत्तयः, ता यदा न समाविशन्ति तदा मुक्त इत्युच्यते। समावेशस्तदनुग्रहः। **आत्ममात्रासु** इति। परमात्मनो या मात्राः कर्मात्मरूपाः तासु। ते हि कर्मात्मानः कालेनानुगृहीताः प्रतिबन्धाभ्यनुज्ञाभ्यां प्रवर्तन्ते। यदानुग्रह एव न, मोक्षः पुनर्वृत्त्यभावः। **सर्वात्मना** इति। न केवलं विवर्तरूपं नापि ... [5]**नैरात्म्यम्** इति। नैःस्वाभाव्यम्, ब्रह्मस्वभावस्य निरूपयितुं वक्तुं चाशक्यत्वात्। ब्रह्म इत्यपि तत्त्वमित्यपि, रूपविगमात् ग्राह्यग्राहकविगमाद्वा इति। **प्राप्तिविकल्पाः**, प्राप्तिविकाराः। **ब्रह्मराशिः** वेदः। तस्य प्राप्त्युपायतां प्रतिपादयिष्यन्नाह **यथाभ्युदयस्य** इति। स्वर्ग-

---

2. B om. व्यावृत्तो.   3. AD समीहा निवर्तन्ते.

4. तत्पूर्वः is not in the Mss., but has been adopted by L. Some such word is necessary. Otherwise the word संसारः would remain unconnected.   5. ABCD नैकात्म्यम्.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"वेदाभ्यासात् वरमान्तरं शुक्लमजरं ज्योतिस्तस्मिन्नेवापारे तमसि वीते विवर्तते" इति। अनुकारः इति। यां सूक्ष्मां नित्यामतीन्द्रियां वाचमृषयः साक्षात्कृतधर्माणो मन्त्रदृशः पश्यन्ति तामसाक्षात्कृतधर्मभ्योऽपरेभ्यः प्रवेदयिष्यमाणा बिल्मं समामनन्ति स्वप्नवृत्तमिव दृष्टश्रुतानुभूतमाचिख्यासन्त इत्येष पुराकल्पः। आह खल्वपि।

"साक्षात्कृतधर्माण ऋषयो बभूवुस्तेऽपरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुः उपदेशाय ग्लायन्तोऽपरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं

स्य। **दानम्**, हिरण्यादेः प्रतिपादनम्। **तपः**, सत्यवचनादि। **ब्रह्मचर्यम्**, मैथुनादिनिवृत्तिः। आदिशब्दाज्जपादयः। यथैषां स्वर्गफलताम्नायादेवावसीयते। तत्राप्याम्नायमाह **वेदाभ्यासात्** इति। [6]**वरम्**, उत्तमम्। **आन्तरम्** इति बाह्यज्योतिषोऽवच्छेदः। **शुक्लम्**, परिशुद्धम्, सत्यवस्तुप्रकाशनात्। **अजरम्**, अविकारि। **ज्योतिः**, प्रकाशस्वभावत्वात्। **अस्मिन्नेव** इति। नान्यस्मिन् जन्मनि। **अपारे** इति। अविद्वद्भिः पारयितुमशक्यत्वात्। **तमसि** इत्यविद्यायाम्। **वीते** इति, वी गताविति अयं धातुः गतौ वर्तते। विवर्तो व्याख्यातः। एतदाह—अविद्यायां विगतायां स प्रकाशो विवर्तत इति। **अनुकारः** इति व्याख्येयमुत्थापयति। वस्तुतो भेदाभावादनुकार इव वेदो ब्रह्मणः। तदाह **सूक्ष्माम्** इति। सूक्ष्मा [7]वाग् ब्रह्मेवोपसंहृतभेदत्वात्। **अतीन्द्रियाम्** इति सूक्ष्मतामिन्द्रियविषयतातिक्रमेण साधयति। इन्द्रियविषयातिक्रमस्तु नित्यतया। यदाह **नित्याम्** इति। उदयव्ययवर्तीं वाचमर्वाग्दर्शनाः प्रतियन्ति। अन्यथा सर्वदा सर्वशब्दोपलम्भप्रसङ्गः, व्यवस्थितत्वात्तस्याः। अभ्युदयनिःश्रेयससाधनो धर्मः यैः साक्षात्कृतः प्राप्तः ते धर्मानुगृहीतान्तःकरणाः तां वाचं पश्यन्ति च। अत एव ते मन्त्रदृशः। यदुच्यते

'दृष्टं साम' (P. 4.2.7.)

इति। [8]**ताम्** इति। यथोक्तां वाचम्। **असाक्षात्कृतधर्मभ्यः** इति। अन्येभ्यः **परेभ्यः**। **प्रवेदयिष्यमाणाः** ज्ञापयितुमिच्छन्तः। **बिल्मं** प्रतिच्छन्दकम्, वेदाङ्गाख्यम्। न चासावतीन्द्रिया सूक्ष्मा वाक् तथाख्यातुं शक्यत इति प्रतिच्छन्दकथनम्। अत एवाह **स्वप्नवृत्तमिव** इति। स्वप्ने हीन्द्रियव्यापारेण विना अबहिस्तत्त्वा रूपादयोऽनुभूताः। एते [9]तथाख्यातुमशक्या इति प्रतिच्छन्दकः। इन्द्रियमेव तेन बाह्यादिरूपेण कथ्यते। **दृष्टश्रुतम्** इति। नपुंसके भावे क्तः। तेन दर्शनश्रवणाभ्यामनु-

---

6. W, W² ML have पर but ABCD have वरम्.

7. AC वा ब्रह्मेव; D °क्ष्मामात्र°.

8. CD om. ताम् इति.

9. L ins. न before तथा, but no ms. has it.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वेदाङ्गानि च। बिल्मं भिल्मं भासनं वा" इति। तस्य वेदो महर्षिभिः, एकोऽप्यनेकवर्त्मेव। एकोऽयं वेदाख्यो दर्शनात्मनि स्थितो दृश्योर्थः स महर्षिभिर्भेदेनाभेदस्य प्रतिपादयितुमशक्यत्वादभिव्यक्तिनिमित्तालब्धक्रमे वागात्मरूपे प्रापित एकत्वानतिक्रमेण संहितापदक्रमविभागेन प्रविभक्तमार्गोऽध्ययननिमित्तामध्येतृणां चरणसमाख्यां व्यवस्थापयद्भिः समाम्नाताः। अपर आह–यथा वाग्देशभेदेन भिन्ना

भूतमर्थमाख्यातुमिच्छन्तः। दृष्टश्रुतग्रहणं सर्वेन्द्रियज्ञानोपलक्षणायैव। **पुराकल्पः** इति। अर्थवादः। आगमान्तरमप्याह **आह खल्वपि** इति। सम्प्रादुः इति संपूर्वाद्ददातेर्जुसि लुङि रूपम्। संदत्तवन्त इति यावत्। **उपदेशाय ग्लायन्तः** इति। स्वयं विदितं तादृक् कथं साक्षादुपदेक्ष्याम इति खिद्यमानाः। उपदेशार्थः खेद इति तादर्थ्ये चतुर्थी। **बिल्म**[10]**ग्रहणाय** इति, प्रतिच्छन्दकग्रहणाय। **इमं ग्रन्थम्** इति, वेदं वेदाङ्गानि च। **समाम्नासिषुः** समाम्नातवन्तः। प्रतिच्छन्दकसामान्यमवच्छिनत्ति **वेदं वेदाङ्गानि च** इति। बिल्म[11]पर्यायवचनं भिल्मम् इति। तदप्यस्पष्टमित्याह भासनम् इति। भास्यते प्रकाश्यतेऽनेन तद्वस्तु इति। **एकोऽपि** इति। कथमवसीयमानवर्णत्रिभागस्य वेदस्यैकत्वम् इत्याह **दर्शनात्मनि** इति। यथा गौरित्येकपदपरिच्छेदिन्यामेकस्यां बुद्धौ पूर्वापरीभूतानेकवर्णाकारायामपि[12] नानेकत्वं दृश्यस्यैवं ब्रह्मराशिपरिच्छेदिन्यामेकस्यां बुद्धौ द्रष्टव्यम्। बाह्यव्यतिरेकाद् **भेदेन**। **समाम्नाताः** इत्यनेनं संबन्धः। **अभेदस्य** इति। न हि भेदव्यवहारानुपातिनां प्रत्यस्तभेदेन व्यवहार इत्यशक्यता। ततः किं कृतमित्याह **वागात्म**[13]**रूपे** इति। प्रविभक्ताक्षरायां वाचि। **प्रापितः** समारोपितः। तद्रूपतया व्यवस्थापितः। तस्यापि न स्वतो भेद इत्याह **अभिव्यक्तिनिमित्ताम्** इति। तस्या वाचो नित्याया अभिन्नाया अभिव्यक्तौ यन्निमित्तं स्थानकरणाभिघातो ध्वनिर्वा ततो लब्धक्रमो ययेति। तेऽपि हि क्रमवन्तः अभिव्यङ्ग्यस्य वागात्मनः क्रमं दर्शयन्ति।

---

10. C बिल्वग्रह°.

11. ABCD have विकल्पपर्यायवचनं बिल्वम् इति। तदप्यस्पष्टमित्याह भासनम् इति। But this cannot be the real text. In the Vṛtti, there is a quotation from the Nirukta of Yāska (1. 20) in which there are the three words: बिल्मम्, भिल्मम् and भासनम्। Vṛṣabha had also three words in the Vṛtti, but they cannot be विकल्प, बिल्म and भासनम्। W, W² and M also do not have three distinct words. L has, therefore, taken the three words from the Nirukta. That is a reasonable thing to do.

12. ACD om. अपि before नानेकत्वम्.

13. L वागात्मरूपत्वे.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सत्यपि स्वरूपभेदे एकाभिधेयनिबन्धनत्वमव्यतिक्रान्ता। सैव च देशादिभेदप्रकल्पनव्यवस्थाहेतुः। एवं चरणभेदेऽप्येकार्थनिबन्धनत्वमव्यतिक्रान्तानि श्रुतिवाक्यानि। स्वरूपभेद एव चरणभेदप्रकल्पनव्यवस्थाहेतुरिति। अपरे मन्यन्ते–यथाष्टांङ्ग आयुर्वेदः पुराकल्प एक एव आसीत् स एव कलौ शक्तिवैकल्यान्नृणां प्रविभक्ताङ्गो दृश्यते। तथायमप्यपरिमाणमार्गशक्तिभेदो वेदो ब्रह्मराशिरिति ॥ ५ ॥

एकत्वानतिक्रमेण इति। तद्धि वाचः परं रूपमेकत्वमजहद् भेदरूपक्रमं दर्शयतीति। **प्रविभक्तमार्गः** इति, सामवेदादिमार्गभेदेन। तत्राप्यपरं विभागमाह-**संहितापदक्रमविभागेन** इति। **अध्ययननिमित्तां समाख्याम्** इति संबन्धः। येयं चरणरूपा आख्या अन्यां पृच्छ छन्दोग इति सा तदध्ययननिमित्ता। सति च प्रविभाग एतद्भवति। अन्येषां पाठोऽध्ययननिमित्तम्[14] इति। सति च प्रविभागेऽस्माकमियं शाखास्माकमियमिति पक्षपाताद् भियोगेनाधीयत इत्यध्ययननिमित्तं चरणसमाख्या। एतदाह। परमार्थत एकोऽपि[15] वेदः शिष्टैः अभेदस्य कथयितुमशक्यत्वात् स्थानकरणाभिघातभेदेन प्रापितभेदश्चरणविभागेन प्रविभक्त इति। अन्यथैकतां प्रविभागं च प्रतिपादयति **यथा वाग्** इति। प्रतिदेशमेकस्यैव वाचकस्य भेदः। न च स्वरूपभेदादर्थे भेदः। **सैव च** इति। वाग् भिद्यमाना देशादिव्यवस्थां कल्पयति। यथैते दाक्षिणात्याः एते गौडाः इति। आदिशब्देन कालभेदः। यथा न्याङ्कवनैयङ्कवशब्दावर्थभेदे स्वरूपभेदात् साधुत्वे कालभेदं गणयतः। **चरणभेदेऽपि** इति। सामादिभेदे। **एकार्थनिबन्धनत्वम्**, यस्मात्तैरेव चरणैरेकं कर्म यागाख्यं कर्मराशिर्वैकः। अनुक्तमपि यत् किञ्चिदेकत्र तदपरप्रामाण्यादपरत्र क्रियते। यद्वा ज्योतिरान्तरं प्रतिपाद्यमिति। **स्वरूपभेदः** इति, शब्दमात्रभेदः। अतोऽर्थाभेदादेकत्वं स्वरूपभेदादनेकधर्मता। **यथाष्टाङ्गः** इति। शल्यचिकित्सा, शालाक्यम्, कायचिकित्सा, भूतचिकित्सा, कौमारभृत्यम्, अगदतन्त्रम्, वाजीकरणतन्त्रम्, रसायनतन्त्रम् इति। **पुराकल्पे** इति। पूर्वस्मिन् काले। **एक एव** इति। एका चिकित्सा, आरोग्यमुद्दिश्य प्रवृत्तत्वात्। **कलौ शक्तिवैकल्यात्** इति। अल्पशक्तित्वेन, यतोऽन्येन शास्त्रे कृतसंस्कारस्यायुर्वेदनियोगः। ततश्चाध्ययनस्यास्य परिसमाप्तिरिति। अष्टधा विभागे त्वेकाङ्गकौशलेन सफलं शास्त्राध्ययनं शक्यं च। **अपरिमाण** इति बहुत्वमाह। बहूनां मार्गाणां शक्तिभेदा अस्मिन् वेदाख्ये ब्रह्मणि विद्यन्ते यतः तदेवेदं तथा विवृत्तमिति ॥ ५ ॥

---

14. L has अध्ययननिमित्तम् in the Vṛtti.

15. B om. अपि ...... कथयितुम्.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भेदानां बहुमार्गत्वं कर्मण्येकत्र चाङ्गता।
शब्दानां यतशक्तित्वं तस्य शाखासु दृश्यते ॥ ६ ॥

तत्र चतुर्धा भेदे सति एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यं पञ्चदशधेत्येके। नवधाथर्वणो वेदः। इत्येवं प्रतिभागं बहवो मार्गाः। कर्मण्येकत्र चाङ्गता। सर्वशाखाप्रत्ययमेकं कर्म। तद्यथा। सर्वभिषक्शाखाप्रत्ययमेकं चिकित्सितम्। शब्दानां यतशक्तित्वम्। तथार्थप्रत्यायने सामर्थ्यात्, तथाभ्युदयहेतुत्वात्। तस्य शाखासु दृश्यते इति। देवसुम्नयोर्यजुषि काठके (P. 7.4.38.) सिमस्याथर्वणेऽन्त उदात्तः (Ph. 79) इत्येवमादि। येषां त्वयं शाखाप्रविभागो विच्छेदेन पुनः पुनर्भवतीत्यागमः तेषां प्राक् प्रविभागादव्यभिचार एव संहृतक्रमाया वाच इत्येतद्दर्शनम् ॥ ६ ॥

इदानीं वेदस्य स्वरूपकथनेन माहात्म्यमाह **भेदानाम्** इति। **तस्य** इति वक्ष्यति। **तस्य** वेदस्य भेदाः सामवेदादयश्चत्वारः। **बहुमार्गत्वम्** इति। प्रत्येकमनेकशाखाभेदात्। **कर्मण्येकत्र** इति। सर्वेषामेककर्मविषयत्वात्। **यतशक्तित्वम्** इति। प्रतिशाखं प्रतिनियतशक्तयः शब्दाः अर्थप्रत्यायनेनापूर्वाङ्गभावेन च।

चतुर्धा भेदे सति इति। सामादिभेदेन। **एकशतम्** इत्यादिना अवान्तरभेद एकैकस्य। तदाह **प्रतिभागम्** इति। एकैकस्मिन् विभागे। **सर्वशाखाप्रत्ययम्** इति। सर्वशाखाहेतुकं कर्म निष्पाद्यते। अनुक्तानामपि तदन्यशाखोपदिष्टानां तत्र करणात्। **सर्वभिषग्** इति। सर्वेषां भिषजां शाखाभेदादष्टाङ्गानि, तन्निमित्तमेकं चिकित्सितम्। अङ्गान्तरविहितायाश्चिकित्साया अङ्गान्तरहेतुकफले तुल्यतया समारोपात्। आरोग्यस्य वैकस्य सर्वेषां हेतुत्वात्। 'यतशक्तित्वं[1] नियतकार्योत्पादकत्वेनाह—**तथार्थप्रत्यायने** इति। येन रूपेण स्वरेण च युक्तो यस्यां शाखायामुक्तः स तत्रैवार्थमभिधत्ते न शाखान्तरे। अतोऽर्थक्रियानियमेन शक्तिनियमः। **अभ्युदयहेतुत्वात्** इति। तत्रैव तथैवाभ्युदयं ज्ञानतः प्रयोगतो वा करोति। काठके एव तथा साधुत्वमिति। **येषां तु** इति। अयं वेदो ब्रह्मणः सकाशात् शाखादिभेदभिन्न एव विवर्तत इति। तेषामुपसंहृतक्रमा वाग् दुर्लभा। येषां तु दर्शनं ब्रह्मणः प्रथमतो वेद एकरूप एव विवर्तते, सोऽध्येतृणामशक्तेः प्रविभक्तः स पुनरुपसंहृतभेदो भवतीति पुनश्च भिद्यत इति। यदाह—**विच्छेदेन पुनः पुनर्भवति** इति। **तेषां विभागात् प्रागव्यभिचार एव** इति। तस्यामवस्थायां स्वरूपाप्रच्युतेरव्यभिचार एव[2]।...रूपग्रहणं हि व्यभिचारः। **संहृतक्रमायाः** इति। क्रमवद्वर्णरूपतिरोधानात्। अस्मिंश्च दर्शने पूर्वोक्तं कारिकाद्वयं भवति ॥ ६ ॥

---

1. BC यतः शक्तित्वम्। 2. B om. व ...... व्यभिचारः.

Dr. Urmila Sharma Collection, Varanasi

सत्यपिं स्वरूपभेदे एकामिधेयनिबन्धनत्वमव्यतिक्रान्ता। सैव च देशादिभेदप्रकल्पनव्यवस्थाहेतुः। एवं चरणभेदेऽप्येकार्थनिबन्धनत्वमव्यतिक्रान्तानि श्रुतिवाक्यानि। स्वरूपभेद एव चरणभेदप्रकल्पनव्यवस्थाहेतुरिति। अपरे मन्यन्ते-यथाष्टांङ्ग आयुर्वेदः पुराकल्प एक एव आसीत् स एव कलौ शक्तिवैकल्यान्नृणां प्रविभक्ताङ्गो दृश्यते। तथायमप्यपरिमाणमार्गशक्तिभेदो वेदो ब्रह्मराशिरिति ॥ ५ ॥

एकत्वानतिक्रमेण इति। तद्धि वाचः परं रूपमेकत्वमजहद् भेदरूपक्रमं दर्शयतीति। **प्रविभक्तमार्गः** इति, सामवेदादिमार्गभेदेन। तत्राप्यपरं विभागमाह-**संहितापदक्रमविभागेन** इति। **अध्ययननिमित्तां समाख्याम्** इति संबन्धः। येयं चरणरूपा आख्या अन्यां पृच्छ छन्दोग इति सा तदध्ययननिमित्ता। सति च प्रविभाग एतद्भवति। अन्येषां पाठोऽध्ययननिमित्तम्[14] इति। सति च प्रविभागेऽस्माकमियं शाखास्माकमियमिति पक्षपातादभियोगेनाधीयत इत्यध्ययननिमित्तं चरणसमाख्या। एतदाह। परमार्थत एकोऽपि[15] वेदः शिष्टैः अभेदस्य कथयितुमशक्यत्वात् स्थानकरणाभिघातभेदेन प्रापितभेदश्चरणविभागेन प्रविभक्त इति। अन्यथैकतां प्रविभागं च प्रतिपादयतिं **यथा वाग्** इति। प्रतिदेशमेकस्यैव वाचकस्य भेदः। न च स्वरूपभेदादर्थे भेदः। **सैव च** इति। वाग् भिद्यमाना देशादिव्यवस्थां कल्पयति। यथैते दाक्षिणात्याः एते गौडाः इति। आदिशब्देन कालभेदः। यथा न्याङ्कवनैयङ्कवशव्दात्रर्थभेदे स्वरूपभेदात् साधुत्वे कालभेदं गणयतः। **चरणभेदेऽपि** इति। सामादिभेदे। **एकार्थनिबन्धनत्वम्**, यस्मात्तैरेव चरणैरेकं कर्म यागाख्यं कर्मराशिर्वैकः। अनुक्तमपि यत् किञ्चिदेकत्र तदपरप्रामाण्यादपरत्र क्रियते। यद्वा ज्योतिरान्तरं प्रतिपाद्यमिति। **स्वरूपभेदः** इति, शब्दमात्रभेदः। अतोऽर्थाभेदादेकत्वं स्वरूपभेदादनेकधर्मता। **यथाष्टाङ्गः** इति। शल्यचिकित्सा, शालाक्यम्, कायचिकित्सा, भूतचिकित्सा, कौमारभृत्यम्, अगदतन्त्रम्, वाजीकरणतन्त्रम्, रसायनतन्त्रम् इति। **पुराकल्पे** इति। पूर्वस्मिन् काले। **एक एव** इति। एका चिकित्सा, आरोग्यमुद्दिश्य प्रवृत्तत्वात्। **कलौ शक्तिवैकल्यात्** इति। अल्पशक्तित्वेन, यतोऽन्येन शास्त्रे कृतसंस्कारस्यायुर्वेदनियोगः। ततश्चाध्ययनस्यास्य परिसमाप्तिरिति। अष्टधा विभागे त्वेकाङ्गकौशलेन सफलं शास्त्राध्ययनं शक्यं च। **अपरिमाण** इति बहुत्वमाह। बहूनां मार्गाणां शक्तिभेदा अस्मिन् वेदाख्ये ब्रह्मणि विद्यन्ते यतः तदेवेदं तथा विवृत्तमिति ॥ ५ ॥

---

14. L has अध्ययननिमित्तम् in the Vṛtti.

15. B om. अपि ...... कथयितुम्.

CC0. In Public Domain, Digitizagtion by eGangotri

भेदानां बहुमार्गत्वं कर्मण्येकत्र चाङ्गता।
शब्दानां यतशक्तित्वं तस्य शाखासु दृश्यते ॥ ६ ॥

तत्र चतुर्धा भेदे सति एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यं पञ्चदशधेत्येके। नवधाथर्वणो वेदः। इत्येवं प्रतिभागं बहवो मार्गाः। कर्मण्येकत्र चाङ्गता। सर्वशाखाप्रत्ययमेकं कर्म। तद्यथा। सर्वभिषक्शाखाप्रत्ययमेकं चिकित्सितम्। शब्दानां यतशक्तित्वम्। तथार्थप्रत्यायने सामर्थ्यात्, तथाभ्युदयहेतुत्वात्। तस्य शाखासु दृश्यते इति। देवसुम्नयोर्यजुषि काठके (P. 7.4.38.) सिमस्याथर्वणेऽन्त उदात्तः (Ph. 79) इत्येवमादि। येषां त्वयं शाखाप्रविभागो विच्छेदेन पुनः पुनर्भवतीत्यागमः तेषां प्राक् प्रविभागादव्यभिचार एव संहृतक्रमाया वाच इत्येतद्दर्शनम् ॥ ६ ॥

इदानीं वेदस्य स्वरूपकथनेन माहात्म्यमाह **भेदानाम्** इति। **तस्य** इति वक्ष्यति। **तस्य** वेदस्य भेदाः सामवेदादयश्चत्वारः। **बहुमार्गत्वम्** इति। प्रत्येकमनेकशाखाभेदात्। **कर्मण्येकत्र** इति। सर्वेषामेककर्मविषयत्वात्। **यतशक्तित्वम्** इति। प्रतिशाखं प्रतिनियतशक्तयः शब्दाः अर्थप्रत्यायनेनापूर्वाङ्गभावेन च।

चतुर्धा भेदे सति इति। सामादिभेदेन। **एकशतम्** इत्यादिना अवान्तरभेद एकैकस्य। तदाह **प्रतिभागम्** इति। एकैकस्मिन् विभागे। **सर्वशाखाप्रत्ययम्** इति। सर्वशाखाहेतुकं कर्म निष्पाद्यते। अनुक्तानामपि तदन्यशाखोपदिष्टानां तत्र करणात्। **सर्वभिषग्** इति। सर्वेषां भिषजां शाखाभेदादष्टाङ्गानि, तन्निमित्तमेकं चिकित्सितम्। अङ्गान्तरविहितायाश्चिकित्साया अङ्गान्तरहेतुकफले तुल्यतया समारोपात्। आरोग्यस्य चैकस्य सर्वेषां हेतुत्वात्। [1]यतशक्तित्वं नियतकार्योत्पादकत्वेनाह—**तथार्थप्रत्यायने** इति। येन रूपेण स्वरेण च युक्तो यस्यां शाखायामुक्तः स तत्रैवार्थमभिधत्ते न शाखान्तरे। अतोऽर्थक्रियानियमेन शक्तिनियमः। **अभ्युदयहेतुत्वात्** इति। तत्रैव तथैवाभ्युदयं ज्ञानतः प्रयोगतो वा करोति। काठके एव तथा साधुत्वमिति। **येषां तु** इति। अयं वेदो ब्रह्मणः सकाशात् शाखादिभेदभिन्न एव विवर्तत इति। तेषामुपसंहृतक्रमा वाग् दुर्लभा। येषां तु दर्शनं ब्रह्मणः प्रथमतो वेद एकरूप एव विवर्तते, सोऽध्येतॄणामशक्तेः प्रविभक्तः स पुनरुपसंहृतभेदो भवतीति पुनश्च भिद्यत इति। यदाह—**विच्छेदेन पुनः पुनर्भवति** इति। **तेषां विभागात् प्रागव्यभिचार एव** इति। तस्यामवस्थायां स्वरूपाप्रच्युतेरव्यभिचार एव[2]।...रूपग्रहणं हि व्यभिचारः। **संहृतक्रमायाः** इति। क्रमवद्वर्णरूपतिरोधानात्। अस्मिंश्च दर्शने पूर्वोक्तं कारिकाद्वयं भवति ॥ ६ ॥

---

1. BC यतः शक्तित्वम्। 2. B om. व ...... व्यभिचारः.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्मृतयो बहुरूपाश्च दृष्टादृष्टप्रयोजनाः।
तमेवाश्रित्य लिङ्गेभ्यो वेदविद्भिः प्रकल्पिताः ॥ ७ ॥

तत्र काश्चिच्छब्दनिबन्धनाः स्मृतयः। काश्चिदशब्दनिबन्धनाः शिष्टेषु प्रसिद्धसमाचाराः। दृष्टप्रयोजनाश्चिकित्सादिविषयाः। अदृष्टप्रयोजना भक्ष्याभक्ष्यगम्यागम्यवाच्यावाच्यविषयास्तुल्ये विषये प्रसक्तविरोधा दृष्टप्रयोजनाभावे विकल्पिन्यः। शिष्टानां तु विप्रतिपत्तौ यत्र दृष्टं प्रयोजनमस्ति तासामप्रामाण्यम्। अविप्रतिपत्तौ

स्मृतियोनित्वं वेदस्य दर्शयितुमाह **स्मृतयः** इति। [1]स्मरणानि, तत्पूर्वका वा शब्दसंदर्भसमाचाराः। **बहुरूपाः** इति, शब्दसमाचारभेदेन। **दृष्टादृष्टप्रयोजनाः** इति। दृष्टादृष्टफलाः। **तमेव** इति। वेदमाश्रित्य, एतल्लिङ्गव्यपाश्रयेण। **वेदविद्भिः** इति। वेदार्थज्ञैः। एतदाह—स्मरणमनुनय(भव ?)पूर्वकम्, न च प्रत्यक्षादिकं तत्र व्याप्रियते। अतो वेदार्थज्ञैर्वेदानुभूतास्तेऽर्थाः।

स्मृतेर्बहुरूपतां व्याचष्टे **शब्दनिबन्धनाः** इति। शब्दो निबन्धनमासाम्, यत् स्मरणं शब्देनानुगम्यते। **अशब्दनिबन्धनाः** इति, शब्दो निबन्धनं यासां न भवति। किं निबन्धनमित्याह **प्रसिद्धसमाचाराः** इति। यद्यपि शब्दो नास्ति ते तु शिष्टास्तान् शब्दानाचरन्तो दृश्यन्ते इति प्रसिद्धसमाचारः। एतदुक्तं भवति—स्मरणमत्र प्रमाणम्। तच्च कदाचिच्छब्दात् कदाचिच्छिष्टसमाचारादविच्छिन्नादिति। चिकित्साया रोगनिवृत्तिर्दृष्टं प्रयोजनम्। **आदि**शब्देन

वैणवीं धारयेद्यष्टिम् (Manu. 4.36.)

इत्येवमादीनां स्खलत्प्रतिष्ठादिकम्। **भक्ष्याभक्ष्य** इति। पञ्च पञ्चनखा भक्ष्याः, अभक्ष्यो ग्रामकुक्कुटः इति। **गम्याः**, यथा ऋतावुपेयात् इति। **अगम्याः**—मातापितृयोनिसंबन्धिन्यः इति। **वाच्याः**—मङ्गलवत्यो वाच इति। **अवाच्याः**—शुक्ता वाच इति। दृष्टप्रयोजनप्रति[2]बन्धिरूपेण चोदनाद् भक्ष्यादिकं यददृष्टार्थमेव तद् बोद्धव्यम्, न भैषज्यविषयादिकम्। **तुल्ये विषये** इति। एकस्मिन् विषये। भिन्नविषयाणां चिन्तैव नास्ति। **प्रसक्तविरोधाः** इति। प्रसक्तो विरोध आसामिति, परस्परविरुद्धा इति यावत्। विरोधाभावे समुच्चय एव। यथा सुरापस्य गन्धाघ्राणे प्राणायामघृतप्राशनयोः। **दृष्टप्रयोजनाभावे** इति। यदि दृष्टं प्रयोजनं नास्ति। सति तस्मिंस्तदपेक्षया प्रक्षेपोऽपि

1. D om. स्मरणानि ...... बहुरूपाः इति।

2. L °प्रतिद्वन्द्विरूपेण. Some such text is wanted but all the mss. have °प्रतिबन्धिरूपेण.

Dr. Urmila Sharma Collection, Varanasi

तु दृष्टप्रयोजनसंभवेऽपि विकल्प एव। तद्यथा मण्डूकवधे प्रायश्चित्तस्य। तमेवाश्रित्य लिङ्गेभ्य इति। श्रुत्याश्रितानि लिङ्गानि श्रुतिविहितानां स्मृतिविहितानां च कर्मणां कर्तृसामान्यं प्रवेदयन्ते। येषां हि श्रुतिविहितैर्दृष्टादृष्टप्रयोजनैः कर्मभिरधिकारः ते श्रुत्यैव स्मृतिविहितानामपि कर्मणां कर्तृत्वेनाख्यायन्ते। तद्यथा

"[3]अयं यजमानोऽतिथय आगतायाज[4]मषण्डं महोक्षं वा पचेत्"

संभाव्यते, यथा वक्ष्यति हंसभक्षणस्य। तत्रापि विकल्पो भवतीति। यथा ब्रह्महत्याया द्वादशवार्षिकं प्रायश्चित्तं

"खट्वाङ्गकपालपाणिर्द्वादशसंवत्सरान् ब्रह्मचारी भैक्षाय ग्रामं प्रविशेत् स्वकर्माचक्षाणः"

इति (G. Dh. S. 22.3.)। अपरस्तु मरणान्तिकं

"प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्छिराः" (Manu. 11.73.)

इति। स्मृतिद्वयस्य प्रामाण्यादविरोधाच्चादृष्टस्य फलस्यैकत्वाद्विकल्पः। अन्ये भिन्नविषयतामनयोर्मन्यमाना [5]गुरुतल्पगे प्रायश्चित्तद्वयमुदाहरन्ति यथा

"तप्ते[6] लोहशयने गुरुतल्पगः शयीत सूर्मिं वा श्लिष्येज्ज्वलन्तीम्"

(G. Dh. S. 23, 8–10.)

इति। **विप्रतिपत्तौ** इति, विरुद्धायां शिष्ट(वि)प्रतिपत्तौ यथा हंसविषययोः भक्षणाभक्षणस्मृत्योः परस्परापाकरणेन विरोधे दृष्टप्रयोजनाया हंसभक्षणस्मृतेरप्रामाण्यम्, अति लौल्यादपि स्मृत्युपनिबन्धसंभवादभक्षणस्मृतिरेव प्रमाणम्। **अविप्रतिपत्तेः**[7] इति। यत्र स्मृत्यन्तराविरोधेन स्मृतिः प्रवर्तते यथा मण्डूकवधे प्रायश्चित्तं क्षीरभोजनमासक्तघृतं वा दधि। **दृष्टप्रयोजनसंभवेऽपि** इति। मधुररसप्रियाणां षाडवरसप्रियाणां च स्मृतिद्वयप्रक्षेपशङ्काप्यस्ति। तत्रापि **विकल्प** एव, उभयोरपि विप्रतिपत्त्या प्रामाण्यात् इति। **श्रुत्याश्रितानि** इति, श्रुतिपठितानि लिङ्गादीनि, तेषामन्यार्थत्वेऽपि तदवगमशक्तेर्लिङ्गत्वम्। **कर्तृसामान्यम्** इति। एककर्तृताम्। **प्रवेदयन्ते,** कथयन्ति। येषां कर्मणां ये कर्तारः श्रुतौ पठिताः तेषामेव कर्मणां ते एव कर्तारः स्मृतावपि पठिताः। तेन श्रुत्यर्थाभिधायिनी त्वर्थ स्मृतिः प्रमाणम्। एतदेव व्याचष्टे **येषां हि** इति। **तद्यथा** इत्युदाहरति। **अयं यजमानः** इति। यतोऽतिथिमुद्दिश्याषण्डस्याजस्य महतो वा बलीवर्दस्य

---

3. L om. अयं. 4. L महाजं वा. 5. B गुरुकल्पने.

6. All the mss. have तल्पे which is obviously a mistake for तप्ते. Similarly, शिष्ये is a mistake for श्लिष्येत्.

7. W, W², M, L have अविप्रतिपत्तौ in the Vṛtti.

CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

इति। क्वचिच्च विषये लिङ्गानि दृष्टानि स्थालीपुलाकवच्छ्रुत्यर्थाविरोधिन्याः स्मृतेः प्रामाण्यकल्पनायालम् ॥ ७ ॥

तस्यार्थवादरूपाणि निश्रिताः स्वविकल्पजाः ।
एकत्विनां द्वैतिनां च प्रवादा बहुधा मताः ॥ ८ ॥

अर्थवादानर्थवादप्रकाराणि श्रुतिवाक्यानि पौरुषेयाः प्रवादाः प्रायेणानुपतन्तो दृश्यन्ते। पुरुषबुद्धिविकल्पाच्च प्रवादभेदाः संभवन्ति। तद्यथा—

'असद्वा इदमग्र असीत्'

कदनं[8] वर्णत्रयस्य वेदे पठितम्। स्मृतावपि[9] वर्णत्रयस्यातिथिमुद्दिश्य तदेव पठितमिति। यास्तर्हि अश्रुतिमूलाः स्मृतयस्तासु कथं प्रामाण्यमित्याह **क्वचिच्च विषये** इति। यत्र श्रुतिलिङ्गं नास्ति। **स्थालीपुलाकवत्** इति। यथैकोऽपि स्थालीपुलाको दृष्टस्तदन्येषां तुल्यकरणानामदृष्टानामपि तथात्वं गमयति, एवमदृष्ट[10]वेदलिङ्गाया अपि स्मृतेस्तेनैव स्मरणात् दृष्टवेदलिङ्गाया इव प्रामाण्यायालम् इति संबन्धः। तत्रैतत् स्यात् यांकांचिल्लिङ्गप्रतिबद्धामुपलभ्य कपटप्रक्षेपोऽपि स्यादित्याह—**श्रुत्य[11]र्थाविरोधिन्यः** इति। या श्रुत्यर्थं न बाधते सा प्रमाणम्। कपटप्रक्षेपश्चावश्यं बाधते ॥ ७ ॥

इदानीं दर्शनभेदा अपि तत एवेत्याह **तस्यैव**[1] इति। वेदस्य। **अर्थवादरूपाणि** इति। अर्थार्थो वादः प्रयोजनार्थः, तत्सदृशमर्थवादरूपम्। अर्थवादानर्थवादरूपाणि चेति यङ्लुग्वदेकशेषः। **निश्रिताः**। **प्रवादाः** इति संबन्धः। यदि वेदवाक्याश्रिताः कथं प्रवादाः इत्याह—**स्वविकल्पजाः** इति। न च तेषां वाक्यानां सोऽर्थः। ते तु तथा तान् परिकल्प्य दर्शनभेदान् कल्पितवन्तः। स्वविकल्पसमुत्थाः प्रवादाः। विकल्पानां तु वेदवाक्यानि मूलानीत्यर्थः। एकत्वं द्वैतं चैषामस्तीति एकत्विनो द्वैतिनश्च। **बहुधा** इति। अनेकप्रकाराः।

अर्थवादान् इति। य एते ब्राह्मणे विध्यङ्गभूताः स्तुतिनिन्दापराः ग्रन्थखण्डलकाः सोऽरोदीत् इत्येवमादयः। **अर्थवादप्रकाराणि** इति रूपशब्दार्थमाह। यान्येतानि मन्त्रे स्तूयमानदेवताप्रकाशकानि तेभ्योऽपि ह्युत्थिताः प्रवादाः। **पौरुषयाः** इति। पुरुष-

---

8. A वधनं; B वद्वनं; C वदनं; D वचनं.
9. A om. स्मृतावपि......पठितमिति।
10. A om. अदृष्टवेदलिङ्गाया अपि.
11. A om. श्रुत्यर्थाविरोधिन्यः.

1. Though all the mss. have तस्यैव इति, it should be तस्य इति, because there is no एव in the Kārikā. तस्य must have been in the commentary because its explanation वेदस्य is found in all mss. The omission of it in L. is not justified.

CC0. In Public Domain, Digitizagtion by eGangotri

इति अग्निचयनस्थानोपस्तुत्यर्थोऽर्थवादः, तद्रूपपरिकल्पननिश्रितश्चायमेकान्तत्व-प्रवादः।

'असदसतो निरीहान्निरीहमपदादपदमनुपाख्यादनुपाख्यमवस्तुकादवस्तुकं जायते' इति।

विकल्पसमुत्थितत्वात्। प्रवादाः इति। [2]वस्तुतत्त्वानुविधानात्। अनुपतन्तः अनुगच्छन्तः। पुरुषबुद्धिविकल्पाच्च। एतान्येव वाक्यान्यन्यपराणि, अन्यथा स्वयं कल्पयित्वानेकदर्शनोत्पत्तेः।

'असद्वा इदमग्र आसीत्' (S. B. 6.1.1.1.)

इति ब्राह्मणेऽर्थवादः। किमर्थं इत्याह अग्निचयनस्थानोपस्तुत्यर्थः इति। अग्निचयनस्थानं हि सप्तपुरुषरूपतया कर्तव्यतया विधीयते—

'स वै सप्तपुरुषो वा'

इति चत्वार आत्मानः, त्रयः पक्षपुच्छानीति। ते च पुरुषाः प्राणत्वेन स्तूयन्ते—

'असद्वा इदमग्र आसीत्'। तदाहुः—"किं तदसदासीत्। ऋषयो वाव तेऽग्रे तदसदासीत्।" तदाहुः—'के त ऋषयः' प्राणा वाव ऋषय

इति। यतस्तदसत् सप्तप्राणरूप इति। यथा विवृत्तं सकलसंसाररूपेणावतिष्ठते, सप्तप्राणमयत्वाज्जगतः। ते चासदित्युच्यन्ते प्राणाः। तस्मात् सप्त पुरुषाः ... अनुतिष्ठता सर्वमनुष्ठितं भवति। न चानेन ब्राह्मणग्रन्थेनासन्नाम एकं किंचिद् व्यवस्थाप्यते। किं तु चयनस्तुतिपरमेतत्। न चैतदुभयं शक्नोति कर्तुम्। अत एवार्थवादः। तस्य त्वर्थवादस्य रूपं परिकल्प्यान्यथार्थवत्तां कल्पयित्वायमेकान्तवाद इति। कल्पितं विरचितमेव ग्रन्थं पठति असद् इत्यादि। कारणसधर्मार्हतां कार्यस्याचष्टे असतः इति। सत्तानावेशनाद् ब्रह्मणः। क्रियानावेशादाह—निरीहाद् इति। गुणानाश्रयणादाह—अपदाद् इति। शब्दप्रवृत्तिनिबन्धनाभावाद् अनुपाख्याद् इति। स्वरूपेणानिरूप्यत्वाद् अवस्तुकाद् इति। कार्यमप्यनिष्पन्नत्वात् सत्ताक्रियागुणशब्दस्वरूपनिबन्धनानां नास्पदमनिरूप्यं चेति असन्निरीहमपदमनुपाख्यमवस्तु तज्जायत इति। कथं पुनरयं कार्येषु सद्व्यवहार इति चेद् असदेवेदं सत्त्वेन

---

2. Though all the mss. have वस्तुतत्त्वानुविधानात्, perhaps वस्तुतत्त्वाननुविधानात् would be more suitable.

Dr. Urmila Sharma Collection, Varanasi

"अपूर्वापराभ्यां तु सत्त्वासत्त्वाभ्यामेक आत्मा विभज्यते ।
तत्राद्वये कथं हि स्यात् सोपाख्यनिरुपाख्यता ॥"

इति । तथा

"नासदासीन्नो सदासीत् । तम एव खल्विदमग्र आसीत् ।"

इति ।

इदं फेनो न कश्चिद्वा बुद्बुदो वा न कश्चन ।
मायेयं बत दुष्पारा विपाश्चिदिति पश्यति ॥ क ॥
अन्धो मणिमविन्दत्तमनङ्गुलिरावयत् ।
तमग्रीवः प्रत्यमुञ्चत्तमजिह्वोऽभ्यपूजयत् ॥ ख ॥ (Tai. Ā. 1.11.5.)

कल्पितम् । यदाह—**अपूर्वापराभ्याम्** इति । पूर्वापरयोः कोट्योरसत्त्वम्, मध्ये च सदिति यदि क्रमेण ततः सत्त्वतः सद्व्यवहारः । यतस्त्वपूर्वापराभ्यां युगपद् व्यवस्थिताभ्यां सत्त्वासत्त्वाभ्यामेक आत्मा ब्रह्माख्यो विकल्पते सदसद्रूपेणावतिष्ठते, यतस्तदेवासत्त्वरूपमनतिक्रामद् गवादिरूपेण प्रत्यवभासमानं सद्व्यवहारनिबन्धनमिति । तत्रैतत् स्यात्—एकस्य सत्यतो रूपद्वययोगात् सत्यतः सद्व्यवहारो भविष्यतीत्याह—**तत्राद्वये**[3] इति । अभिन्ने सोपाख्यनिरुपाख्यते विरुद्धे कथं तत्त्वतः स्याताम् । तस्मादनेनैकरूपेण सत्यतो भाव्यम् । तत्रासद्रूपता ब्रह्मण उक्ता तदव्यतिरिक्ता गवादय इति तेऽपि सत्यतोऽसन्त एव । अपरमर्थवादमाह—**नासदासीद्** इति । अयमपि चयनस्तुत्यर्थ एव । चयन एवंरूपत्वात् क्रमेणाग्निनिमित[4] इति । नासदासीदित्येवान्येन रूपेण सद्भावात् । किं पुनस्तदित्याह **तम एव** इति । सर्वेण रूपेण तस्यानवधार्यमाणत्वात् । तस्मादुत्थितं दर्शनमाह—**इदं फेनः** इति । षष्ठिनन्त्रगन्थश्चायं यावद् **अभ्यपूजयत्** इति । दृश्यमानस्य तुच्छतामाह **फेनः** इति । वस्तुसद्भावमात्रं कथितम्, परमार्थतो निष्पन्नं तदपि नास्तीत्याह—**न कश्चित्**[5] इति । **बुद्बुदः** इति । सोऽपि नास्तीत्याह **न कश्चन** इति । किं तर्हीदम्? मायैषा यतो दृश्यमानतयास्ति, परमार्थतो नास्ति । **दुष्पारा** इति । अविद्वद्भिः न खेन पार्यते, सुखेनान्तगमनं क्रियते इति । **विपश्चित्** पण्डितः । **इति पश्यति** । एवं जानाति । **अन्धो मणिम्** इति । मणिव्यवधानं चक्षुष्मतः, चक्षुरादयश्च ते असत्या इति । न प्रकृतेः प्रकृतिपरिणामानाञ्च, न पुरुषस्य

---

3. Though all the mss. have तत्रान्वये, the explanation which follows and the text of the Vṛtti favour तत्राद्वये.

4. ABC °मिनिवृत्त इति ।

5. All the mss. have कचित्, but कश्चित् was obviously the text.

CC0. In Public Domain, Digitizagtion by eGangotri

तथा

आपो वा इदमग्र आसीत्। (S. B. 14.8.6.1.)

इति दर्शपूर्णमासविषयोऽर्थवादः। ततश्चायं प्रवादः।

"प्रज्ञानरूपपाकश्चासंप्रख्यानरूपपाकश्चापां प्राणो रसः।
स खल्वावर्ती चानावर्ती च"

इति। तदेतदेकं सर्वप्रबोधरूपं सर्वप्रभेदरूपतायां समवतिष्ठते। द्वैतिनः खल्वप्याहुः

दर्शनात्मकत्वात्। यतश्चक्षुरन्तरेण मणिव्यवधानमित्याह अन्य[6] (अन्ध?) इति। एवमनङ्गुलिरपि न प्रकृतेः न पुरुषस्य। अनङ्गुलिः तं[7]मणिं सूत्रे ग्रथितवान्। यदाह **आवयद्** इति। वेते रूपम्। एवमग्रीवतापि पूर्ववत्। सोऽग्रीवस्तं मणिं सूत्रे ग्रथितं कण्ठे परिहितवान्, यदाह **प्रत्यमुञ्चद्** इति। अनेकार्थतया धातोः। तमेव मणिं पूर्वोदितेन न्यायेनाविद्यमानजिह्वः स्तुतवान्, यदाह **अभ्यपूजयद्** इति। तदेवमन्धत्वादिभिः सत्त्वविविक्तं व्यवधानादिभिरसत्त्वविविक्तमेकं प्रधानमिति प्रतिपादितम्। **दर्शपूर्णमासविषयः।** अमावास्यापौर्णमासीकर्मविषयः। तत्र हि पुरोडाशार्थं पिष्टपिण्डीकरणाय विरोधः (विधिः?) प्रणयन्ति[8] इति। तस्य स्तावकोऽर्थवादः **आपो वा इदमग्र आसीद्** इति। आपो हि सर्वयोनित्वेन श्रूयन्ते। तस्यान्यार्थतां कल्पयित्वायमेकान्तवादः स्थापितः। **ततश्च** इति। अर्थवादात्। **प्रज्ञानरूपपाकश्च** इति। तासामपां पच्यमानानामेकोंऽशश्चैतन्यरूपेण, प्रज्ञानरूपः पाकोऽस्येति। असम्प्रख्यानरूपः पाकोऽस्य, योऽयं पृथिव्यादिरूपेण। **प्राणो रसः** इति। बलिष्ठः सार इति यावत्। [9]**आवर्तते च** इति। अविदुषां पुनःपुनरावृत्तेः। **अनावर्त्ती च** इति। विदुषामपुनरावृत्तेः। यद्वा शरीराणामावृत्तिरात्मनो नावृत्तिः, नित्यत्वादिति। **तदेतदेकम्**[10] इति। अथमपि यथोक्तभेदो नास्तीत्याह यतस्तदेव सर्वप्रबोधरूपं सर्वपदार्थपरिच्छेदाकारं यत्तत् प्रज्ञानरूपयुक्तं तदेव सर्वप्रभेदरूपतायाम-

---

6. Though all the mss. have 'अन्यः', it cannot be the real text. अनङ्गुलिः is required.

7. All the mss. have कर्मणि but it cannot be the real text. I have, therefore, made a tentative emendation.

8. Vṛ. seems to have had this word in his text of the Vṛtti, but it is not found there now.

9. Though all the Mss. have आवर्तते, symmetry with अनावर्ती which follows and consideration of the text of the Vṛtti, require आवर्ती.

10. L has तदेवं तदेकरूपं in the Vṛtti.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"नित्याश्चानित्याश्च मात्रायोनयः, यासु रूपि
चारूपि च सूक्ष्मं च स्थूलं चेदं भुवनं विषक्तम्"

इति। तथा

उभौ सखायौ सयुजौ सुपर्णौ समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥
इन्द्रियग्रामश्चान्तर्यामी च बुद्धिश्च क्षेत्रज्ञश्चेति।

यथापरे

विवृत्ताविवृत्तं बहुधानकं चैतन्यम्

व्यतिरिक्तैर्गवाद्याकारैः प्रत्यवभासते। यदाह—अवतिष्ठते[11] इति। अतः सर्वस्य तद्रूपानतिक्रमादेकत्वम्। अथवा प्रज्ञानरूपपाक इति विद्यारूपमुक्तम्, असंप्रख्यान इत्यविद्यारूपम्। आवर्तीत्यविद्यारूपमाह, नावर्तीति विद्यारूपम्। तदेवं तदेकरूपमिति नाविद्या विद्यातोऽन्येति, सर्वप्रबोधरूपमिति विद्यारूपमेवेदमनेकशक्तियोगात् सर्वप्रभेदरूपतायां समवतिष्ठते तथा विवृत्तेरिति। द्वैतमधिकृत्याह **नित्याः** इति। यतो द्विविधाः पदार्था एव पठिताः, नित्यास्त्वात्मादयः, अनित्याः पृथिव्यादयः मात्राः। घटादीनां योनयः कारणानि। **यासु** इति। एतत्कार्यजातं द्विविधं **विषक्तं** निबन्धनम् (निबद्धम् ?)। **रूपि च** इति। घटादि। **अरूपि** इति। बुद्ध्यादि। एवं स्थूलं सूक्ष्मं च। उभौ वृक्षं परिषस्वजाते, पक्षिणाविवेति सुपर्णावित्युक्तौ। **सयुजौ** इति। समानयोगौ। येनैवेन्द्रियं विषयेण युज्यते बुद्धिश्च तेनैव पुरुषान्तर्यामिणौ। युजेः सम्पदादिपाठात् अतः स्त्रीलिङ्गे भावे क्विप् सयुग् (युग् ?) इति। **सखायौ** इति। समानख्यानौ। यथेन्द्रियबुद्धी अध्यवस्यतो विषयं तथा पुरुषान्तर्यामिणौ। यतो विषयाकारेणेन्द्रियं परिणमते इन्द्रियवृत्त्या बुद्धिः तत्प्रतिबिंबं पुरुषे उदेतीति समानख्यातियोगः। समानमेकं वृक्षं भोग्यतया विषयं स्वजाते, तत्र प्रवर्तेते। प्रवृत्तिं विभजति एकः[12] **पिप्पलम्** इति। सुबन्तत्वादनेकशाखाविस्तीर्णतया विषय उच्यते। **स्वाद्वत्ति**। तदाकारपरिणामात्। **अनश्नन्** इति। अपरिणममानः। **अभिचाकशीति**। देदीप्यते, चेतयते। तौ पक्षिणावाह—**इन्द्रियग्रामः**[13] इत्यादिना। **अन्तर्यामी** इति। व्याख्यातः। **क्षेत्रज्ञः**। यः सांख्यीयः पुरुषः। एते मन्त्रार्थवादाः द्वैतवादिपरिकल्पनिबन्धनम्। **अथापरे** इति। एतमेव मन्त्रार्थवादमन्यथा परिकल्प्यापरे एकत्वदर्शनं स्थापितवन्तः। सामैव[14] चैतन्यमाहुरिति संबन्धः। अत एव किल तत्

---

11. W, W² M L समवतिष्ठते in the Vṛtti.
12. L अन्यः in the Vṛtti.
13. B om. इन्द्रियग्रामः...व्याख्यातः.
14. B om, मैव...संबन्धः। अ°.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्याहुः

तदेजति तन्नैजति तद्दूरे तद्वन्तिके।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः॥ (Is. Up. 5.)

इति ॥ ८ ॥

यतश्चैते सर्वविकल्पातीत एकस्मिन्नर्थे सर्वशक्तियोगाद् द्रष्टॄणां दर्शनविकल्पाः, तत एव खलु।

प्रकाशमुक्तम्। अपरिणाममिव पुरुष इति दर्शितः। तदेव विवृत्तं बुद्धीन्द्रियशब्दाभ्यामुक्तम्। अविवृत्तं क्षेत्रज्ञान्तर्यामिशब्दाभ्याम्। **बहुधानकम्** इति। धाना बीजानि। तदेवैकं सर्वबीजकम्। यथोक्तामप्याकृतिं तृतीयः स्याद् यदाहुः बहुधानकम् इति। एतमर्थं मन्त्रान्तरेण दर्शयति **तदेजति** इति कम्पनेन सर्वक्रियायुक्तमाह। **तन्नैजति** इति निर्व्यापारमाह। **तद् दूरे** इत्यासत्तिविप्रकर्षावपि तद्विषयौ। **तदन्तरस्य** इति अन्तर्बहीरूपेण च, तत्रैवेति न। **तदु सर्वस्य** इति। उशब्दो निपातः। यदि तर्ह्येते दर्शनभेदाः पुरुषविकल्पानुवर्तिनः कथं तर्ह्यसौ ब्रह्मवादः प्रत्यक्षादनुमानाद्वा गम्योऽर्थवादः स्थापितः। उच्यते—कर्माङ्गभूतेभ्योऽर्थवादेभ्यो द्वैतैकत्वप्रवाद ... द्योतकेभ्यः कर्माङ्गभूतः स हि स्वर्गादौ फले भावयितव्य इतिकर्तव्यतानां करणानां च प्रवर्तका निवर्तकाश्च स्तुतिनिन्दाद्वारेण येऽर्थवादाः तेभ्यो विधिशेषभूतत्वेन न वार्थवादव्यवस्था ज्ञानाङ्गभूतेषु नान्यत् किंचिद् भावयितव्यमस्ति, केवलमात्मा ज्ञातव्य इति विधिः पुनरात्मज्ञाने नान्यद् भावयेदिति, तत्र चात्मनोऽहमिति प्रत्यक्षप्रत्ययमितत्वादात्ममात्रज्ञाने विधेरव्यापार इति एक एवाद्वैत इत्यादिधर्मविषय एवायं न वस्तुतो विधिः, तत्रैवंरूप आत्मा ज्ञातव्य इति आत्मरूपविशेषप्रकाशकेभ्योऽर्थवादेभ्यस्तद्रूपज्ञानविधेस्तद्रूपतावश्यमेवमस्य व्यवस्थाप्यते। सोऽपि दोषो न भवति—यदुच्यते विधौ वेदवाक्यानां प्रामाण्यं न स्वरूपकथने, कथं ब्रह्माद्वैतरूपसिद्धिरिति। यस्त्वयमन्यः असद्वा इदमित्यर्थवादः स सिद्धेर्भेदे। तदनुषङ्गिषु कारेषु अन्ते उपचयार्थमुपन्यस्त इति ॥ ८ ॥

यतश्चैते इति। य एते दर्शनभेदा उपन्यस्ताः। त इति वक्ष्यति। **एकस्मिन्** इति। ब्रह्मणि। किंरूप इत्याह—सर्वविकारातीते[15] इति। **सर्वशक्तियोगाद्** इति अनेकदर्शनविकल्पप्रसवयोनित्वमाह। यतः शक्तिपरिपाकापेक्षया दर्शनविकल्पनिबन्धनम्। **द्रष्टॄणाम्** इति। न वस्त्वेव, ते त्वविद्यावशात् तथा पश्यन्ति। यदाह—**दर्शनविकल्पाः** इति।

---

15. This is supposed to be a quotation from the Vṛtti for the purpose of explanation, but W, W² M L have सर्वविकल्पातीते in the Vṛtti.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सत्या विशुद्धिस्तत्रोक्ता विद्यैवैकपदागमा ।
युक्ता प्रणवरूपेण सर्ववादाविरोधिना ॥ ९ ॥

इहैवैकस्मिन् सर्वरूपे ब्रह्मणि यः परिकल्पः स विरुद्धरूपाभिमतेभ्यः परिकल्पान्तरेभ्यो न भिद्यते। अपि खलु ब्रह्मविद आहुः—

प्रदेशोऽपि ब्रह्मणः सार्वरूप्यमनतिक्रान्तश्चाविकल्पश्च ।

यत एते भिन्नरूपानुपातिनोऽसत्याश्च ततः भ्रमान्निवर्तयितुमभिन्नत्वात् सत्यत्वाच्च विद्यैव वेद उक्ता । तथैव हि पर्याप्नुवन्ति विशुद्धिं कर्तुम् इति ब्रह्मरूपत्वात् । **विशुद्धिः** इति । सर्वपरिकल्पनिवृत्तेः तद्धेतुत्वाद् विद्यैव विशुद्धिरित्युक्ता । **तत्र** इति । वेदे । **विद्यैव** इति । यत् तद् विद्यात्मकं ब्रह्म । तस्याः प्राप्त्युपायमाह **एकपदागमा** इति । एकं पदमागमो यस्याः । ततो हि पदात् सा गम्यते । ततो हि प्राप्यते । तथा हि वेद उक्तम्

ओमि'त्यक्षरमुद्गीथमुपासीत । (Chā. Up. 1.1.1.)

इति । योऽसौ वा प्रणवः स उपास्यः । तदेकं पदम् । तदुपासनया सा प्राप्यते । **युक्ता प्रणवरूपेण** इति । प्रणवस्वभावयुक्ता सा विद्येति, यतः प्रणवो ब्रह्म एव, स एव विद्येति । **सर्ववादाविरोधिना** इति । सर्वशक्तियुक्तेन ।

इहैव इति । इहैवैकस्मिन् ब्रह्मणि यः कश्चिद् दर्शनपरिकल्पः सोऽन्येभ्यो [2]दर्शनान्तरेभ्यो न भिद्यते । सर्वासां विषयमात्राणां सत्यत्वाद् ब्रह्मैव विषय इति विषयाभेदान्न परिकल्पान्तराणि भिद्यन्ते । **विरुद्धरूपाभिमतेभ्यः** इति । विरुद्धरूपास्तेऽभिमताः, केवलमविद्यावशादभिमानमात्रमेतत् । **प्रदेशोऽपि** इति । घटः पटो वा । **सार्वरूप्यम्** इति । सकलपदार्थरूपताम् । **अनतिक्रान्तः** इति । अनतीतः । सर्वरूपाद् ब्रह्मणोऽनन्यत्वात् सर्वरूपः । **अविकल्पश्च** इति । योऽयं प्रदेशस्य प्रदेशान्तरेभ्यो भेदविकल्पः अयमस्मादन्य इति । घट इति पटविलक्षणः सन्नास्ति । **तथा** इति । ब्रह्मवाद एव । **अन्यूनम्** इति । दर्शनान्तराङ्गीकृतैः पदार्थैः । दर्शनान्तरमपि युक्तम्, सर्वेषां सर्वरूपत्वात् । **अविकल्पम्** इति । दर्शनान्तरेभ्यः स्वभावाभेदात् । कथमनुभूयमाना विकल्पा न सन्तीत्याह **विकल्पमिव** इति । अविद्यावशादभिन्नं वस्तु भिन्नमिव पश्यति । **आन्तरः** इति । कर्मात्मा । तत्र प्रणवस्य माहात्म्यमाह **सर्वाभ्यनुज्ञाविषयः** इति । सर्वेषां दर्शनभेदानां यदभ्यनुज्ञानं यथा यथा दर्शनभेदाः कल्पयन्ति तथा तथायमभ्यनुजानाति । **सर्वश्रुतिरूपः** इति । सर्वशब्दस्वभावः, सर्वशब्दरूपेण तस्य विवृत्तेः । **प्रकृतिसर्वनाम** इति ।

---

1. The actual text of the Chā. Up. is etc. ओमित्येतदक्षरं 2. In अन्येभ्यो दर्शनान्तरेभ्यः, either अन्य or अन्तर can be dispensed with, but all the Mss. have both.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तथा

"सर्वं दर्शनमन्यूनमविकल्पं वि[3]कल्पमिवायमान्तरः पुरुषोऽभिमन्यते"

इति। अत्र प्रणवः सर्वाभ्यनुज्ञाविषयः सर्वश्रुतिरूपः प्रकृतिसर्वनाम सर्वदर्शनोदयप्रत्यस्तमययोनिः सर्वविरुद्धार्थोपग्राही सर्वथेदं ब्रह्माभ्यनुजानाति सर्वथा च प्रतिषेधति। न च प्रतिषेधाभ्यनुज्ञयोरस्य प्रवृत्तितत्त्वं विकल्पते। तथा ह्याहुः

तदेतदेकं नैकं च तथोभे नाप्युभे न च।
कर्मस्था विषमं ब्रूयुः सत्त्वस्थाः समदर्शिनः॥

इति॥९॥

प्रकृतित्वेन कल्पितानां प्रधानपरमाण्वादीनां तदभिन्नं रूपम्, यतो भिन्ना अप्यर्थाः सर्वनामार्थाभेदेन स्थिताः। यथा लिङ्गादीनि नपुंसकेऽभेदेन स्थितानीति लिङ्गसर्वनाम नपुंसकम्। स्वरसर्वनामैकश्रुतिः इति। [4]**सर्वदर्शनोदयप्रत्यस्तमययोनिः**। सर्वेषां दर्शनानामुत्पत्तौ योनिः कारणं तद्योग्यतापरिग्रहेण तथा प्रत्यवभासनात्। प्रत्यस्तमयस्य दर्शनभेदनिवृत्तेः तदेव निमित्तम्। यतो भेदानामसत्यतया प्रणवमभिन्नं विवर्तते सर्वदृष्टिः। **सर्वविरुद्ध** इति। प्रधानात् कार्यमव्यतिरिक्तं परमाणुभ्यो व्यतिरिक्तमितीदं दर्शनं विरुद्धम्। तस्य परस्परव्यावृत्तस्याकारस्योपसंग्रहात् स्वरूपदर्शनेन। **सर्वथा** इति। यथा दर्शनभेदा ब्रह्मरूपं विकल्पयन्ति तथा प्रणवोऽभ्यनुजानाति, एतदप्यतः, एतदपि रूपमस्येति। यतः प्रणवो वेदरूपेण विवृत्तः वेदे च सर्वदर्शनविकल्पनिबन्धनमर्थवादाः सन्ति इति। न च ब्रह्मणः प्रणवभेदोऽस्ति, उक्तो ह्ययमर्थः सर्वाभ्यनुज्ञाविषय इति अनेनैव पुनरुपन्यस्तः उत्तररूपप्रतिपादनाय। **प्रतिषेधति** इति। असत्यत्वाद् भेदरूपस्य। यतो भेदरूपप्रतिषेधो वेदात्मतया विवृत्तेन प्रणवेनोक्तः सलिल एवाद्वैत इति। **न च** इति। प्रतिषेध(ध्य?)ाभ्यनुज्ञातव्ययोः नास्त्यन्यत्वम्। **प्रवृत्तितत्त्वम्** इति। विरुद्धयोः प्रतिक्रिययोः(क्रिययोः?)प्रतिपाद्यमानस्य या तात्त्विकी वृत्तिर्न तस्या भेदोऽस्ति। एकेनैवात्मनावस्थानात्। तद्व्यतिरिक्तवस्त्वभावात्। अत्रागममाह—**तदेतदेकम्** इति। ब्रह्म **एकम्** इति एकत्वदर्शनाभ्यनुज्ञानम्। **नैकं च** इति तस्यैव प्रतिषेधः। न [5]च इत्यु-

---

3. L सविकल्पमिव in the Vṛtti.

4. No Ms. cites this portion of the Vṛtti, but according to Vṛṣabha's method, it must have been there because what follows is an explanation of it and Vṛṣabha cites the text before explaining it.

5. AC ins. तथाभेद इति द्वैतदर्शनप्रकल्पितं रूपाभ्यनुज्ञानम्। नास्याभेद इति तस्यैव प्रतिषेधः before न चेत्युत्तरेण संबन्धः। But the inserted portion does not seem to be connected with the text of the Vṛtti.

Dr. Urmila Sharma Collection, Varanasi

विधातुस्तस्य लोकानामङ्गोपाङ्गनिबन्धनाः ।
विद्याभेदाः प्रतायन्ते ज्ञानसंस्कारहेतवः ॥ १० ॥

वेदो हि लोकानां प्रकृतित्वेन चोपदेष्टृत्वेन च विवर्तेषु व्यवस्थासु च विधाता। प्रणव एव वेद इत्येके। स हि सर्वशब्दार्थप्रकृतिरिति। एतस्मिंश्च दर्शने विद्याभेदाः प्रणवात्मतया वेदतत्त्वं नातिक्रामन्ति। तदाहुः—

त्तरेण संबन्धः । **कर्मस्थाः** इति । कर्मणि स्थिताः ये कर्मतः फलमिच्छन्ति, ज्ञानं तु कर्माङ्गमिति ते भेददर्शने स्थित्वा विषमवादिनः । ये त्वसत्यतया कर्मणां तत्परित्यागे ...उपनिषद्विहितज्ञानमुपासिताः ते सत्त्वस्थाः ज्ञानस्थाः समदर्शिनः भेददर्शनतिरस्कारात् । तत्र कर्मस्था विषमं ब्रूयुरित्यनुज्ञानम्, असत्यत्वाच्च **न चेति** तस्य प्रतिषेधः । **सत्त्वस्थाः** समदर्शिनः इत्यभ्यनुज्ञा, असत्यत्वाच्च तस्य **न च** इति प्रतिषेधः ॥ ९ ॥

विधातुः इति । स्रष्टुर्व्यवस्थापयितुश्च। **तस्य** इति। वेदस्य । **लोकानाम्** इति । सर्वस्य जगतः । **अङ्गोपाङ्ग** इति । अङ्गानि व्याकरणादीनि, उपाङ्गानि शकुनज्ञानादीनि । तन्निबन्धनाः तद्धेतुकाः । विद्याया भेदाः विशेषा **प्रतायन्ते** विस्तीर्यन्ते । ज्ञाने हेतवः संस्कारे हेतवश्च **ज्ञानसंस्कारहेतवः** ।

वेदो हि इति । यस्मादयं वेदो ब्रह्माख्यो जगत् सृजति वर्णाश्रमांश्च स्वेषु कर्मसु व्यवस्थापयति । यतोऽयं प्रकृतित्वेन विवर्तेषूत्पत्तिषु लोकस्य विधाता आद्ये व्याख्याने । द्वितीये तु वर्णाश्रमव्यवस्थोपदेशकत्वादुपदेष्टृत्वेन विधाता । कोऽसौ वेदो विधाता इत्याह **प्रणवः** इति। यत्तत् परं ब्रह्मणो रूपम्। **स हि** इति। प्रणवः । सर्वेषां शब्दानामर्थानां च प्रकृतिः कारणम्, सर्वशक्तियोगेन तथा भासनात्। **एतस्मिंश्च** इति। प्रणवो वेद इति दर्शने। सर्वे विद्याविशेषा वेदतत्त्वं वेदरूपं नातिक्रामन्ति, सर्वशब्दस्वरूपत्वात् प्रणवस्य, शब्दात्मिकाश्च विद्याः इति । **तदाहुः** इत्यागममाह । **सर्वा वाचः** इति । वाग्रूपत्वाद्विद्यानां वेदाः (वेदा?)पृथक्[1]त्वात् । यदाह **अनुप्रविष्टाः** इति। **नावेदविद्** इति । वेदान्तर्गतत्वात् शब्दप्रणवः । तज्ज्ञानादेव ब्रह्मज्ञानं भवतीति। **तथा** इति । विध्यादीनपरे वेदमाहुः । विधिः ब्राह्मणम् । तद्धि मन्त्रान् कर्मणि विनियुङ्क्ते इति विधाय[2]कम् । **विधेयो** मन्त्रः, तेन विनियुज्यमानत्वात् । **तर्कः** इति । मीमांसा । प्रणवाङ्गोपाङ्गेभ्यः प्रणवशब्देनोक्तो वेद उच्यते, तस्य यान्यङ्गोपाङ्गानि तेभ्यो विद्याविशेषाः पातञ्जलादयः **प्रभवन्ति** जायन्ते । पुनरङ्गोपाङ्गेभ्यः श्रुतिस्मृतित्रय्यन्तादिभ्यः इति ।

---

1. B om. पृथक्त्वात्.   2. B om. °यकम्...विनियु.

सर्वा वाचो वेदमनुप्रविष्टाः ।
नावेदविन्मनुते ब्रह्म किंचित् ॥

इति । तथा

'विधिर्विधेयस्तर्कश्च वेदः ।'

इति । प्रणवाङ्गोपाङ्गेभ्यश्च श्रुतिस्मृतित्रय्यन्तादिभ्यो विद्याभेदाः प्रभवन्ति सम्यग्ज्ञानहेतवः पुरुषसंस्कारहेतवश्च । ज्ञानात्मकत्वाद् वा पुरुषस्यैव संस्कारहेतवः । वेदाख्यस्य प्रसिद्धस्य ब्रह्मणोऽङ्गेभ्यो ज्यौतिषादिभ्यः शकुनज्ञानादय उपाङ्गेभ्यश्च स्वप्नविपाकयोनिज्ञानादयो विद्याभेदाः प्रसिद्धा लोके ॥ १० ॥

आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः ।
प्रथमं छन्दसामङ्गमाहुर्व्याकरणं बुधाः ॥ ११ ॥

श्रुतिः अर्थवादः, **स्मृतिः** व्याकरणादिका, **त्रय्यन्ताः** उपनिषदः । आदिशब्दाच्छ्लोकादयः, यदुच्यते 'तदप्येते श्लोकाः' इति । अपरे व्याचक्षते प्रणवस्वरूपेभ्यः श्रुत्यादिभ्य इत्येवमेतद्वेदितव्यम् । श्रुतिः प्रणवः, स्मृतिः काचिदङ्गं व्याकरणादिलक्षणा, काचिदुपाङ्गं चिकित्सालक्षणा । त्रय्यन्ताः वेदान्ताः । साङ्गमुपाङ्गं वा । **सम्यग्ज्ञानहेतवः** इति । अभेदज्ञानहेतवः । **पुरुषसंस्कारहेतवः** इति । संस्कारो धर्मः, तदभिव्यक्तिहेतवः । ज्ञानं च संस्कारश्चेति । वृत्तिव्याख्याता षष्ठीसमासमाह **ज्ञानात्मकत्वाद्वा** इति । ज्ञानसंस्कार एव हि पुरुषसंस्कारः । उत्पन्नज्ञानातिशया हि संस्कृता उच्यन्ते इति । **प्रसिद्धस्य** इति । लौकिकीं प्रसिद्धिमास्थाय वेदशब्दार्थस्य व्याख्यां करोति । लोके सार्थवादकस्य सोपनिषत्कस्य ब्राह्मणस्य मन्त्राणां च वेदाख्या । ज्यौतिषाच्छकुनज्ञानम् । अङ्गानि स्मृतानि । उपाङ्गानि स्वप्नविपाको येन ज्ञायते एतत्फल इति तत् **स्वप्नविपाकज्ञानम्** । योनिज्ञानम्, अनेकद्रव्यसंयोगात् विशिष्टप्रामाण्यो(प्राण्यु?)त्पत्तिर्येन ज्ञायते । आदिशब्दाद् योगमालादयः ॥ १० ॥

एवं [1]वेदं तं प्रदर्श्य तदङ्गतया व्याकरणवर्णनमारभते **आसन्नम्** इति । अव्यवहितम् । **तस्य** इति । प्रक्रान्तस्य वेदस्य । **तपसाम्** इति । चान्द्रायणादीनाम्, **उत्तमम्** इति । उत्कृष्टम् । **प्रथमम्** इति । प्रधानम् । **छन्दसाम्** इति । वेदस्य । **अङ्गम्** इति । अवयवः । **आहुः** इत्यागमं दर्शयति । **बुधाः** इति । शिष्टाः ।

शब्दब्रह्मणो हि इति । शब्दरूपेण विवृत्तस्य ब्रह्मणः । यतः स्वरूपसंस्कारः स्वरूपविशेषः स्थानकरणेष्वपि तद्धेतुतया प्रसङ्ग इत्यव्यवच्छिन्नः । **साधुत्वप्रतिपत्त्यर्थः**

---

1. L वेदान्तं.

CC0. In Public Domain, Digitizagtion by eGangotri

तस्य शब्दब्रह्मणो हि यतः स्वरूपसंस्कारः साधुत्वप्रतिपत्त्यर्थः तदासन्नं साक्षादुपकारि। उपकारविशेषकृता ह्यासत्तिः समाख्याता। ऊह्यं चाम्नायान्तरम्। इदमूह्यमिदमनूह्यमिति न्यायादवस्थिते सम्यग्विपरिणतौ लिङ्गवचनादीनां व्याकरणं निबन्धनमिति, आम्नायान्तरप्रतिपत्तिहेतुत्वादासन्नमिति व्यपदिश्यते। तपसामुत्तमं तपः। यानि लोके तपस्त्वेनाभिख्यातानि ब्रह्मचर्याधःशयनोदवासचान्द्रायणादीनि, ये च पवित्रतमाः स्वाध्यायास्तेषामिदं दृष्टादृष्टविशेषफलहेतुत्वादभिख्याततमं तपः।

इति। न विशिष्टोत्पत्तिरत्र संस्कारः, अपि तु प्रकृतिप्रत्ययादिभिर्विभागान्वाख्यानम्। ततोऽपि साधुत्वावसाय इति। **साक्षात्** इति। स्वरूपगतसंस्कारोपसंहाराद(व्य?)वहितोपकारः। **उपकारविशेषकृता हि** इति। लौकिकीमासत्तेः प्रसिद्धिमाह। उपकारविशेषो हि स्वरूपाधानेनाव्यवधानेन च। **ऊह्यं चाम्नायान्तरमस्ति,** अतोऽप्यासन्नम्। ननु मीमांसैवोहे व्याप्रियते, किमत्र व्याकरणस्य इत्याह **इदमूह्यम्** इति। विषयविभागोऽत्र मीमांसया वाक्यार्थनिरूपणद्वारेण क्रियते, न तूह्यमानस्य मन्त्रस्य स्वरूपपरिज्ञानम्। अवस्थिते तु विभागे सम्यग्विपर्ययेण यथापठितलिङ्गा[2]पगमेन न्याय्य(?)लिङ्गवचनोपादाने व्याकरणम्। **आम्नायान्तर** इति। सन्त एवैते वेदखण्डा आलस्यादिना नाम्नाता व्याकरणेनानुमीयन्ते। अतः स्वरूपप्रतिपत्तिहेतुत्वादासन्नं व्याकरणम्। **तपसामुत्तमम्** इति। तपो हि दुःखात्मकम्, पूर्वप्रकृतस्यैव तत्फलो धर्मक्षयहेतुः, (तत्फलं पूर्वकृतस्याधर्मस्य क्षयः) व्याकरणध्ययनाच्च भूयिष्णु(ष्ठं?) दुःखमित्युत्तमं व्याकरणं दुःखहेतुत्वात्तपः। **अभिख्यातानि** इति। प्रसिद्धानि। **ब्रह्मचर्यम्**। मैथुनादिनिवृत्तिः, **अधः**[3]**शायिता** भूमिशयनम्। यथाह गौतमः

"ब्रह्मचर्यं सत्यवचनं सवनेषूदकोपस्पर्शनमार्द्रवस्त्रताधःशायितानाशक इति तपांसि"
(G. Dh. S. 19, 15.)

इति। **उदवासः** इति। उदकवासः। यथा मनुः

ब्रह्मचारी तु योऽश्नीयान्मधुमांसं कथंचन।
स त्रीण्यहान्युपवसेदेकाहं चोदके वसेत्॥ (See Manu. 11.158.)

इति। **चान्द्रायणम्**। इति। चान्द्रमयनम्, वृद्धिह्रासानुगमः चान्द्रायणम्। "श्वोभूतां पौर्णमासीमुपवसेत्" इत्यादिना विधानेन प्रतिपद आरभ्य एकपिण्डाशनोत्कर्षेण पंचदश पूरयित्वा पुनस्तथैव ह्रास इत्येवमादिकः। आदिशब्दात् कृच्छ्रादीनि। **पवित्रतमाः** इति। पुरुषसूक्तादयः। तेऽपि पठ्यमानाः खेदायेति तपस्त्वेनोक्ताः। **तेषामिदम्** इति। व्याकरणम्। **दृष्टादृष्ट** इति। दृष्टफलं लाभः, अदृष्टं मोक्षाख्यः। तद्धेतुत्वेनापि हि

---

2. C °लिङ्गानवगमेन; D °लिङ्गागमेन, 3. W, W² M L अधःशयन.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यस्याक्षरसमाम्नायस्य ज्ञानमात्रेण सर्ववेदपुण्यफलावाप्तिरागमेन स्मर्यते तच्छन्दसां प्रथममङ्गं प्रधानत्वात्। एवं ह्याह

प्रधानं च षट्स्वङ्गेषु व्याकरणं, प्रधाने च कृतो यत्नः फलवान् भवतिऽ इति (M. Bhā. I. p. 1. l. 19) ॥ ११ ॥

प्राप्तरूपविभागाया यो वाचः परमो रसः।
यत्तत् पुण्यतमं ज्योतिस्तस्य मार्गोऽयमाञ्जसः ॥ १२ ॥

अभिन्नात् संहृतक्रमादन्तःसंनिवेशिनः शब्दतत्त्वाद्वर्णपदवाक्यलक्षणं रूपविभागं स्थानादिभेदेन प्राप्ताया वाचः। अभिधेयत्वेन वा गवादिरूपविभागोपग्रहं

ख्याततमम्। अदृष्टफलमागमेन दर्शयति यस्य इति। अक्षरसमाम्नायः प्रत्याहारः, तस्य ज्ञानमात्रेण, किं पुनरष्टाध्याय्याः। सर्वेषां वेदानामध्ययने यत् पुण्यं तस्य यत् फलं तद् भवति। भाष्यकारेण चास्य मतत्वात् प्रामाण्यम्। यदाह स्मर्यते इति। प्रधानम् इति। अपरेषामङ्गानामेतदधीनत्वात् स्वरूपस्य। षट्सु इति। छन्दःशिक्षासूक्त[4]निरुक्तज्यौतिषव्याकरणेषु। फलवान् इति। मतुवत्रातिशायने प्रधानफलत्वेन इति ॥ ११ ॥

प्राप्तरूपविभागायाः इति। प्राप्तो रूपविभागो ययेति प्राप्तरूपविभागा गवादिशब्दाकारेण घटाद्याकारेण वा। वाचः, परमः इति। उत्कृष्टः। पुण्यतमम् इति। मोक्षाख्यफलनिष्पादकत्वात्। ज्योतिः, प्रकाशः...स्वभावत्वात्। मार्गः इति। उपायः। आञ्जसः इति। ऋजुः, लाघवाद् यतोऽस्याविभागप्राप्तिः।

तामविभागावस्थामाह अभिन्नात् इति। गकाराकारादिवर्णभेदाभावात्। भेदाभावाच्च तन्निबन्धनः क्रमो नास्तीत्याह संहृतक्रमात्। अन्तःसंनिवेशिनः इति। न बुद्धिस्थानकरणसंनिवेशिनः, भिन्नत्वात्तस्य। श[1]ब्दतत्त्वाद् इति। शब्दपदात्। वर्णपदवाक्यलक्षणम् इति। विभागभेदाख्यानम्। स्थानादिभेदेन इति। स्थानकरणानुप्रदानभेदेन भेदं प्रतिपद्यते इत्येषा व्याख्या। अथवा प्राप्ताः स्वीकृताः गवादिरूपविभागाः ययेति। तत् कथयति गवादिरूपप्रविभागोपग्रहम् इति। गवादय एव रूपप्रविभागाः परस्परतो विभज्यमानत्वात्, तेषामुपग्रहः स्वीकारः। कथमित्याह अभिधेयत्वेन इति। ते हि विभक्ताः अभिधेयतया स्वीकृताः। सा पुनः कथमित्याह नित्ये[2]न इति।

---

4. One would expect कल्प here instead of सूक्त.

1. B om. शब्दतत्त्वाद् इति...एषा व्याख्या.

2. D om. नित्येन...तृतीयां व्याख्यामाह.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नित्येनार्थसंबन्धेन प्राप्ताया वाचः। वाच एव वा विभागा गवादित्वेनावतिष्ठन्ते। गवादयश्च बाह्यार्थरूपा इव विभागाः पुनः श्रुतिरूपेण[3] परिणमन्ते। तथा एके कार्यकारणभावमेव शब्दार्थयोः संबन्धं मन्यन्ते। एवं ह्याह—

नामैवेदं रूपत्वेन वव्रुते रूपं चेदं नामभावे ऽवतस्थे।
एके तदेकमविभक्तं विभेजुः प्रागिवान्ये भेदरूपं वदन्ति॥ क॥

परमो रसः इति। वाचकत्वादभ्युदयहेतुत्वाच्च व्यवस्थितसाधुभावः शब्दसमूहोऽभिधीयते। एवं ह्याह—

ऋजीषमेतद्वाचो यः संस्कारहीनः शब्दः।

नित्यः शब्दार्थयोः संबन्ध इति वक्ष्यति। तृतीयां [4]व्याख्यामाह **वाच एव** इति। परस्परव्यावृत्ता गवादयः पदार्थरूपविभागाः, ते च तया प्राप्ताः। यत् तथैषार्थरूपेण विवर्तते। यदाह **गवादित्वेनावतिष्ठन्ते** इति। **गवादयश्च** इति। गवादिपदार्थाः बाह्यार्थरूपा इति न ते शब्दाः परमार्थतो बहिः सन्ति। बहिस्तु प्रत्यवभासमाना एवमभिहिताः। **श्रुतिरूपेण** इति। शब्दरूपेण। एतदाह सैव वाग् गवादिपदार्थरूपेण परिणमते। ते च गवादयस्तत्रैव प्रलीना वाग्रूपेण व्यवतिष्ठन्त इति कार्यकारणभावः। शब्दः कारणं गवादयः कार्यम्। गवादयः कारणं शब्दः कार्यमिति। तदेवमुभयोर्गम्यगमकभावः। एतमर्थमागमेन दर्शयति—**नामैवेदम्** इति। नामेति शब्दः। **रूपत्वेन** इति। गवादिपदार्थत्वेन। **वव्रुते** इति। वृतेर्लिटि। विवृत्तमित्यर्थः। **अविभक्तम्** इति। प्रागपि वृत्तेस्तदवस्थितमेव, केवलमविभक्तं भवतीति। **रूपं चेदम्** इति। गवादिपदार्थाः **नामभावः**। इति। शब्दरूपेण प्रतिलब्धा गवादयः शब्दरूपेणावतिष्ठन्त इति एके मन्यन्ते। **प्रागिवान्ये** इति। केचित्तु शब्दार्थयोरविवृत्तिकालेऽपि विवेकेनावस्थानं मन्यन्ते। द्वयोरपि रूपसंहृतक्रमयोः क्रमवद्रूपेण विवृत्तिरिति। विभक्तमिति चैतत् परस्मात् तत्त्वतो न भिद्यत इत्येवैतदेव। **परमः** इति। प्रधानम्। **रसः** सारः। योऽयं साधुः शब्दः स प्रधानं रसः। तदुभयमाह—**वाचकत्वाद्** इति। अर्थप्रत्यायनेन प्राधान्यमाह। **अभ्युदयहेतुत्वाद्** इति। धर्माभिव्यक्तेः। अनेन सारत्वमाह। **व्यवस्थितसाधुभावः** इति। साधुत्वान्नित्यमेव व्यवस्थितमित्याह। यदपेक्षया साधुत्वं तदाह **ऋजीषम्** इति। निष्पीडितरसस्याग्रे रसः सारः। यदन्यत् किट्टं स ऋजीषः। ये वाचोऽपभ्रंशाः किट्टस्थानीयाः ऋजीषाः, साधवस्तु सार इति।

---

3. W, W[2] M L श्रुतिरूपत्वेन.

4. B ins. here शब्दतत्त्वाद् इति...एषा व्याख्या.

Dr. Urmila Sharma Collection, Varanasi

इति। यत्तत् पुण्यतमं ज्योतिः। इह त्रीणि ज्योतींषि त्रयः प्रकाशाः स्वरूपपररूपयोरवद्योतकाः। तद्यथा।

"योऽयं जातवेदा यश्च पुरुषेष्वान्तरः प्रकाशो यश्च प्रकाशाप्रकाशयोः प्रकाशयिता शब्दाख्यः प्रकाशः तत्रैतत् सर्वमुपनिवद्धं यावत् स्थास्नु चरिष्णु च।"

इति। तस्य मार्गोऽयमाञ्जसः। सामान्यविशेषवद्धि लक्षणं लक्षणप्रपञ्चाभ्यां शब्दब्रह्मणः कृत्स्नस्य लघुनोपायेन समधिगमनिमित्तम्। उपदेशं चान्तरेण संस्कारवति निरपभ्रंशे शब्दब्रह्मणि लब्धप्रतिष्ठानां शिष्टानामनुमानम्। शिष्टज्ञानाच्च पृषोदरप्रकाराणां शिष्टप्रयोगत्वात् साधुत्वप्रतिपादने निमित्तं व्याकरणम्। तथा चोक्तम्।

"शब्दार्थसंवन्धनिमित्ततत्त्वं वाच्याविशेषेऽपि च साध्वसाधून्।
साधुप्रयोगानुमितांश्च शिष्टान्न वेद यो व्याकरणं न वेद" ॥ ख ॥ १२ ॥

पुण्यतमम् इति। अन्येभ्यः पुण्येभ्योऽतिशयमाख्यातुं प्रकाशान्तराणि दर्शयति **त्रयः प्रकाशाः** इत्यादिना। **जातवेदाः** अग्निः तमोऽपनयनादात्मानं परं च प्रकाशयति। **आन्तरो** बुद्धिः। सा बाह्यान् घटादीन् प्रकाशयति, आत्मानं च, स्वयं विदितत्वात्। **प्रकाशाप्रकाशयोः** इति। प्रकाशानामेषां त्रयाणाम्, अप्रकाशानां च घटादीनाम्। यतोऽस्य प्रकर्षः। **उपनिवद्धम्**। शब्देन द्योतनात्। **स्थास्नु** पृथिव्यादि, **चरिष्णु** मनुष्यादि। **तस्य मार्गोऽयम्** इति। मार्गः उपायः। **आञ्जसो** लाघवादित्युक्तः। तल्लाघवमाह **सामान्यविशेषवद्धि** इति। **समधिगमनिमित्तम्** इति संबन्धः। प्रतिपदपाठोऽतिगुरुः। सामान्यं विशेषश्च यत्र विवेते तदेवमुच्यते। उत्सर्गापवादविधिप्रतिषेधनिपातनातिदेशस्थान्यादेशलिङ्गनियमैः सप्तभिः सामान्यविशेषप्रकारैः। **लक्षणप्रपञ्चाभ्याम्** इति। ध्रुवमपाये इति लक्षणम्, उत्तरः प्रपञ्चः। **कृत्स्नस्य ब्रह्मणः** इति। शब्दराशेः। एवं तदन्वाख्यातानां व्याकरणमुपायः। अनन्वाख्यातानामपीति दर्शयति **उपदेशं चान्तरेण** इति। न चाष्टाध्यायीमधीते संस्कृतांश्च शब्दान् प्रयुङ्क्ते शिष्ट इत्यनुमीयते। अनुमानं चेदमष्टाध्यायीन एवेति। किं तैरनुमितैरित्याह **शिष्टज्ञानाच्च** इति। तैर्य उपदिष्टाः लक्षणेन नान्वाख्याताः पृषोदरप्रकाराः ते तत्प्रयुक्तत्वात् साधव इति ज्ञायन्ते। एवं पारम्पर्यात् तेषां व्याकरणं साधुत्वप्रतिपत्तौ लघुरुपायः। शब्दार्थसंबन्धाः निमित्तं चेति द्वन्द्वः। निमित्तं शब्दप्रवृत्तिनिमित्तम्। एषां तत्त्वमविपरीतं रूपम्। **वाच्याविशेषेऽपि** इति। एकस्मिन्नेवार्थे एक एव शब्दः साध्वसाधुतां प्रतिपद्यते। यथा सास्नादिमति गोणीशब्दो जात्यादिनिमित्तेनासाधुः, आवपनादिनिमित्तसाधर्म्यात् साधुः। **साधुप्रयोगानुमितान्** इति। यथोक्तप्रकारेण। **न वेद** इति। यो व्याकरणं न जानाति स एतत् सर्वं न जानातीति ॥ १२ ॥

---

5. Though all the Mss. have उपनिबन्धनम्, it would not be quite correct. So the text of the Vṛtti has been adopted,

CC0. In Public Domain, Digitizagtion by eGangotri

अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् ।
तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते ॥ १३ ॥

अर्थस्य प्रवृत्तितत्त्वं विवक्षा, न तु वस्तुरूपतया सत्त्वमसत्त्वं वा। विवक्षा हि योग्यशब्दनिबन्धना। योग्यं हि शब्दं प्रयोक्ता विवक्षाप्रापितसंनिधानेष्वभिधेयेषु प्रत्यर्थमुपादत्ते। तद्यथोपलिप्समानः प्रतिविषयं योग्यमेवेन्द्रियमुपलब्धौ प्रणिधत्ते।

अपर आह–अर्थस्य प्रवृत्तौ तत्त्वं व्यवहारे यन्निमित्तम्। यदा हि निमित्तान्निमित्तवत्स्वर्थेषु निमित्तस्वरूपः प्रत्यय उत्पद्यते तदार्थेन व्यवहर्तुं शक्यते, न तु

अर्थप्रवृत्तितत्त्वानाम् इति। अर्थस्य प्रवृत्तिर्व्यापारः, तस्य तत्त्वानि। अर्थश्च प्रवृत्तिश्चेति वा द्वन्द्वः। अर्थो द्रव्यं, प्रवृत्तिः क्रिया, तयोस्तत्त्वानि, तेषां शब्दो **निबन्धनम्**। **तत्त्वावबोधः** इति, साधुत्वावबोधः। स नास्ति व्याकरणमन्तरेण। व्यवहार एव नास्तीति कथयति यतो व्यवहारः शब्दाधीनः शब्दश्च व्याकरणायत्त इति।

प्रवृत्तितत्त्वम् इति शब्दार्थस्य व्यवहारे तत्त्वम्। किं पुनस्तत्। विवक्षा। अर्था यावन्न विवक्षायामारूढमात्मानमुपदर्शयन्ति न तावत्तैः[1] शाब्दो व्यवहारः। विवक्षेति तदारूढ आकार उच्यते। तदव्यतिरेकात्। **न वस्तुरूपतया** इति। बहीरूपतया। **सत्त्वम्** इति। विद्यमानस्यापि विवक्षामनारूढस्याव्यवहार्यत्वात्। **असत्त्वम्** इति। असतो विवक्षाप्रापितसन्निधानस्य व्यवहार्यत्वात्। सा हि वस्तुतो बहिः सत्त्वमसत्त्वं वानपेक्ष्य व्यवहारस्य प्रवृत्तिनिवृत्तिकारणम्। **शब्दा एव निबन्धम्** इति व्याचष्टे **विवक्षा** इति। **योग्यशब्दनिबन्धना** इति। योग्यस्तद्विवक्षाप्रतिपादनसमर्थः शब्दः तस्य निबन्धनं विवक्षाशब्दार्थः। ननु विवक्षा शब्दार्थः, तत्किं योग्यशब्दनिबन्धनत्वेनेत्याह **योग्यं हि** इति। एतदुक्तं भवति। ये तेऽर्थाः प्रतिपाद्यास्ते विवक्षातो न व्यतिरिक्ताः, अतो विवक्षैव सत्ययोग्यशब्दनिबन्धना, तया च विवक्षया तेऽर्थाः सन्निधाप्यन्ते प्रकल्प्यन्ते। **प्रत्यर्थम्** इति। अर्थमर्थं प्रतीति। नियतविषयतां शब्दस्य योग्यतालक्षणसंबन्धवशादाह **तद् यथा** इति। इन्द्रियाणामपौरुषेयीत्युपलब्धिमिच्छन् शक्तिव्यपेक्षयैवेन्द्रियापदेशेनावृत्त्या स **प्रणिधत्ते** नियुङ्क्ते। तथा शब्दमपि। व्याख्यान्तरमाह **अर्थस्य प्रवृत्तौ व्यवहारे** इति। यथा सोऽर्थो व्यवहारे पदमवतारयति तत्तस्य तत्त्वम्। यदाह **यन्निमित्तम्** इति। या एता व्यक्तयो भिन्ना यावज्जात्या नोपरज्यन्ते न तावदिदं तदिति परिच्छिन्नेन रूपेण व्यवहार्याः। तद् दर्शयति **निमित्तात्** इति। गोत्वादिकात्। **निमित्तवत्सु** इति। जातिमत्सु पिण्डेषु। **निमित्तस्व[2]रूपः** इति। जातिरूपानुकारी।

---

1. C तावत् तैः शब्दैः व्य°.   2. AD निमित्तसरूप इति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संसर्गिरूपान्तरविवेके कैवल्यविषयो व्यवहारो विद्यते। तदेवं जातिषु प्राप्तस्वरूपत्वादभिधानानां सामान्यस्य शब्दनिबन्धनत्वमास्थीयते।

व्यवहारे वा तत्त्वं संसर्गः। विच्छिन्नरूपेष्विवात्यन्तसंसृष्टेषु पदार्थेषु प्रत्यवभासमानेषु व्यवहारो वाक्यनिबन्धनः। न हि संसर्गदर्शनप्रत्यस्तमये कश्चिदपि पदार्थगतव्यवहारो व्यवतिष्ठते।

अपरोऽर्थः। केवलं वस्तु त्यदादीनां वस्तूपलक्षणानां विषयमात्रम्। तस्य प्रवृत्तितत्त्वं संसर्गः। संसृष्टो हि क्रियासु गुणभावेन प्रधानभावेन चोपादीयते।

तद्रूपेण ह्यर्थेन व्यवहारः इति। तदभावे व्यवहाराभावमाह **न तु** इति। **संसर्गि** इति। जातिरूपोपरागाभावे। **कैवल्यविषयः** इति। जात्युपधानरहितशुद्धवस्तुविषयः। स्वलक्षणस्यावाच्यत्वात्। **जातिषु** इति। तत्र पदन्यासमकृत्वा न स्वलक्षणेषु शब्दाः प्रवर्तन्ते इति तत्रैषां स्वरूपप्रतिलंभः। स्वरूपप्रतिलब्धौ ह्येषां प्रतिपादकत्वम्। तच्च जातिमन्तरेण नास्तीति। **शब्दनिबन्धनत्वम्** इति। सामान्यं शब्दानां निबन्धनं तद्द्वारेण प्रवृत्तिरिति। व्याख्यान्तरमाह **संसर्गः** इति। संसर्गानुपहितस्यार्थस्याशक्यव्यवहारत्वात् स एव तत्त्वम्। स हि क्रियाकारकयोः परस्परात्मानुप्रवेशलक्षणः। अर्थो हि साध्यसाधनभेदाद् द्विविधः। शेषस्य साधनान्तर्भूतत्वात्। तत्र नामपदान्यनुप्रविष्टरूपाण्येव साधनानि प्रतिपादयन्ति। आख्यातपदान्यनुप्रविष्टसाधनामेव क्रियाम्। परस्परानुप्रवेशमन्तरेणानयोः स्वरूपापहारात्। स चेदृशः संसर्गः प्रतिपदमेव व्यवस्थापितः। पदान्तरप्रयोगस्तु क्रियासाधनयोराश्रयविशेषोपसंहाराय। अप्रतिपाद्यमानास्तान् पदार्थान् संसृष्टानपि विच्छिन्नानिव पश्यन्ति। यदाह **विच्छिन्नरूपेषु** इति। **प्रत्यवभासमानेषु** इति संबन्धः। **अत्यन्तसंसृष्टेषु** इति। क्वचिद्विधानपूर्वकः संसर्गः। स तु पदार्थेषु नास्तीत्यत्यन्तग्रहणम्। क्रियाकारककलापस्यैकेनाभिधानात्। एतदुक्तं भवति। प्रतिपदार्थं संसर्गो व्यवस्थित एव। न त्वसौ लौकिकस्य प्रवृत्तिनिवृत्तिलक्षणस्य व्यवहारस्याश्रयविशेषोपसं[3]हारमन्तरेण निमित्तं भवति। यदाह **वाक्यनिबन्धनः** [इति]। **न हि** इति। गतमेवार्थं व्यतिरेकेण कथयति। **संसर्गदर्शनप्रत्यस्तमये** आश्रयविशेषावच्छिन्नक्रियासाधनसंसर्गाभावे। **पदार्थगतः** इति। सामान्यमात्रसंसर्गः। व्याख्यान्तरमाह **केवलम्** इति। क्रियानालीढम्। **वस्तु** इति। नामपदवाच्यम्। **त्यदादीनाम्** इति सर्वनामोपलक्षणम्। **सत्त्व[4]लक्षणानाम्** इति। सत्त्वं द्रव्यं तल्लक्ष्यत एभिरिति।

वस्तूपलक्षणं यत्र सर्वनाम ... (Vāk. III. भू. द्र. 3.)

---

3. D om. उपसंहारमन्तरेण...आश्रयविशेष.

4. W, W^2 M L वस्तूपलक्षणानां in the Vṛtti.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथवा प्रवृत्तिर्जन्मादिक्रिया आख्यातपदनिबन्धना। तस्याः प्रवृत्तिरिति समाख्यातायास्तत्त्वं साध्यत्वं साधनाकाङ्क्षता क्रमरूपोपग्रहः कालाभिव्यक्तिहेतुत्वम्। अपरस्त्वर्थः सत्त्वमात्रं त्रिष्वपि कालेषु स्वभावसिद्धमभिधेयत्वेन प्रत्यस्तमितक्रमरूपं नामपदनिबन्धनम्।

अथवार्थप्रवृत्तेः किं तत्त्वम्। अर्थरूपाकारः प्रत्ययात्मा बाह्येषु वस्तुषु प्रत्यस्तः। स च शब्दनिबन्धनः।

इति द्रव्यलक्षणम्। अत एव **विषयमात्रम्**। विशेषस्याप्रतिपादनेन। तदनेन द्रव्यपर्यायतामर्थशब्दस्याचष्टे। **तस्य** इति। द्रव्यसंसर्गः क्रियासाधनभावापत्तिः। न हि वस्तुमात्रं क्रियोपयोगमगच्छद् व्यवहाराङ्गम्। यदाह **संसृष्टो हि** इति। **गुणभावेन** इति। अप्राधान्येन। यथा एधाः पचन्ति इत्येधानामप्राधान्यम्, पाकार्थत्वेन। **प्रधानभावेन** इति। यथा 'ओदनं पचति' इति ओ[5]दनार्थत्वात् पाकस्यौदनः प्रधानम्। **अथवा** इति। द्रव्याश्रयेण व्याख्यान्तरमाह। **जन्मादिक्रिया** इति। षड् भावविकाराः। प्रवृत्तिर्व्यापारः क्रियेति पर्यायाः। **समाख्यातायाः** इति। प्रसिद्धायाः। श्लोके वा प्रवृत्तिरिति व्याख्यातायाः। **साध्यत्वम्** इति। निष्पाद्यत्वम्, परायत्तात्मलाभता तत्त्वम्। अत एव साधनान्याकाङ्क्षति। एतदस्यास्तत्त्वम्। **क्रमरूपोपग्रहः** पूर्वापरीभूतानेकावयवता। **कालाभिव्यक्तिहेतुत्वम्** इति। कालवाचिभिरेव शब्दैर्भवत्यादिभिः क्रियायां प्रतिपाद्यमानायां कालो व्यज्यते। अतीतादिभ्यस्तु नामपदेभ्यः कालप्रतीतिः धातुवाच्यादेवान्यत्रार्थादिति केचित्। सत्त्वव्यक्तिरत्रोपात्ता, अतीतादिभिः कालाभिधानमेवेति। अर्थस्तु न सामानाधिकरण्यवैयधिकरण्याभ्यां प्रवृत्तेर्विशेषणमव्यभिचारादिति पृथक् तस्यार्थमाह **सत्त्वमात्रम्** इति। द्रव्यमात्रम्। **त्रिष्वपि** इति। भूतादिषु। **स्वभावसिद्धम्** इति। निष्पन्नम्। अत एव साधनानि नापेक्षते, यदाह स्वभावसिद्धम् इति। तत्र चौदनं पचतीति निष्पद्यमानतौदनस्य, अत एव निर्वर्त्यं कर्मोच्यत इति आह **अभिधेयत्वेन** इति। न रूपतया स्वभावसिद्धता, अपि तु शब्दार्थतया। ओदनादयश्च शब्दा निष्पन्नरूपं द्रव्यं प्रतिपादयन्ति। विशिष्टक्रियापदसन्निधाने तु साधनताप्रतीतिः। अतश्चैतदेवं यदोदनं पचतीति निष्पद्यमानता प्रतीयते। **प्रत्यस्तमित** इति। सिद्धरूपत्वादेव प्रत्यस्तमितत्वं क्रियायास्तु साध्यमानत्वात् क्रमरूपता युज्यते। **नामपदनिबन्धनम्** इति। तत्त्वस्य शब्दनिबन्धनत्वमाह। तदेवं शब्दैर्व्यवहारोपग्रहः कथितः। **अथवा** इति तत्पुरुषमाश्रयति। व्यवह्रियमाणस्यार्थस्य किं तत्त्वम्, किं रूपमित्याह **प्रत्ययात्मा** इति। बुद्धिस्वरूपम्। **बाह्येषु** इति। बुद्धिरेवोपदर्शितबाह्यरूपाकारा तेषु प्रत्यस्तेत्युच्यते। बाह्यत्वेन ग्रहणं न बाह्यं

---

5. ACD om. ओदनार्थत्वात्.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्त्वाववोधः शब्दानाम् । शब्दस्य तत्त्वमवैकल्यम् । अनपगतसंस्कारं साधुस्वरूपम् । तद्धयस्याविकलम् । अन्ये तु तत्प्रयुयुक्षया प्रयुज्यमाना विकला स्युरपभ्रंशाः इति ॥ १३ ॥

तद् द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते ॥ १४ ॥

शब्दपूर्वं हि शब्दस्वरूपस्याभेदतत्त्व[1]ज्ञाने क्रमसंहारेण योगं लभते । साधुप्रयोगाच्चाभिव्यक्तधर्मविशेषो महान्तं शब्दात्मानमभिसंभवन् वैकरण्यं प्राप्नोति ।

वस्त्वस्तीति । सति बाह्येऽर्थे तन्निबन्धना विवक्षा पूर्वत्र तत्त्वमित्युक्ता, सम्प्रति बुद्धिरेवेति विशेषः । **अवैकल्यम्** इति । परिपूर्णता । **अनपगतसंस्कारम्**, प्रकृतिप्रत्ययविभागादिसंस्कारानपगमात् । किं तदित्याह **साधुस्वरूपम्** इति । संस्कृतं रूपमिति यावत् । **तद्धि** इति । साधुरूपम् । **अविकलम्** इति । संस्कारस्य परिपूर्णत्वात्तत्र । **अन्ये** इति । अपभ्रंशाः । ते हि संस्कारभ्रंशाद् विकलाः ॥ १३ ॥

तद् इति । व्याकरणम् । **द्वारम्** इति । उपायः । **अपवर्गस्य** मुक्तेः । **वाङ्मलानाम्** इति । वाचो मलस्थानीया अपभ्रंशाः । **चिकित्सितम्** इति । अपनयहेतुः । **पवित्रम्** इति । पूयन्तेऽनेन सर्वविद्या इति पवित्रम् । यदाह **सर्वविद्यानाम्** इति । **अधिविद्यम्** इति । विद्यां विद्यां प्रति, वीप्सायामिति । (इति वीप्सायाम्?)

'अव्ययम्' (P. 2. 1. 6)

इति समासः । **प्रकाशते** द्योतते ।

शब्दपूर्वं हि इति । साधुशब्दप्रयोगज्ञानपूर्वकम् । **योगं लभते** । परां वा प्रकृतिं प्रतिपद्यते इत्यनेन संबन्धः । यतः साधूनां प्रयोगाद् ज्ञानाद्वा सर्वम[2]वाप्यते । ज्ञानस्योपायतामाह **अभेदतत्त्वज्ञाने** इति । शब्दस्य स्वरूपं यत् तत्स्वरूपं तत्र यो भेदः तस्यासत्यतया तत्त्वाभेदज्ञान इति । **क्रमसंहारेण** इति । भेदविषयत्वात् क्रमस्य तत्र क्रमवर्णानुगमनं न पश्यति ततश्चासत्यभिन्नविषयव्यासङ्गाभावे एकवस्तूपसंहृतान्तःकरणतो योगं लभते । प्रयोगस्योपाय(ता?)माह **साधुप्रयोगाच्च** इति । शास्त्रपूर्वकात् प्रयोगात् । **अभिव्यक्तधर्मविशेषः** इति । विशिष्टधर्मानुग्रहात् । **महान्तम्** इति । योऽसौ महान् शब्दवृषभः । तदाह **शब्दात्मानम्** इति । महान् परशब्दो ब्रह्माख्यः, यदधिकृत्योक्तम्

'महो देवो मर्त्यान् आविवेश ।' (R. V. 4. 58. 3.)

---

1. W, W² L अभेदतत्त्वज्ञः. 2. CD प्रयोगज्ञानाभ्यां सर्वं वा उच्यते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सोऽव्यतिकीर्णां वागवस्थामधिगम्य वाग्विकाराणां प्रकृतिं प्रतिभामनुपरैति। तस्माच्च सत्तानुगुण्यमात्रात्प्रतिभाख्याच्छब्दपूर्वयोगभावनाभ्यासाक्षेपात्प्रत्यस्तमित-सर्वविकारोल्लेखमात्रां परां प्रकृतिं प्रतिपद्यते। वाङ्मलानां चिकित्सितम्। आयुर्वेद इव शारीराणां दोषाणाम्। व्याकरणज्ञो हि प्रत्यवायहेतुभूतानपभ्रंशान्न प्रयुङ्क्ते।

ज्ञानं हि तस्य शरणम्

इत्युक्तम्। पवित्रं सर्वविद्यानाम्। तन्निमित्तत्वात् संस्कारस्य। शब्दोपगृहीतो हि विद्यास्वर्थः। उक्तं च—

यदधीतमविज्ञातं निगदेनैव शब्द्यते।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥ (क) ॥ (Ni. 1.18.)

इति। **अभिसंभवन्** इति। प्राप्नुवन्नेकीभवन्, तदनुप्रवेशात्। अत एवेन्द्रियनिवृत्तिरित्याह **वैकरण्यम्** इति। अपगतेन्द्रियताम्। एकस्या एव ब्रह्मप्राप्तेः क्रममिदानीं वर्णयन्नाह **अव्यवकीर्णाम्** इति। प्रथमतस्तां वाचमपभ्रंशेन संभिन्नां जानाति। ततोऽस्य भेदस्यासत्यतया भेदैरव्यतरेकं जानाति। **वाग्विकारणाम्** इति। य एते गवादयः शब्दाः संगतत्र.मवर्णभेदेन परस्परतश्च भिन्नाः। **प्रकृतिम्** इति। कारणम्। किं तदित्याह **प्रतिभाम्** इति। येयं समस्तशब्दार्थकारणभूता बुद्धिः यां पश्यन्तीत्याहुः। यतः शब्दाः प्राणवृत्तिमनुपतन्ति। ताम् **अनुपरैति** अनुगच्छति। **सत्तानुगुण्यमात्राद्** इति। सत्तया सर्वभावविकारं लक्षयति। तेषामुत्पत्तावनुगुणत्वात्, प्रतिभायास्तद्रूपतया सर्वपदार्थानामेकरूपत्वात् सत्ताव्यपदेशः। तेषां च सा योनिरिति। **शब्द[3]पूर्वकः** इति। शब्दपूर्वो योगो व्याख्यातः। तस्य भावना प्राप्तिः। तस्याः आवृत्तिरभ्यासः, तस्याक्षेपः स्वकार्योत्पादनाभिमुख्यम्। **प्रत्यस्तमित** इति। विकाराख्या उल्लेखाः, ते परस्मिन् ब्रह्मणि प्रत्यस्तमिताः, तस्य सर्वविकल्पातीतत्वात्। **पराम्** इति। उत्कृष्टाम्। **प्रकृतिम्**, सर्वयोनिं प्रतिपद्यते तयैवेति (तामेवैति?)। तदेवं वाग्विकारं प्रतिभायामुपसंहरति। तामपि चास्मिन् ब्रह्मणीति। तस्मात् साधुत्वज्ञानपूर्वकत्वाद् अपवर्गस्य साधुत्वज्ञानस्य च व्याकरणहेतुकत्वात् द्वारमित्युक्तम्। वाचो मलमपभ्रंशाः। ते च व्याकरणं ज्ञात्वा न प्रयुज्यन्ते इत्यपनीताः। अपनयो हि चिकित्सा। यथा शारीरकाणां दोषाणामपनयनमायुर्वेदेन। ज्ञात्वा न प्रयुङ्क्ते, तेन ततोऽसौ रक्षित इति। **तन्निमित्तत्वाद्** इति। यतो व्याकरणे सर्वे शब्दाः प्रकृत्यादिविभागेनान्वाख्यायन्ते। सर्वविद्यासु ह्यर्थशब्दोपादानेन वा संस्कृतात् सम्यगर्थावसाय इत्यानर्थक्यं विद्यानां स्यादिति सूच्यन्तेऽनेन सर्वविद्या इति। **पवित्रम्**। यदाह **शब्दोपगृहीतः** इति। **यदधीतम्** इत्यभ्युदयहेतुतया पवित्रतामाह।

---

3. L शब्दपूर्वं in the Vṛtti.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तथायमप्रमत्तगीतः श्लोकः।

आपः पवित्रं परमं पृथिव्यामपां पवित्रं परमं च मन्त्राः।
तेषां च सामर्ग्यजुषां पवित्रं महर्षयो व्याकरणं निराहुः ॥ (ख) ॥

[4]अतश्च अधिविद्यं प्रकाशते। सर्वो हि प्रायेण स्वस्यां विद्यायां व्याकरणमनुगच्छति, अपभ्रंशप्रयोगेण च नियतमपत्रपते ॥ १४ ॥

यथार्थजातयः सर्वाः शब्दाकृतिनिबन्धनाः।
तथैव लोके विद्यानामेषा विद्या परायणम् ॥ १५ ॥
इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ॥ १६ ॥

अविज्ञातम् इति। अविज्ञातसंस्कारम्। **निगदेनैव** इति। संपाठमात्रेण। **शब्द्यते,** न प्रकृत्यादिविभागज्ञानेन। **तज्ज्वलति** इति। ज्वलनं स्वकार्यकरणम्। **अनग्नाविव** इति। यथा काष्ठादि ज्वलनसमर्थमप्यग्निनानुपगृहीतं [5]न ज्वलति तथा सा विद्याभ्युदयकार्यकरणसमर्थापि व्याकरणेनानुपगृहीता न स्वकार्यं करोति। शास्त्रपूर्वके हि प्रयोगेऽभ्युदयः स्मर्यते। **तथायम्** इति प्रामाण्यं दर्शयति। अप्रमत्ताः शिष्टाः, तैः पठित इति। **आपः** इति। यतोऽशुचीनामद्भिः शौचं स्मृतम्। तदद्भिः पूर्व इति। [6]**परमं** प्रधानम्, अन्येषामपि शौचहेतूनामद्भिरेव शौचात्। **अपाम्** इति निर्धारणे षष्ठी। तासामपि मन्त्रैः संस्कृतानां मन्त्राः **पवित्रम्**। मन्त्रत्वे सामादीनामुपादानात् ताननुवदति **सामर्ग्यजुषाम्** इति। यत एते व्याकरणेनानुगृहीताः फलदाः। शास्त्रपूर्वके प्रयोगेऽभ्युदय इति। **अतश्च** इति। यतस्तत् पवित्रम्। **प्रायेण** इति। **अधिविद्यम्** इति व्याचष्टे **सर्वो हि** इति। सर्वास्वेव च विद्यासु पुरुषप्रमादादिसंभवात् प्रकृत्यादिविभागविज्ञानमन्तरेण स्वजनितपरिहारार्थं व्याकरणमपेक्षितमिति ॥ १४ ॥

यथार्थजातयः इति। अभिधानपक्षेऽर्थसमवेता या जातयः। **शब्दाकृतिनिबन्धनाः** इति। शब्दजातिनिबन्धनाः तत्प्रतिपाद्यतया। तद्वत् सर्वा विद्या व्याकरणाधीनाः। तदधीनत्वादर्थप्रतिपत्तेरिति साम्यम्। यदाह **परायणम्** इति। शरणम् इति यावत् ॥ १५ ॥

इदं व्याकरणम्। **आद्यं** प्रथमम्। **पदस्थानम्** इति। पदं स्थानम्। **सिद्धिः** मोक्षः, तस्य या अन्तरालावस्थाः तास्तत्प्राप्तौ सोपानतुल्यत्वात् सोपानानि। तेषां

---

4. L om. अतश्च in the Vṛtti. 5. A °नुपगृहीतेन.

6. Though all the Mss. have परं, it is obviously a citation of the Vṛtti where the text is परमं.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्रातीतविपर्यासः केवलामनुपश्यति ।
छन्दस्यश्छन्दसां योनिमात्मा छन्दोमयीं तनुम् ।। १७ ।।

प्रत्यस्तमितभेदाया यद्वाचो रूपमुत्तमम् ।
यदस्मिन्नेव तमसि ज्योतिः शुद्धं विवर्तते ।। १८ ।।

वैकृतं समतिक्रान्ता मूर्तिव्यापारदर्शनम् ।
व्यतीत्यालोकतमसी प्रकाशं यमुपासते ।। १९ ।।

विभागाः पर्वाणि । तत्र च व्याकरणं प्रथमं पर्व, यतोऽस्माद्वागधिगमः । ततस्तदुपासनं ततो ब्रह्माधिगमः इति । [1]मुमुक्षूणाम् इति । मोक्षेच्छूनाम् । अजिह्मा इति । अपक्रान्तजिह्मत्वेऽपि .... प्राप्तिर्नवा । राजपद्धतिः इति । राजमार्गः ।। १६ ।।

अत्र इति । व्याकरणे । अतीतविपर्यासः इति । शब्दविपर्यासपूर्वकोऽर्थविपर्यासः । तं च शब्दविपर्यासमत्येति व्याकरणात् । केवलाम् इति । अपभ्रंशविविक्ताम् । अनुपश्यतीत्येनेन संबन्धः । छन्दस्यः इति । छन्दसां समूहः । समूहार्थो औपसंख्यानिकस्तद्धितः । ओ श्रावय इति चतुरक्षरम्, ये यजामहे इति पञ्चाक्षरम्, अस्तु श्रौषट् इति चतुरक्षरम्, यज इति द्व्यक्षरम्, द्व्यक्षरो वषट्कारः, एष वै सप्तदशाक्षरः छन्दस्यः । एतदाह—छन्दस्यः आत्मा व्याकरणादपगतशब्दार्थविपर्यासः छन्दोमयीं तनुं परमं वेदरूपं पश्यतीति ।। १७ ।।

प्रत्यस्तमितभेदायाः इति । परिशुद्धं वाचो यद्रूपम् । यद् इति । तदेव रूपमाह । यदस्मिन्नेव तमसि इति संदृश्यमानतामाह । सत्येवैतस्मिन् प्रतिबन्धके तदुपमर्देन । ज्योतिः शुद्धं विवर्तते, परिणमत इति । यद्वा शुद्धमपि ब्रह्माविद्यावशाज्ज्योतिरात्मना शब्दात्मना विवर्तते, शब्दात्मकत्वाज्जगतः इत्युत्तरार्धेन विविक्तरूपत्वमुक्तम् । अथवा अस्मिन्नेव शरीरे, तमसि, इत्यज्ञानरूपे । ज्योतिः शुद्धम् इति । चैतन्यमाह । चैतन्यरूपेणेति विवर्तते । ब्रह्माधिगम्यते इति वक्ष्यति, तत्सर्वेषूत्तरश्लोकेषु संबन्धनीयम् ।। १८ ।।

वैकृतम् इति । विकृतौ भवम् । किं तदित्याह मूर्तिव्यापारदर्शनम् (इति) । मूर्त्याः क्रियायाश्च दर्शनम्, अनुभवः, तं ये समतिक्रान्ताः । असत्यत्वाद् भेददर्शनस्याभेददर्शनेन व्यवस्थिता योगिन इत्यर्थः । तदेतेन विषयभूतविकारप्रत्यस्तमय उक्तः ।

---

1. This appears to be a citation from Bhartṛhari's text for the purpose of explanation, but the actual text everywhere is मोक्षमाणानां Did Vṛsabha have मुमुक्षूणाम् ?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यत्र वाचो निमित्तानि चिह्नानीवाक्षरस्मृतेः ।
शब्दपूर्वेण योगेन भासन्ते प्रतिबिम्बवत् ॥ २० ॥
अथर्वणामङ्गिरसां साम्नामृग्यजुषस्य च ।
यस्मिन्नुच्चावचा वर्णाः पृथक्स्थितिपरिग्रहाः ॥ २१ ॥
यदेकं प्रक्रियाभेदैर्बहुधा प्रविभज्यते ।
तद् व्याकरणमागम्य परं ब्रह्माधिगम्यते ॥ २२ ॥
नित्याः शब्दार्थसंबन्धास्तत्राम्नाता महर्षिभिः ।
सूत्राणां सानुतन्त्राणां भाष्याणां च प्रणेतृभिः ॥ २३ ॥

व्यतीत्य इति । परित्यज्य । आलोकतमसी इति । विद्याविद्ये । तदनेनान्तरो भेददर्शनाभाव उक्तः । प्रकाशम् इति । परं ब्रह्म । उपासते । भावयन्ति ॥ १९ ॥

वाचः इति । गवादिशब्दानाम् । निमित्तानि इति । कारणानि । भासन्ते । चिह्नानीव इति । यथाक्षरस्मृतेः चिह्नानि लिप्यक्षराणि सिंहाकृत्यादीनि वा । यतस्तद्दर्शनादक्षरस्मरणम्, तथा वाचो निमित्तान्युत्कीर्णानीव भासन्ते । कथमभिन्ने भिन्नानां निमित्तानां भासनम् इत्याह प्रतिबिम्बवत् इति । यथानेकतालसालादिरूपं भिन्नमभिन्ने आदर्शे[1] प्रतिबिम्बधर्मेणाभासते । शब्दपूर्वेण इति । ते हि योगिनः पूर्वोक्तशब्दपूर्वेण योगेन तामभिन्नां वाचमुपासीनास्तानि निमित्तानि प्रतिबिंबधर्मेण पश्यन्ति ॥ २० ॥

अथर्वणाम् इति । चतुर्णां वेदानाम् । अङ्गिरसामित्युपनिषदेकदेशस्य नाम । उच्चावचाः इति । नानाजातीयाः । पृथक् इति । असंकरणेन । पृथक् स्थितिः परिग्रहः स्वीकारो येषामिति । एतदाह-नानाजातीयवर्णप्रतिबिम्बपरिग्रहेण यः स्थित इति ॥ २१ ॥

प्रक्रियाभेदैः इति । बन्धमोक्षव्यवस्थाभिः, 'सांख्यबौद्धादिभिर्वा[1] । बहुधा इति । प्रधानं विज्ञानम्, इति । प्रविभज्यते । अन्यथान्यथा व्यवस्थाप्यते । तद् ब्रह्माधिगम्यते इति पूर्वैः चतुर्भिः श्लोकैः संबन्धः । व्याकरणमागम्य[2] इति । व्याकरणमवबुध्य । तेन व्याकरणं मोक्षप्रयोजनमिति ॥ २२ ॥

एवं व्याकरणप्रयोजनमभिधाय शास्त्रव्यवस्थाकथनद्वारेण तेनास्य प्रकरणस्य संबन्धार्थमुपोद्घातं करोति नित्याः इति । यतः शब्दार्थसंबन्धाः तत्र व्याकरणे, नित्याः समाम्नाताः । महर्षिभिः इति । शिष्टैः । तस्मात्तेषामनुगमाय प्रकरणमेत-

---

1. D om. आदर्शे...पूर्वोक्तशब्दपूर्वेण.
2. D °मधिगम्य.

1. D om. सांख्यबौद्धादिभिर्वा ।

Dr. Urmila Sharma Collection, Varanasi

नित्यः शब्दो नित्योऽर्थो नित्यः संबन्ध इत्येषा शास्त्रव्यवस्था। तत्र हि शब्द इत्यनेन शब्दाकृतिरभिधीयते। एवं ह्याह

आकृतिनित्यत्वान्नित्यः शब्दः

इति। आकृतिप्रयुक्तं चेदं शास्त्रम्। तथा हि

"आकृत्युपदेशात् सिद्धम्" (Vā. on M. Bhā. पस्पशाह्निक)

इत्याह। सा चेयमाकृतिः शब्दत्वसामान्यविशेषादन्या। शब्दत्वं हि विरुद्धैकार्थसमवायिनीभिराकृतिभिः सर्वाभिरविरुद्धैकार्थसमवायम्। शब्दाकृतिविशेषा हि

दिति। शिष्टानाह। सूत्राणां प्रणेतृभिः। पाणिन्यादिभिः। सानुतन्त्राणाम् इति। अनुतन्त्रम्, वार्तिकम्। भाष्याणाम् चूर्ण्यादीनाम्।

ननु शब्दार्थाः शिष्टैर्व्याकरणेषु समाम्नाताः। तदनुगमेनापि संबन्धः कथित एव। तत्र किमिति तैर्नित्यता व्याख्याता, किमर्थं वेहानुगम्यत इत्याह शास्त्रव्यवस्था इति। नासत्येषां नित्यत्वे शास्त्रं व्यवतिष्ठते इति। तेन नित्यत्वं शास्त्रव्यवस्थाहेतुः। शब्दाकृतिः इति। या एता वृक्षशब्दादिषु वृक्षशब्दत्वादिजातयः ताः शब्दशब्देनोपात्ताः, न शब्दत्वमेवेति वक्ष्यति। शब्दस्वलक्षणानि परिच्छिद्यमानोदयव्ययानि कथं नित्यानि स्युः। स्वलक्षणानि च न वाचकानि, सामान्यमेव वाचकमिति जातिः शब्दः। एवं ह्याह इत्यागममाह। आकृतिप्रयुक्तम् इति व्याकरणमप्येवं प्रवृत्तमित्याह। आकृत्या प्रयुक्तं प्रेरितमात्माभिधानम् यत आकृतिमभिधेयामङ्गीकृत्य शास्त्रं प्रयुक्तम्। अतः शब्दशब्दोऽप्याकृतिमाहेति। व्यक्त्यभिधाने उदात्तादिभिन्नव्यक्त्यग्रहणप्रसङ्गे चोदिते

'आकृतिग्रहणात् सिद्धम्। अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति'

(M. Bhā. पस्पशाह्निक.)

इत्युक्तम्। आकृतिरपि वृक्षशब्दे शब्दत्वगुणत्ववृक्षशब्दत्वलक्षणा सम्भवतीत्यवच्छेदनायाह सा चेयम् इति। शब्दत्वं यत् सर्वशब्दानुगतं गुणत्वादन्यद् व्यावृत्तं ततोऽन्या। यदाह शब्दत्वाद् इति। गुणत्वं त्वनभिधायकं प्रतीतमेव, रूपादिष्वपि समवायात्। तत्र युक्तिमभिधातुकामः शब्दत्ववृक्षशब्दत्व[3]योर्भेदं प्रतिपादयति शब्दत्वं हि विरुद्धैकार्थसमवायिनीभिः इति। विरुद्ध एकस्मिन्नर्थे समवायो यासां गोशब्दवृक्षशब्दत्वादीनामेकत्रासमवायात्। अविरुद्धैकार्थसमवायम् इति। गोशब्दत्वादिभिः शब्दत्वस्याविरुद्धः समवायः। तस्य गोशब्दत्वादीनां चैकत्र समवायात्। यस्य चैकत्र समानकालनियतं सन्निधानमसन्निधानं च तयोर्भेदः। वृक्षशब्दे च वृक्षशब्दत्वं सन्निधीयते न गोत्वमिति। यदि च शब्दरूपेण वृक्षशब्दो वाचकः तस्य सर्वशब्देषु भावादभिधानसङ्करः स्यात्।

---

1. ABCD °दिभिः नव्यः°.

2. Vṛṣabha seems to have had the reading शब्दत्वात् सामा° in the Vṛtti.

3. D °वृक्षशब्दयोर्भे°.

CC0. In Public Domain, Digitizagtion by eGangotri

वृक्षशब्दत्वादयः सति वस्तुसंप्रमोहे निमित्तसरूपतामापन्ना अभिव्यक्ताः शब्दा इत्यपदिश्यन्ते। यथा हि घटे द्रव्यत्वपृथिवीत्वघटत्वादीनामविरुद्धः समवायस्तथा वृक्षशब्देऽपि गुणत्वशब्दत्ववृक्षशब्दत्वादीनामाकृतिविविशेषाणामविरुद्धः समवायः।

ननु च व्यवस्थितावयवेषु घटादिष्ववयवी सामान्यविशेषाभिव्यक्तिहेतुः। अनवस्थितावयवास्तु शब्दव्यक्तिविशेषाः। 'तैस्तु[4]क्रमजन्मभिरयुगपत्कालैरव्यपदेश्यरूपैरवयवैरविद्यमानानेकसमवायिकारणं शब्दान्तरमारब्धुं न शक्यते, यत्राकृति-

---

स च न दृष्ट इति। यदाह—**शब्दाकृतिविशेषाः** इति। वृक्षशब्दत्वादयो हि शब्दत्वव्याप्यैकदेशवृत्तित्वात् स्वाभिधेयप्रतिनियता विशेषाः। **वस्तुसंप्रमोहे** इति। जात्युपरागरहितं वस्तु वस्तुमात्रतया सर्वशक्तीनां तुल्यतया परस्परविच्छेदाभावेऽवधारणाभावात् संप्रमुग्धमिव। **निमित्तसरूपताम्** इति। जात्यादिरूपतामापन्ना हि जात्युपरागाद् इयत्तया[5] अभिव्यज्यन्ते। **अभिव्यक्ताः** इति। स्वाश्रयेणाभिव्यक्ताः व्यवहाराङ्गं जातयः। एतदाह—गृहीता जातयो व्यक्तिरूपां त्यजन्ति न रूपरक्ता अभिन्नशब्दप्रत्ययोत्पत्तिसमर्था भवन्ति। यदाह—**शब्दा इत्यपदिश्यन्ते** इति। कथं पुनर्भिन्नयोरेकाश्रयत्वमित्याह **यथा घटे** इति।

ननु च इति दृष्टान्तस्य वैषम्यमाह। **व्यवस्थितावयवेषु** इति। यौगपद्येन तेऽवयवा व्यवस्थिताः एव घटाख्यमवयविद्रव्यमारभन्ते। तत्र जातीनां समवायात् स जात्यभिव्यक्तिहेतुराश्रय इति। **शब्दव्यक्तिविशेषाः** इति। वृक्षशब्दादयः। तेषामवयवाः अनवस्थिताः। तामनवस्थितिमाह **क्रमजन्मभिः** इति। क्रमवत्त्वात् स्थानकरणाभिघातानामुत्पत्तिः क्रमवती। उत्पन्नानां स्थितौ यौगपद्यं स्यादित्याह **अयुगपत्कालैः** इति। [6]उत्पन्नानन्तरं प्रध्वंसित्वादयुगपत्कालैः। तेषामपि प्रामाण्यकल्पो भेद इति। गवादिशब्दाभिव्यक्तिसामर्थ्याभावाद् **अव्यपदेश्यैः**। अतश्च न प्रत्येकं शक्यते शब्दान्तरमारब्धुम्। अविद्यमानानेकावयवत्वात् चावयवा[7]नाम्। **अविद्यमान** इति। अविद्यमानमनेकं समवायिकारणमस्य। यौगपद्याभावात् क्षणानाम्। यत्र समवायो जातीनां संभाव्येत। शब्दत्वस्य कथमभिव्यक्तिरित्याह **शब्दत्वं तु** इति। एकवर्णावयविशब्दव्युत्पत्तेः। **तद्वच्च** इति। यदि शब्दत्व-देकवर्णावयवसमाप्तिराकृतिविशेषस्य वृक्षशब्दत्वस्य प्रतिज्ञायते। **वृक्षादिशब्दविशेषाकारावग्रहा** इति। तदाकारपरिच्छेदिता। **बुद्धिः प्राप्नोति**ति संबन्धः।

---

4. WL तैस्त्वसमजन्मभिः W^2 तैस्तु समंजन्मभिः M तेषु कतयजन्मभिः.
5. ACD °रागद्यत्तयाभिव्यज्यते.
6. उत्पत्त्यनन्तरं would be better, but no Ms. has it.
7. अवयविनाम् would be better, but no Ms. has it.

Dr. Urmila Sharma Collection, Varanasi

विशेषाणां समवायः स्यात्। शब्दत्वं तु प्रत्यवयवं परिसमाप्यते। तद्वच्चाकृतिविशेषस्य प्रत्यवयवं परिसमाप्तिर्यदि प्रतिज्ञायते अवयवमात्रोच्चारणे वृक्षादिशब्दविशेषाकारावग्रहा वकारादिष्ववयवेषूच्चारितेषु केवलेष्वपि बुद्धिः प्राप्नोति। नैष दोषः। यथैवोत्क्षेपणभ्रमणरेचनादीनामुत्पन्नापवर्गिणां कर्मविशेषाणां न च तावदवयवैः कर्मान्तरमवयविस्थानीयं किंचिदारभ्यते। न च कर्मत्वव्यतिरेकेणोत्क्षेपणत्वादीनां जातिविशेषाणां समवायो नाभ्युपगम्यते। न च कर्मावयवमात्रदर्शने भ्रमणादिकर्मविशेषाकारावग्रहाः प्रत्यया उत्पद्यन्ते।

तानि ह्यवयवकर्माणि विशिष्टप्रयत्नहेतुकानि प्रत्यवयवमुत्क्षेपणत्वादीनामाधारत्वमपि प्रतिपद्यमानानि दुरवधारत्वाद्विशेषस्य विशिष्टजातिविषयां बुद्धिं न प्रकल्पयन्ति।

अवग्रहो हि परिच्छेदः। **अवयवमात्रोच्चारणे** इति, तदुच्चारणानन्तरम्। तदनेन बुद्धेः कालविशेष उपात्तः, न तु विषय इति, विषयमाह **वकारादिषु** इति। एकैकस्मिन् वर्णे वर्णान्तरापेक्षे। **उत्पन्नापवर्गिणाम्** इति। एकैकः कर्मक्षणः परमाणुमात्रयोर्देशयोः पूर्वापरयोस्त्यागोपादानसमर्थः परेण देशेन संयोगाख्यं कार्यमभिनिर्वर्त्य निवर्तते। संयोगिविरोधित्वात् कर्मणः। न चाविनष्टे पूर्वस्मिन् कर्मभागे उत्तरस्योत्पत्तिः। अतस्ते कर्मांशा उत्पन्नापवर्गिण इति कर्मान्तरसहितैः कर्मविशेषैर्नान्यत् कर्मारभ्यते। **अवयविस्थानीयम्** इति। अवयविशब्दो द्रव्ये प्रतीत इति स्थानीयग्रहणम्। **न च कर्मत्वव्यतिरेकेण** इति। कर्मत्वसामान्यादन्ये उत्क्षेपणत्वादयः तेषु कर्मक्षणेषु समवेता अभ्युपगम्यन्त एव वैशेषिकैः। यदाह **न च नाभ्युपगम्यते** इति। **न च कर्मावयव** इति। उत्क्षेपणकर्मणो यः प्रथमः क्षणः भ्रमणादनवधार्यमाणविशेषः स जातिसमवायेऽपि तदनुरूपप्रत्ययोत्पादनेऽसमर्थः परमाणुमात्रे देशे आक्रमणमात्रस्याविशेषात्। न च नास्ति विशेषः। विशिष्टमिहावच्छिन्नसंयोगविभागकार्यजनकत्वात् कस्यचित् कर्मविशेषाकारावग्रह इति। उत्क्षिप्यते एकद्रव्यमित्येकाकारः प्रत्ययः। तदेव स्फुटीकरोति **तानि हि** इति। **अवयवकर्माणि** इति। उत्क्षेपणादीनि। **विशिष्टप्रयत्नहेतुकानि** इति। अन्य[8] एव हि प्रयत्न उत्क्षेपणस्य जनकोऽन्यो भ्रमणस्य। उत्क्षिपामि भ्रमामि इति भिन्नप्रत्ययजननात्। ते च प्रयत्ना भिद्यमाना अवश्यमेव स्वकार्येषु उत्क्षेपणादिषु भेदं जनयन्ति। स तु सूक्ष्मत्वाद् दुरवधारः। यद्यपि कर्मणां गुरुत्वादीन्यविशेषहेतवः उत्क्षेपणादीनां तु प्रस्तुतत्वात् प्रयत्नग्रहणम्। **प्रत्यवयवम्** इति। एकैकः क्षणो यत उत्पन्नमात्र एव स्वजातिसमवाययोर्निष्ठा संबन्धयोस्तुल्यकालत्वात्। **दुरवधारत्वात्** इति। परमाणुमात्रदेशाक्रमणेन सारूप्यात् स न विभेदो दुरवधारः। **विशिष्टजातिविषयाम्**

---

8. BCD अत एव.

विशिष्टापि हि सा बुद्धिरनभिव्यंक्तोपव्यंजनविशेषपरिग्रहा। तस्मात्तया व्यवहर्तुं न शक्यते। यदा तु दिग्विशेषावधिपरिच्छिन्नसंयोगविभागकार्याणां कर्मणां प्रबन्धः क्रमेणोपलब्धो भवति, अथ जातिविशेषोपाधियुक्ता व्यवहाराः [9]प्रकल्पन्ते। तथा वृक्षादिष्वपि शब्देषु [10]प्रयत्नविशेषजनिता विशिष्टा वकारादयो दुर्ज्ञानविशेषा यद्यपि प्रत्यवयवं शब्दजातिविशेषाभिव्यक्तिं कुर्वन्ति तथाप्यपरिगृहीतानेकोपव्यंजनविशेषाभिस्ताभिः शब्दाकृतिभिर्व्यवहर्तुं न शक्यते। यदा त्ववयवप्रबन्धः क्रमेणोपलब्धो भवति, अथ जातिविशेषोपाधियुक्ता [9]व्यवहारा अवतिष्ठन्ते।

इति। विशिष्टजात्युपहितकर्मविषयामिति वक्तव्ये जातिवशात्तथाप्रत्ययोत्पत्तेः तस्या एव विषयत्वमुक्तम्। विशिष्टजातिः उत्क्षेपणत्वम्। ननु हेतुभूतप्रयत्नभेदात् कर्मक्षणभेदः, तद्भेदात्तदालंबनबुद्धिभेदः, किमाह दुरवधारत्वादित्याह **विशिष्टा हि** इति। **अनभिव्यक्त** इति। तस्या जातेर्यान्युपव्यंजनानि कर्मव्यक्तयः तासां यो विशेषो भेदः तस्य परिग्रहः स्वीकारः अनभिव्यक्तोऽस्फुटः उपव्यञ्जनव्यक्तिविशेषपरिग्रहो यस्यामिति। तद्वशात् साप्यस्फुटा। अन्यविविक्तेनाकारेण(न ?)प्रकाशते। **व्यवहर्तुम्** इति। सत्यं विशिष्टैव सा बुद्धिरुत्पन्नेत्येत्र न तया व्यवहारः यावत् प्रत्यवमर्शप्रत्ययो निश्चयात्मको नास्ति। स च सारूप्यात् भ्रान्तस्य न भवतीति न तया व्यवह्रियते। ततस्तदुपाधिकोऽपि सामान्यविशेषो नावधार्यते। कथं तर्हि भेदप्रत्यय इत्याह **यदा तु** इति। दिग्विशेषः ऊर्ध्वाधःसंज्ञकः स एवात्रधिः मर्यादा तया परिच्छिन्नौ विभक्तौ परविशिष्टौ संयोगविभागौ कार्यं येषां कर्मणामिति। यदा अधोदिक्संबन्धं विभागमूर्ध्वदिक्संबन्धं च संयोगमारभते उत्क्षेपणमिति तदास्य........। एवमवक्षेपणादयः तदन्यदिगवधिकौ संयोगविभागौ जनयन्तः। अतस्तेषां **कर्मणां** यदा **प्रबन्ध उपलब्धो भवति**। **अथ** इति। अनन्तरम्। जातिविशेषा उत्क्षेपणत्वादयः तैरुपाधिभिर्विशेषणैर्युक्ताः विशेष्येषु व्यवहाराः[11] प्रवर्तन्ते उत्क्षेपणम् इति। **प्रयत्नविशेषजनिताः** इति। वृक्षशब्दमुच्चारयामीत्यतो वृक[12]शब्दोच्चारणेऽन्यः प्रयत्नः। तत्र यद्यपि वृक्षवृकशब्दयोर्वकारस्य भेदो नोपलभ्यते हेतुभेदात्तु भेदोऽस्त्येव। स तु दुरवधारः। यदाह **दुर्ज्ञानविशेषाः** इति। तदनवधारणाच्च वकारमात्रश्रुतौ विशिष्टजातिपरिच्छेदो नास्ति। यदाह **यद्यपि** इति। **जातिविशेषाभिव्यक्तिम्** इति। एकैकस्मिन्नवयवे वृकशब्दत्वस्य समवायात्। किमर्थं तर्हि ताभिस्त-

---

9. M om. प्रकल्पन्ते to व्यवहाराः. 10. WL यत्नवि°.

11. All the Mss. have व्यवहारः प्रवर्तते, but the plural is required here as the Vṛtti has the plural.

12. ACDL वृक्षवृकशब्दोच्चारणे.

न चावश्यं शास्त्रान्तरे परिदृष्टा जात्यभिव्यक्तिप्रक्रिया वैयाकरणैः परिगृह्यते। न ह्यभिव्यक्तिमतामभिव्यञ्जकैराश्रितानामेवाभिव्यक्तिर्नियमेन क्रियते। तत्रासत्यपि शब्दव्यक्तिसमवाये शब्दाकृतेर्वर्णावयवावग्रहप्राप्तसंस्काराभिः क्रमोत्पन्नाभिर्बुद्धिभिः पूर्वमगृहीता अव्यक्तं गृहीता वा संस्कृतेऽन्तःकरणे चरमविज्ञानेनाकृतिः परिच्छिद्यते।

थापि न व्यवह्रियन्त इत्याह **तथापि** इति। यद्यपि जातिविशेषा एवाभिव्यक्ताः प्रतिवर्णं तथापि न ताभिर्व्यवहर्तुं शक्यते। यतोऽनेकस्योपव्यंजनस्य वकारादेर्यो विशेषो भेदो विशिष्टप्रयत्नकृतः अनेको वा उपव्यञ्जनविशेषः प्रयत्नादिकृतः सोऽपरिगृहीतोऽपरिच्छिन्न आसामित्युपव्यंञ्जयाया अप्यस्फुटता ग्रहणस्य एतदाह—अभिव्यंजके सारूप्याद् भ्रान्तप्रत्ययसंभवेन प्रत्यवमर्शप्रत्ययाभावाद् व्यवहाराशक्यतेति। अपरे व्याचक्षते—अपरिगृहीतोऽपरिच्छिन्न अनेक उपव्यंजनविशेषो वर्णभागो यासामिति। यत एकदा एकं वर्णभागं गृह्णाति न सर्वं सकृदिति। तत उपव्यञ्जनो(न?)जातिविशेषपरिच्छेद इति न ताभिराकृतिर्व्यवहारः। **अवयवप्रबन्धः** इति। तदुत्तरोत्तरवर्णोपलब्धिः यदा भवति। **अथ** इति। अनन्तरम्। जातिनिमित्ता व्यवहाराः प्रवर्तन्ते।

ननु चैतानि सामान्यानि अनुगताकारप्रत्ययप्रबन्धसत्त्वानि तदभावे कथमवयवेषु सन्तीति कल्प्यन्ते। अभिव्यक्तिश्च सत एव तद्विषयज्ञानोत्पादनम्। तदभावात् सापि नास्ति। कर्मावयवेष्वेतत् तुल्यम्। तैरेवाभ्युपगम इति चेत्, केयं युक्तिः। यद्वा समानजातीयकर्मक्षणेषु प्रबन्धप्रवृत्तेषूत्तरज्ञानस्य स्फुटतरस्योत्पत्तिः संभाव्यते। न तु भिन्नस्वभावेषु वर्णेषु। न च वृक्षशब्दादिशब्दत्वमपरमङ्गीकृतं संसर्गवादिभिरित्याह **न चावश्यम्** इति। **जात्यभिव्यक्तिप्रक्रिया** इति। जातेरभिव्यक्तिप्रकारः। यथा जातयो व्यज्यन्ते। तदाह **न हि** इति। **अभिव्यक्तिमताम्** इति। जातिव्यतिरेकेणान्यानभिव्यङ्ग्यान् निरूपयति। यथा घटादीनामभिव्यञ्जकैः प्रदीपालोकेन्द्रियादिभिरनाश्रितानामेवाभिव्यक्तिः क्रियते। न हि घटः प्रदीपालोके आ[13]श्रयः इन्द्रिये वा। **नियमेन** इति। कदाचिदाश्रितानाम् यथा प्रदीपे स्वाश्रितस्य रूपस्य। अनेनाश्रितस्य रूपस्य। अतोऽनाश्रितैः वृक्षशब्दत्वजातिर्वर्णेषु भागेषु स्वतन्त्रैव स्फोटावस्थितेति। यदाह **तत्रासत्यपि** इति। कथं पुनरसमवेता तेषु तैरभिव्यज्यते इत्याह **वर्णावयवावग्रहप्राप्तसंस्काराभिः** इति। अवर्णावयवाः(वर्णावयवाः?)अकारादिभागाः तेषामवग्रहः परिच्छेदः तैः प्राप्तः संस्कारो याभिः बुद्धिभिः पूर्वपूर्ववर्णावयवबुद्धय उत्तरोत्तरवर्णावयवबुद्धिभि(बुद्धीर्वि?)र्विशिष्टा जनयन्तीति संस्कृताः। **पूर्वमगृहीता** इति। पूर्वपूर्ववर्णावयवबुद्धिभिर्न गृह्यते। ग्रहणे ह्युत्तरोत्तर-

---

13. आश्रितः would be better, but no Ms. has it.

CC0. In Public Domain, Digitizagtion by eGangotri

तस्यास्तु शब्दाकृतेरस्तित्वं शुक[14]शारिकामनुष्यादिप्रयुक्तेषु वृक्षादिशब्दव्यक्तिविशेषेषु स एवायमिति प्रत्ययाभेदादनुमीयते।

यैरप्ययमाकृतिव्यवहारो नाभ्युपगम्यते तेऽप्यनेकध्वनिव्यङ्ग्यां नित्यां शब्दव्यक्तिमेव प्रतिजानते। शब्दव्यक्तिगतस्तु कैश्चिद्वर्णभेदोऽभ्युपगम्यते।

वर्णोच्चारणानर्थक्यम्। **अव्यक्त गृहीता वा** इति। ग्रहणानुकूलत्वात्तेषां प्रत्ययानां ग्रहणमिव मन्यते। वर्णपरिच्छेदात् कृतं तैराकृतेर्ग्रहणम्। आरूपमात्रग्रहणाद्वा अव्यक्तग्रहणम्। अन्यथा विशेषाभावादेकत्वाच्चेतरत्र न स्यात्। **संस्कृतेऽन्तःकरणे** इति। बुद्धिरेवान्तःकरणम्, सैव पूर्वपूर्वाभिः संस्क्रियते। **चरमविज्ञानेन** इति। प्रतिलब्धसर्वसंस्कारत्वात्तस्य चरमविज्ञानेन तस्याः परिच्छेद इति। अत्रानेकं दर्शनम्। केचिन्मन्यन्ते —अन्त्यवर्णालम्बनं यज्ज्ञानं तत्पूर्ववर्णज्ञानाहितसंस्कारसहायं जातेर्ग्राहकम्। यद्यपि च तद्वर्णालम्बनत्वाद् वर्णाकारं तथाप्यभिव्यङ्ग्याभिव्यंजकयोरपि जातिवर्णयोर्ग्राहकम्। यथा रूपग्राहकज्ञानं रूपालोकनयोः। अपरे मन्यन्ते—अन्त्यवर्णज्ञानसहितैः सर्वैरेव पूर्वपूर्ववर्णज्ञानैः संस्कारारंभः। अन्त्यवर्णविज्ञानानन्तरं तु जातिग्राहकं ज्ञानमुत्पद्यते। यदुच्यते **चरमविज्ञानेन** इति। सर्ववर्णग्राहकज्ञानादनन्तरं ज्ञानं चरमविज्ञानम्। अत्रापि दर्शनद्वयम्। केचिन्मन्यन्ते—श्रोतृ(त्र?)विज्ञानमेतदिति। अन्ये तु मानसं ज्ञानं तदिति। तस्यां च सत्तायां प्रमाणमाह **तस्या[15]स्तु** इति। **शुकमनुष्यादिप्रयुक्तेषु** इति। यद्यपि मनुष्यप्रयुक्तेष्वपि वृक्षशब्देषु स्वलक्षणभेदोऽस्ति स्फुटतरस्तु शुकमनुष्ययोरिति स उदाहृतः। स एवायमिति प्रत्ययाभेदोऽन्यत्रापि जातिव्यवस्थाहेतुरिति। **यैरपि** इति। एवं मन्यते आकृतयो नामैताः स्वाश्रये स्वानुरूपप्रत्ययाभिधानजनिताः। इयं तु स्वतन्त्रा पदार्थान्तरवत् कथमाकृतिः। संस्कारश्च स्वानुरूपस्मृतिहेतुः कथमर्थान्तराकृतिग्रहण उपयुज्यते। **तेऽपि शब्दव्यक्तिमेव** इति संबन्धः। योऽसौ स्फोट इत्याख्यायते। **अनेकध्वनिव्यङ्ग्याम्** इति। अनेकध्वनिनाभिव्यज्यते, एकध्वन्यभिव्यङ्ग्यत्वे द्वितीयध्वन्युच्चारणानर्थक्यमिति स एव दोषः। तस्य चार्थान्तरभूतस्यैव ध्वनिभिर्व्यक्तिः, प्रदीपेनेव रूपस्येति न यथोक्तदोषाः। **नित्याम्** इति। करणानि ध्वनावेव व्याप्रियन्ते। अन्यानि कृतसंधीनि ध्वनिव्यङ्ग्यतामेव द्रढयन्ति। **शब्दव्यक्तिगतस्तु** इति। तस्यामेव तु शब्दव्यक्तौ दर्शनभेदः। यदाह **वर्णभेदः** इति। परस्परव्यावृत्ता वर्णास्तत्रेति भागवन्तं स्फोटं मन्यन्ते। **केचित्तु** इति। निरवयवस्फोटवादिनः। **प्रतिवर्णम्** इति। वर्णा अपि परमाणुकल्पेनावयवभेदेन भिन्नाः, तथा पदं वर्णभेदेन, तथा वाक्यं पदभेदेन इति। स वर्णपदवाक्यस्फोटेषु नास्ति, निरवयवा

---

14. Vr. had शुकमनुष्य° in his Vṛtti.   15. ACD तस्यां तु.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

केचित्तु प्रतिवर्णं प्रतिपदं प्रतिवाक्यं चैक "एवायं शब्दात्मा क्रमोत्पन्नावयवरूपप्रत्यवभासः प्रकाशत इति मन्यन्ते।

अपर आहुः। पारम्पर्याविच्छेदान्नित्यप्रवृत्तेः प्रयोक्तृभिरुत्पत्तावलब्धप्राथम्या व्यवहारनित्यतया नित्याः शब्दा इति

अर्थानामपि नित्यत्वं कैश्चिदाकृतिनित्यत्वादेवाभ्युपगम्यते। तथा ह्याह

"कतरस्मिन् पदार्थे एष विग्रहो न्याय्यः,
सिद्धे शब्देऽर्थे संबन्धे चेति। आकृतावित्याह।"

(Cf. M. Bhā. पस्पशाह्निकम् I. 7.)

एतस्मिंश्च भाष्योद्देशे यावन्तः पक्षास्तेष्वर्थस्य नित्यता बहुधा व्याख्याता यथाभाष्यमनुगन्तव्या।

वर्णपदवाक्यस्फोटाः। तैस्तु भागवद्भिर्ध्वनिभिरक्रमः सोऽभिव्यज्यते। यदाह—**एक एवायम्** इति। निरवयवः। कथं तर्हि क्रमवान् प्रत्यवभासते इत्याह **क्रमोत्पन्नावयवरूपप्रत्यवभासः** इति। तानि ह्युपव्यंजनानि हेतुभेदात् क्रमवन्ति, तदभिव्यंजकरूपानुविधानादक्रमे स्फोटे क्रमवान् प्रत्यवभासः। प्रतिविम्बकरूपेण ये तूत्पन्ना अवयवास्तेषां यद्रूपं तस्य प्रत्यवभासः प्रतिबिम्बाख्योऽस्मिन्निति विग्रहः। **अपरे** इति। पक्षद्वयेऽपि दोषदर्शनात्। यतः सावयवस्फोटदर्शने सत्यपि नित्यत्वाद् यौगपद्ये स्फोटावयवानां नानभिव्यक्ताः प्रकाशकाः इति क्रमेणैकध्वनिभागेनैकैकस्फोटभागाभिव्यक्तौ समस्तशब्दग्रहणाभावः। बुद्ध्यनुसंहारश्चेत् ध्वनिबुद्धिभ्य एवास्तु इत्यनर्थिका स्फोटकल्पना। निरवयवपक्षेऽपि प्रथमभागाभिव्यक्तौ तत्कालग्रहणप्रसङ्गः द्वितीयभागोच्चारणवैयर्थ्यं च स्यात्। अथ तेन (न ?) व्यक्ति(: ?)द्वितीयेन तृतीयेन च न स्याद्, विशेषाभावात्। समुदायश्च तेषां नास्ति। नापि तैरर्थान्तरारंभ इत्युक्तमिति। पक्षान्तरेऽपि। श्रुति[17]**पारम्पर्याविच्छेदात्** इति। न शब्दव्यवहारस्य विच्छेदोऽस्ति, अनादौ संसारे पारम्पर्येण व्यवस्थितोऽयं शब्दव्यवहार इति न कूटस्थनित्यता, किन्तु प्रयोगाविच्छेदः। अत्रापि हि नित्यशब्दो दृष्टः यथा नित्यवाहिनी नदीति। यदाह **नित्यप्रवृत्तेः** इति। तदेव स्फुटयति **प्रयोक्तृभिः** इति। न केनचिदप्रयुक्तपूर्वाः प्रथमतः प्रयुज्यन्ते, नास्ति स कालो यत्रैते न प्रयुज्यन्ते। यथा अहमन्येभ्य एतानेष्वर्थेषु प्रयुञ्जे इति। एवं तेऽप्यन्येभ्यः, तेऽप्यन्येभ्य इति। यदाह **व्यवहारनित्यतया** इति। अविद्यमानप्रथमकोटयः शब्दा इति। **आकृतिनित्यत्वाद्** इति। आकृतिवादिनो हि नित्यामाकृतिमभ्युपगताः। सा तु शब्दार्थ इति। अस्मिन् दर्शनेऽर्थस्य नित्यत्वं भाष्येऽप्यङ्गीकृतमित्याह

---

16. W W²L एक एव श°, 17. WW²ML पारम्पर्या वि°.

Dr. Urmila Sharma Collection, Varanasi

नित्यः संबन्ध इत्यस्येदंभावे सति शब्दार्थयोः सोऽयमिति यः संबन्धः सोऽर्थादेशनस्य कर्तुमशक्यत्वाद् औत्पत्तिकः स्वभावसिद्धः न केनचित् कर्त्रा कश्चित् प्रतिपत्तारं प्रत्यज्ञातपूर्वः तत्प्रथमं कृत इति। तस्मादनादिर्नित्यं प्राप्ताविच्छेदः शब्दार्थयोः संबन्धः।

एतस्मिंश्च इति। यत्र शब्दार्थसंबन्धशब्दस्य विग्रहभेदप्रदर्शनेन तस्य नित्यताख्यायते। यथा

द्रव्येऽपि पदार्थ एष विग्रहो न्याय्यः। द्रव्यं नित्यम्। (M. Bhā. पस्पशाह्निकम्)

इति। **बहुधा** इति। कूटस्थनित्यतया व्यवहारनित्यतया च। यदाह

तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते। (M. Bhā. पस्पशाह्निकम्)

इति। **अस्येदंभावे** इत्यभेदलक्षणसंबन्धस्य विषयकथनम्। अस्येदं रूपमपि यत्र सारूप्यं तत्राभेदेन सर्वस्य सर्वेणेति। प्रतिपत्तिनिबन्धनं वा सारूप्यम्, तच्च स्वत एव व्यवस्थितम्, अस्येदं वाचकमस्येदं वाच्यमिति ज्ञानेन कार्येण प्रतीयते। **अस्येदम्** इति, सारूप्यं ज्ञानं वा तदभिधेयत्वेनास्येदंशब्देनोच्यते। तस्य भाव इति समासः। अनुकरणं वा। अस्येदमित्येतस्य शब्दस्य भाव इति। क्व चास्य भावः। यत्र तदर्थोऽस्ति। **सोऽयम्** इति। स्वरूपकथनम्। सोऽयमिति ज्ञानेन विषयनिर्देशः। अभिन्नरूपतेति यावत्। तत्र सारूप्यस्योभयगतत्वेऽपि शब्दे प्रकाशकस्वभावत्वात् अर्थस्य रूपसंक्रान्तिः, यथा स्वच्छतया दर्पणतले रूपसंक्रान्तिः, न दर्पणतलस्य रूपे। तयोश्च सारूप्यमुपाधिकृतम्। शब्देषु तु प्रतिनियतं तदवस्थितं स्वत एव। ततश्च शब्दो गृह्यमाणः संक्रान्तार्थाकार एव गृह्यते। सा चेयमभिन्नरूपता शब्देऽर्थस्य प्रतिपत्तिहेतुत्वात्। अत्यागोऽर्थेन वा संबन्ध इत्युक्तः। कस्तर्हि शब्दस्यार्थे व्यापारः। अयमुच्यते, सोऽर्थमभिधत्त इति। न खलु कश्चित् केवलःशब्दः स्वात्मन्यर्थाकारमादर्शयन् समारोपणाख्येन व्यापारेण युक्त इवाभिधत्त इत्युच्यते। तच्चेदं सारूप्यं शब्दार्थयोः स्वभावव्यवस्थितम्। यदाह औत्पत्तिकः संबन्ध इति। **औत्पत्तिकः** इति। नित्यः। उत्पत्त्या हि(स्व ?)भावो लक्ष्यते, उत्पत्तौ सत्यां भवतीति। मुख्यार्थप्रतिपत्तिनिवृत्त्यर्थमाह **स्वभावसिद्धः** इति। **अर्थादेशनस्य कर्तुमशक्यत्वात्** इति। उक्तं समर्थवार्तिके

"अर्थानादेशनात्। तच्च लघ्वर्थम्। को हि समर्थो धातु-
प्रातिपदिकप्रत्ययनिपातानामर्थानादेष्टुम्" (M. Bhā. on P. 2.1.1).

इति। यतोऽर्थानामानन्त्यान्न प्रत्यक्षतोऽर्थानां नापि शब्दान्तरेणावस्थानाच्छक्यते कर्तुम्। ननु चाशक्यकरणतया शशविषाणवदसत्त्वं कस्मान्न भवति। उच्यते। अर्थप्रतीते-

CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इन्द्रियविषयवद्वा प्रकाश्यप्रकाशकभावेन समयोपाधिर्योग्यता शब्दार्थयोः संबन्धः। अर्थसरूपप्रत्यवभासानां वा प्रत्ययानां वाह्येष्वर्थेषु प्रत्यस्तानामक्षरनिनित्ता-

---

र्व्यवस्थिताः, तत्त्वस्य शक्यकरणतया अकृतकतां संबन्धस्य दर्शयति। तदेव स्फुटीकरोति **न केनचिद्** इति। नायं संबन्धः केनचिदप्रवृत्तपूर्वः प्रथमतः कंचित् पुरुषं प्रति प्रणीत इति। यदाह **क श्वत् प्रति** इति। तदनेनाविच्छेदनात् संसारमय(स्य ?)ईदृक् संबन्धः स्थित एवेति कथयति। ननु च भिन्नेन्द्रियग्राह्यत्वात् शब्दार्थयो रूपरसवत् कथं वास्तवं सारूप्यम्। उच्यते। शब्देन यदि जातिरुच्यते सा नेन्द्रिमगम्येति व्याख्यातम्। स्फोटे तु न स्यात् संभवः। अर्थोऽपि येषां विकल्पोपारूढस्तेषां भिन्नेन्द्रियगम्यः। येषामपि बहिर्जातिरेकैकशब्दप्रत्ययानुवृत्तेरर्थापत्त्यावसितसत्त्वा नेन्द्रियगम्या। प्रत्यक्षतायां तु स्यात्। संभवाद् द्रव्येऽपि स्वर्गादिशब्दस्य स्वर्गः (स्पर्शः) पूर्वादीनां च वाच्यता। न हि नेन्द्रियग्राह्यं रूपादिष्वपि गुणत्वोपकृतेन रूपेण सारूप्यमस्त्येव। न ह्येकान्ततो विरूपाणामेकजात्यभिव्यक्तिसामर्थ्यमस्ति। एवं द्रव्यादिभ्यो(वि ?)लक्षणं रूपादीनां सारूप्यम्। यस्तु वस्तुभूतं सारूप्यं नेच्छति तस्य शब्दार्थयोर्भिन्नेन्द्रियग्राह्यत्वमप्यसिद्धमेवेति।

योग्यता इति। सामर्थ्यम्। **शब्दार्थयोः संबन्धः। प्रकाश्यप्रकाशकभावेन** इति। शब्दस्य प्रकाशकत्वम्, अर्थस्य प्रकाश्यत्वम्। एतद् द्वयं संहत्यैकः संबन्धः, न पुनः प्रत्येकं शब्दार्थयोर्योग्यतया पृथक् संबन्धाभिधानम्। **इन्द्रियविषयवद्** इति। यथा श्रोत्रादीनां [18]रूपादिषु प्रकाशनशक्तिः प्रतिनियतापौरुषेयी, रूपादीनां च प्रकाश्यशक्तिः, तथा शब्दार्थयोरिति। यथैव तर्हि इन्द्रियं स्वयोग्यतया विषयं सर्वस्य प्रकाशयति तथा शब्दोऽनिर्ज्ञातसंबन्धस्यापि प्रकाशयेदित्याह **समयोपाधिः** इति। समयो व्यवहारदर्शनम्। स उपाधिरस्या योग्यतायाः। भूयस्त्वेन व्यवहारं दृष्टवतः[19] स योग्यताप्रतिपत्तिनिबन्धनम्। तत्र यथैव चक्षुरादयः सत्यामपि रूपप्रकाशनयोग्यतायां ना[20]नपेक्षितालोकसहाया रूपं प्रकाशयन्ति तथा शब्दाः सत्यामप्यर्थप्रकाशनयोग्यतायां समयसहाया इति। ननु च समर्थस्य किं सहायेन, सैव सहायापेक्षा न तस्य सामर्थ्यं गमयति। नैतदस्ति। य एव समर्थस्तत्कार्यजनने स एव सहायमपेक्षते, न [21]श्रोत्रं रूपग्रहणासमर्थमालोकं सहायमपेक्षते। नास्यालोकः सामर्थ्यं जनयति

---

18. शब्दादिषु would be more correct, but all the Mss. have रूपादिषु.
19. All the Mss. has दृष्टवन्तः, but it is obviously a mistake.
20. C om. नानपेक्षितालोकसहाया ...... अर्थप्रकाशनयोग्यतायाम्.
21. D om. न श्रोत्रं ...... अपेक्षते.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्षरकल्पनावदर्थवदेवैकविषयत्वेऽभ्युपगम्यमाने नित्यमविच्छिन्नपारम्पर्यः कार्यकारणभावः शब्दार्थयोः संबन्धः। तथा ह्युक्तम्

"तेऽपि हि तेषामुत्पत्तिप्रभृत्या विनाशाद् वृद्धीर्व्याचक्षाणाः
सतो बुद्धिविषयान् प्रकाशयन्ति" (M. Bhā. on P. 3.1.26.)

इति। तत्राम्नाता महर्षिभिः। सूत्रादीनां प्रणेतृभिः। व्याकरण एव ये सूत्रादीनां प्रणेतारस्ते व्यपदिश्यन्ते। तत्र सूत्राणामारम्भादेव शब्दानां नित्यत्वमभिमतम्। न ह्यनित्यत्वे शब्दादीनां शास्त्रारम्भे किञ्चिदपि प्रयोजनमस्ति। व्यवहारमात्रं ह्येत-

---

श्रोत्रे। अतिप्रसङ्गादिति। यदपि क्षणिकभाववादिभिरभिधीयते सहकारिभ्योऽर्थान्तरमेव तदुपजातमिति तच्चिन्तान्तरमिति बहुग्रन्थभयाच्च न लिख्यते। **अर्थसरूपप्रत्ययावभासानाम्** इति। अर्थेन बाह्येन समानरूपप्रत्ययावभासो येषां प्रत्ययानाम्। **प्रत्यस्तानाम्** इति। यदा ते प्रत्ययास्तेषु बाह्येष्वर्थेषु प्रत्यस्ता बुद्ध्यारोपिता बाह्यमेवेदं वस्त्विति परिच्छिद्यमानाः किञ्चित् सादृश्यात् प्रत्यस्ता भवन्ति, यतस्तद्दर्शनात्तदध्यवसायः। यथाक्षरनिमित्तेषु लिप्यक्षरेषु अनक्षरेष्वप्यक्षरव्यवहारः तदेकत्वव्यवसायश्च लिपिदर्शनेऽक्षरावबोधात्, तथा तद्रूपेऽपि प्रत्ययेऽर्थव्यवहार इति। शब्दाद्धि सार्थाकारा बुद्धिरुत्पद्यते, तं त्वाकारमयं बाह्यत्वेन मन्यते इति कार्यकारणलक्षणः संबन्धः। **नित्यम्** इति। सदैवैषामर्थाकारप्रत्ययजननम्। यदाह **अविच्छिन्नपारम्पर्यः** इति। अत्रापि समयोपाधिरिति संबन्धनीयम्। तेन सहकारिणा सह कार्यजननात्। **तथा हि** इति। जन्यजनकताबुद्धिभावात्। बुद्धिरूपतां चार्थस्यागमेन प्रतिपादयति **तथा हि** इति। एवं ह्युक्तम्—

"इह तु कथं वर्तमानकालता कंसं घातयति, बलिं बन्धयति"
(M. Bhā. on P. 3.1.26.)

इत्यादि इति। ततश्चोदितम्

"ग्रन्थिकेषु कथम्, यत्र शब्द[22]गडुमात्रं लक्ष्यते" (M. Bhā. on P. 3.1.26)

इति। तत्र न वासुदेवो न बलिकंसौ न प्रयोजकश्चेति। तत्र परिहारः **तेऽपि हि** इति। ग्रन्थिकाः। **तेषाम्** कंसादीनाम्। **उत्पत्तिप्रभृति** इति। जन्मत आरभ्य। (वृद्धीः।?)सम्पदो विपदश्च। **व्याचक्षाणाः** शब्दैस्तेषां श्रोतॄणां बुद्धिषु तान् कंसादीन् संवेदोहननं च तथा दर्शयन्ति येन ते स्वप्रत्ययाङ्गतयावस्यन्तः पुरोव्यवस्थितमिव बाह्यं संमन्यन्ते। यत आह **सतो बुद्धिविषयान्** इति। बुद्धिविषयान् सत इति। बुद्धिस्थान् सत इत्यर्थः।

---

22. The M. Bhā. has शब्दग्रन्थगडुमात्रं.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दनर्थकं न महान्तः शिष्टाः समनुगन्तुमर्हन्तीति। तस्माद् व्यवस्थितसाधुत्वेषु शब्देषु स्मृतिशास्त्रं प्रवृत्तमिति।

अपरे तु

'तदशिष्यं संज्ञाप्रमाणत्वात्' (P. 1.2.53.)

इत्येवमादीनि सूत्राणि नित्यत्वं प्रति समर्थयन्ते। अनुतन्त्रेषु खल्वपि

'सिद्धे शब्दार्थसंबन्धे' (Vā. 1. in पस्पशाह्निक.)

इति 'सिद्धं तु नित्यशब्दत्वात्'

'स्फोटः शब्दो ध्वनिस्तस्य व्यायाम उपजायते'

सर्वे सर्वपदादेशाः। (M. Bhā. on P. 1.1.20., I. p. 75.)

इत्येवमादि। भाष्ये खल्वप्युक्तम्—

"संग्रहे एतत् प्राधान्येन परीक्षितं नित्यः शब्दः" (M. Bhā. पस्पशाह्निक I. p. 6)

इति। अनुतन्त्रभाष्येऽप्युक्तम्

सूत्रशब्दस्य सामान्यशब्दत्वादवच्छिनत्ति **व्याकरण एव ये सूत्राणाम्** इति। तत्र **सूत्राणाम्** इति शास्त्रारंभ एव नित्यतां गमयति। **न हि** इति। यद्येते शब्दा शार[23]क्रीडापन्ना व्यपाद्यन्ते(व्युत्पाद्यन्ते ?) न तर्ह्युद[24]यसाधनम् (अभ्युदयसाधनम् ?)। व्यवस्थितसाधुत्वेषु हि धर्माङ्गता युज्यते, न स्वयं रचितेषु। न चार्थप्रत्यायनार्थः शास्त्रारंभः। अपभ्रंशादपि तस्य सिद्धेः। तत्रैतत् स्यात् कैरपि विदग्धैः शारक्रीडामिवोद्दिश्येदं शास्त्रं कृतमित्याह **व्यवहारमात्रम्** इति। नाभ्युदयार्थः, स्वयं कल्पितत्वाच्छारक्रीडावत्। **न महान्तः** इति। विदितवेदितव्यत्वान्न ते समनुगच्छेयुः। शिष्टसमनुगमात्त्ववसीयते व्यवस्थितसाधुभावेष्वेव स्मृतिरियमिति। यदाह **तस्माद्** इति। **अपरे** इति। तदेकदेशेन नित्यतां मन्यन्ते। संज्ञानां प्रामाण्यवचनेन ज्ञायते प्रागपि व्याकरणाद् व्यवस्थितसाधुभावा एवेति। **सिद्धे शब्दार्थसंबन्धे** इति। सिद्धशब्दस्य नित्यवाचित्वात्। **सिद्धं तु** इति। नित्यत्वस्य शब्दानामङ्गीकरणात्। अत्र कण्ठतो नित्यत्वं कथितम्, पूर्वं तु तस्य व्यापारः। श्लोकवार्तिककारमतमाह **स्फोटः शब्दः** इति। ध्वनेर्व्यायामजन्यतया कृतकत्वम्, स्फोटस्य तु तद्व्यतिरेकेण च कारणानुपदर्शनेन च नित्यत्वम्। **सर्वपदादेशाः** इति अपूर्वशब्दोपजननेनागमस्यानित्यत्वे चोदिते परिहारायोक्तम्। सर्वे सर्वपदादेशा इति नित्यताख्याता। **भा[25]ष्येषु** इति अनेकत्वाद्

---

23. D शारक्रीडावत्त व्या°.

24. A न तर्ह्युभयसा°.

25. Obviously Vṛṣabha had भाष्येषु in his text of the Vṛtti as the explanation shows, but no Ms. of the Vṛtti has it.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"नित्येषु शब्देषु कूटस्थैर्वर्णैरविचालिभिर्भवितव्यम्"
(M. Bhā. on P. प्र. सू. 1.)

इत्येवमादि। तथा व्यावहारिकेऽपि नित्यत्वे—

"खदिरबर्बुरौ सूक्ष्मपर्णौ गौरकाण्डौ। तत्र कण्टकवान् खदिरः॥
(M. Bhā. on P. 1.1.46., I. p. 113.)

प्राचीनं ग्रामादाम्राः। क्षीरिणः प्ररोहवन्तः पृथुपर्णा न्यग्रोधाः"
(M. Bhā. on P. 1.1.56., I. p. 137.)

इति।

अथवा यैः प्रत्यक्षधर्मभिस्तत्र तत्र प्रवचने सूत्रानुतन्त्रभाष्याणि प्रणीतानि तैरेव शिष्टैर्व्याकरणेऽपि नित्याः शब्दार्थसंबन्धाः इत्याम्नातम्। तेषां च व्यवस्थितं लोके प्रामाण्यमिति ॥ २३ ॥

भाष्यस्याह। संग्रहे इति। चूर्णिकारेण पठितं संग्रहे एतद् इति। तेन ज्ञायते संग्रहप्रणेत्रा नित्यत्वमभ्युपगतमिति। अनुतन्त्रभाष्ये इति। पातञ्जलभाष्ये। नित्येषु इति। वर्णसमुदायात्मकस्य शब्दस्य वर्णनित्यतया तेन नित्येन भवितव्यमिति। एवमविशेषेण नित्यतामाख्याय निष्ठामाह व्यावहारिकेऽपि इति। इहापूर्वशब्दोपजनेनागमानां स्थान्यादेशभावेन वा नित्यत्वे दृष्टान्तः। खदिरबर्बुरौ इति। सर्वत्र खदिरबुद्धिप्रसङ्गे कण्टकवान् खदिर इति। न तत्रासन्तः कण्टका आधीयन्ते। बुद्धिस्तु केवलं पूर्वा निवर्तते। अन्या चोपजायते। प्रा[26]चीनौ इति। अत्रापि सर्वत्राम्रबुद्धिप्रसङ्गे, क्षीरिणः इति। न तत्राम्रा अपनीयन्ते नापि न्यग्रोधा असन्तः आरोप्यन्ते। तदेतेषां स्थितानामेव यथाख्यानं तथा व्याकरणेऽपि इति। 'आद्यन्तौ टकितौ', 'षष्ठी स्थाने' इति च नासतस्तव्य इतीकारस्यागमत्वम्, अपि तु इतव्यशब्दस्यान्वाख्यानोपायः। तथा नास्तेरपनयो भूशब्दस्य चोत्पादः, किंत्वार्धधातुके व्यवस्थिता एव ते समुदाया अन्वाख्यायन्ते इति न तत्र कूटस्थनित्यता। व्यावहारिकीं तु नित्यतामङ्गीकृत्य परिहारः। प्रत्यक्षधर्मभिः सर्वज्ञैः। तत्र तत्र इति। आत्मीयेषु प्रवचनेषु। सूत्रादीन्युपनिबन्धनानि। तैरेव। पाणिन्यादिभिः। व्याकरणेऽपि इति। यथाख्यातम्। तेषां च यथाचे प्रत्यक्षाभावः तथा शब्दार्थसंबन्धव्यवस्थानामपि स्वेषु स्वेषु प्रवचनेषु व्यवस्थितं प्रामाण्यमास्ते ॥ २३ ॥

---

26. W, W ML प्राचीनं in the Vṛtti. This agrees with the text of the M. Bhā.

Dr. Urmila Sharma Collection, Varanasi

अपोद्धारपदार्था ये ये चार्थाः स्थितलक्षणाः ।
अन्वाख्येयाश्च ये शब्दा ये चापि प्रतिपादकाः ॥ २४ ॥
कार्यकारणभावेन योग्यभावेन च स्थिताः ।
धर्मे ये प्रत्यये चाङ्गं संबन्धाः साध्वसाधुषु ॥ २५ ॥
ते लिङ्गैश्च स्वशब्दैश्च शास्त्रेऽस्मिन्नुपवर्णिताः ।
स्मृत्यर्थमनुगम्यन्ते केचिदेव यथागमम् ॥ २६ ॥

इदानीं प्रकरणस्याभिधेयप्रदर्शनायाह **अपोद्धारपदार्था ये** इति । पद्यते अनेनार्थ इति पदम्, न पारिभाषिकम्, तस्यार्थाः पदार्थाः, अपोद्ध्रियन्ते इत्यपोद्धाराः पदार्थाश्चेति, अपोद्धृतानां वा पदानामर्थाः, अपोद्धारेण परिकल्पिता वा अर्थाः इति शाकपार्थिवादिः । अपोद्धारसंबन्धिनो वेति षष्ठीसमासः । अपोद्धारो विभागः । **स्थितलक्षणाः** इति । स्थितं लक्षणमेषाम्, स्वरूपस्याप्रच्युतेः । स्थितलक्षणाः पदार्थाः वाक्यार्थाश्च मतभेदेन । प्रकृतिप्रत्ययार्थो यथोपायतया पदार्थे तिरोधीयन्ते न तु पदार्थाः तथा पदार्था उपायतया वाक्यार्थप्रतिपत्तौ तिरोधीयन्ते, न तु वाक्यार्थ इति । अर्थानां द्वैविध्यमभिधाय तद्वाचकानामाह **अन्वाख्येयाः** इति । ये प्रयोगार्हाः साधवः । **प्रतिपादकाः** इति । तेषामुपायभूताः भू तॄ अतीत्यादयः । **कार्यकारणभावेन** इति । संबन्धस्य द्वैविध्यम् । अभेद[1]लक्षणस्यास्य कार्यकारणभावेऽन्तर्भावं वक्ष्यति । स्थिताः संबन्धाः । क्व त इत्याह **साधुषु** इति । साधुषु गवादिषु । असाधुषु गाव्यादिषु । यतस्तेऽपि परम्परयार्थं प्रतिपादयन्ति । तेषां फलमाह **धर्मे ये** इति । धर्माभिव्यक्तेरर्थप्रतिपत्तेश्च । **अङ्गम्** इति । निमित्तम् । असाधवोऽर्थप्रत्यायन एव । तदेवमर्थशब्दसंबन्धफलानां प्रत्येकं द्वैविध्यादष्टौ पदार्था भवन्ति । एतच्च शास्त्रशरीरम् । यदाह **ते लिङ्गैः** इत्यादि । लिङ्गस्वशब्दान् दर्शयिष्यति । **शास्त्रेऽस्मिन्** इति । व्याकरणे । **स्मृत्यर्थम्** इति । न मया किंचिदपूर्वं क्रियते, किं तु स्मरणार्थमष्टपदार्थीसमनुगम इति प्रकरणप्रयोजनमाह । **यथागमम्** इति । नोत्प्रेक्षया, अपि त्वागमानुसारेण इति ।

त्रिष्वपि इति । उक्तासु तिसृष्वपि कारिकासु । **प्रस्तुतस्य** इति । वाक्यपदीयाख्ये शास्त्रे यदनुगन्तुमिष्टं तस्य । **परिसमाप्तिः** । एतावन्त एव पदार्था अत्रानुगम्यन्ते इति । अपोद्धारणं संसर्गपूर्वकमिति पूर्वावस्थामाह **अत्यन्तसंसृष्टः** इति । विभागपूर्वकसंसर्ग-

---

1. ABCD अभेदलक्षणमर्थस्य कार्यकारणभावेऽन्तर्भावः वक्ष्यति । स्थितिः संबन्धाः क्व ता इत्याह । Though all the Mss. agree, the text cannot be correct.

CC0. In Public Domain, Digitizagtion by eGangotri

त्रिष्वन्येषु श्लोकेषु प्रस्तुतस्य परिसमाप्तिः। तत्रापोद्धारपदार्थो नामात्यन्तसंसृष्टः संसर्गादनुमेयेन परिकल्पितेन रूपेण प्रकृतविवेकः सन्नपोद्ध्रियते। प्रविभक्तस्य हि तस्य वस्तुनो व्यवहारातीतं रूपम्। तत्तु स्वप्रत्ययानुकारेण यथागमं भावनाभ्यासवशादुत्प्रेक्षया प्रायेण व्यवस्थाप्यते। तथैव चाप्रविभागे शब्दात्मनि कार्यार्थमन्वयव्यतिरेकाभ्यां रूपसमनुगमकल्पनया समुदायादपोद्धृतानां शब्दानामभिधेयत्वेनाश्रीयते। सोऽयमपोद्धारपदार्थः शास्त्रव्यवहारमनुपतति, शास्त्रव्यवहारसदृशं च लौकिकं भेदव्यवहारम्। स चैकपदनिबन्धनः सत्यासत्यभावेनानुपाख्येयः। वृक्षः

निषेधायात्यन्तग्रहणम्। स एवंविधः प्रकृतः प्रविवेकः प्रकृतिविभागः सन् अपोद्ध्रियते इति संबन्धः। कुत इत्याह **संसर्गाद्** इति। (न?) पदार्थान्तरानुप्रवेशः संसर्गो निरवयवत्वाद् वाक्यार्थस्य। कथं निरवयवत्वात् पृथक्क्रियेत्याह **अनुमेयेन** इति। अन्वयव्यतिरेकाभ्यां भागानुमानात्। तावेव निरवयवे कथमित्याह **कल्पितेन** इति। असत्यतामन्वय[2]व्यतिरेकयोराह। तथा हि। अनियतावधिदर्शनभेदेन विभागो मरुत्तेन्द्रादिषु, न वैकस्य सत्यतोऽनेकरूपत्वम्, यतस्तु निरवयवमपि तदनेकशक्तियोगादनेकपरिकल्पनाकारणतयान्वयव्यतिरेकेण दर्शयति अनु[3]गतमिदं व्यावृत्तमेतदिति। तां चासत्यतामप्यपरिहार्यत्वेनाह **प्रविभक्तस्य हि** इति। यतः प्रविभक्तैः पदार्थैर्न प्रवृत्तिनिवृत्तिलक्षणो व्यवहारोऽस्या(स्ति, अ?)पि तु संसृष्टैरेवेति। **तत् तु** इति। कल्पितं रूपम्। **उत्प्रेक्षया व्यवस्थाप्यते** इति संबन्धः। तदेवासत्यत्वं द्रढयति। कुत उत्प्रेक्षेत्याह **स्वप्रत्ययानुकारेण** इति। स्वान् प्रत्ययाननुगच्छन्तो विभागं कुर्वन्ति। तथा प्रत्ययानां मूलमाह **यथागमम्** इति। तं तमागममाश्रित्य। **भावनाभ्यासवशाद्** इति। आगमतः प्राप्तस्यार्थस्याभ्यासाद् भावनाभिप्राप्तिः। एतदाह——तं तमागममाश्रित्य तदभ्यासात् स्वयं प्रत्ययमनुगच्छन्त उत्प्रेक्षया व्यवस्थापयन्तीति। **प्रायेण** इति। स्थितलक्षणोऽपि हि क[4]श्चिदपोद्धृत्य स्थापयिष्यते। तथा च वक्ष्यति **तानि चैकपदसरूपाणि** इति। इदानीं शब्दापोद्धारं व्युत्पादयति **अप्रविभागे** इति। अविद्यमानोद्देशविभागे वाक्ये पदे वा। **कार्यार्थमपोद्धृतानाम्** इति संबन्धः। कथमपोद्धार इत्याह **अन्वयव्यतिरेकाभ्याम्** इति। निर्भागे तौ कथमिति चेदाह **रूपसमनुगमकल्पनया** इति। विशिष्टशक्तियोगाद्रूपसमनुगमस्तत्र कल्प्यते। ततोऽन्वयव्यतिरेकौ। एवं कल्पनया समुदायादपोद्धृताः। **अभिधेयत्वेन** इति। योऽ-

---

2. ACD om the text from °व्यतिरेकयोराह ... समुदायादपोद्धृताः here, but give it after the words सन्निहितक्रिया यदि नास्ति तत्र प्रयुज्यते।. This seems to be a mere scribal mistake.

3. C अनुस्थितमिदम्. 4. B कुतश्चित्.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्लक्ष इत्यनुपसंहृते हि क्रियापदे शब्दोपग्रहाणामर्थात्मनां निरूपणं न विद्यते। यावच्चापवादभूताः क्रियाविशेषाः शब्दप्रवृत्तिकारणमस्तित्वं न निवर्तयन्ति तावदस्ति-र्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽपि वृक्षादिभिः पदैराक्षिप्तः प्रतीयते। तानि चैक-पदसरूपाण्याक्षिप्तक्रियापदानि वाक्यानीति व्याख्यायन्ते। तथा पूर्वपदार्थ उत्तरपदार्थो ऽन्यपदार्थः प्रातिपदिकार्थो धात्वर्थः प्रत्ययार्थ इत्येकपदवाच्योऽप्यनियतावधिर्बहुधा

सापोद्धारपदार्थः स तेषामभिधेयमिति। **शास्त्रव्यवहारम्** इति। प्रकृत्यर्थव्यवहारम्। **अनुपतति** इति। तदाश्रयेण शास्त्रप्रक्रियाव्यवस्थानात्। **लौकिकम्**। अनुपततीति संबन्धः। योऽयं लोके प्रविभागः अयं कर्ता अपरा क्रिया, यद्यन्यवर्तन इत्ययमपि शास्त्रनिरूढत्वात्तत्सदृशो भवति। **स च** इति। अपोद्धारपदार्थः। एतस्यैकपदवाच्यस्वरूपं कथयति **अनुपाख्येयः** इति। सत्योऽसत्य इत्युपाख्यातुमशक्यः। वृक्ष इत्युक्ते यद्यपि जातिव्यवच्छिन्नार्थसम्प्रत्ययस्तथापि तस्यार्थस्य सर्वक्रियासंबन्धयोग्येनात्मनावस्थानाद-निर्धार्यमाणरूपतैव। यदि बहिःसत्यतार्थस्य, कथं नास्तीत्यनेन संबन्धः। अथासत्यता, कथं विद्यत इत्यादिभिः। तद्दर्शयति **अनुपसंहृते** इति। क्रियापदेनानुपनीतसंबन्धे नामपदे। **शब्दोपग्रहाणाम्** इति। नामपदवाच्यानां क्रियापदाप्रयोगे सत्यतासत्यते न निश्चीयेते। नन्वेकमपि पदं प्रयुज्यमानं लोके दृष्टम्, वृक्षः इति। तत् कथमुच्यते संसर्गादपोद्धृतः पदार्थ इत्याह **यावच्च** इति। तत्रापि क्रियासंसर्गोऽस्तीति कथयति। अस्तिर्भवन्तीपर इति भाष्यग्रन्थस्य विषयमाह **यावच्च** इति। **अपवादभूताः** जायते इत्यादयः। एते ह्यस्तिसंबन्धविरोधित्वाद् अपवादभूताः। न हि भवति वृक्षोऽस्ति जायते इति। राज्ञः पुरुष इत्यत्र च संबन्धस्य क्रियोपजनितत्वात् सन्निहिता क्रिया। यदि चास्ति तत्र प्रयुज्येत। पदद्वयस्योपसंहारे स्वस्वामिसंबन्धो नावगम्येत। स हि इति वाक्यवाच्य एवेति। **शब्दप्रवृत्तिकारणम्** इति। येयमौपचारिकी सत्ता सा सर्व-शब्दप्रवृत्तिकारणम्, तामस्तीत्याह। **तावदस्तिः प्रतीयते** इति संबन्धः। **तानि च** इति। वाक्यान्येव तानि, केवलं कल्पनया तत्रपदाभि[5]न्नः। **आक्षिप्तक्रियापदानि** इति। नात्र क्रियापदाक्षेपः, किं त्वर्थः क्रियालक्षणः स्वार्थानुपातिनं स्वार्थपदमाक्षिपति। तत्पदाभिधेयत्वात्तु तस्य तत्पदाक्षेपक उक्तः। आक्षिप्तफलत्वाद्वा। एवं वाक्यार्थात् पदार्थापोद्धारमुक्त्वा 'पदार्थस्यापोद्धारमभिधित्सुर्वृत्तिपदेभ्यस्तावदाह **पूर्वपदार्थः** इति। वृत्तिपदात् पूर्वपदार्थ इति विभागः। केवलं नामपदार्थादाह **प्रातिपदिकार्थः** इति।

---

5. AD पदादिन, B पदादिना.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रविभज्य कैश्चित् कथंचिदपोद्ध्रियते। स्थितलक्षणस्तु वाक्यरूपोपग्रहः कल्पितोद्देशविभागो विशिष्ट एकः क्रियात्मा वि[6]च्छिन्नपदार्थग्रहणोपायप्रतिपाद्यः सत्यामपि विच्छेदप्रतिपत्तौ नमस्यति, संग्रामयते, मुण्डयति, कुट्टयति, चर्वयतीत्येवमादिभिरविशिष्टः प्रतिभोपसंहारकाले। यदुक्तम्

'न वा पदस्यार्थे प्रयोगात्' (Vā. 19. on M. Bhā. on P. 1.2.64.)

आख्यातार्थादाह **धात्वर्थः** इति। **एकपदवाच्योऽपि** इति। अविद्यमानोद्देशविभागेनैकेन प्रतिपाद्यः। **अनियतावधिः** इति। एकस्मिन्नेव शब्देऽन्यथा चान्यथा च परिकल्पनात्। **कैश्चित् कथंचिद्** इति। भवतिशब्दात् केचिदप्रत्ययं केचित्तिपमपोद्धरन्ति। तथा मरुत्तादिषु भिन्नापोद्धारव्यवस्था, अत एवासत्यमिति। **वाक्यरूपोपग्रहः** इति। वाक्यरूप उपग्रहोऽस्य, उपग्रहणमुपग्रहः स्वीकारः, स च वाक्यरूपाश्रयत्वाद्वाक्यरूपशब्देनोक्तः। तद्धि तां क्रियामात्मानमभिधेयतया स्वीकरोति उपगृह्णाति वा। कर्तर्यचमेके कुर्वन्ति वाक्यरूपमुपग्राहकमस्येति। ग्रन्थकारेण वाक्यमेव वाचकमित्युक्तम्। कल्पित उद्देशाभिख्यो विभागो यस्मिन्। उद्देशो हि प्रदेशः कर्त्राद्याख्यः। स च कल्पितोऽभावात्। यदि कर्त्रादयो न सन्ति क्रियामात्रस्य वाक्यार्थता स्यादित्याह **विशिष्टः** इति। नियताश्रय इति। साधनशक्त्यनुस्यूते विशेषणविशेष्ये। भेदार्थस्तर्हि विभक्तः स्यादित्याह **एकः** इति। यथा गमनक्रिया पचतिक्रियाया विशिष्टैव। न च तस्या विभागः। एवमेकः क्रियात्मा वाक्यान्तरवाच्यात्क्रियात्मनो भिन्नरूपः पचतिक्रियावत् प्रतिपाद्यते। **विच्छिन्नपदार्थ** इति। विच्छिन्नानामेवोद्धृतानां पदानां योऽर्थस्तस्य ग्रहणमुपायो यस्य प्रतिपत्तौ। विच्छिन्नो वा पदार्थस्तस्य ग्रहणमुपायस्तस्येति वा। समानत्वाद्वा संहिताया अविच्छिन्नानां नैरन्तर्येणोच्चरितानामर्थः, तस्य ग्रहणमुपायः। नैरन्तर्येण हि तेषां प्रतिपादनमिति। यदि तेषामर्थानां ग्रहणमुपायः, सन्ति तर्हि तेऽर्थाः, तत्र प्रतीतेरित्याह **सत्यामपि** इति। नमस्यतीत्यस्यार्थकथनाय नमः करोतीति क्रियासाधनभेदेन व्युत्पादनम्। न च तत्र सत्यमीदृशः क्रियासाधनभेदोऽस्ति। यतः प्रणमतिशब्दवन्नमस्यतिशब्दः क्रियान्तरवाच्येव। तथा मुण्डयत्यादयोऽपि। असत्यभूतस्तत्रपोद्धृतपदार्थः। **अविशिष्ट** इति। तद्वाक्यमपि क्रियामात्रवाचि। **प्रतिभोपसंहारकाले** इति। अर्थक्रियाकालेऽभिन्नप्रतिभोपसंहारात्। यदि तर्ह्यविद्यमानविभागं वाक्यमेव तत्र प्रयुज्यते कथं सरूपवार्तिके प्रातिपदिकानामेकशेष इत्युपक्रम्योक्तम्

'न वा पदस्यार्थे प्रयोगात्' (Vā. 19. on P. 1.2.64.)

---

6. L क्रियात्माऽविच्छिन्न.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति। उपसंहृतक्रियमत्र पदमाश्रीयते। संप्रत्ययानुगममात्रं वा परिगृह्यते। तथा हि पदस्यार्थे प्रयोगमभ्युपगम्य पुनरप्याह

"कृत्तद्धितान्तं चैव ह्यर्थवन्न केवलाः कृत्तद्धिताः"

(M. Bhā. on P. 1.4.14.)

इति। अन्वाख्येयाश्च ये शब्दाः। केषांचित् पदावधिकमन्वाख्यानं, वाक्यावधिकमेकेषाम्। तत्र पदावधिकेऽन्वाख्याने श्रुत्यभेदादेकपदरूपोपग्रहे सामान्यमात्रे लब्धसंस्काराणि पदानि पदान्तरसंबन्धप्राप्तसंनिधानेष्वर्थेषु संनिपतितेष्वपि विशेषेषु सामान्ये प्रतिलब्धमन्तरङ्गं संस्कारमुपादायैव प्रवर्तेरन्। तत्रैकवचनान्तो नपुंसकलिङ्गश्च शुक्लशब्दो भिन्नलिङ्गसंख्यैराश्रयैः संबद्धः श्रूयेत। तदर्थं

"विशेषणानां चाजातेः" (P. 1.2.52.)

इत्यनेन योगेन भाविन्याश्रये बहिरङ्गे प्रकान्ते गुणवचनानां शब्दानामाश्रयतो लिङ्ग-

---

इत्याह उपसंहृतक्रियम् इति। यत्तदेकपदरूपं वाक्यं तदेवमुक्तम्। तत्र हि क्रियार्थ उपसंहृतः। तच्च पदसारूप्यात् पदं पदाद्वा, यथा द्वन्द्वे युगपदधिकरणवचनतायां सर्वेषामेकार्थता तथात्रैकमेकं पदं सकलवाक्यार्थमुद्दिश्य प्रयुज्यमानमुपसंहृतक्रियमर्थमेक ...... लोलीभूतक्रियाकारकं प्रतिपादयतीति। सम्प्रत्ययानुगममात्रं वा इति। अस्ति वाक्यादपोद्धृतात् पदात् कश्चिदर्थमात्रायाः संप्रत्यय इति। तदनुगमादेवमुक्तम्। स पुनरयमर्थोऽसत्यः कल्पितः शास्त्रसंव्यवहारार्थमिति कथयति तथा हि इति। इह

कृत्तद्धितसमासाश्च। (P. 1.2.46.)

इत्यत्र

सुप्तिङन्तं पदम् (P. 1.4.14.)

इत्यत्रान्तग्रहणाल्लिङ्गात् प्रत्ययमात्रस्य प्रातिपदिकसंज्ञाप्रसङ्गे परिहार उक्तः

"अर्थवदिति वर्तते। कृत्तद्धितान्तं चैव ह्यर्थवत्, न केवलाः कृत्तद्धिताः"

(M. Bhā. on P. 1.4.14.)

इति। तत्र यदि लौकिकार्थो गृह्यते अर्थवदिति, कृत्तद्धितान्तं चैव ह्यर्थवदिति न घटते, सुबन्तस्य लोके प्रयोगात्। अथान्वयव्यतिरेकगम्यः, न केवलाः कृत्तद्धिताः इति विरुध्यते यतोऽन्वयव्यतिरेकाभ्यां तेषामर्थोऽस्ति। तत्रार्थवद्ग्रहणानुवृत्तेरुभयोरन्तरालवर्तिन्यपि प्रतीयमानैवार्थवत्ता शास्त्रसंव्यवहारार्थमसत्या कल्पिता कृत्तद्धितान्तस्य, तथा पदस्यापि इति। पदावधिकम् इति। अवधिर्मर्यादा। पदात् परेणाप्रवृत्तेरन्वाख्यानस्य। पदवादिनां

---

7. L कृताया:.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वचनान्यनुगम्यन्ते । वाक्यावधिके त्वन्वाख्याने नित्यसंसृष्टस्य गुणस्याश्रयविशेषेणात्यन्तमविवेकात् सर्वतो व्यवच्छेदे सामान्यार्थत्वमेव न विद्यते । तत्र चेदमुक्तम्—

स्वाभाविकमेतत् । (M. Bhā. on P. 2.2.29.)

चैतत् । **वाक्यावधिकम्** इति । वाक्यवादिनाम् । तेषां हि पदान्यसत्यानि, उपायभूतानीति । तत्र द्वयोरन्वाख्याने विशेषमाह **तत्र** इति । शुक्लादयः शब्दाः गुणवृत्तित्वेऽपि यदा गुणोपसर्जनद्रव्यं मतुब्लोपात् प्रतिपादयन्ति तदायमुपन्यासः । तदा ह्येषां गुणोपसर्जनद्रव्याभिधानाद्विशेषणत्वमिति । गुणस्य स्वातन्त्र्येणाभिधाने न विशेषणत्वम् । तदा च यद्यपि विशेषो वर्तते तथाप्येवं पदगतमर्थमाश्रित्य शुक्लो गुणोऽस्यास्तीति वृत्तिशब्दपदान्तरप्रतिपाद्यविशेषासंस्पर्शादभिन्नरूपता तेषु वर्तते । आश्रयसामान्याभिधानात् । यदाह **श्रुत्यभेदात्** इति । अतश्चैकेनैव पदरूपेणोपग्रहीतुं शक्यते । **सामान्यमात्रे** इति । विशेषाणां पटादीनां तेनाशक्योपात्तत्वात्तन्मात्रानिबन्धन एव शब्दसंस्कारः ।

आश्रयसामान्यरूपस्य च लिङ्गसर्वनाम्ना नपुंसकेन योगो व्यक्तिविशेषविषयत्वात् संख्यानादीनाम्, अभिन्नत्वाच्चाभेदैकत्वसंख्ययेति तल्लिंगसंख्ये कुतः । व्यक्तिविशेषास्तु विशिष्टलिङ्गसंख्यायुक्ता इति । यदाह **लब्धसंस्काराणि** इति । एकत्वनपुंसककृतेन संस्कारेण शुक्लमिति । **पदान्तर** इति । यद्यपि पदान्तरैः पटो बृहतिका वस्त्रं कंबल इत्यादिभिः संबन्धे सति तस्मिन् शुक्लशब्दार्थे विशेषप्रतीतिः तथापि । **सामान्यमात्रे** इति । आश्रयमात्रे । **अन्तरङ्गम्** इति । तत्पदप्रतिपाद्यार्थनिबन्धनत्वात् । पदान्तरोपनीयमानत्वाद्विशेषस्य बहिरङ्गत्वम् । **उपादायैव** इति । अपरित्यज्य । **तत्रैकवचनान्तः** इति । शुक्लः पटः शुक्ला बृहतिकेत्यादि । **तदर्थम्** इति । एतद्दोषपरिहाराय । **भाविनि** इति । तत्पदोच्चारणवेलायाम् अभावादुच्चारयिष्यमाणपदार्थत्वाच्च । **आश्रये** इति । योऽसौ विशिष्टव्यक्तिवचनसन्निधापितः । **बहिरङ्गे** इति । शब्दान्तरार्थत्वाद्विप्रकृष्टः । सामान्यकृतस्तु संस्कारः स्वाभाविक इति । **गुणवचनानाम्** इति । ये गुणोपसर्जनं द्रव्यमाहुः । **आश्रयतः** इति । द्रव्यतः । कथं युक्ता इति व्यक्तय उच्यन्ते । तथा हि तेनाश्रयसामान्येन युक्ता अतस्तद्वदिति । कुतो विशेषणानामिति । संबन्धिशब्दाद् विशेष्यस्य ये लिङ्गवचने ते भवतः । तस्माद्विशेष्यसामान्यात्मना युनक्तीति युक्तवद्वचनेनोच्यते ।

नित्यसंसृष्टस्य इति । सदैव पदानि वाक्यगतानीति पृथगर्थानपाश्रयः संस्कारः केवलस्याप्रक्रमाद्विशिष्टलिङ्गसंख्यता । **आश्रयविशेषेण** इति । पटा[8]द्येन । **अत्यन्तम्**

---

8. ABCD पदाद्येन,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति। तथा प्रत्यवयवं द्वन्द्वपदसंस्कारे

द्वन्द्वेऽबहुषु लुग्वचनम्। (Vā 3. on P. 2.4.62.)

उपन्यस्तम्। समुदायसंस्कारप्रक्रमे तु

"न वा सर्वेषां द्वन्द्वे बह्वर्थत्वात्" (Vā. 8. on P. 2.4.62.)

इत्याह। तथा

विशेषणं विशेष्येण बहुलम्। (P. 2.1.57.)

उपमानानि सामान्यवचनैः। (P. 2.1.55.)

इति। एकलोलीभूतत्वात् विशेषादविभक्त एव प्रक्रान्तः। **सर्वतो व्यवच्छेदे** इति। वाक्यावधिकाद्याकांक्षाभावात सर्वतो व्यवच्छिन्नत्वात् वाक्यार्थस्य। **सामान्य** इति। वाक्यार्थस्यैव प्रयोगान्न सामान्यकृतः संस्कारः। ततश्च विशेषणानामिति सूत्रमनारम्यम्। यदाह

नेदं वाचनिकम्, स्वाभाविकमेतत्

इति। **तथा प्रत्यवयवम्** इति। तद्राजस्य बहुष्वित्यत्र वार्तिके

"द्वन्द्वेऽबहुषु लुग्वचनम्" (Vā. 3. on P. 2.4.62.)

इति चोदितम्। इह गार्ग्यश्च वात्स्यश्च वाज्यश्चेति यञन्ताश्चेत्यनेन बहुवचने परतो बहुषु वर्तमानयोरिति पक्षद्वयेऽपि लुक् (न ?)प्राप्नोतीति चोदितम्। एतच्च पदावधिक एवान्वाख्याने, यतोऽत्रैकैकं पदमेकार्थवृत्ति न समुदाय इति अपोद्धारकल्पनया समुदाय इत्याह। (**समुदायसंस्कारप्रक्रम** इति ?) वाक्यावधिकसंस्कारपक्ष इति यावत्। **सर्वेषाम्** इति पदान्त(प्रत्ययान्त ?)मनेकार्थमुपादाय संस्क्रियन्ते युगपदधिकरणवचने। **द्वन्द्वे** इति। तत्र प्रत्येकं समुदायार्थपरिसमाप्तिः, तदा च तेनार्थेन सर्वेषां बह्वर्थत्वात् सर्वेषां बहुवचन(पर ?)ता बह्वर्थता च। तेन गर्गाश्च वत्साश्च वाजाश्चेति सिद्धो लुक्। तथा चोक्तम्—

"अथापि निदर्शयितुं बुद्धिरिति वाक्यसंस्कारोऽपरिहारः"[इति।]

तथा इति। पदयोः सामान्यविशेषतायां नीलशब्दार्थस्य विशेषणता उत्पलपदार्थस्य च विशेष्यत्वम्। अन्यथा नीलोत्पलशब्दस्याविद्यमानविभागत्वात् कुतो विशेषणविशेष्यभाव इति। **उपमानानि** इति। शस्त्रीशब्दस्योपमानवाचित्वमुपमेयवाचित्वं देवदत्तादिशब्दस्य श्यामाशब्दस्य सामान्यवाचित्वं पदानां सामान्यार्थत्व एव। अन्यथा त्वभिन्नस्यार्थस्यैकैकः शब्दोऽभिधातेति नास्त्युपमानोपमेयभावः। आदिशब्देन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्यादि सर्वं पदावधिक एवान्वाख्याने परिगृह्यते। पदस्य चान्वाख्येयत्वमभ्युपगम्य भू भूति भू अति इत्येवमादयः शब्दान्तरसमुदायप्रतिपत्तिहेतवः परिकल्पिताः प्रतिपादकाः शब्दा उपादीयन्ते।

कार्यकारणभावेनार्थाकारनिर्भासमात्रानुगतस्य प्रत्ययस्यार्थेषु प्रत्यस्तरूपस्यार्थत्वेनाध्यवसाये तस्यार्थात्मनः शब्दो निमित्तम्। तथार्थावग्रहदर्शनं सोऽयमिति शब्दार्थयोः संबन्धप्रसिद्धेर्नादाभिव्यक्तस्यान्तःकरणसंनिवेशिनः शब्दस्य प्रवृत्तौ कारणम्। इन्द्रियविषयवत्तु प्रकाश्यप्रकाशकभावेन विशिष्टानां शब्दानां विशिष्टेष्वर्थेषु नित्यमकर्तृव्यापारसाध्यमव्यभिचरितप्रसिद्धसाधुभावानां वाचकानां शब्दानां वाच्येषु योग्यत्वम्, अप्रसिद्धसंबन्धानां प्रथमप्रतिपादने समयोपाधिकम्।

उपमितं व्याघ्रादिभिः ... (P. 2.1.56.)

इत्येवमादि। **संगृह्यत**[8a] इति। व्यवतिष्ठते। **पदस्य च** इति। पदस्य चान्वाख्येयतायां प्रतिपादकाः शब्दाः व्यवस्थाप्यन्ते। भू-ल इत्येतत् भू-ति-इत्येतस्य, भू-ति इत्येतद् भू-अति इत्येतस्य। एतदप्युत्तरेषां शब्दान्तराणां यः समुदायो भविष्यति तस्य प्रतिपत्तिहेतवः परिकल्पिताः इत्यसत्यत्वात्तेषामन्तरालवर्तिनामन्वाख्यानोपायत्वम्।

संबन्धद्वयमाख्यातुकाम आह **अर्थाकार** इति। बुद्धयो ह्यगृहीतार्थाकारनिर्भासा निरवयवा अपि तैरर्थाकारनिर्भासैरवयवइत्यव(इव?)भासन्त इति मात्राशब्दोऽवयववचन उपात्तः। अर्थाकारैर्निर्भासैरवयव इवानुस्यूतस्य प्रत्ययस्य। **अर्थेषु** इति। तेषां बाह्यार्थत्वेनाध्यवसायात् ते तत्र प्रत्यस्ता उच्यन्ते। **अर्थत्वेन** इति। वस्तुत्वेन। तस्यार्थात्मनो बुद्धिनिविष्टस्य शब्दो निमित्तकारणम् इत्येवं कार्यकारणलक्षणं संबन्धमभिधायात्रैवाभेदलक्षणमन्तर्भावयिष्यन्नाह **तथा** इति। अर्थावग्रहोऽर्थपरिच्छेदः तदात्मकदर्शनम्, अर्थाकारः प्रत्ययः। **शब्दस्य प्रवृत्तौ कारणम्** इति संबन्धः। तत्रार्थः कारणम्, शब्दः कार्यमिति कार्यकारणभावः। **अन्तःकरणसन्निवेशिनः** इति। बुद्धिस्थस्य। यतोऽर्थाकाराया बुद्धेः शब्दाकारा बुद्धिरुत्पद्यते। **नादाभिव्यक्तस्य** इति। नादोच्चारणेन बुद्धिस्थः शब्दोऽभिव्यज्यते, येन श्रोता उच्चारणादवस्यति। एवं शब्दाकारस्य बुद्धिर्भवति। तत्कथमित्याह **सोऽयम्** इति। यदायमुपगृहीतार्थाकारतां बुद्धिस्थस्य शब्दस्य जननभेदं बुद्धिस्थेन श...र्थेनावस्यति तदार्थाकारबुद्ध्यन्तरविशिष्टशब्दाकारस्य बुद्धिर्भवति। स च प्रयुक्तस्वरूप पदार्थाकारमपि दर्शयति। **इन्द्रियवद्** इति। व्याख्यातम्। **विशिष्टानां विशिष्टेषु** इति संबन्धः। न कदाचिदपि कर्तृव्यापारेणाभिधीयतेऽभिधान-

---

8a. The Vṛtti has परिगृह्यते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्र साधोर्यः संबन्धोऽर्थेन स ज्ञाने शास्त्रपूर्वके वा प्रयोगे धर्माभिव्यक्त्यावङ्गत्वं प्रतिपद्यते। विशिष्टप्रत्ययोत्पत्तौ च प्रत्यक्षपक्षेण व्यवस्थां प्रकल्पयति। अनुमानपक्षेण तु संबन्धिसंबन्धादक्षिनिकोचादिवदपभ्रंशाः प्रत्ययविशेषेष्वङ्गभावमुपगच्छन्ति।

ते लिङ्गैश्च[9]। अपोद्धारे हि शास्त्रव्यवहारार्थं समुदायात् संसृष्टायाः कस्याश्चिदर्थमात्रायाः क्रियमाणे तं तमवधिं प्रति निमित्तत्वेनार्थानां पुरुषाधीनो विकल्पभेदः

शक्तिः। **अव्यभिचरित** इति। अव्यभिचरितः प्रसिद्धः साधुभावो येषामिति। ये नित्यं साधुतामपरित्यजन्तः प्रसिद्धाः। यथा गवादयः। एतच्चाभिधेयाव्यभिचारात्। न हि गोशब्दः स्वमर्थं जहाति। हाने पुनरसाधुतैव। यथा गोणीशब्दस्यावपनार्थपरित्यागे गोत्वेन सास्नादिमति प्रवृत्तस्य। **अप्रसिद्ध** इति। **प्रथमप्रतिपादने समयोपाधिकं योग्यत्वम्** इति प्रकृतेन संबन्धः। फलमधिकृत्याह **साधोर्यः**इति। **ज्ञाने** इति। येषां ज्ञानादेव धर्म इति। **शास्त्रपूर्व** इति। येषां प्रयोगाद्धर्म इति। **धर्माभिव्यक्तौ** इति। अवस्थित एव धर्मपदार्थः, केवलं ज्ञानेन प्रयोगेण चाभिव्यज्यते। **विशिष्ट** इति। साधुशब्दा अर्थस्य संबन्धाद्विशिष्टं ज्ञानं जनयन्तीति अविशेषमाह **प्रत्यक्षपक्षेण** इति। यथा प्रत्यक्षमव्यवहितं ज्ञानान्तरेण स्वविषयं बोधयति तथा साधुशब्दसंबन्धः शब्दान्तराव्यवहितः। **अनुमानपक्षेण** द्वि[10]तीयः। यथा लिङ्गं स्वज्ञानव्यवधानेन लिङ्गि[11]नमनुमापयति। यथा वानुमेयज्ञानं सामान्याकारव्यवधानेन स्वलक्षणम्। **अपभ्रंशाः** इति। तथा गोण्यादयः शब्दा गोशब्दव्यवधानेन। यत्र श्रोतुरेवं बुद्धिर्भवति गोशब्दोऽस्याभिधित्सितः, प्रमादादशक्तेर्वा गोणीशब्दमुच्चारयतीति। **अक्षिनिकोचादिवद्** इति। यथाक्षिनिकोचादयो वाचकशब्दविशेषव्यवहिता अर्थस्य प्रतिपादकाः। ये[12](ए?)षामष्टानामर्थानां लिङ्गानि स्वशब्दांश्च दर्शयति। **अपोद्धारे, क्रियमाणे** इत्यनेन संबन्धः। **शास्त्रव्यवहारार्थम्** इति। शास्त्रप्रक्रियासम्पादनाय। **संसृष्टा(याः?)** इति। एकान्तसंसर्गेणावस्थानमर्थानां व्याख्यातम्। **तं तमवधिम्** इति। अवधिर्मर्यादा, सा च पुरुषविकल्पभेदाद्भिन्नेति वीप्सा **तं तम्** इति। यतो णिचमेव केचित् प्रेषणाध्येषणाख्यस्य हेतुमदर्थस्य वाचकमाहुः। अपरे पचिमेव। अतस्तस्यावधिभेदे निमित्तं पुरुषदर्शनभेदसमर्थम्। यदाह

9. W[2] M quote here the whole of the Kārikā No. 26.

10. L. तु इति। This is a likely text, but all Mss. have द्वितीयः which also yields a meaning.

11. L. लिङ्गम°, but लिङ्गिनम् is wanted here and the Mss. have it.

12. L. तेषां, But all Mss. have येषां which also gives a meaning.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्सम्भवति। कथमिदं विज्ञायते हेतुमत्यभिधेये णिज् भवति, आहोस्विद्धेतुमति यो धातुर्वर्तते इति (हेतुमति) वर्तमानादिति। तथा

स्त्रियाम् (P. 4.1.3.)

इति। किं स्त्र्यर्थाभिधाने टाबादयः स्त्र्यर्थवृत्तेः प्रातिपदिकात्स्वार्थे वेति। तथा

नञ् (P. 2.2.6.)

इति किंप्रधानोऽयं समास इति। न ह्येते विकल्पा लौकिकाः। समुदायार्थे हि लौकिके व्यभिचाराभावात्। पुरुषविकल्पेष्वनियतेषु यथा शास्त्रव्यवस्थाभेदो न भवति स विकल्पः परिगृह्यते। तथैकत्वादयो विभक्त्यर्थाः कर्मादयः, पञ्चकः प्राति·

पुरुषाधीनः इति। एक एवार्थः कैश्चित् कथंचिदुत्प्रेक्षितः। अभिधेयावपि मात्रात्तस्यानवगते अन्वयव्यतिरेकप्रत्ययस्य सोऽर्थ इति। वर्तते इति। यथा पचिः विक्लित्तिवचनोऽपि तादर्थ्यादधिश्रयणादीनन्तर्भावयति तथा प्रेषणाध्येषणे अपि। (इति?)स्वारूप्यादनवसाय इति व्यञ्जको णिच्। स्त्र्यर्थाभिधाने इति। अन्वयव्यतिरेकाभ्यां प्रत्ययार्थपक्षः। [13]स्त्रीवृत्तेः इति। अन्तरेणापि प्रत्ययं दृषदादौ स्त्र्यर्थावसायात् प्रकृत्यर्थपक्ष इति। किंप्रधान इति। पूर्वोत्तरपदान्यपदार्थपक्षाः शास्त्रप्रक्रियासमवर्णनार्थमुपन्यस्ताः। लौकिकाः इति। न ह्यब्राह्मणशब्दस्यैकस्मिन् व्यवस्थितरूपे लौकिके व्यभिचारः। पुरुषास्तु स्वामुत्प्रेक्षां निबन्धनीकृत्य विकल्पानानयन्ति। यथा शास्त्र व्यव[14]स्थित इति। यथा न विनश्यति शास्त्रप्रक्रिया तथा स विकल्प आश्रीयते रूढिशब्देषु। प्रत्ययाथस्याह(प्रत्ययस्याह?) तथा इति। केषां चित् संख्या प्रत्ययेनाभिधीयते कर्मादयः प्रातिपदिकेन, यतो वृक्षौ वृक्षान् इति प्रत्ययभेदे संख्याभेदः न साधनभेदः। अपरेषां कर्मादयः प्रत्ययेन, संख्या तु प्रातिपदिकेन। यतोऽग्निचिदिति विना प्रत्ययेनैकत्वावगतिः, न तु विभक्तिमन्तरेण कर्मादिगतिः। अपरेषां तूभयं प्रातिपदिकेन, चर्म पश्य इत्यन्तरेण विभक्तिमुभयार्थगतेरिति। प्रकृतेराह पञ्चकः इति। सर्वे जात्यादयः प्रातिपदिकेनाभिधीयन्ते यथा दृषद् इति। चतुष्कः इति। संख्या प्रातिपदिकेन, साधु प्रातिपदिकेन, संख्या प्रत्ययेन। त्रिकः इति। द्वयमपि यदा प्रत्ययेनाभिधीयते। तथा विकारोऽपि। केषांचिद् यदा भाव-

---

13. W, W², L स्त्र्यर्थवृत्तेः. But all the Mss. of the Paddhati have स्त्रीवृत्तेः.

14. It is not clear what text Vṛṣabha had in his Vṛtti here. All the Mss. have the text as printed, but it is doubtful. The text of the Vṛtti as printed yields a good meaning.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पदिकार्थश्चतुष्कस्त्रिक इति पुरुषविकल्पाधीन एवंप्रकारः पक्षभेदः। क्रियासाधनकालादयोऽपि कैश्चित् कथंचिदभिधेयत्वेन प्रविभक्ताः।

"धातुः साधने दिशि पुरुषे चिति च तदाख्यातम्। लिङ्गे किमिति विभक्तौ एतन्नाम।"

भावकर्मभ्यामात्मनेपदं, कर्तुः परस्मैपदम् इत्यपोद्धारपरिकल्पनाव्यवस्थामाश्रित्य

"स्वार्थमभिधाय शब्दो निरपेक्षो द्रव्यमाह समवेतम्"

इति प्रतिपत्तिक्रमनियमानुगममात्रं क्रियते। न हि शब्दस्य क्रमवती विरम्य विरम्य

दिभिः (तथा द्विकादयोऽपि केषांचित्। यदा टाबादिभिः ?) स्त्रीत्वमभिधीयते तदा देवदत्तेत्यादौ प्रत्ययाल्लिङ्गावगतेः। सर्वे एते पुरुषविकल्पाधीनाः पक्षभेदाः। तिङन्तेष्वाह क्रियासाधनकालादयः इति। आदिशब्दात् संख्यापुरुषोपग्रहाः। कैश्चिद् इति। धातुः क्रियामात्रमाह, प्रत्ययः साधनानीति। लः कर्मणि इति वचनात्। कालस्तु प्रकृत्यर्थोपाधिरपि प्रत्ययाभिव्यङ्ग्य एव। वर्तमाने लट् इति वचनात्। तदादेशैस्तिबादिभिः संख्या, तन्निबन्धनाश्च प्रत्ययाः, तेषामेकत्वादिनियमात् पुरुषनियमा[15]च्च। उपग्रहस्तु कर्त्रभिप्रायादिः प्रकृतिप्रत्ययोपाधिरादेशेभ्य एव गम्यते इति भगवान् पाणिनिः। धातुरिति काशकृत्स्नानां सूत्रम्। धातुः साधने, कर्मादौ, वर्तते। दिशि इति। दिक्शब्देन क्रिया कालश्चोच्यते। पुरुषे इति। प्रत्यक्तादयः। चिति इति। आख्यातपदवाच्यायाः संख्याया एतन्नाम। तदाख्यातम् इति। तच्चैतदाख्यातमिति वेदितव्यम्। यतो धातोः प्रत्ययाः स्वार्थ एवोत्पद्यन्ते। प्रातिपदिकार्थमाह लिङ्ग इति। लिङ्गे स्त्रीत्वादौ। किमिति नामपदवाच्यायाः संख्याया (नाम)। विभक्तौ कर्मादिषु कारकेषु। एतन्नाम इत्युच्यते। प्रत्ययानामव्यतिरिक्तार्थाभिधानात्। यदि धातुः साधनमाह कथमात्मनेपदादिविधाने सूत्रपाठ इत्याह भावकर्मभ्याम् इति। भावकर्मवाचिनो धातोरात्मनेपदम्, कर्तृवाचिनः परस्मैपदम् इति। कर्तुः इति पञ्चमी। यथा

तेन रक्तम्। (P. 4.2.1.

इति रागाभिधायिनः प्रत्ययः। एवमभिन्नस्यार्थस्य शब्दभागभेदकल्पनया भेदापोद्धारे लिङ्गमुक्तमाह यतो भेदनिबन्धनः क्रमयोगव्यवहारः, स च भेदोऽपोद्धार इति। यदाह अपोद्धारपरिकल्पना इति। स्वार्थमभिधाय इति। यदत्र पूर्वकालवाचि(क्त्वा?)प्रत्ययोऽभिदधातेरुत्पद्यमानः शब्दगतस्याभिधाख्यव्यापारस्यार्थेन नियतां क्रमवर्तीं वृत्तिं श्रुत्या प्रकाशयति। यदाह स्वार्थमभिधाय शब्दो द्रव्यमाह इति।

---

15. ACDL °नियमाय.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वार्थादिषु वृत्तिः संभवति । सकृदुच्चारणात् । अर्थेन च नित्यमवियोगात् । प्रतिपत्तिक्रमो ह्ययं श्रोतुरभिधातुर्वा न व्यवस्थितः । सर्वविशेषणविशिष्टं हि वस्तु संसर्गिणीनां मात्राणां कलापं यौगपद्येनैकस्या बुद्धेर्विषयतामापन्नमुत्तरकालमिच्छन् बुद्ध्यन्तरैः प्रविभजते । प्रविभक्तस्यापि चानुसंधानमन्तरेणार्थक्रियाविषया प्रतिभा नोत्पद्यत इति पुनः संसर्गरूपमेव प्रत्यवमृशति । योऽपि चाभिधाता श्रोता वा विभागेन मात्रासु प्रतिपत्ति

तस्य पक्षस्यासंबद्धतां पश्यन्नाह **प्रतिपत्ति[16]क्रम** इति । न शब्दगतोऽभिधानक्रमोऽपि तु प्रतिपत्त्य(त्तृ ?)प्रतिपत्तिक्रमः । स हि प्रतिपत्ता क्रमेणार्थं प्रतिपद्यमानः स्वप्रत्ययानुसारेण शब्दगतामभिधां क्रमवतीं व्यवस्थापयति । तदनुरोधाच्चाह स्वार्थमभिधाय इति । प्रतिपत्तेर्यः क्रमो नियतः तस्यानुगम इति । मात्रग्रहणमभिधानक्रमनिवृत्त्यर्थम् । श्रुत्य(ता?)र्थपरित्यागे हेतुमाह **न हि** इति । **विरम्य** इति । स्वार्थाभिधानाद्विरतो द्रव्यमाहेति । तदनेनाक्रमत्वमाह । **वृत्तिः** इति । शब्दव्यापारमभिधाख्यमाह । न हि सा क्रमवती । **सकृदुच्चारणाद्** इति । नैषां शब्दानां सत्तामात्रे प्रतिबद्धोऽर्थेष्वभिधाख्यो व्यापारः । अपि तूच्चारणानुगृहीतः । तच्चोच्चारणमेकमेव इत्येक एव व्यापारः । [17]तस्मिंश्चोच्चारणे जातिप्रत्ययो न च द्रव्यादयोऽप्यभिधीयन्त इति । तदर्थत्वाज्जातिवद...ता प्रतिपादयति । एकार्थप्रतिपादनशक्तिप्रबोधे एकमुच्चारणमुपक्षीणमिति नैव प्रतिपादयेत् । न च साम ... वधत्त इति नित्यः शब्दार्थयोः संबन्धः । यदाह **नित्यम्** इति । सोऽयं द्रव्यादिरर्थो जातिवदभिधेयभावेन सन्निहितः कथमनेनोच्चारणक्रियालब्धातिशयेन न प्रतिपद्येत । अर्थोऽसौ तस्य न स्यादिति । न । व्यवस्थितप्रतिपत्तिक्रमस्य कल्पितापोद्धारसमुत्थत्वादसत्यतामाह **सर्वविशेषण** इति । जात्यादिभिः पञ्चभिरर्थैः परस्परानुग्रहेण संसृष्टम् । किं तदित्याह **संसर्गिणीनाम्** इति । जात्यादीनाम् । तेन विशिष्टेन संसर्गेण संसृष्टा येन द्रव्यजातिलिङ्गानव्यतिरिक्तानभ्युपगच्छन्ति केचित् । **कलापम्** इति । भेदकल्पनायाम् । अत एवाह **यौगपद्येन** इति । अन्यथैकतामुपगते तस्मिन् पदार्थे कुतो भेदनिबन्धने क्रमयौगपद्ये । **एकस्याः** इति । शब्दग्रहणानन्तरमेकैव द्रागिति विशिष्टार्थग्राहिका या बुद्धिः । **उत्तरकालम्** इति । ततोऽयमित्यादिबुद्धिभिर्विभागं करोति जातिरियं द्रव्यमेतदित्यादि । **इच्छन्** इति । फलमन्तरेणेच्छया विभागप्रवृत्तेः । तथापि च कृतविभागस्यासंव्यवहार्यतामाह **प्रवि[18]भक्तस्य च** इति । न तैरसंसृष्टैर्विशिष्टा प्रतिभोपजन्यते यतोऽर्थक्रियायाः प्रतीतिरिति । ततस्तानर्थान् प्रविभक्तानपि पुनरनुसंधत्ते । यदाह **संसर्गरूपमेव** इति । प्रतिपत्तेरर्थप्रत्यायनकालेऽर्थ-

---

16. ACD प्रकम, 17. L एकस्मिंश्चो°, 18. L. प्रविभक्तस्यापि च,

Dr. Urmila Sharma Collection, Varanasi

लभते तस्यापि प्रत्यासत्त्या महाविषयत्वेनाभिव्यक्तिनिमित्तोपव्यंजनप्रकर्षेणोपलिप्सया बीजवृत्तिलाभानुगुण्येन वा ग्राह्यासु मात्रास्वनियमेन बुद्धिक्रमो व्यवतिष्ठते। तथा ह्याह

एकोऽयं शक्तिभेदेन भावात्मा प्रविभज्यते।
बुद्धिवृत्त्यनुकारेण बहुधा ज्ञानवादिभिः॥ क॥

क्रियाकाले च न क्रम इति कथयति। अतो नास्ति प्रतिपत्तिक्रमः कालद्वये शब्दस्यार्थप्रतिपत्तौ, न च तत्र क्रमोऽस्तीति। यस्तु मध्यावस्थायां क्रमः स न शब्दव्यापारात्, अपि तु वृत्ते शब्दव्यापारे प्रतिकल्पनातः। प्रतिपत्तौ च योऽसमर्थः तमभिन्नं शब्दार्थमवगन्तुं स क्रमं प्रत्यवमृशति। यथा भिन्नपदार्थग्रहणासमर्थः प्रकृत्यर्थादिविभागेनार्थं प्रतिपद्यते तथा वाक्यार्थमपि कश्चित् पदार्थानुगमेन। तदाह **योऽपि च** इति। **अभिधाता** इति। उच्चारयिता। यो योऽसमर्थोऽपि विशिष्टमर्थं चेतसि निधाय शब्दान् प्र(ति)योक्तुम्, न प्रतिपत्ता। किं निबन्धनं प्रतिपत्तिक्रमस्येत्याह **प्रत्यासत्त्या** इति। एते हि प्रत्यासत्त्यादयः पञ्च संसृष्टार्थसन्निधानक्रमावगतिनिमित्तमन्यत्रापीत्युपन्यस्ताः। स हि प्रतिपत्ता स्वार्थादिषु संसृष्टेषु यं प्रत्यासन्नं पश्यति तं प्रथमतः प्रतिपद्यते। प्रत्यासत्तिश्चोपकारभावितेत्युक्ता। जातिश्चासन्नोपकाराय। तेन जातिस्वरूपवत् तद् द्रव्यं विविक्तेन रूपेण शक्यावधारणम्। अतः प्रत्यासत्तेः प्रथमतो जातिः प्रतिपद्यते। सा च द्रव्यमन्तरेणानभिव्यक्ता व्यवहाराक्षमा। लिङ्गादयश्चाश्रयमन्तरेण नावसीयन्त इत्येतेभ्यः प्रत्यासन्नं द्रव्यं प्रतिपद्यते। लिङ्गं तु द्रव्यान्तरानपेक्षं वस्त्वन्तरापेक्षयोः संख्याकारकयोः प्रत्यासीदति। यद्यपि चैकत्वमर्थान्तरानपेक्षं संख्याजातिस्तु सापेक्षा दृष्टा। यद्वाभेदमात्रं ब्रवीतीति द्वित्वापाकरणेनावस्थितत्वात् सापेक्षैव। द्वयोस्तु संख्याकारकयोरर्थान्तरापेक्षत्वे तुल्ये समानजातीयापेक्षत्वात् संख्या प्रत्यासीदति। यतो द्रव्यमेव समानजातीयमपेक्षते। कारकं तु भिन्नजातीयां क्रियामिति। **महाविषयत्वेन** इति। सर्वव्यक्त्यनुगतत्वाज्जातिर्महाविषया। ततश्च स्फुटतरपरिच्छेद्यतया प्रथमतः प्रतिपद्यते। सर्वलिङ्गसाधारणत्वाद् द्रव्यं महाविषयम्। लिङ्गं तु लिङ्गान्तराद् व्यावर्तते। लिङ्गं[19] संख्यातो यतो लिङ्गं सर्वां संख्यां व्याप्नोति। संख्यान्तरात्तु संख्या भिद्यते। तथा संख्या सकलकारण(क?)साधारणभूतं कारणान्तरविलक्षणं कारकम्। **अभिव्यक्तिनिमित्तं** यदुपव्यञ्जनं तस्य प्रकर्षो भूयस्ता। तस्य भूयांस्युपव्यञ्जनानि। उपव्यञ्जनभूयस्त्वे प्रथमतः परिच्छेदः। तत्र जातयः सर्वसाधारणतया एकव्यक्तिव्यङ्ग्यत्वाद् भूय[20]

---

19. L. लिङ्गंसंख्ययोस्तु लिङ्गं महाविषयम्, यतो°. 20. C भूयस उप°.

CC0. In Public Domain, Digitizagtion by eGangotri

स्थितलक्षणस्तु शास्त्रे पदार्थो वाक्यार्थो वा। तथा ह्युक्तम्—

न वा पदस्यार्थे प्रयोगात् (Vā. 19. on P. 1.2.64.)
यदत्राधिक्यं वाक्यार्थः सः। (M. Bhā. on P. 2.3.49.)

इति। संग्रहेऽप्युक्तम्—

न हि किञ्चित् पदं नाम रूपेण नियतं क्वचित्।
पदानां रूपमर्थो वा वाक्यार्थादेव जायते ॥ ख ॥

उपव्यञ्जनाः। द्रव्यं तु प्रत्येकं स्वावयवव्यङ्ग्यत्वादल्पोपव्यञ्जनम्। सं[21]स्त्यानादि(?) संस्थानविशेषापेक्षया लिङ्गं प्रत्येति। द्रव्यं त्वेकैकावयवदर्शनेऽपि प्रतीयत इति ततोऽपि भूयउपव्यञ्जनम्। तथैकैकवस्तुदर्शने लिङ्गमवसीयते। संख्या त्वनेकपदार्थदर्शन इत्यल्पोपव्यञ्जना। तथा संख्या स्वाश्रयमात्रदर्शने प्रतीयमानत्वाद् भूयउपव्यञ्जना। आश्रयव्यतिरिक्तवस्तुनिबन्धना तु कारकप्रतीतिरल्पोपव्यञ्जना। **उपलिप्सया** इति। [22]यदपि [23]प्रथमत उपलब्धुमिष्टं भवति। **बीजवृत्तिलाभानुगुण्येन** इति। यस्य प्रत्ययस्योत्पत्तौ यदान्तरं कारणं तद्बीजम्, तस्य स्ववृत्तिलाभः प्रबोधलाभः, तस्यानुगुण्यं कार्योत्पादनाभिमुख्यम्। यतस्ते प्रत्ययाः पूर्वप्रत्ययाहितसंस्कारप्रबोधवशादुत्पद्यन्ते। जातिप्रत्ययो द्रव्यप्रत्ययस्य बीजवृत्तिलाभानुगुण्ये वर्तते। तन्निबन्धनत्वात्तत्प्रत्ययस्येति प्रथमतो जातौ प्रत्ययः। [24]तदाहितवासनापरिपाकपूर्वं व्यक्तिं प्रतिपद्यते। यथाहुः—"वैश्यावैश्यबुद्धेः श्येतबुद्धिस्त्वेककार्यकारणभूते" इति। व्यक्तिप्रत्ययो लिङ्गादीनामाश्रयपरतन्त्राणां प्रतिपत्तावनुगुणः। लिङ्गप्रत्ययोऽनेकसारसमवेतायाः संख्यायाः प्रतिपत्तावनुगुणः। [25]संख्याप्रत्ययोऽपि बहिरङ्गक्रियाकर्मापेक्षकर्मादिप्रत्ययस्यानुगुणः। **अनियमेन** इति। अत एव प्रत्यासत्त्यादयोऽन्वयमपि क्रमं प्रतिपादयन्ति। तत्र यथा जाति[26]र्द्रव्यमन्यतो विविक्तेन रूपेण दर्शयति व्यवहार्यतां नयति तथा लिङ्गादयो विनापि जातिं रूपेण इयमेकस्यैतत् कर्मेति। न चानभिव्यक्ता द्रव्येणोपलभ्यत इति व्यभिचरति जातेः प्रत्यासत्तिः। तथा लिङ्गपदार्थज्ञानापेक्षत्वमेकत्वेऽपि तुल्यम्। तदेकत्वव्यवच्छेदापेक्षमिति स्त्रीत्वमपि पुंस्त्वमपि व्यवच्छेदापेक्षम्। यथैव च स्वाश्रयव्यतिरिक्तमाश्रयान्तरं वापेक्षते लिङ्गं तथा संख्यापीति को भेदः। तथा कारकात् समानजातीयापेक्षात् समानजातीयापेक्षा संख्येति न द्रव्यवत्। यस्माद् द्रव्यगुणकर्मसु

---

21. ACD स्त्यानतानि. 22. ABCD यद्यपि. 23. AD अप्र°.
24. AD तदाह्रिरूपास°, B तदाहिरदवा°, C तदानिरुपास°.
25. D om. संख्या प्र ...... गुणः. 26. B जातिप्रत्ययो द्र°.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अन्वाख्येयस्य खल्वपि पदस्वरूपस्य कृतेऽपि रूपपरिग्रहे प्रकृतिप्रत्ययादीनां विभागे रूपपरिग्रहानियमो दृश्यते मरुत्तेन्द्राण्यैकागारिकगिरिशश्रोत्रियक्षत्रियादिषु वाक्यावधिकेऽन्वाख्याने। तदुक्तम्—

अर्थात् पदं सभिधेयं पदाद् वाक्यार्थनिर्णयः।
पदसंघातजं वाक्यं वर्णसंघातजं पदम्॥ ग॥

व्युत्पत्तौ वाक्यस्थं पदं वर्णसंघातजं पदमिति। कार्यकारणभावेन खल्वपि संबन्धो निदर्शितः। तद्यथा

"तेऽपि हि तेषामुत्पत्तिप्रभृत्याविनाशाद् बुद्धीर्व्याचक्षाणाः सतो

बीजजातीयेषु त्रित्वसंख्यासमवायः। अथ समानजातीयत्वमपि यत्र कयाचिन्मात्रयास्ति क्रियायामप्येतत् तुल्यम्। तथा महाविषयत्वाद्वा तत्सकाशाल्लिङ्गादीनां भिन्नजातीये[27]ऽपि भावात्। न तु सामान्यमेव वृक्षत्वादिकम्। यथैव लिङ्गादयः संख्यादीन् व्याप्नुवन्ति तथा संख्यादयोऽपि लिङ्गादीनि यतो भिन्नलिङ्गेष्वपि अभिन्नलिङ्गसंख्या[28]व्याप्तिरिति सर्वं योज्यम्। उपव्यञ्जनभूयस्त्वमपि लिङ्गादीनामेवास्ति। यतो लिङ्गादिकं भिन्नजातीय .... वर्तते, न त्वेवंजातीयक इति। उपलिप्सा सर्वत्राविशिष्टा। बीजवृत्तिलाभानुगुण्यं तु प्रत्यासत्तिव्यभिचारादेव बोद्धव्यम्। यतस्तदेव निमित्तं बीजवृत्तिलाभस्य। अथ यस्य यदा वृत्तिलाभ इति तथाप्यनियमः सिद्ध एव। तदेवं कल्पितत्वादनियतः क्रम इति कथितम्। **एकोऽपि** इति। यत्तद्विशिष्टवस्त्वित्युक्तम्। **शक्तिभेदेन** इति। शक्तयः स्वार्थादयः। शक्तित्वं चैषां प्रतिपादयिष्यते। सामर्थ्य-भेदोऽनेकशक्त्याध्यासितत्वात्। **भावात्मा** इति। शब्दार्थः। **प्रविभज्यते** इति। इयं जातिरिदं द्रव्यमित्यादि। **बुद्धिवृत्तिः**, अर्थाकारोऽवग्रहः। तदनुकारेण स्वप्रत्यया-कारमनुगच्छन्तो जात्यादीनपोद्धरन्ति। **ज्ञानवादिभिः** इति। ज्ञानमेव ये शब्दार्थत्वेन व्यवस्थापयन्ति। स्थितलक्षणमर्थमाह(शास्त्रे इत्यादिना ?)**पदार्थः** इति। पदवा-दिदर्शनमुपक्षिपति। **वाक्यार्थः** इति वाक्यार्थवादिदर्शनम्। पदवादिदर्शने लिङ्गमाहुः

'न वा पदस्यार्थे' .... (Vā. 19. on P. 1.2.64.)

इति। पदवादिनो हि पदार्थ एव सत्यं लौकिकश्चेति प्रतिपन्नाः। कात्यायनवाक्यं चेदं यथाश्रुतमेव, नोपसंहृतक्रियाविषयम्। वाक्यार्थनिबन्धनमाह **यदत्राधिक्यम्** इति। प्रथमाविधानसूत्रे चोदितम्

पदसामानाधिकरण्य उपसंख्यानम्। (Vā. 1. on P. 2.3.46.)

---

27. AC °ष्वेऽपिया°. 28. B व्याप्तिरस्तीति.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बुद्धिविषयान् प्रकाशयन्ति'' (M. Bhā. on P 3.1.26.)

इति। योग्यभावेनापि संबन्ध उपवर्णितस्तत्र तत्र।

अभिधानं पुनः स्वाभाविकम्। (Vā 15. on P. 2.2.29.)

समाने वर्णे शोणकर्कहेमादीनामश्वविषयत्वं गवादिषु चाप्रवृत्तिः

(cf M. Bhā. on Vā. 13. on P. 2.2.29.)

तथेदमुक्तम्—

"समानमीहमानानां चाधीयानानां च केचिदर्थैर्युज्यन्ते, अपरे न"

(M. Bhā. on P. 2.2 29.)

इति। वीरः पुरुषः इति परस्परावच्छेदेन विशेषणविशेष्यभावस्य प्रातिपदिकार्थव्यतिरेकात्। यदाह

....अधिकत्वात् (Vā. 1 on P 2.3.46.)

इति। तत्र समाधिः।

न (वा) वाक्यार्थत्वात्। (Vā. 2. on P. 2.3.46.)

इति।

यदत्राधिक्यं वाक्यार्थः सः

(M. Bhā. on the above Vārttika.)

इति। पदार्थो हि पदसंस्कार उपयुज्यते इति। तस्मादवसीयते-अस्ति पदातिरिक्तो वाक्यार्थ इति। तत्र प्रवृत्तिनिवृत्तिलक्षणस्य लौकिकस्य व्यवहारस्य निमित्तत्वात् स्थितलक्षणः। तत्रैवागमान्तरमाह **न हि** इति। न पदं नाम स्वतन्त्रं किंचिदस्ति। तदभावात् पदार्थाभावः कथितः। कथं तर्हि पदार्थव्यवहार इत्याह **पदानाम्** इति। एतदाह—नैकान्ततः पदपदार्थप्रतिषेधः। यतो वाक्यात् पदरूपं वाक्यार्थात् पदार्थश्चापोद्धारकल्पनया व्यवस्थाप्यते। अन्वाख्येयस्य शब्दस्य लिङ्ग इह **रूपपरिग्रहे** इति। पदावधिकेऽन्वाख्याने यत् स्वरूपं तदेव प्रातिपदिकानामवयवानां दर्शनभेदाद् भेदेऽपि व्यवस्थितरूपत्वात् पदमेवान्वाख्येयमिति। यदाह **रूपपरिग्रहानियमः** इति। तमवयवानामनियममुदाहरति **मरुत्त** इति। अत्र हि मरुतेऽस्य सन्ताति

तप् पर्वमरुद्भ्याम् (Vā on P. 5...121.)

इति तप्प्रत्ययमेके। मरुद्भिर्दत्त इति वा ददातेर्निष्ठायामुपसंख्यानात्तत्त्वमाहुः। **इन्द्राणी** इति। इन्द्रशब्दात् स्त्रियामीकारमानुकं चैके। [29]स्त्रीविषयमेव(यादेवः?)प्रकृत्यन्तरादिन्द्राण-

---

29. A स्तिवि°, B स्त्रिवि°, C तिवि°, D अस्तिवि°.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्येवमादि।

"तथाजातीयकाः खल्वप्याचार्येण स्वरितञितः पठिताः ये उभयवन्तः येषां कर्त्रभिप्रायं चाकर्त्रभिप्रायं च क्रियाफलमस्ति।" (M. Bhā. on P. 1.3.72.)

संग्रहकारः पठति—

शब्दादीकारमपर आहुः। इन्द्रशब्दादानीप्रत्ययमपरे। **ऐकागारिक** इति। एकागारशब्दात् ठनमेके। एकशब्दाच्चागारिकमपरे। **गिरिशः** इति। गिरौ शेते इत्यौपसंख्यानिकः शेतेर्डप्रत्ययः। गिरयो वास्य सन्ति, लोमादित्वात् शप्रत्ययः। यो हि गिरौ शेते गिरयस्तस्य सन्ति इति। तथा वाक्यार्थे पदरचनम् **श्रोत्रिय** इति। छन्दसो वा श्रोत्रभावो घश्च प्रत्ययः इति। आदिशब्दात् हरिद्रवः, हरित् रवः इत्यादि द्रष्टव्यम्। वाक्यस्यान्वाख्येयतायां संग्रहोक्तलिङ्गमाह **अर्थात्** इति। प्रयोजनात्। **पदं साभिधेयम्** इति। पदमर्थश्च व्यवस्थाप्यते, न पुनस्तयोः सत्यत्वम्। प्रयोजनमाह **वाक्यार्थनिर्णयः** इति। यतः पदग्रहणपूर्विका वाक्यप्रतिपत्तिः, पदार्थग्रहणपूर्विका च वाक्यार्थप्रतिपत्तिः तदेवमुपायत्वात् पदस्यस्यासत्यत्वम्, वाक्यमेव सत्यतयान्वाख्येयमिति। कथमित्याह— यतः **पदसंघातजं वाक्यम्**, पदसमुदायरूपत्वात्। तस्य **वर्णसंघातजं** [30]**पदम्** इति दृष्टान्तः। यथा वर्णसमुदायमात्रं पदं तथा पदसमुदायो वाक्यमिति। यदि तर्हि पदानि संहन्यमानानि वाक्यम्, सत्यमित्याह **व्युत्पत्तौ** इति। [31]वाक्यं व्युत्पाद्यमानमनेनोपायेन व्युत्पाद्यते, अपोद्धारकल्पनामङ्गीकृत्य, तथा दृष्टान्तोऽपि व्युत्पत्तिसमाश्रयणेन। यदाह **वर्णसंघातजं पदम्** इति। संबन्ध[32]योर्लिङ्गमाह **तेऽपि हि** इति। प्राक् स्वरूपकथनायोक्तम्, सम्प्रति लिङ्गत्वेनोपन्यास इति विशेषः। **स्वाभाविकम्** इति। सरूपसूत्र उक्तम्

"पुरुषव्यापारमन्तरेण स्वत एतेषामर्थप्रतिपादनयोग्यता"

इति। **समाने वर्णे** इति चार्थद्वन्द्ववार्तिके नियतविषयतां शब्दानामुपदर्शयते। तदुक्तम्

"सा चेद् यन्नियतविषयतां योग्यतावशादेवावतिष्ठते"

इति। **समानमीहमानानाम्** इति। यतोऽर्थाभिधानशक्तौ सत्यामुच्चारणे च नियतार्थप्रतिपादकत्वं योग्यतावशेन विविक्तम्। यदाह

तत्र किमस्माभिः कर्तुं शक्यम्। (M. Bhā. on P. 2.2.29.)

---

30. ACD °स्त्रोऽयमिति द°. 31. ACD वाक्यमयं व्यु°.
32. B सम्बन्धौर्लि°.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शब्दार्थयोरसंभेदे व्यवहारे पृथक्क्रिया।
यतः शब्दार्थयोस्तत्त्वमेकं तत्समवस्थितम् ॥ घ ॥

स एव पुनराह
संबन्धस्य न कर्तास्ति शब्दानां लोकवेदयोः।
शब्दैरेव हि शब्दानां संबन्धः स्यात् कुतः कथम् ॥ ङ ॥ २६ ॥

शिष्टेभ्य आगमात् सिद्धाः साधवो धर्मसाधनम् ।
अर्थप्रत्यायनाभेदे विपरीतास्त्वसाधवः ॥ २७ ॥

इति। तथाजातीयकाः इति। स्वरितञिद्ग्रहणप्रत्याख्यानायेदमुक्तम्। कर्त्रभिप्राये क्रियाफले आत्मनेपदं प्रोच्यमानं स्वरितञिद्भ्य एव भविष्यति। यत एव तथा[33]रूपम्। यदाह-तथाजातीयकाः इति। तदनेनैतद् दर्शयति-नात्मनेपदवशाच्छब्दाभिधाने शक्तिरेषामपि तु....। यत एवेति(य एते[34]इति?)। यत एते(य एते?)शब्दादयोऽष्टौ पदार्थास्ते ब्रह्मणि कल्पिताः तत्त्व इति कथयितुं संग्रहकारदर्शनमाह शब्दार्थयोः इति। शब्दार्थावेकस्माद्ब्रह्मणः परमार्थतोऽसंभिन्नौ अभिन्नौ(भिन्नौ?)इव क्रियावत्, तत्र भेदरूपं व्यवहार्यमिति व्यवहारानुवदति। बुद्धयः पृथक्त्वेन व्यवहरन्ति, तद्-व्यवहारवशाच्च पृथक्क्रिया, तत्त्वमविपरीतमेव ब्रह्मेति। तदीयामेवागमसंबन्धनित्यतामाह

'संबन्धस्य न कर्तास्ति'

इति। गतार्थः श्लोकः ॥ २४, २५, २६ ॥

उक्तं 'धर्मे ये प्रत्यये चाङ्गम्' इति (का. २५.)। तत्र प्रत्ययाङ्गतायाः स्वव्यवधारत्वाद्ध[1]र्माङ्गतां दर्शयितुमाह शिष्टेभ्यः इति। शिष्टानां यदिदमविच्छिन्नपारम्पर्यं स्मरणं स आगमः। तस्मात् सिद्धाः साधवः। अतश्च ते धर्मसाधनम्। अर्थप्रत्यायनाभेदे इति। यद्यपि साक्षादनुमानेनेति च भेदः तथाप्यर्थप्रत्यायनम[2]भिन्नम्, [3]साधूनामसाधूनां च तुल्यम्। विपरीताः इति। शिष्टोपदेशपारम्पर्येणा[4]व्यवस्थिताः, अधर्मसाधनं वा।

---

33. AD °रूपा°, C °रूपं.

34. य एते इति is a tentative emendation. This seems to be a citation from the text of the Vṛtti for explanation but none of the Mss. of the Vṛtti has a text beginning with य एते.

1. C तद्धर्मं°. 2. ACD °यनाभि°. 3. A असाधूनाम्, BD om. साधूनाम्.

4. ACD °र्येण व्य°. But this cannot be correct. °र्ये[ण]ऽव्य° is needed here.

Dr. Urmila Sharma Collection, Varanasi

यथैवान्यानि धर्मसाधनानि वि[5]शिष्टोपदेशपारम्पर्यागमाविच्छेदेनागतानि अनभिशङ्कनीयानि व्यवस्थितानि। यथा च प्रतिषिद्धानि हिंसानृतस्तेयादीनि अवि[6]-शिष्टाप्रतिषिद्धानि च हिक्कितश्वसितकण्डूयितादीनि। तथा साध्वसाधुव्यवस्थानमप्यनवच्छिन्नपारम्पर्यमनभिशङ्कनीयं यथागमादेव सिद्धमिति ॥ २७ ॥

नित्यत्वे कृतकत्वे वा तेषामादिर्न विद्यते।
प्राणिनामिव सा चैषा व्यवस्थानित्यतोच्यते ॥ २८ ॥

यथैव इति। यथान्यान्यष्टकादीनि पञ्चनखभक्षणादीनि च धर्मसाधनानि व्यवस्थितानि। कुत इत्याह **विशिष्टोपदेश**[7] इति। विशिष्टानां य उपदेशस्तस्य पारम्पर्यम्। तदेव **आगमाविच्छेदेन** इति। **अनभिशङ्कनीयानि** इति। अविच्छिन्नत्वान्न तेष्वाशङ्कास्तीति। **यथा**[8] **च** इति। यथा चाधर्मसाधनान्यनृतस्तेयादीन्यागमाविच्छेदेन व्यवस्थितानि। **अविशिष्टाप्रतिषिद्ध**[9] इति। हसितकण्डूयितान्यविच्छेदेन व्यवस्थितानि। **तथा** इति। एते साधव इति यद् व्यवस्थानं पूर्ववदेवाविच्छिन्नपारम्पर्यम्। **आगमादेव** इति। योऽसौ शिष्टानामविच्छिन्न उपदेश इति। अथवागमादविच्छिन्ना ये साधवः सिद्धाः ते शिष्टेभ्यः सकाशात् धर्मसाधनमिति सिद्धाः। न तु शिष्टग्रहणेनागमो विशिष्यते। यतोऽनादिरगृह्यमाणकारण आचारोपदेश आगम इत्यागमलक्षणम्। तेनागमाद्ये साधवः सिद्धाः ते शिष्टस्मरणाद्धर्मसाधनम्। यत एवं स्मरन्ति—

'एकः शब्दः सम्यग् ज्ञातः'

इति। **तथा** इति। यथाष्टकादीन्यविच्छिन्नपारम्पर्याणि व्यवस्थितानि धर्मसाधनानि तथा साध्वसाधुव्यवस्थानमपि धर्मसाधनमिति ॥ २७ ॥

तच्चैतच्छब्दानामनादित्वे घटत इत्यनादित्वं साधयन्नाह **नित्यत्वे** इति। यदि नित्याः शब्दा अथापि कृतकाः, न पुनस्तेषामादिरस्ति। शब्दव्यवहारपरम्पराया अनादित्वात्। **प्राणिनामिव** इति। यथैव प्राणिनामनित्यत्वेऽपि शरीराव[1]ग्रहस्याना-

---

5. Judging from his explanation, Vṛṣabha had most probably विशिष्ट° though शिष्ट° as printed in L is what one would expect, considering that the Kārikā has शिष्टेभ्यः etc.

6. I have adopted the reading of M. and the commentary, though here also अशिष्टाप्र° would be better.

7. ACD °देशे इति.

8. Though all the Mss. have न च, it is obviously a mistake.

9. AD °ताप्रतिषेति.

1. ACD शरीरविग्र°.

CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यदि नित्यानां शब्दानामभिव्यक्तिर्जन्मादिविक्रियापत्तिर्वा सताम्, असतां वा सोपाख्यनिरुपाख्यत्वम्, सर्वथैषामप्रवृत्तशब्दव्यवहारा प्रथमा कोटिर्न विद्यते। न परा। ये चेश्वरकालपुरुषविद्याक्षेत्रज्ञान् विभक्ततत्त्वानाहुः। ये चानीश्वरकमकालमपुरुषमविद्यमक्षेत्रज्ञमविद्यामात्रमेव मन्यन्ते, ये चैकत्वानतिक्रमेण स[2]म्मूर्च्छितविरुद्धापरिणामशक्तिरूपनिर्भासपरिग्रहमपूर्वापरं विश्वमाचक्षते, तेषां सर्वेषां नास्ति कश्चिदप्रवृत्तप्राणिव्यवहारः प्रथमो नाम कालाध्वा। सा चेयमनादिरविच्छिन्ना

दित्वमिति। **सा चैषा** इति। कूटस्थनित्यताया अन्या व्यवस्थानित्यतेति संज्ञिता व्यवहारनित्यतेति यावत्।

सांख्या मतभेदेन तत्त्वमाहुः। **अभिव्यक्तिः** इति। परिनिष्पन्नरूपा एव भावाः प्रधाने व्यवस्थिताः सर्वेऽभिव्यज्यन्ते केवलम्, यथा घटादयः प्रदीपेन, यथा च प्रसवे कार्यव्यवस्थिता एवाकृष्टा उपलभ्यन्ते। प्रधानं तु केवलं नदीस्रोतस आनुगुण्येन व्यवतिष्ठते इति पञ्चाधिकरणाः शक्त्यात्मना व्यवस्थिताः प्रधाने भावा विहाय ताद्रूप्यं प्रधानादव्यतिरिक्ता महदाद्यात्मना व्यक्तिरूपतां प्रतिपद्यन्त इति वार्षगण्यः। यदाह **जन्मा[3]दि** इति। जायत इत्यादिषड्भावविकाराः, तैर्विकारापादनेनावस्थितस्य प्रकाशनमिति। शब्देऽपि द्वयमेतद् भवेत्। कार्यपक्षमाह **असतां वा** इति। प्रागसत्योऽनुपाख्यः, कारणेभ्य उपलब्धात्मा सोपाख्यः। पुनः स्वतोऽन्यतो वा लब्धविनाशो निरुपाख्यः। **अप्रवृत्त** इति। पक्षद्वयेऽपि न सा कोटिर्मर्यादास्ति यत्रायं शब्दव्यवहारो न प्रवृत्तपूर्वः। **ईश्वर** इति। अष्टगुणैश्वर्ययोगाभी(दी?)ष्टे सर्वभावानां, तदधीनत्वात् प्रवृत्तिनिवृत्त्योरिति। तथा कालवादिभिः कालो नोपादानकारणत्वेन कल्पितः। **पुरुष** इति केचित् पृथिव्यादिसंघातमाहुः। अपरे परमात्मानम्। स एव च कारणमिति। **विद्या** इति। [4]ज्ञानम्, तदेव भावानां कारणमिति। **क्षेत्रज्ञ** इति। सांख्यीयः पुरुषः। तदौत्सुक्याद्धि प्रधानं महदाद्यात्मना परिणमत इति। पुरुषशब्देन वा पृथिव्यादिपरिग्रहे परमात्मनः क्षेत्रज्ञशब्देन ग्रहणम्। **विभक्ततत्त्वान्[5]** इति। एते हि तेभ्यः कार्येभ्यो व्यतिरिक्ता इति। **अविद्यामात्रम्** इति। ईश्वरादिव्यापारानपेक्षमविद्यामात्रमिति ब्रह्मवादिनः। **एकत्वा[6]नतिरेकेण** इति। तदेव ब्रह्मैकत्वमजहदविद्यात्मनिर्मितं नानारूपम्, पृथिव्यादीनां तदव्यतिरेकात्। कथमेकत्वमव्यतिक्रान्तं नानाजातीयमित्याह **सम्मूर्च्छित** इति।

---

2. WW²ML समुच्छित. The change has been made to agree with the commentary and the Ms. ठ mentioned in L.

3. C जन्मनः. 4. A विज्ञानम्. 5. ACD विभक्तत्वादिति.

6. All the Mss. have this, but one would expect एकत्वानतिक्रमेण.

Dr. Urmila Sharma Collection, Varanasi

प्रवृत्तिनित्यता। तथा ह्युक्तम्—

तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते

(M. Bhā. on Vā. 1 in पस्पशाह्निक.)

इति ॥ २८ ॥

नानर्थिकामिमां कश्चिद् व्यवस्थां कर्तुमर्हति।
तस्मान्निबध्यते शिष्टैः साधुत्वविषया स्मृतिः ॥ २९ ॥

को हि शिष्टः संभिन्नबुद्धिरपि लोकं प्रत्यभिनिविष्टो[1] दुर्ज्ञानं दुरध्येयं च स्वरसंस्कारादिनियमं लौकिकवैदिकानां शब्दानां प्रयोजनं व्यवस्थापयितुमुत्सहेत[2]।

सम्मूर्छितानां संभिन्नानां विरुद्धानामपरिणामानां शक्तिरूपनिर्भासानां परिग्रहः स्वीकारोऽस्येति व्याख्यातम्। सत्त्वतश्च भेदाभावादपूर्वापरं कारणमाचक्षते। अप्रवृत्तप्राणिव्यवहारः इति। यत्रैते प्राणिनो नासन् स तादृशो निवृत्तप्राणिव्यवहारः कालाख्या नास्ति। तथा शब्दव्यवहारशून्यो न लोकोऽस्ति। सा चेयम् इति। कूटस्थनित्यतापरिहारेणानादिमविच्छिन्नं व्यवहारं नित्यतेत्याह। तथा हि इत्यागममाह। तत्त्वम् इति। स एवायमिति प्रत्ययो यस्मिन्न व्यावर्तते। शब्देषु देशकालभेदेनोच्चरत्सु स एवायमिति प्रत्ययोऽस्ति। सर्वथा च व्यवहारस्याविच्छेदात्तदध्यवसायानुवृत्तेर्व्यवहारनित्यता, कूटस्थनित्यताया निराकरणे चेयं भाष्ये प्रक्रान्ता 'न खलु तदेव नित्यं यत् कूटस्थमविचालि' इति ॥ २८ ॥

यदुक्तं 'शिष्टेभ्य आगमाद्' इति तत्र प्रथमे व्याख्याने यद्यपि शिष्टाग[3]माविच्छेदात् साधवो व्यवस्थिताः, ते तु कथं धर्मसाधनमिति पूर्वपक्षे सत्याह **नानर्थिकाम्** इति। येयं साधुव्यवस्था शिष्टानामविच्छिन्ना सा नानर्थिका भवितुमर्हति। शिष्टानां हि प्रामाण्यमङ्गीकृतम्। न च ते निष्प्रयोजनं साधुव्यवस्थानं कुर्वन्ति। न च ते स्वार्थप्रत्यायनाय, अपशब्देभ्योऽपि तस्य भावात्। तस्मात्ते धर्मसाधनमिति। [4]द्वितीये तु व्याख्याने न केवलं शिष्टस्मरणात् धर्मसाधनत्वम्, अपि तु धर्मव्यवस्थानादपि। यतो नानर्थिकामिमां कश्चिदिति। **निबध्यते** इति। अविच्छेदेन व्याकरणस्य स्मृत्युपनिबन्धनस्य स्थितत्वात्। अन्तर्हितामपि च तत्संस्कृतान्तःकरणाः सन्तः पुनःस्मृत्योपनिबध्नन्तीति।

---

1. The reading अनभिनिविष्टः existed in Vṛṣabha's time, as he mentions it.

2. WW [3]ML उत्सहते. 3. D शिष्टानामति°.

4. Just before this ACD repeat by mistake पूर्वपक्षे सत्याह नानर्थिकाम् इति।

CC0. In Public Domain, Digitizagtion by eGangotri

न चानर्थको नियमः। कुतोऽपि शिष्टैरपरैर्न परिगृह्यते। प्रमाणं वा विदुषां लोके न स्यादिति। तस्मादनादिर्गुरुपूर्वक्रमागता शिष्टानुमानहेतुरव्यभिचारा लक्षणप्रपञ्चाभ्यां पर्यायैः शब्दवती चाशब्दा च स्मृतिर्निबध्यते ॥ २९ ॥

नागमादृते धर्मस्तर्केण व्यवतिष्ठते।
ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम् ॥ ३० ॥

को हि शिष्टः, प्रयोजनं व्यवस्थापयितुमुत्सहेत इति संबन्धः। शिष्टो हि परानुग्रहे प्रवृत्तः कथमेवं कुर्यात्। तत्र स्याद् बुद्धिः, नैवासौ शिष्ट इत्याह **संभिन्नबुद्धिः** इति। नास्तिकः। स हि पुण्यापुण्ययोरन्यथाबुद्धित्वान्मिश्रितबुद्धिः। **लोकं प्रति** इति। अपि नामायं लोकः खेदायासाभ्यां युज्यते(ज्येत ?)इति व्युत्थितबुद्धिरभिनिविष्टः। ये तु अनभिनिविष्टः इति पठन्ति तेषां सुगममेव। **दुरध्येयम्** इति। उदात्तादीनां परिज्ञानेऽप्यशक्योच्चारणत्वात्। **दुर्ज्ञानम्** इति। विस्तीर्णत्वात् (दुः?) खत्वाच्च। स्यादेतत्—परित्यक्तधर्मतायां विप्रलम्भतापि दृष्टेत्याह—**न चानर्थकः** इति। ग्रहीतारो बहुलोकप्रकारणात् (प्रतारणात् ?)तज्जातीयास्तथा कुर्युरित्याह **प्रमाणं वा**[5] इति। य एते विद्वांसः शिष्टाः स्वत एव साध्वसाधुप्रविचयकुशलास्तैरपि प्रामाण्येनाभ्युपगताः, यतस्ते लक्षणाविरोधेनैव शब्दान् प्रयुञ्जते। **तस्माद्** इति। यतोऽङ्गीकृतप्रामाण्यः शिष्टैरिति। **अनादिः** इति। पूर्वपूर्वैरस्यार्थस्याविच्छेदेन स्मर्यमाणत्वात्। **गुरुपूर्वक्रमागता**[6] इति। पूर्वेभ्यो गुरुभ्योऽपराननुगतास्तेभ्योऽपरानिति। ते गुरवो विच्छेदे प्रतिसन्धायकत्वात् पूर्व इत्युक्ताः। तत्क्रमेणागताः शिष्टानुमानहेतुरित्युक्तम्। शिष्टपरिज्ञानार्था चेयमष्टाध्यायीति। **अव्यभिचारा** इति। लक्षणस्यान्यथाप्रणयनेऽपि सारभूतप्रतिपाद्यसाधुशब्दरूपाव्यभिचारात्। **पर्यायैः** इति। भेदैः। **शब्दवती च** इति। साक्षाच्छब्देनोपात्ता। यथा 'अग्नेर्ढक्' इति। **अशब्दा**। समाचारनिबन्धनादेव स्मरणात्। यथा 'इष्टमेवैतद् गोनर्दीयस्य' इति ॥ २९ ॥

तदेवमागमात् साधुशब्दानां धर्माङ्गतामभिधायान्यस्य धर्मं प्रत्युपायभावमपाकरोति **न चागमाद्** इति। न तावदर्थानामभ्युदयनिष्पादनशक्तिः प्रत्यक्षगम्या, तस्याः प्रत्यक्षागम्यत्वात्। कार्यमपि चास्याः कालान्तरे इत्यनुमेयतापि नास्ति। यदाह **न तर्केण धर्मो व्यवतिष्ठत** इति। स्यादेतत्—ऋषयः सर्वज्ञाः पदार्थशक्तीः प्रत्यक्षेणाध्यवस्यन्तीत्याह

5, ACD प्रमाणं पत्र.　　6, ACD °क्रमागतेन.

Dr. Urmila Sharma Collection, Varanasi

सर्वेऽ[1] **हि वादिनो दूरमपि गत्वा स्वभावं न व्यतिवर्तन्ते। अदृष्टार्थानां च कर्मणां फलनियमे स्वभावसंविदागमप्रतिबद्धा। को ह्यनवस्थितसाधर्म्यवैधर्म्येषु नित्यमलब्धनिश्चयेषु पुरुषतर्केषु विश्वासः। येष्वपि तर्कातीतः पृथग्विद्याचरणपरिग्रहेषु कश्चिदनुत्तरः पुरुषधर्मः श्रूयते, तेष्वपि तदर्थज्ञानमार्षमृषीणामागमिकेनैव**

ऋषीणामपि इति। तेऽपि ह्यागमादेवावगम्य पदार्थानभ्यस्यन्तस्तत्तद्विहितानुष्ठानाभिव्यक्तधर्मविशेषास्तां[2] काष्ठां प्राप्ता इत्यागमनिबन्धनत्वं धर्मस्य।

सर्वे हि इति। युक्तिवादिनोऽप्यत्यन्तमनुबध्यमानाः स्वभावमेवान्ते तथा ते वदन्ति। यतस्त्रैगुण्यवादी प्रधानस्य त्रिगुणात्मनः कारणस्याभेदे कथं कार्यभेद इति तेषामङ्गाङ्गिभावाद्भेदमाह। स एव कुत इति पृष्टः पुरुषोपभोगनिमित्तत्वादिति। कथं पुनरचेतनं पुरुषोपभोगाय प्रवर्तत इति स्वभावादन्यं न हेतुमाह। परमाणुकारणत्वेऽपि तुल्ये भौतिकत्वे किमिति पृथिवी [3]घनस्वभावा आपो द्रवस्वभावा इति पृष्टः तत् (तत्र ?)परमाणुबाहुल्यमाह। एते[4] एव परमाणवः किमिति केचिद् घनाः केचिद् द्रवरूपाः इति स्वभावादन्यत् किं वक्ति। बौद्धोऽपि निरुपाख्योऽनुत्पन्नोऽसत्त्वात् क्वचिदप्रतिबन्धः शाल्यङ्कुरो न यवबीजानन्तरं दृश्यते इति पृष्टः स्वभावादन्यत् किं वक्ति। तदेवं दृष्टेऽपि न युक्तिः कृतास्पदा यत्र भिन्नकार्यदर्शनाच्छक्यते शक्तिभेदानुमानम्। अदृष्टे तु दूरोत्सारितैव। यदाह [5]**अदृष्टार्थानां च** इति। अदृष्टफलानाम्। **फलनियमे** इति। अस्मादेवेदं फलमिति। स्वभावः सर्ववित् (स्वभावसंवित् ?)त्स्वभावाद् बोधः(°व बोधः ?), एवंशक्तियुक्तमेतत् कर्मेति। तत्रैतत् स्यात्—कासांचिदनुग्रहात्मिकाणां (नां ?) क्रिया-(णा ?)मिष्टफलदानात्तत्सादृश्याद्दानादिक्रियास्वपीष्टफलत्वेनानुमास्यन्त (फलदातृत्वमनुमास्यते) इत्याह **को हि** इति। पदार्थानामपरिमाणत्वादनेकप्रकारत्वाच्च किं कस्यचित् केनचित् साधर्म्यं वैधर्म्यं वा। सत्तायां (त्तया ?) सर्वेषां साधर्म्यं विशेषरूपतया सर्वेषां वैधर्म्यम्। तदेवं क्रियात्वेन हि सर्वाभिरपि साधर्म्यम्, विशेषरूपतया सर्वाभिरपि वैधर्म्यम्, अनुग्रहत्वेन परदाराभिमर्शनादिभिः साधर्म्यमित्यनवस्था। यतः साधर्म्यमेव कदाचिद् वैधर्म्यं भवति। अत एव च निश्चयो नास्ति। **पुरुषतर्केषु** इति आगमसमुत्थाद् वाक्यार्थतर्कादवच्छिनत्ति। ननु कपिलादयः सूक्ष्मव्यवहितानर्थानार्षेण चक्षुषा पश्यन्तीत्याह **येष्वपि** इति। प्रवादेषु पुरुषेषु वा। **तर्कातीतः** इति। कथं ते विदन्तीति तर्कयितुमशक्यत्वात्। **पृथग्** इति। [6]आर्षम्। ज्ञानार्थं (आर्षज्ञानार्थं ?) चरणं चर्या

---

1. WW[2]L सर्वेऽपि. 2. A ताः काष्ठाः. 3. B कठिनस्व°.
4. B एके ए°. 5. L दृष्टार्थानां च, 6. ABCD आर्थम्.

CC0. In Public Domain, Digitizagtion by eGangotri

धर्मेण संस्कृतात्मनामाविर्भवतीत्याख्यायते। स्वाभाविके हि तस्मिन् प्रयत्नः फलाद् व्यतिरिच्येत, स्वभावतश्च प्रत्यवायोऽपि तथाभूतः स प्रसज्येत ॥ ३० ॥

धर्मस्य चाव्यवच्छिन्नाः पन्थानो ये व्यवस्थिताः।
न ताँल्लोकप्रसिद्धत्वात् कश्चित्तर्केण बाधते ॥ ३१ ॥

बहुविकल्पेष्वपि शिष्टानां चरणेषु सन्ति साधारणाः प्रसिद्धाः पुरुषहितप्रतिपत्तिमार्गाः, येष्वन्यथा प्रवृत्तिर्लोकविरसा। न च ते तर्केण कदाचिदपि व्युदस्त-

---

आचारः सिद्धान्तो वा, तस्य परिग्रहो येषु प्रवादेषु। येषां वा कपिलादीनाम्। अनुत्तरः इति। सर्वपुरुषातिशायी सूक्ष्मादिविषयत्वात्। पुरुषधर्मः सर्वपदार्थदर्शित्वम्। अतस्ते (श्रूयते?) इति। [7]विनाप्यागमं वदन्तीति। तेष्वपि, कपिलादिषु। आर्षम् इति ज्ञानविशेषस्य संज्ञा, न सर्वस्य, येन पुनराह–ऋषीणाम् इति। आगमिकेनैव इति। आगमचोदिताचारानुष्ठानादभिव्यक्तधर्माणां तदुक्तपदाभ्यासाद् ज्ञानाविर्भाव इति आगम एव मूलभूतम्। तत्रैतद्भवेत्–अहेतुकमेवैतज्ज्ञानं यथेश्वरस्य धर्मज्ञानवैराग्यैश्वर्यशक्तिः सहजा(इति ?)आचक्षते इत्याह–स्वाभाविके हि इति। अहेतुके। [प्र]यत्नः इति अभ्यासादिकः। फलाद् इति। ज्ञानात्। व्यतिरिच्येत। अधिकस्य[8] यत्नमन्तरेण भावाज्ज्ञानस्य निरर्थको यत्न इति अधिकः प्रत्यवायोऽपि इति। अहेतुकत्वे सति प्रत्यवायो निरयगामित्वमपि कस्मान्न भवतीति ॥ ३० ॥

भिन्नत्वात्तस्यागमानां(भिन्नत्वादागमानां ?)विप्रलम्भभूयिष्ठत्वाच्च कुतः प्रतिपत्तव्यमित्याह धर्मस्य चाव्यवच्छिन्नाः इति। यत्रापि-प्रतिपत्तिः[1] सर्वेषां, यथा [2]दानादिषु। अतः सर्वैरत्यागादविच्छेदः। श्रुतेर्वापौरुषेयतया स्मृत्युपनिबन्धनाविच्छेदाद् अविच्छिन्नश्रुतिस्मृत्याख्य आगमः। ....[3]....(तदन्ये तु ?) पौरुषेयत्वाद्विच्छिन्नाः। पन्थानः इति। तन्निबन्धनत्वाल्लोकप्रवृत्तेः। लोकप्रसिद्धत्वात् इति। सर्वजनाभ्युपगमात्। तर्केण न बाधते इति। सर्वैर्वादिभिरङ्गीकृतत्वात्।

बहुविकल्पेषु इति। प्रधानं परमाणव इत्यनेकविकल्पेष्वपि। चरणेषु इति। सिद्धान्तेषु। साधारणाः इति। श्रुतिस्मृत्युपनिबन्धनगम्यागम्यभक्ष्याभक्ष्यवाच्यावाच्यकार्याकार्यादिमार्गाः सर्ववृद्धाङ्गीकृताः। वैशेषिकैस्तद्वचनादागमप्रामाण्यवचनात्। सांख्यैः 'अपाम सोमम्' (Taitt. Saṁ. III. 2.5.)

---

7. A न विना. 8. ACD अधिकस्यां.

1. AL अविप्रतिपत्तिः, 2. BCD नादाना°, 3. AD तदद्वे तु, C तदा द्वे तु.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पूर्वाः। काममागमोद्देशनिश्रयेणैव केचिद्विनिन्दितमपि लोकसमाचारविरुद्धाचरणं प्रतिपद्यन्ते ॥ ३१ ॥

अवस्थादेशकालानां भेदाद् भिन्नासु शक्तिषु ।
भावानामनुमानेन प्रसिद्धिरतिदुर्लभा ॥ ३२ ॥

इहाव्यभिचरिताभिमतसाहचर्यस्य दृष्टस्य संबन्धिनः तत्सदृशस्य वा दर्शनाद्-दृष्टे संबन्धिनि यज्ज्ञानमुत्पद्यते तेनाप्रत्यक्षस्यार्थस्य प्रसिद्धिर्दुरवसाना। तथा हि। अवस्थान्तरेषु विनिश्चितबलसत्त्वादीनां पुनरवस्थान्तरेषु पुरुषगम्येष्वपुरुषगम्येषु वा दृश्यन्ते स्वभावा व्यभिचारिणः। बाह्यानामपि बीजौषधिप्रभृतीनामवस्थाभेदादुप-

---

इत्यादिवचनाङ्गीकरणात्। बौद्धैरपि सर्वलोकव्यवहारात्यागात्। **लोकविरसा** इति। लोकगर्हिता। यामनुतिष्ठन् परित्याज्यो भवति। **व्युदस्तपूर्वाः** इति। प्रक्षिप्तपूर्वाः। यतोऽनुमानमपि लोकविरोधे नावतिष्ठते। तस्मादेतद्भिन्ना लौकिकमार्गा बुध्यन्त इत्याह **कामम्** इति। **आगमोद्देशनिश्रयेण** इति। तेऽपि हि वेदान्तदर्शनमन्यथा परिकल्प्य प्रवृत्ताः। अत एव च लोकं बाधन्ते, न तु तर्कसन्निश्रयेणेति ॥ ३१ ॥

इदानीमनुमानस्यार्थाधिगमे सामर्थ्यमपनिनीषुराह——**अवस्थादेशकालानाम्** इति। एते ह्यवस्थादयः स्वतो भिद्यमानाः पदार्थशक्तिं भिन्दन्ति। ततश्चैकदर्शनेनान्यस्य तथात्वनिश्चयो नास्ति। यदाह **अतिदुर्लभा** इति। दुरधिगमत्वात् पदार्थशक्तीनां नास्त्यनुमानमिति।

अव्यभिचरितेति। अग्निं न व्यभिचरति धूम इत्यभिमानमात्रमेतत्, न पुनरव्यभिचारः। यतोऽवस्थादिभेदादनेकरूपाः पदार्थाः। तत्र स्यादपि कश्चिद्धूमो यो नाग्नेः, यथा शालूकादपि शालूकः, गोमयादपि। तत्रैतत् स्यादस्ति तत्र कश्चिद्विशेष इति। को वा स्वलक्षणानां विशेषानङ्गीकरोति, स धूमस्य धूमा न सन्ति दुरधिगमाः, यद्धि सामान्यवस्तु सङ्कल्पयतानुमानाङ्गं तत्राप्यस्ति, याप्यन्यतोभावे अहेतुकतोच्यते साकमिति शालूकमिति न प्रसज्यते, न चाग्निधूमजन्ययोः धूमयोर्विशेषोपलब्धिरिति स्यात् स्वलक्षणयोरव्यभिचारः। न च तत्रानुमानम्। अथ स्यादपि चेति। तत् कार्यं कारणं न व्यभिचरतीति स एवावस्थादिभेदेन विवेकाभावः प्रतिपाद्यत इति। अव्यभिचरित इत्यभिमतं साहचर्यमव्यभिचारो यस्य धूमादेस्तद् **अव्यभिचरिताभिमतसाहचर्यम्**। '[4]**दृष्टस्य इति** विशेषः। अतो(विशेषतो ?)दृष्टानुमानमाह। **तत्सदृशस्य वा** इति। सामा-

---

4. ACD अदृष्टस्य.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लभ्यते शक्तिव्यभिचारः। तथा देशभेदादपि। अतिशीतो हैमवतीनामपां स्पर्शः। स तु वलाहकाग्निकुण्डादिषु तद्रूपाणामेवात्युष्ण उपलभ्यते। तत्र रूपसामान्याद्-पहृतबुद्धिः परोक्षविशेषो दुर्ज्ञानं भेदमर्वाग्दर्शनो दर्शनमात्रेणागस्त्यमागमेनैव प्रपद्यते। कालभेदादपि। ग्रीष्महेमन्तादिषु कूपजलादीनामत्यन्तभिन्नाः स्पर्शादयो दृश्यन्ते। तत्र सूक्ष्ममवस्थानविशेषं प्राकृतमप्राकृतगम्यमागमचक्षुरन्तरेणाप्रत्यक्षमनुमानमात्रेणानिश्चितं कः साधयितुमसंमूढः प्रयतते ॥ ३२ ॥

न्यतोदृष्टम्। संबन्धिनि अनुमेये। दुरवसाना इति। दुरवधारा। निश्चितबलसत्त्वादीनाम् इति। निश्चितं बलं सामर्थ्यं सत्त्वं च येषाम्। आदिग्रहणात् प्रज्ञामेधादयः। पुरुषगम्येषु इति। प्रत्यक्षेषु। [5]पुरुषागम्येषु इति। अप्रत्यक्षेषु। एतदाह—यथा प्राग् देवदत्त उपचितशरीरो बलसत्त्वसम्पन्नो दृष्टः। पुनः स एव व्याधिनापचितकायः पुरावद्[6] बलसत्त्वसम्पन्नत्वमस्य देवदत्तस्यान्नावसीयते इति पुरुषगम्यः। स एव पुनः कालान्तरे तथैवोपचितशरीरो व्याधिना केनचिदन्तःश्लथितबलसत्त्वेन तथात्वेन .... इत्यपुरुष-गम्यः। बाह्यानामपि इति। बलसत्त्वयोरन्यत्वात्[7]। बीजौषधिप्रभृतीनाम् इति। स्यादपि जातीनामनेकसहायानामनेककार्यजननसामर्थ्यमित्यवस्थाभेदमाह। यथा धान्या-दिबीजानामवस्थान्तरेऽङ्कुरजननसामर्थ्याभावः। ओषधेश्च पिप्पल्याख्यस्यार्द्रावस्थायां कफ-जननशक्तिः, शुष्कस्य च त्रिदोषशमनशक्तिरिति। हिमवति भवा आपोऽतिशीताः वलाहकल्पमुदकस्थानमग्निकुण्डं राजगृहादिषु। आदिशब्दान्निर्झरादयः। तत्र रूपस्याभेदे स्पर्शभेदः। रूपसामान्य(न्याद्?) इति। रूपसामान्येन विशेषबुद्धेरपहृतत्वात् परोक्षा विशेषा अस्येति परोक्षविशेषः। अर्वाग्दर्शनः इति। परमध्यमभागानामदर्शनादर्वाग्व्यव-स्थितमेव भागं [8]पश्यतीत्यसर्वज्ञ उच्यते। दर्शनमात्रेण इति। रूपसामन्य(स्य?)। कालभेदादाह ग्रीष्महेमन्तादिषु इति। कूपजलादीनाम् इति। आदिशब्दात्तटाकादि-ग्रहणम्। स्त्रीन(स्त्रीपुं?)पुंसकयोर्वा कालभेदात् स्पर्शभेदः। अत्यन्तभिन्नाः इति। सूक्ष्मस्पर्शादिभेदः सर्वदैवास्ति। स्पर्शादय इत्यादिग्रहणाद्रसभेदः। यथा ग्रीष्मे क्षारत्वं, हेमन्ते माधुर्यम्। तथाह-तटाकादीनां वर्षासु कफरूपत्वम्, कौपीनां विपरीतम्। अप्राकृतगम्यम् इति। प्रत्यक्षधर्मभिरेव गम्यम्। आगमेति। आगमोत्पन्नं ज्ञानम्, तच्चक्षुः प्रकाशत्वात्। आगमानुसारेण शक्यं तद् द्रष्टुमिति ॥ ३२ ॥

---

5. The Vṛtti has अपुरुषगम्येषु.
6. AD पुरोवद्.
7. C °योरनधिगमत्वात्, D °योरनन्तत्वात्.
8. ACD पश्यन्ति.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निर्ज्ञातशक्तेर्द्रव्यस्य तां तामर्थक्रियां प्रति ।
विशिष्टद्रव्यसंबन्धे सा शक्तिः प्रतिबध्यते ॥ ३३ ॥

अग्न्यादीनां काष्ठादिविकारोत्पादने दृष्टसामर्थ्यानामभ्रपटलादिषु द्रव्येषु तथाविधं[1] सामर्थ्यं प्रतिबध्यते। तथा मन्त्रौषधिरसादिभिर्योग्येष्वपि द्रव्येषु सामर्थ्यं प्रतिबध्यते। [2]तत्रैकस्मिन् विषये दृष्टसामर्थ्यानां पुनर्विषयान्तरेषु द्रव्याणां दुरवसानाः शक्तयः ॥ ३३ ॥

यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः ।
अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते ॥ ३४ ॥

अन्यद् द्रव्यं गुणेभ्यो व्यपदेशात्। तद्यथा। सति विशेषणविशेष्यभेदे राज्ञा राष्ट्रं विशेष्यते न परिव्राजकेन। विशेष्यते वा चन्दनेन गन्धो न रूपादिभिः। तस्मादन्यद्

निर्ज्ञातशक्तेः इति। निर्ज्ञातसामर्थ्यस्य। द्रव्यस्य इति। अग्न्यादेः दाहादिका। विशिष्टद्रव्य इति। अभ्रपटलादिसंबन्धे। प्रतिबध्यते इति। प्रतिहन्यते।

तथाविधम् इति। तत्कार्यजनकं सामर्थ्यम्। अभ्रपटलं दहत्ययमग्निः, अग्नित्वात्, इति नानुमानम्। मन्त्रौषधिरसादिभिः इति। प्रतिबन्धो मन्त्रवशादोषधिरसवशाच्च दाहप्रतिघातः। तेन न शक्यते दर्शनमात्रेण दाहशक्तेरनुमानम्। तत्रैकस्मिन् इति। चक्षुरिन्द्रियं सन्निहितग्राह्यमिति .... न्तादिना तद्घनस्य न ग्राहकम्। तस्माद्दुरधिगमाः पदार्थशक्तय इत्यनुमानाभावः ॥ ३३ ॥

तत्रैतत् स्यात्---[1]विवेचिते व्यभिचारः, किं तस्यादरादित्याह यत्नेन इति। सत्यपि यत्ने(न ?) विवेचनसामर्थ्यं तस्य। यथा पङ्गोर्गमने कृतयत्नस्यापीत्याह कुशलैः इति। अन्यथैव इति। प्राज्ञानां तारतम्येन व्यवस्थानादव्यवस्थितस्य तु अनुमाप्यतोऽप्रामाण्यम्।

अन्यद् द्रव्यं गुणेभ्यो व्यपदेशात् इति। व्यपदिश्यतेऽनेनेति व्यपदेशो विशेषणम्, द्रव्यं त्वविशेषणम् (गुणविशेषणम् ?) चन्दनस्य गन्ध इति। विशेषणविशेष्ययोश्चान्यत्वम्। यथा राज्ञः पुरुष इति राजपुरुषयोः। तदस्य वृक्षा वनमित्यभेदेऽपि दर्शनान्नैकान्तिकत्वमनयोः। यथा। व्याचष्टे यद्दर्शयति। सति इति। यद्यपि विशेषणविशेष्ययोर्भेदः यथा

---

1. MW²ML तथाभूतम्। 2. WW²L तथैकस्मिन्.

1. L यस्मिन् यत्नेन विवेचिते,

Dr. Urmila Sharma Collection, Varanasi

द्रव्यं गुणेभ्य इत्यनुमानेन द्रव्ये व्यवस्थापिते नायमपदेशो युक्त इत्याहुः। विशिष्टाविशिष्टाभिधेयनिबन्धनत्वात् शब्दानाम्। चन्दनशब्देन हि विशिष्टरूपादिवचनेन विशेषणमर्थवद् गन्धादीनाम्। रूपादिमात्रवचनत्वात्तु रूपादीनां तावतोऽर्थस्य निर्ज्ञातत्वादनर्थकं विशेषणम्। तथा हि। कस्यायं पुरुष इति प्रश्ने विशेषान्तरावच्छेदार्थं राज्ञ इति व्यपदिश्यते। न तु निर्ज्ञातत्वात् पुरुषस्य इति। अपर आहुः।

राज्ञः पुरुष इति, पुरुषो राज्ञः इति। राजा अर्थान्तरं राष्ट्रात्, राष्ट्रं च स्वाम्यन्तरेभ्योऽवच्छिन्नं विशेषणम्, राज्ञो राष्ट्रम् इति। **न परिव्राजकेन** इति। परिव्राजकस्तु राष्ट्राच्छिन्नोऽपि विशेषणं न भवति, परिव्राजकस्य राष्ट्रमिति। विशेषणविशेष्ययोश्च प्रसिद्धो भेदः। **विशेष्यते वा** इति। चन्दनं गन्धस्य विशेषणम्। न तु रूपादयः। न हि भवति रूपादीनां गन्ध इति। **तस्माद्** इति निगमयति। एतदाह - व्यपदेशाव्यपदेशहेतुत्वाच्च न(°त्वाच्च रूपा ?)रूपादीनां राजपरिव्राजकवदन्यत्वम् इति। **नायमपदेशः** इति। अपदेशो हेतुः। नायं हेतुरिति प्रत्यवतिष्ठते। **विशिष्टाविशिष्ट** इति। चन्दनशब्दो विशिष्टसन्निवेशव्यवच्छिन्नान् रूपादीनाह। रूपादिशब्दास्तु सर्वपदार्थसाधारणान् रूपादीनाहुरित्येतत् इति। यत्र विशेषणत्वं विशेष्यत्वस्य कारणं न भेदः। यदाह— **चन्दनशब्देन हि** इति। [2]**अर्थवद्** इति। अन्यतो रूपादिसमुदायादवच्छेदकम्। **अनर्थकम्** इति। रूपादीनां गन्ध इति न कुतश्चिदवच्छेदः, केवलं सहकारित्वं प्रतीयते। तच्च गन्धशब्दादेवावसितम्। तस्य तैर्विनाभावात्। **तथाहि** इति अनैकान्तिकतामप्याह। **कस्यायम्** इति निर्ज्ञातपारतन्त्र्यस्य **प्रश्ने राज्ञ** इति स्वाम्यन्तरव्यवच्छेदाय विशेषणम्। **न तु** इति। **पुरुषस्य** इति तु न विशेषणम्। स्वपुरुषाक्षेपान्न कुतश्चिदवच्छिनत्ति। एतदाह—यथा राज्ञोऽपि पुरुषत्वाद्वस्तुतोऽनन्यत्वे राजा विशेषणं न पुरुषः, ततोऽन्यत्वे राजा विशेषणं न पुरुषः, तथा चन्दनस्य रूपादिभ्योऽनन्यत्वेऽ[3]न्यत्वे चेति। **पदसमूहैकदेशभावे** इति। पदसमूहस्य सूक्ताख्यस्य[4] पदमेकदेशः, ऋगपि। पदान्येव हि विशिष्टसन्निवेशयुक्तानि ऋगित्यभेद ऋक्पदयोः। अथ च ऋक् पदस्य विशेषणं 'ऋचः पदम्' इति, पदानां श्लोकादिष्वपि साधारणत्वात्। न पदानि ऋचमवच्छिन्दन्त्यव्यभिचारात्। अतस्तयोरन्योन्यतो(ऽ ?)विशिष्टो विशेषणाद्वि(णावि ?)शेषणभेद इत्यनैकान्तिकः। तत्र व्यतिरिक्ताभिमतरूपाद्येकदेशो गन्धो विशेष्यते, इह तु साक्षात् पदमिति वैधर्म्यं नैवेहोपयुज्यते। **एकत्व** इति।

---

2. ACD नार्थवद्. 3, ABCD om. अन्यत्वे च,
4, L वाक्याख्यस्य,

CC0. In Public Domain, Digitizagtion by eGangotri

पदसमूहैकदेशभावेऽपि पदमृचा व्यपदिश्यते, न पदेन ऋक्। अपर आह। एकत्वाभ्युपगमेनैव चन्दनेन व्यपदेशो गन्धादीनां रूपादिभिरव्यपदेश इति विरुद्धत्वादसिद्धमेतत्। श्रुतिविशेषसंनिधानासंनिधानकृतस्तु पूर्वपक्षोपन्यासः। तस्माद् दृष्टाददृष्टमनुगम्यते इत्यविरोधात् सिद्धमेतत्। तथा पाकाद्यनुमानार्थानि क्रियाविशेषेषु प्रतिनियतान्यङ्गानि विप्रलम्भार्थान्यपि कैश्चित् कथंचिदुपादीयन्ते ॥ ३४ ॥

चन्दनशब्दोपात्तभावव्यपदेशाङ्गे यो विशेषणत्वं चन्दनस्य, नानुपात्ते मदिरागरलादौ, यतः सर्वत्रैव विशेषणं समुदायावयवभावेनोपात्तस्यैव। यथा [5]गृहस्य द्वारशालेति, नानुपात्तस्य विशेषणं गृहस्य हस्तीतिसत्यपि च भेदे न द्वारशाला गृहस्य विशेषणम्। रूपादिभिः इति। रूपादिशब्देन गन्धस्यानुपात्तत्वव्यपदेशाद्, यतो गन्धपरित्यक्तै रूपादिभिः सह न कश्चिद् गन्धस्य संबन्धः। एकार्थसमवाय इत्यपि द्रव्येण सह तेषां संबन्ध उच्यते, न तु परस्परतः, तत्र विरोधाच्च। एवं ह्युक्तम्

'गुणकर्मसन्निकृष्टेषु द्रव्यं कारणं कारकं च'

इति। यदि चैकार्थसमवायः संबन्धः कथं तेषां सन्निकर्षाभावः। गन्धोऽपि नैव विशेषणम्। गन्धस्याव्यभिचारात्। असति स्वस्वामिभाव इति वा वेदितव्यम्। तदेवमयं हेतुर्धर्मस्वरूपविपर्ययसाधनाद्विरुद्धः। असिद्धिद्वयमेतदिति प्रतिज्ञानस्यासिद्धेर्व्यपदिश्याभेद एव दर्शनात्। कथं तर्हि पूर्वपक्ष इत्याह श्रुतिविशेष इति। चन्दनशब्दाद्विशिष्टस्यार्थस्य बुद्धौ सन्निधानम्, रूपादिवाच्यस्यासन्निधानम्। एवं रूपादिशब्दादपि विपर्ययेणेति शब्दार्थभेदमङ्गीकृत्य पूर्वपक्षो न वस्तुगतमिति। यदानुमानं न प्रमाणं कथमेकपदार्थदर्शनादन्यप्रतीतिरित्याह दृष्टाद् इति। लिङ्गात् दृष्टमिति लिङ्गविषयः लिङ्गी। अनुगम्यत इति। एतदाह—दृष्टविषये भवत्यनुमानं प्रमाणम्, नैकान्तादृष्टे धर्माधर्मादौ, यत्रैकान्ततो लिङ्गदर्शनासम्भव इति। न ततोऽपूर्वादीनां भावाभावौ इति। अविरोधात् सिद्धम् इति। तत्रापि दृष्टेऽदृष्टमिति प्रत्यक्षागमाभ्यामविरोधात् सिद्धं यतस्तदविरोधादेवानुमानसिद्धिः। यद्वानुमितेऽपि तावन्नि(न्नि ?)श्चीयते यावत् प्रत्यक्षागमाभ्यां न प्रतीतमिति। तथा इति। उदाहरणान्तरमाह। पाकादि इति। पाकादिक्रियाणामनुमानाय। क्रियाविशेषेषु। पाकादिषु। अङ्गानि इति। काकमारणाय भिक्षुप्रतारणाय चोपादीयन्ते स्थाल्यधिश्रयणादीनि(इति ?) साधनेभ्यः क्रियानुमानं व्यभिचारयति ॥ ३४ ॥

5, ACD गृहस्थस्य.

Dr. Urmila Sharma Collection, Varanasi

परेषामसमाख्येयमभ्यासादेव जायते ।
मणिरूप्यादिविज्ञानं तद्विदां नानुमानिकम् ॥ ३५ ॥

न हि रूपतर्कादयः सूक्ष्मानप्रसिद्धसंविज्ञानपदान् कार्षापणादीनां कल्पयित्वापि समधिगमहेतून् परेभ्य आख्यातुं शक्नुवन्ति । षड्जऋषभगान्धारधैवतादिभेदं वा प्रत्यक्षप्रमाणविषयमप्यभ्यासमन्तरेणाभियुक्ताः प्रणिधानवन्तोऽपि न प्रतिपद्यन्ते ॥ ३५ ॥

प्रत्यक्षमनुमानं च व्यतिक्रम्य व्यवस्थिताः ।
पितृरक्षःपिशाचानां कर्मजा एव सिद्धयः ॥ ३६ ॥

प्रत्यक्षानुमाने एव प्रमाणे इत्यत्र[1]गमादन्यप्रमाणप्रदर्शनेन व्यभिचारयति **परेषाम्** इति । **असमाख्येयम्** इति शक्यार्थे कृत्यः, आख्यातुमशक्यमिति । आगमिकत्वान्निरासः । **अभ्यासादेव** इति । विषयसन्निपातमात्रादनुत्पत्तेर्न प्रत्यक्षत्वम्, लिङ्गादेरभावेन च नानुमेयत्वम् । यदाह **नानुमानिकम्** इति ।

रूपतर्कादयः इति । रूपं रूपकभेदा दीनारादयः, तांस्तर्कयन्ति परीक्षन्ते इति, सौवर्णिका[2] उच्यन्ते । आदिशब्देन माणिक्यपरीक्षकः । **सूक्ष्मान्** इति विशेषणं, समधिगमहेतूनाम्, दुरवधानत्वाद्[3] अप्रत्यक्षत्वम् । अत एवानुमानाभावः । [4]**अप्रसिद्ध** इति । प्रसिद्धं संविज्ञानपदं नास्ति तेषां समधिगमहेतूनामित्याख्यानस्याशक्यतयानागमिकत्वं समम् । हेतुसद्भावे आगमिकत्वं स्यादित्याह **कल्पयित्वापि** इति । तथा षड्जादिषु प्रत्यक्षविषयोऽपीति(योऽपि ?) भेदोऽभ्यासादेव जायत इत्याह **षड्ज** इति ॥ ३५ ॥

प्रत्यक्षानुमानागमव्यतिरिक्तां प्रतिपत्तिमाह **प्रत्यक्षम्** इति । यतः पित्रादीनां कर्मजाः सिद्धयोऽन्तर्धानादयः, न तत्र प्रत्यक्षं नाप्यनुमानं व्याप्रियते । **च** [1]शब्दादागमोऽपि ।

तस्याः सिद्धेरुदाहरणमाह **स्वप्ने हि** इति । यद्यपि स्यात् पूर्वशब्दानुभवाद्बधिरस्य, जातिबधिरादेस्त्वननुभूतशब्दादेरपि [2]स्वप्नेन शब्दाद्यनुभवं दर्शयति ।

---

1. L इत्यागमाद् . 2. ACD सौवर्णिक उच्यते. 3. L दुरवधार°.
4. ACD प्रसिद्धेति. 1. L न च शब्दागमोऽपि.
2. ACD have पित्रादयः before स्वप्नेन. It may be a corruption of प्रतिपादनम् of the Vṛtti.

CC0. In Public Domain, Digitizagtion by eGangotri

स्वप्ने हि बधिरादीनां शब्दादिप्रतिपादनम्, घनसंनिविष्टावयवानां च कुड्यादीनामवयवविभागमन्तरेणान्तर्वेश्मादिषु सूक्ष्माणामर्थानां दर्शनं यत्सर्वप्रवादेषु सिद्धम्, तत्र कथम्भूतानि साधनानीत्यदृष्टशक्तिमचिन्त्यां हित्वा नान्यानि साधनान्याख्यातुं शक्यन्ते ॥ ३६ ॥

आविर्भूतप्रकाशानामनुपप्लुतचेतसाम् ।
अतीतानागतज्ञानं प्रत्यक्षान्न विशिष्यते ॥ ३७ ॥

तत्रोत्पत्तिपक्षे तावत्कथमपदमवस्तु निरात्मकमदृष्टाप्रतिनियतकारणशक्तिपरिग्रहमधिगन्तुं शक्यते। पक्षान्तरे च विशिष्टव्यक्तिरूपतिरोभावाद् व्यवहारं प्रति

---

[3]संनिविष्टेति। सन्निविष्टं सन्निवेश एषामित्यशक्यच्छेदतामाह। अवयव इति। व्यवधाने न दृष्टा इन्द्रियप्रवृत्तिरदृष्टत्वात् सर्वत्र। सर्वप्रवादेषु इति। संबन्धं वस्तुत आह। कथं भूतानि इति। तस्याः प्रतिपत्तेः किं साधनं बधिरादीनाम्, न ते श्रोत्रादय इति न प्रत्यक्षम्, नाव्यभिचारिसंबन्धिदर्शिन इत्यनुमानभावेनापि। तदागमः पिशादीन्द्रिये ज्ञानमप्रत्यक्षादित इत्यन्य उपाधयो वक्तव्याः (इत्यनुमानाभावः। नाप्यागमः। पिशाचाद्यतीन्द्रिये ज्ञानमप्रत्यक्षादिति अन्ये उपाया वक्तव्याः ?)। अदृष्टशक्तिः इति। पूर्वकृतकर्मशक्तिः, सा। अचिन्त्याम् इति। सा कथं वितर्केण(हि तर्केण ?) अवयव(अवसेया?) ॥ ३६ ॥

इदानीं प्रसिद्धप्रत्यक्षव्यतिरेके प्रत्यक्षान्तरमाह आविर्भूत इति। तस्यैव प्रकाशस्य केवलमविद्यापगमादिनाविर्भावमाह। अनुपप्लुतचेतसाम् इति। अविद्याप्रत्यस्तमयमाविर्भावे कारणमाह। अतीतानागतज्ञानम् इति। अतीन्द्रिय प्रत्यक्ष(क्षा ?)प्रवृत्तिमाह। न विशिष्यते इति। लोकप्रत्यक्षेण तुल्यत्वात् प्रामाण्यमाह।

उत्पत्तिपक्षे इति। असत्कार्यपक्षे। अपदम् इति। अनाश्रयम्। निरुपाख्यतया न प्रतिबद्धं क्वचित्, शक्तिरूपेण स्थितम्[1]। [2]अवस्तु इति। शरीराभावात्। अत एव निरात्मकम् निःस्वभावम्। एतदेव चातीतस्यापि रूपम्। तत्रैतत् स्यात्—उपागतस्य कामनादर्शनात्(अनागतस्य कारणदर्शनात्?) पूर्ववदनुमानेनावधारणमाह अदृष्टेति। कारणशक्तेः कारणावस्थायाः परिग्रहः स्वीकारः कार्यदर्शनाद्यदा[3] विधीयते(यदावधार्यते ?)ततस्ते परिगृहीता भवन्ति। तदा(यदा ?)

---

3. ACD स्वसंनिविष्टानामिति; what reading of the Vṛtti Vṛṣabha had is not clear. 1. AD ins. न before स्थितम्। 2. ACD अवस्थितम्।
3. ACD यदृविष्वाचसीयते, C यांऽधावसीयते,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदविधेयं वस्तु निरुपाख्यैरेव तुल्यम्। अथ च तपसा निर्दग्धदोषा निरावरणख्यातयः शिष्टाः प्रतिबिम्बकल्पेन प्रत्यक्षमिव स्वासु ख्यातिषु संक्रान्ताकारपरिग्रहमव्यभिचरितं सर्वं पश्यन्ति ॥ ३७ ॥

अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा ।
ये भावान् वचनं तेषां नानुमानेन बाध्यते ॥ ३८ ॥

अन्तर्यामिणमणुग्राममभिजातिनिमित्तनिबन्धनमनभिव्यक्तं शब्दब्रह्म शक्त्यधिष्ठानं देवताः कर्मणामनुबन्धपरिणामशक्तिवैकल्यानि सूक्ष्ममातिवाहिकं शरीरं

च कार्याभावात्तद्दर्शनाभावे कारणशक्तिरपि नावसीयते इत्यदृष्टः कारणशक्तिपरिग्रहः। प्रतिनियतस्य स्वविशिष्टस्य कार्यस्योत्पादनात् तन्ना(तत्रा ?)नुमानादस्ति प्रतिनियमः। अथ कार्यदर्शनाच्छेषवदनुमानेनातीतमवगम्यत इति, तत्रापि स्वयमभावात्कारणशक्तिस्तस्य नास्त्येवेति सुतरामदृष्टश्चाप्रतिनियतश्च शक्तिपरिग्रहः। पूर्वं कारणावस्थायाः कार्येण परिग्रहः। सम्प्रति कारणेन स्वस्या एव शक्तेः परिग्रहः। पक्षान्तरे इति। सत्कार्यपक्षे। विशिष्टेति। विशिष्टं व्यक्तिरूपं व्यवहारयोग्यं वर्तमानावस्थस्य दृष्टम्। तथा(तन्ना ?)स्त्यतीतानागतयोः। यत्रदस्ती(यन्नास्ती ?)त्यङ्गीक्रियते तदव्यवहार्यं न प्रत्यक्षसमधिगम्यमिति। तेनास्मदादयः शशविषाणं वातीतानागते(वा ?) न प्रत्यक्षयन्ति। तपसा इति। श्रुतिस्मृतिविहितेन। निर्दग्धदोषाः इति। अपगततमस्काः। अत एव च निरावरणख्यातयः। ख्यातिर्बुद्धिः[4]। तस्याः क्लेशज्ञेयावरणविगमात्। प्रतिबिम्बकल्पेन इति। तेऽतीतादयो बहिर[5]सन्तोऽपि प्रतिबिम्बरूपेण तेषां बुद्धिषु प्रत्यवभासेरन्। प्रत्यक्षमिव[6] इति। बहिरङ्गत्वादव्यभिचाराच्च। परिगृह्यत इति परिग्रहः। संक्रान्त आकारपरिग्रहोऽस्येति। [7]बाह्ये तदाकारप्रतीत्यवभासेन(त्यभावेन ?)प्रतिबिम्बकल्पमाह। यद्यवस्तुविषयः कथं न(ना ?) प्रमाणमित्याह—अव्यभिचरितमिति। व्यभिचाराभावाच्च न प्रमाणम् (अप्र ?)। यतस्तथैव तद्भूतं तथैव च भविष्यतीत्यव्यभिचारः। अन्यत्र व्यभिचारादेव प्रामाण्यम् (अप्रा° ?)॥ ३७॥

येऽप्येते तर्कप्रतिसरणाः(तर्कप्रतीतिशरणाः ?)स्तेऽपि स्वस्मिन् सिद्धान्ते कांश्चित् पदार्थांस्तर्कबहिष्कृतानागमादेवेच्छन्तीति सर्वैरेवागमस्य प्रामाण्यमङ्गीकृतमित्यपौरुषेयादागमात् किमिति धर्माङ्गत्वं न सिद्ध्यतीत्याह अतीन्द्रियान् इति। चक्षुरादिपञ्चकेनानुपलभ्यमानान्। असंवेद्यान् इति। मनसा। आर्षेण इति। दिव्येन। अनागमगम्यानाह।

---

4. D धीः.
5. L. बहिः सन्तोऽपि.
6. ACD न प्रत्यक्षमितिवेति.
7. ACD अबाह्ये.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पृथगन्यांश्च तीर्थप्रवादेषु प्रसिद्धानर्थान् रूपादिवदिन्द्रियैरग्राह्यान् सुखादिवत् प्रत्यात्ममसंवेद्यान् ये शिष्टा व्यावहारिकादन्येनैव चक्षुषा मुक्तसंशयमुपालभन्ते। तेषामनुमानविषयतातीतं वचनं व्यभिचारिभिरनुमानैरपाकर्तुमशक्यम्। जात्यन्धानां रूपग्रहणमेवमुत्पद्यत इति सावस्था नैवाभ्युपगतपूर्वा कदाचित्, तस्यां कथमनुमानं प्रवर्त्तेत ॥ ३८ ॥

अन्तर्यामिणम् इति। व्याख्यातोऽन्तर्यामी। **अणुग्रामम्** इति। चतुर्विधाः परमाणवः। तान् विशिनष्टि। अभिजातिः सर्गः तस्य निमित्तं प्रेरितं कर्म तस्य निबन्धनं परमाणवः। तत्र सम(सर्ग?)क्रियासमवायात्। यतः सर्वे चतुर्विधाः परमाणवोऽदृष्टप्रेरिताः संयोगसचिवा द्व्यणुकादिक्रमेण शरीरेन्द्रियपृथिव्यादिकार्यमारभन्ते। **अनभिव्यक्तम्** इति। अविवृत्तम्। **शक्त्यधिष्ठानम्** इति। व्याख्यातं समाविष्टं सर्वाभिः शक्तिभिरिति। **देवताः** इति। मूर्ताश्चामूर्ताश्च या उद्दिश्यन्ते। **कर्मणाम्** इति। शुभाशुभानाम्। **अनुबन्धः** कृतानां कर्मणां फलप्रदः संस्कारः। प्रध्वंसित्वात्तु स्वरूपेणानवस्थानमिति। **परिणामस्तस्यै**वानुबन्धस्य सहायान्तरप्रबोधितशक्तेः फलदानाभिमुख्यम्। कार्यान्तरोपजननं प्रत्यसामर्थ्यं कर्मणः **शक्तिवैकल्यम्**। **सूक्ष्मम्** इति। दिव्यम्, [1]अदृश्यत्वात्। **आतिवाहिकम्** इति। इह मृतस्य देशान्तरे शरीरान्तरग्रहणाय यदन्तराभवं शरीरं तद्देशमतिवाहयतीत्यातिवाहिकम्। **पृथग्** इति। ऋद्धिप्रातिहार्यादि। **इन्द्रियैः** इति। रूपेन्द्रियैः। **प्रत्यात्मम्** इति। मनसा। [2]**अन्येनैव** दिव्येन। **अनुमानविषय** इति। प्राकृतप्रत्यक्षागोचरत्वात् तत्पूर्वकमनुमानमपि तत्राप्रवृत्तम्। **व्यभिचारिभिः** इति अनुमानस्वरूपकथनम्, यतः सर्वमेवानुमानं व्यभिचारीति, न तु विशेषणम्, अव्यभिचारिणोऽनुमानस्याभावात्। एतदाह—अनुमानस्य स न विषयः, विशेषतो व्यभिचारि तदिति। **जात्यन्धानां हि** इति। स्वयं प्रत्यक्षस्याप्रवृत्तौ अनुमानस्यापि तत्र प्रवृत्त्यभावमाह। यथा जात्यन्धाश्चक्षुष्मन्तः इवैवं रूपदर्शनमेवमात्मकमिति न शक्ताः प्रतिपत्तुम्। ते स्वयमसन्तश्चेति तत्त्वात् कथमनुमिमते। अतो रूपादिदर्शनावस्था नैवैषां कदाचिदनुभूता एवेति न नित्यादीनां प(स?)दसत्त्वे अनुमिमते। तथा अर्वाग्दर्शना जात्यन्धतुल्यत्वादतीन्द्रियाणामर्थानां स्वयमसंवेदनादिन्द्रियार्थविषयं दर्शनं योगिनामेवमात्मकमिति न प्रतिपद्यन्ते। ततो न तेष्वर्थेषु तदानीमनुमानस्य प्रवृत्तिः। **सावस्था** इति। रूपानुभवावस्था ॥ ३८ ॥

---

1. ACD दृश्यत्वात्. 2. WW[2]L अभ्येव.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

योे यस्य स्वमिव ज्ञानं दर्शनं नातिशङ्कते।
स्थितं प्रत्यक्षपक्षे तं कथमन्यो निवर्तयेत् ॥ ३९ ॥

सन्ति प्रतिचरणं प्रतिपुरुषं चाप्ताः। येषां वचनमविचारितं स्वमिव दर्शनमत्यन्तमनतिशङ्कनीयम्। येषां चादृष्टमपि शिलाप्लवनादि प्रत्ययेन शक्यं श्रद्धातुम्। तथा हि। कर्मणामिह कृतानामूर्ध्वं देहादिष्टानिष्टफलप्राप्तिराप्तवचनपरिग्रहेणैव लोके प्रसिद्धा विनापि शास्त्रोपदेशेन प्रायेण मनुष्यैरनुगम्यते ॥ ३९ ॥

इदं पुण्यमिदं पापमित्येतस्मिन् पदद्वये।
आचण्डालं मनुष्याणामल्पं शास्त्रप्रयोजनम् ॥ ४० ॥

तस्मात्प्रत्यक्षमार्षं च ज्ञानं सत्यपि विरोधे बाधकमनुमानस्य ॥ ४० ॥

तत्रैतत् स्यात्—यद्यपि तेषां वचनमनुमानेन न बाध्यते, ये तु तद्वचनात् प्रवर्तन्ते तेषां कथं न बाध्येतेत्याह **यो यस्य** इति। **यः** परिग्रहीता, **यस्य** प्रयोक्तुः। **स्वमिव** इति। यथा स्वं प्रत्यक्षं नातिशङ्कते, भाव। नैवम् इति। **प्रत्यक्षपक्षे** इति। प्रत्यक्षतुल्यतां तस्य स्थापयति। यथा तेष्वर्थेषु प्रणेता प्रत्यक्षः तथा सोऽपीति। अथवा **स्थितं प्रत्यक्षपक्ष** इति। स्वप्रत्यक्षतुल्ये योगिप्रत्यक्षतुल्ये स्थितम्। '**निवर्तयेद्** इति। न हि स्वयं विदितेऽर्थे कश्चिदनुमानेन निवर्तते।

प्रतिचरणम् इति। एकैकस्मिन् ग्रन्थसिद्धान्ते। **प्रतिपुरुषम्** इति। एकैकस्य पुरुषस्य। तदनेन समुदायशोऽवयवशश्चाप्ताः कथिताः। **शिलाप्लवनादि** इति। दृष्टा(न् ?)प्रत्यक्षानुमानविरुद्धानाह। **प्रत्ययेन** इति। प्रामाण्येन, निश्चयेन। **शक्यं श्रद्धातुम्** इति। तच्च श्रद्धागम्यं विषयमाह **कर्मणाम्** इति। **इह कृतानाम्** इति। अस्मिन् जन्मनि। **ऊर्ध्वम्** इति। अ(मु?)त्र। **आप्तवचन** इति। येनेहकृतानां कर्मणां विशिष्टानामप्यमुत्र फलं श्रद्धीयते। **विनापि** इति। ईदृशो नामायं शास्त्रनिरूढो येन लोकः शास्त्रं नापेक्षते ॥ ३९ ॥

पदद्वये इति। पुण्यं पापमिति पदद्वये। **अचाण्डालम्** इति एकान्ततः 'शास्त्रापरिग्रहमाह। **अल्पम्** इति। नास्तीत्यर्थः। अथवाल्पमेतत्प्रयोजनमिति।

सत्यपि इति। यद्यपि प्रत्यक्षं नानयोरनुमानेन विरोधस्तथापि ताभ्यामनुमानं न बाध्यते, व्यभिचारित्वात् तस्य। ततश्चानुमानेनाविरुद्धो यः स आगम[3] इत्यसम्यक् ॥ ४० ॥

---

1. ACD न निवारयेत्.
2. ACD °मानेन बा°.

1. ACD शास्त्रप°.
3. ACD आगम्य.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चैतन्यमिव यश्चायमविच्छेदेन वर्तते ।
आगमस्तमुपासीनो हेतुवादैर्न बाध्यते ॥ ४१ ॥

यथा ह्यहमस्मीत्येवमादिप्रत्ययानुगतं सहजमनादि यच्चैतन्यं तन्नास्मि न ममेत्येवमाप्तोपदेशे सत्यपि लोके रूढत्वान् मुक्तात्मनामपि व्यवहारं प्रति न व्यवच्छिद्यते। तथैवायं श्रुतिस्मृतिलक्षणः सर्वैः शिष्टैः परिगृहीत आगमः। कार्याकार्यभक्ष्याभक्ष्यगम्यागम्यादिषु यो भिन्नानामपि प्रवादिनां प्रायेण नातिलङ्घनीयः तमित्थंभूतमुपसेवितं वृद्धैः सम्यगुपासीनो न तार्किकप्रवादैः कैश्चिन्न्याय्यादपनीयते वर्त्मनः। तत्रस्थश्चानिन्द्यो लोके भवति ॥ ४१ ॥

हस्तस्पर्शादिवान्धेन विषमे पथि धावता ।
अनुमानप्रधानेन विनिपातो न दुर्लभः ॥ ४२ ॥

यस्य हि स्थालीपुलाकन्यायेनैकदेशं दृष्ट्वा शिष्टेऽर्थे प्रतिपत्तिः सोऽन्ध इव विषमे गिरिमार्गे चक्षुष्मन्तं नेतारमन्तरेण त्वरया परिपतन् कंचिदेव मार्गैकदेशं

एवमागमस्य प्रामाण्ये स्थिते यदागमस्य प्रामाण्ये इदं शास्त्रं प्रवृत्तं तद्दर्शयति **चैतन्यम् इव** इति। चैतन्यं संवेदनम्। तद्ध्यनाद्यविच्छिन्नं चेति। **अयम्** इति। श्रुतिस्मृतिलक्षणः। **हेतुवादैः** इति। अनुमानेन।

यत् संवेदनं दृष्टान्तत्वेनोपात्तं तदाह **अहम्** इति। आदिग्रहणात् ममेत्येवमादयः। **सहजम्** इति। पुरुषोपदेशाद्विना। न चायमिदानीं प्रवृत्त इत्याह **अनादि** इति। ननु च प्रतिपक्षभावनावशेन निवृत्तिरहङ्कारस्य दृष्टा, [1]अतः कथमविच्छेद इत्याह **तन्नास्मि** इति। यद्यप्याप्तोपदेशादाप्तवचनात् पारम्पर्येण विच्छेदोऽहङ्कारस्य तथाप्येवमयमभिरूढो येन तेषां [2]मुक्तानामपि व्यवहारे तदाकारानुषङ्गः। तदयमात्मात्मीयप्रत्ययो व्यवहारे इत्य .... दृष्टान्तमाह **सर्वैः शिष्टैः** इति। सर्वैरेव प्रमाणभूतैः परिग्रहात् [3]प्रामाण्यमाह। **भक्ष्याभक्ष्य** इति। विषयप्रदर्शनात्(नम् ?)। **प्रायेण** इति। भक्ष्याभक्ष्यादिप्रतिपत्तौ कस्यचित् स्वसमयगतस्य भेदस्याङ्गीकरणात्। **तमित्थम्** इति। यथोक्तानुवादेन प्रत्यवमर्शः ॥ ४१ ॥

यस्त्वागमनिरपेक्षादनुमानादेव दृष्टे[1] प्रवर्तते तस्य दोषमाह **हस्तस्पर्शादिव** इति। अनुमानस्थाने हस्तस्पर्शः। **अन्धेन** इति। आगमरहितेन। **विषमे** [2]**पथि** इत्यदृष्टाख्ये। **अनुमानप्रधानेन**। आगमनिरपेक्षेण। **विनिपातः**। प्रत्यवायः।

---

1. ACD अन्तः. 2. ABCD त्यक्तानामपि. 3. ACD अप्रामाण्यम्.

1. L om. दृष्टे. 2. A विषमेऽपि.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हस्तस्पर्शेनावगम्य समतिक्रान्तस्तत्प्रत्ययादपरमपि तथैव प्रतिपद्यमानो यथा विनाशं लभते तद्वदागमचक्षुषा विना तर्कानुपाती केवलेनानुमानेन क्वचिदाहितप्रत्ययो दृष्टादृष्टफलेषु कर्मस्वागममुत्क्रम्य प्रवर्तमानो नियतं महता प्रत्यवायेन संयुज्यते ॥ ४२ ॥

तस्मादकृतकं शास्त्रं स्मृतिं च सनिबन्धनाम् ।
आश्रित्यारभ्यते शिष्टैः शब्दानामनुशासनम् ॥ ४३ ॥

तस्मादपौरुषेयमनतिशङ्कनीयं पुरुषहितोपदेशाय प्रवृत्तमाम्नायं प्रमाणीकृत्य, पृषोदरादिवच्च साधुशब्दप्रयोगेषु शिष्टाचरितमविच्छिन्नपारम्पर्यं स्वचरणसमाचारं

यस्य[3] **हि** इति । यतः प्रतिपत्ता स्वयमेकदेशदर्शनेनान्यत्र तथात्वमनुमिमीते । **चक्षुष्मन्तम्** इति । आगमस्थानीयम् । **समतिक्रान्तः**[4] । **तत्प्रत्ययाद्** इति । यथा हस्तस्पर्शादेतावतीं भुवं क्षेमेणागमं तथापरामपि गमिष्यामीति । अथ च **विनाशं लभते** । **आगमचक्षुषा** इति । आगमानुगृहीत एव तर्को व्यवस्थाहेतुः । तादृशश्च मीमांसातर्क इति । आगमेन तु विना शुष्कतर्कानुसारी । **क्वचिदाहितप्रत्ययः** इति । धूमात् कदाचिदग्निनिश्चयमधिगम्य । **दृष्टादृष्टफलेषु** इति । चिकित्सादिषु दृष्टफलेषु, भक्ष्याभक्ष्यादिषु चादृष्टफलेषु । **नियतम्** इति । अवश्यंभावी प्रत्यवायोऽनुमानादागमरहितात् प्रवर्तमानस्येति ॥ ४२ ॥

तस्माद्[1] इत्युपसंहरति । **अकृतकम्** इति । वेदम् । तथा हि

"तस्माद् ब्राह्मणेन न म्लेच्छितवै"।

"ऋजीषमेतद्वाचः"

इति पठ्यते । **स्मृतिश्च** इति । स्मरणम् । **सनिबन्धनाम्** इति । यत् स्मरणस्य वेदमूलत्वम् । यथा—

"एकः शब्दः ...."

इति । यच्च समाचाराद्, यथा पृषोदरादयः । यानि च व्याकरणस्मृत्यन्तराणि । **आश्रित्य** अङ्गीकृत्य । **शिष्टैः** इति । पाणिन्यादिभिः ।

अपौरुषेयम् इति । पुरुषैरप्रणीतत्वात् । अत एव **अनतिशङ्कनीयम्**, सति हि पौरुषेयत्वे रागादिकरणदोषशङ्कापीति । **पृषोदरादिवच्च** इति । ये लक्षणमन्तरेण सूच्यन्त[2] एव केवलं साधुत्वेन । **शिष्टाचरितम्** इति । येषां शब्दानामविच्छिन्नां शब्दोपनिबद्धां स्मृतिमनङ्गीकृत्य तथा प्रयोगसमाचारपारम्पर्यादेव साधुत्वमवगम्यते ।

---

3. ACD स हि.
4. ACD °क्रान्तम् ।
1. L प्रकृतमुपसंहरति तस्माद् इति.
2. AD स्मर्यन्ते.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परिगृह्य, विरोधे च स्थितविकल्पान्युत्सर्गापवादवदन्ति पूर्वेषामृषीणां स्मृतिशास्त्राणि प्रतिकालं [3]दृष्टशब्दस्वरूपव्यभिचाराणि प्रमाणीकृत्येदमाचार्यैः शब्दानुशासनं प्रक्रान्तमनुगम्यते ॥ ४३ ॥

द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः ।
एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते ॥ ४४ ॥

उपादीयते येनार्थः, स्वरूपेऽध्यारोप्यते, तद्भावमिवापाद्यते स उपादानशब्दः । एवं हि संग्रहे पठ्यते—

यथा 'इष्टमेवैतद् गोनर्दीयस्य' इति । **स्वचरणसमाचारम्** इति । सिद्धान्तसमाचारम् । अयं च समाचारः शिष्टप्रयुक्ताः साधवः इति । **स्थितविकल्प** इति । द्वयोः प्रमाणयोरेकत्र विरोधे विकल्पम् । यथा शाकल्य एवमस्मरद्[4], अन्यस्त्वन्यथेति विकल्पः । **उत्सर्गापवादवन्ति** इति । सामान्यविशेषवन्ति । **प्रतिकालम्** इति । यदा मेधाविनः सत्त्वाः तदा महता प्रपञ्चेनोपनिबद्ध्यन्ते, अन्यदा तु संक्षिप्तेनेति । सन्निवेशव्यभिचाराद् **दृष्टशब्दस्वरूपव्यभिचाराणि** । अथवा केचिच्छब्दाः कदाचिदभ्युदयाङ्गमिति ते कालभेदेन तैस्तैः स्मर्तृभिरन्यथोपनिबद्धाः । यथा 'मृजेरजादौ संक्रमे' इति प्रागपि मृजेर्विकल्पितवृद्धितयाभ्युदयाङ्गता सम्प्रत्यपि तथानुगमः कृतः । न्यङ्कोस्तु पूर्वेऽकृतैजागमस्याभ्युदयाङ्गतां स्मरन्ति । यथाहुः

"न्यङ्कोः प्रतिषेधान्न्याङ्कवम्"

इति । तत्सम्प्रत्यन्यथा, यतो नोपसंख्यातः प्रतिषेधः । नैयङ्कवमित्येवाभ्युदयाय । **आचार्यैः** पाणिनिवररुच्यादिभिः । **प्रक्रान्तं** प्रकृतं । तन्मया **अनुगम्यत** । इति ॥ ४३ ॥

तदनुगमं कुर्वन् प्रथमतः शब्दस्य स्वरूपमाह, अर्थसंबन्धतत्फलानां शब्दमूलत्वात् । **द्वौ** इति । शब्दशब्दस्य नदीघोषादावपि दर्शनादवच्छिनत्ति **उपादानशब्देषु** इति । उपादानो वाचकः, तेषु उच्चरत्सु द्वौ शब्दौ लक्ष्येते । शब्दस्वरूपार्थयोरवधारणे कार्यद्वयदर्शनादनुमीयमानभेदौ । **एकः** इति । प्रतिपादकस्यैकः शब्दो निमित्तम् । **अपरः** त्वर्थप्रतिपत्तेः ।

उपादीयते इति । स्वीक्रियते । करणसाधनमाह [**येन** इति] । **स्वरूपे** इति । शब्दस्वरूपेऽर्थाकारसंक्रान्तिरध्यारोपः । न च यथा मञ्चपुरुषयोरध्यारोपस्तथा इत्याह **तद्भावम्** इति । अर्थरूपतां विहाय स्वभावतः स्वत एवापद्यत इत्युच्यते । तस्य च रूपस्य प्रतिबिम्बकल्पत्वादिवशब्दोपादानम् । अतश्च शब्दस्वरूपवदर्थाकारमपि प्रदर्शयन्

---

3. WW²ML दृष्टशब्दशक्तिस्व°.   4. ACD अस्मरणम्.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"वाचक उपादानः स्वरूपवानव्युत्पत्तिपक्षे। व्युत्पत्तिपक्षे त्वर्थावहितं समाश्रितं निमित्तं शब्दव्युत्पत्तिकर्मणि प्रयोजकम्। उपादानो द्योतक इत्येके। सोऽयमिति व्यपदेशेन संबन्धोपयोगस्य शक्यत्वात्"

इति। उपादेयो वा समुदाय उपादानः। तथा हि—स्वरूपपदार्थकेष्ववयवानामनुपादेयत्वाद्विभागानामप्रतिपत्तिः। एको निमित्तं शब्दानाम्। यदधिष्ठाना यदुपाश्रया यदाधाराः श्रुतयः प्रत्याय्यमर्थं प्रतिपद्यन्ते तस्य निमित्तत्वम्। अपरोऽर्थं। कारण-

प्रतिपादयतीत्युच्यते। प्रतिसंक्रान्तार्थाकारेण शब्दमुच्चारयन् प्रयोक्ता प्रयोजक इति णिचा आपाद्यते इति पठन्ति। अत्रागममाह **वाचकः** इति। अर्थस्य। **उपादानः स्वरूपवान्** इति। स्वरूपं निमित्तभूतमर्थव्यवच्छेदादत्यन्तमस्तीति नित्ययोगे मतुप्। सर्वशब्दानां च स्वरूपस्यास्तित्वान्निमित्तभावास्तित्वे प्रत्ययः। **अव्युत्पत्तिपक्षे** शब्दस्वरूपमेव (शब्दः स्वरूपमेव ?) निमित्तीकृत्यार्थं गमयति। **व्युत्पत्तिपक्षे तु** इति। तत्र हि गोशब्दो विशिष्टं गमनं गोजात्येकार्थसमवाय्यर्थं तन्निमित्तत्वेनापेक्षते। तच्च स्वरूपाद् भिद्यत इति। **प्रयोजकम्** इति। विशिष्टं गमनं गोशब्दव्युत्पत्तेः प्रवर्तकं प्रयोजयतीत्युच्यते। **द्योतकः** इति। उपादानं मूलकारणम्। वाचकानन्वये द्योतकः। तेन कारणेन ये स्वरूपसन्निधानमात्रेण वाचकस्य शक्तिप्रयोगे वर्तन्ते। यदाह **सोऽयम्** इति। नाव्युत्पन्ने संव्यवहारादभेदे शब्दस्य वाचकत्वम्। सा च व्युत्पत्तिर्द्योतकस्य गम्या। वाचकस्त्वर्थनिष्ठ एव। यतोऽयमव्युत्पन्नाभेदः प्रथमतः शब्दस्वरूपमेव प्रतिपा(प ?)द्यते, ततोऽभेदमवस्यति। न च पर्यायान्तरेणापि शक्यते, वर्णसंहतिप्रदर्शनं चेदम्। यद्यपि चावयवा अपि तत्रोपादीयन्ते तथापि समुदायस्योपादित्सायामवयवा नान्तरीयका इति नोपात्ताः, शब्देनोक्ताः। एतदेव कुत इत्याह **स्वरूपपदार्थकेषु** इति। अग्नेर्ढक्, गौरित्ययमाहेत्यादिषु यद्यपि तावत् स्वरूपमात्रपरा चोदना तत्र नावयवा उपादित्सिताः, अकार्यभाक्त्वात्, यतोऽग्निशब्दावयवेभ्यो न प्रत्ययोत्पत्तिः। अनुकरणेष्वपि यद्यवयवा उपादित्सितास्ते पृथगनियतक्रमाः प्रतीयेरन्निति। गौरित्ययमाहेत्यत औपगवमित्यत्र स्थिता औकारादयः प्रतीयेरन्। अनियतानुपूर्वीकास्त एव प्रतीयन्त इति चेत् समुदाय एव तर्हि प्रयोजकः, अवयवा नान्तरीयकाः। **विभागानाम्** इति। विभज्यन्ते इति विभागाः वर्णाः, तेषां पृथगप्रतिपत्तिः[1] अकार्यभाक्त्वेन। विभागेन[2] इति तु येषां पाठस्तेषां सुगममेव। **एको निमित्तम्** इति। त(कु ?)तोऽसौ निमित्तमित्याह

1. CD °पत्तिं, 2. ACD आख्यातविभागेनेति तु पा सुगमैव.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्यापारात्तु प्रतिलब्धविक्रियाविशेषः श्रोत्रानुपाती प्रकाशकभावेन नित्यं प्रत्याय्यपरतन्त्रोऽर्थेषु प्रयुज्यते। लब्धानुसंहारो निमित्तम्, उपजनितक्रमस्तु प्रत्यायक इत्येके। तस्यापि क्रमरूपप्रत्ययस्तमयेनैव प्रतिपत्तिषु प्राप्तसमावेशस्य प्रत्यायकत्वमाचक्षते। अपर आह-क्रमवानक्रमनिमित्तम्। अक्रमे तु वागात्मनि श्रुत्यर्थशक्ती संसृज्येते। एवं ह्याह

अविभक्तो विभक्तेभ्यो जायतेऽर्थस्य वाचकः।
शब्दस्तत्रार्थरूपात्मा सम्भेदमुपगच्छति ॥ ४४॥

यदधिष्ठानाः इति। पर्यायैरेक एवार्थ उच्यते। यत्र स्थिता येनानुगृहीताः ते शब्दा अर्थं प्रतिपद्यन्ते प्राप्नुवन्ति। प्राप्तिश्च प्रत्यायनेन। स तेषामाश्रयो निमित्तमित्युच्यते। तस्य स्वरूपमात्रं कथयिष्यति। अर्थे प्रयुज्यमानमाह **कारणव्यापारात्तु** इति। स्थानकरणाभिघातात्। **प्रतिलब्धविक्रियाविशेषः** इति। यदा शक्तिरूपेण स्थितो व्यक्तिरूपतां प्रतिपद्यते तदा जन्मादिभिः क्रियाभिरापन्नविकारः। पश्चाधिकरणदर्शने त्वनुपलब्धस्य तत उपलभ्यता(ते ?) विक्रियापत्तिः। ततश्च **श्रोत्रानुपाती** श्रोत्रविषयतां गतः। **प्रत्याय्यपरतन्त्रः** तदाकारोपग्रहेणावस्थानात्। कथमित्याह **तस्यापि** इति। यतः प्रत्येकं वर्णाः परिच्छिद्यमाना अप्रतिपादकाः। यदा तु पश्चिमवर्णकाले समस्तशब्दपरिच्छेदिन्यां बुद्धौ एकस्यां प्रत्यवभासन्ते तदा वाचकाः। **क्रमप्रत्ययस्तमय** इति। एकबु(द्धय ?)व्यतिरेकात्, न पुनः स्वा(स्व ?)गतः क्रमो नास्ति। तदेवाह **प्रतिपत्तिषु** इति। शब्दबुद्धिषु। **प्राप्तसमावेशस्य** इति। तस्य समस्तस्य शब्दाकारस्य बुद्धौ समावेशात्, प्रतिपत्तिषु चार्थप्रतिपत्तिषु प्राप्तसमावेशस्य निराकरणभावेनार्थप्रतिपत्तिं प्रत्यवस्थानात्। [3]अन्यत्तु वाचकस्य शब्दस्य यन्निमित्तं तदिह कथयितव्यम्। क्रमभूतानां च वर्णानां बुद्धिस्थो निमित्तम्, न च ते वाचकाः इति पक्षान्तरमाह। [4]श्रोत्रपेक्षयैतदेव विपरीतम्। **क्रमवान्** इति। करणव्यापारादुपजातक्रमः श्रोतृबुद्धिव्यवस्थितस्याक्रमस्य प्रत्यायकस्य निमित्तम्। तदुपायत्वात्तस्येति। **श्रुत्यर्थशक्ती** इति। प्रत्याय्यप्रत्यायकशक्ती। ते चाभेदलक्षणे सम्बन्धे नित्यमर्थाकारोपग्रहस्थिते। तत्र वाचके बुद्धिस्थे एकीभवतः। तत्रेयं वाच्यवाचकव्यवस्थेति। **अविभक्तः** इति। श्रोतृबुद्धिस्थः। **विभक्तेभ्यः** वर्णेभ्यः। **अर्थरूपात्मा** इति। अर्थाकारस्य तत्र भावात्। **सम्भेदम्** इति। एकत्वमिति ॥ ४४ ॥

---

3. ACD अन्यस्तु. 4. A गोत्रपे°.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आत्मभेदस्तयोः केचिदस्तीत्याहुः पुराणगाः ।
बुद्धिभेदादभिन्नस्य भेदमेके प्रचक्षते ॥ ४५ ॥

आत्मभेदस्य ब्रुविकर्मत्वे द्वितीया, वाक्यस्वरूपानुकरणे तु प्रथमा। तत्र कार्यकारणयोरन्यत्वपक्षे भेदः। पक्षान्तरे त्वेकस्यैवात्मनः शक्तिप्रविभागरूपपरिग्रहकृताद् बुद्ध्यवच्छेदान्नानात्वकल्पना। शब्दाकृतिव्यक्तिभेदाभेदव्यपाश्रयो वा पूर्वेषामाचार्याणां दर्शनभेद इति। परस्तादेतद्वस्तुगत एव प्रपञ्चो भविष्यति ॥ ४५ ॥

अरणिस्थं यथा ज्योतिः प्रकाशान्तरकारणम् ।
तद्वच्छब्दोऽपि बुद्धिस्थः श्रुतीनां कारणं पृथक् ॥ ४६ ॥

आत्मभेद इति। स्वभावान्यत्वम्। **तयोः** इति। निमित्तप्रतिपादकयोः। **पुराणगाः** पूर्वे स्मर्तारः। **बुद्धिभेदाद्** इति। न च स्वगतो भेदोऽस्ति, शक्तिद्वययोगात्तु स एव भेदेन प्रत्यवभासते इत्यपरे।

आत्मभेदशब्दात् प्रथमाद्वितीययोः साधुत्वमाह **आत्मभेदस्य** इति। यदात्मभेद एव ब्रवीतिक्रियया व्याप्यते। **आहुः** इति। किम्। आत्मभेदम्। कथम्। **अस्ति** इत्यनेन रूपेण। **वाक्यस्वरूप** इति। यदात्मभेदो(अस्ती ?)त्येतेन तदा वाक्यं पुराणगोक्तं ([1]अनुक्रियते ?)एवमाहुरिति। वाक्यस्य कर्मत्वे आत्मभेदो न कर्मेति प्रथमा। **अन्यत्वपक्षे** इति। येषां दर्शनमन्यद् वा कारणात् कार्यमिति तेषां निमित्तप्रतिपादकयोर्व्यक्त एव भेदः। **पक्षान्तर** इति। कार्यकारणयोरेकत्वदर्शने। एकमेव तद् शक्तिद्वयाध्यासितम्। तत्र कारणशक्तिस्तदन्यथाबुद्धिरन्यथा कार्यशक्तिवशेन चेत्येकत्रापि भेदः। [2]**शक्तिप्रविभाग** इति। शक्तेः प्रविभागो रूपभेदः तस्य परिग्रहः स्वीकारः तत्कृताद् बुद्ध्यवच्छेदाद्, अवच्छिद्यमाना बुद्धिर्बुद्ध्यवच्छेदः। ततो नानार्थ(त्व ?)-कल्पना। **शब्दाकृतिव्यक्ति** इति। शब्दस्य ये आकृतिव्यक्ती तयोर्यौ भेदाभेदौ तद्व्यपाश्रयेण। तत्र केषांचिच्छब्दाकृतिर्निमित्तं शब्दव्यक्तिर्वाचिका। अपरेषामेतदेव विपरीतम्। तयोश्च केचिद्भेदम्, अभेदं चापरे प्रतिपन्नाः। **परस्ताद्** इति। उत्तरत्रायमर्थो विस्तरतो निरूपयिष्यत इति ॥ ४५ ॥

तत्रैको निमित्तमिति यदुक्तं तद् व्याचष्टे **अरणिस्थम्** इति। अरणिकाष्ठव्यवस्थितं ज्योतिर्यथा प्रकाशस्य ज्योतिषः कारणं तथा बुद्धिस्थः शब्दोऽर्थप्रकाशकस्य कारणम्।

एकत्वपक्षे इति। भौतिकत्वे तेजोभूयिष्ठत्वात् काष्ठमेव ज्योतिरात्मना परिणमत इति। **नानात्वपक्षे** इति। येषामर्थान्तरमेव काष्ठाज्ज्योतिरुत्पद्यते। काष्ठं हि पार्थिवमिति।

---

1. ACD अनुष्ठीयते. 2, ACD ins. यदा before शक्ति°,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एकत्वपक्षे नानात्वपक्षे वा बीजसत्तावस्थस्याविवृत्तस्य ज्योतिषो यथोत्तरेण प्रकाशात्मनाऽभिप्रज्वलितस्य स्वपररूपप्रतिपत्तिकारणत्वं प्रागसंवेद्यं पश्चादुपजायमानं दृश्यते। तथैव शब्दभेदबीजानुगते[1] बुद्धितत्त्वे योऽयं शब्दः प्राप्तपरिपाके स्वबीजे लब्धाभिमुख्यः स्थानकरणाद्यनुगृहीतो विवर्तते स व्यञ्जकध्वनिभेदानुपातेन व्यवच्छिद्यमानोद्देशः पौर्वापर्यवानुपलभ्यमानः स्वरूपपररूपयोः प्रकाशको भवति ॥ ४६ ॥

बीजसत्तावस्थस्य इति। बीजात्मना या सत्ता तयावस्थितस्य। **ज्योतिषो** बीजभावेनावस्थितस्येति यावत्। सत्कार्यवादी तदानुपलम्भाद् बीजभावेनावस्थितमिच्छति। असत्कार्यवाद्यपि ज्योतिष उत्पादनशक्तिं तत्रेच्छत्येवेति। [2]**यदा विवृत्तस्य** इति। **उत्तरेण** यदा काष्ठद्वयनिघर्षणात् प्रकाशात्मना विवर्तते तदा तदेव बीजभूतमुत्तरेण प्रकाशात्मनाभिप्रज्वलितमुच्यते। **स्वपर** इति। तथा हि तद् बीजभूतं ज्योतिः स्वविषयायाः परविषयायाश्च प्रतिपत्तेः कारणत्वेनासंबद्धस्य। **प्राग्** इति। बीजावस्थायाम्। **पश्चाद्** इति। विवृत्तिकालेऽपि। **शब्दभेद** इति। भिद्यन्ते इति भेदाः, भिन्नानां शब्दानां यानि बीजानि तैरनुगतं बुद्धितत्त्वं यौगपद्येन सर्वाः शब्दशक्तयो(ऽ ?)भिन्ना इव तत्रासते। कथं तर्हि युगपदविवृत्तिरित्याह **प्राप्तपरिपाके**[3] इति। यथा स्वहेतुबीजपरिपाकस्य क्रमवत्त्वात् क्रमेण विवृत्तिः। **लब्धाभिमुख्यः** इति। आभिमुख्यम्, सा च(तच्च ?)बीजपरिपाके लभ्यते। सहकारिणोऽपि क्रमतो दर्शयन्नाह **स्थानकरणादि** इति। आदिशब्दाद् अनुप्रदानम्[4]। कथं स्थानकरणानुग्रहस्तस्येति दर्शयति **व्यञ्जकध्वनि** इति। यत एते स्थानकरणाभिघातजा ध्वनयः ते भिन्नाः, तदनुविधानं तस्य शब्दस्य। **व्यवच्छिद्यमान** इति। व्यवच्छिद्यमानाः परस्परतो व्यावृत्ताकारा उद्देशाः प्रदेशा अस्येति। अत एव पौर्वापर्यवान् भेद इति। नि(तन्नि ?)बन्धनत्वात् क्रमस्य। अपरे तु समस्तमेव पठन्ति। व्यवच्छिद्यमाना ये उद्देशाः तेषां यत् पौर्वापर्यं तद्वानिति। **उपलभ्यमानः** इति। [5]सत्यतोऽविद्यमानोद्देशविभागः केवलं स्थानकरणाभिघातजव्यञ्जकध्वन्यनुविधानेन तथोपलभ्यते[6] इति पारम्पर्यात् स्थानकरणाद्यनुगृहीत इत्युच्यते। स च प्रत्यायकः स्वरूपस्य अर्थस्य। स एव वक्तृबुद्धिस्थोऽनभिव्यक्तो निमित्तम्, ध्वनिव्यक्तः प्रतिपादकः। यतस्तमेवाभिव्यङ्क्तुं वक्ता स्थानक[7]रणाभिघातीति ॥ ४६ ॥

---

1. WW^{2}ML °भेदभावनानुमते.

2. This यदा in the पद्धति is instead of the यथा which comes after ज्योतिषः in the वृत्ति. As no ms. of the Vṛtti has it, the text has not been altered. यथा also corresponds to the तथा which comes later. Perhaps the correct text is : यदाह अविवृत्तस्य इति।

3. ACD प्राप्तपाके.

4. ACD अनुप्रजानम्, B अनुव्रजानं, C अनुव्रलानं.

5. ACD सत्त्वतो वि°.

6. ACD उपलभ्यन्ते.

7. ACD °करणाव्यभिचारीति। B om. स च प्रत्यायक ... स्थानकरणा°.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वितर्कितः पुरा बुद्ध्या क्वचिदर्थे निवेशितः ।
करणेभ्यो विवृत्तेन ध्वनिना सोऽनुगृह्यते ॥ ४७ ॥

इह शब्दार्थयोः सोऽयमिति संबन्धानुगमे क्रियमाणे यच्छब्दरूपमर्थे समारोपयितुमिष्यते, यस्मिन्[1] वार्थरूपमुपयोगेन व्यावेशं[2] लभते तत् पूर्वं बुद्धिनिरूपणया कृतसंस्पर्शमभिधेयात्मनि प्राप्यमाणं यथाभिप्रायं रूपविपर्यासेनेव रूपान्तरोपग्राहि स्वरूपं निवेशयति । करणेभ्यो विवृत्तेन इति । अविक्रियाधर्मकं हि शब्दतत्त्वं ध्वनिं

कथमस्य बुद्धाववस्थानम्, कथं वा कार्यकारणभाव इत्याह **वितर्कितः** इति । विशिष्टेन रूपेण निरूपितोऽन्यव्यावृत्तेन । **पुरा** इति । प्रागुच्चारणात् । **अर्थे निवेशितः** अभिधेयरूपतायां प्रत्यस्तः । एतेन व्युत्पन्नसंबन्धतामाह । **करणेभ्यः** इति । स्थानकरणजेन । **ध्वनिना** नादेन । **अनुगृह्यते** अभिव्यज्यते ।

शब्दार्थयोः इति । वाच्यानुवाचकतयाप्युभयोरपि संबन्धोऽनुगन्तव्यः । [3]**सोऽयम्** इति संबन्धस्य रूपमाह । **संबन्धानुगमे** इति । संबन्धव्युत्पादने । **क्रियमाणे**, न पुनर्निष्पाद्ये संबन्धे, स्थितत्वात् । **यच्छब्दरूपम्** इति । यदा शब्दोऽर्थे प्रत्यस्यत इति स्थितमपि सारूप्यं व्युत्पादनवशादवसीयत इत्याह । **समारोपयितुम्** इति । सारूप्यमात्रकथनं चैतत् । न तु शब्दरूपता अर्थस्य प्रतिपादन उपयुज्यते । **यस्मिन् वा** इति । शब्दरूपे । **अर्थरूपम्**, अर्थाकारः । **उपयोगेन** इति । व्यापारेण स्वरूपसमारोपणाख्येन । **व्यावेशम्** इति । अनुप्रवेशम् । पूर्वत्र शब्दाध्यारोपोऽर्थे, सम्प्रत्यर्थरूपाध्यारोपः शब्द इति । **तद्** इति । शब्दरूपम् । पूर्वत्र हि पक्षद्वयेऽपि यच्छब्देन शब्दोऽभिहितः । **पूर्वम्** इति । उच्चारणात् । **कृतसंस्पर्शम्** [4]इति । [5]कस्य शब्दस्य कीदृश इत्याह **बुद्धिनिरूपणया** इति । बुद्ध्यादिनिरूप्यमाणस्तद्विषयभावापत्तेः स्पृष्ट इत्युच्यते । एवमसौ शब्दो [6]वितर्कितो बुद्ध्येत्युच्यते । **अर्थे निवेशितः** इति व्याचष्टे **अभिधेयात्मनि** इति । प्रमाणं(**प्राप्यमाणम्** ?)निवेश्यमानम् । अभिधेये किं करोतीत्याह **स्वरूपं निवेशयति** [इति] । क्व ? । अभिधेयात्मन्येव । कथमित्याह **यथाभिप्रायम्** इति । वक्तुरभिप्रायमनुरुध्यैव । यं हि वक्ता अभिधित्सति स शब्दः तथा प्रत्यवभासते । **रूपविपर्यासवशेन** (-र्यासेनेव ?) इति । शब्दरूपमपहायार्थरूपापत्तेः, न तु परमार्थतः स्वरूपभा(हा ?)नमादर्शस्येव मुखरूपप्रतिपत्ताविति इवशब्दोपादानम् । **रूपान्तर** इति । अर्थरूपोपग्रहोऽस्य हि स्वरूपं निवेशयतीति । **अविक्रियाधर्मकम्** इति ।

---

1. L यस्मिंश्चा°. 2. WW[2]L अनुप्रवेशम्. 3. ABC योऽयम्.
4. CD add कृतसंस्पर्शं after इति. 5. CD तस्य. 6. CD शब्दोऽपि तर्कितो.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विक्रियाधर्माणमनु विक्रियते। तच्च सूक्ष्मे व्यापिनि ध्वनौ करणव्यापारेण प्रचीयमाने स्थूलेनाभ्रसंघातवदुपलभ्येन नादात्मना प्राप्तविवर्तेन तद्विवर्तानुकारेणात्यन्तमविवर्तमानं विवर्तमानमिव गृह्यते ॥ ४७ ॥

नादस्य क्रमजन्मत्वान्न पूर्वो न परश्च सः।
अक्रमः क्रमरूपेण भेदवानिव जायते ॥ ४८ ॥

क्रमवता हि व्यापारेणोपसंह्रियमाणप्रचयरूपो नादः सप्रतिबन्धाभ्यनुज्ञया वृत्त्या स्फोटमवद्योतयति। स तदानीमेकोऽपि विभक्तोद्देशावच्छेद इव प्रत्यवभासते।

नोदयव्ययौ तत्र स्तः, नित्यत्वात्। यदाह शब्दतत्त्वम् इति। स्फोटार्थम् (स्फोटाख्यम् ?)। विक्रियाधर्माणम् इति। स हि ध्वनिप्रचयरूपो विभक्तलक्षणश्चानुक्रियते। तदवच्छादितरूपत्वात्। तद्वशाच्चोपलभ्यमानस्तद्विकारमनु विधीयते (विक्रियते ?)। तच्च इति। शब्दत्वम् (शब्दतत्त्वम् ?) विवर्तमानमिव गृह्यत इति संबन्धः। सूक्ष्मे इति। परमाणुकल्पत्वान्नादभागानाम्। व्यापिनि इति। तेषां च नादभागानां सकलव्योमव्यापित्वात्। करणव्यापार इति। यथा वायवीयाः परमाणवो व्यजनेन संहन्यन्ते, तथा नादपरमाणवः स्थानकरणाभिघातप्रचयेन संहन्यन्ते, सा च प्रचितरूपता स्थूलेनात्मनोपलभ्येति। अभ्रसंघातवद् इति। यथा सूक्ष्मा अभ्रकणा अपरिच्छिद्यमाना वायुना संहता उपलभ्येनात्मना विवर्तन्ते तद्वत्। तस्मिन्निहतेन। प्राप्तविवर्तेन तद्विवर्तानुकारेण इति। तन्नादविवर्तांस्तच्छब्दस्तद्वस्तु अनुकरोति अनुविधीयते। अतस्तदपि शब्दतत्त्वं विवर्तमानमुपलक्ष्यत इति ॥ ४७ ॥

कथमेकान्तेनात्र तद्रूपमुपलभ्यत इति स्पष्टयन्नाह नादस्य क्रमजन्मत्वाद् इति। ध्वनेर्व्यञ्जकस्य क्रमोत्पत्त्या स्फोटः क्रमरूपेण तदा हि भेदवानिव जायते। स तु स्वतोऽक्रम एव, यतो न पूर्वः न परश्च सः। पूर्वापरीभूतावयवाभावादक्रम इति।

नादस्यैव कुतः क्रम इत्याह क्रमवता हि इति। यतस्तस्य कारणभूताः स्थानकरणाभिघाताः क्रमवन्तः तत्प्रतिबद्धजन्मा नादोऽपि क्रमवान्। यदाह उपसंह्रियमाणप्रचयरूपः इति। तस्य क्रमवत्कारणत्वात् उपसंह्रियमाणं प्रचयरूपं यत्तज्जन्मा। सप्रतिबन्धाभ्यनुज्ञया इति। वर्तमानतयैवाकृत (वर्तमानया ?) वृत्त्या स्फोटमवद्योतयति। योऽयमुत्पद्यते भागो ध्वनेः स तस्य स्फोटस्य गंतत्वं भागमिवाभिव्यक्तमभ्यनुजानाति। तदन्यभागानामभिव्यक्तिं प्रतिबध्नातीव। ततः क्रमवानवभासते। तदानीम् इति। अभिव्यक्तिकाले। एकोऽपि इति। अक्रमः। विभक्तोद्देश इति। उद्देशास्तेषामवच्छेदः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्य तु क्रमयौगपद्ये नित्यत्वैकत्वाभ्यां विरोधान्न विद्येते। तेनासावेकत्वमनतिक्रामन् संसर्गिणो नादस्य भेदरूपमुपसंगृह्णाति। संसर्गिधर्म एवायमित्थंभूतः। तथा ह्यत्यन्तमभिन्नात्मा भिन्नरूपावयवोऽवयवी नानादेशस्थिताधारो वैचित्र्येणोपलभ्यते ॥४८॥

प्रतिबिम्बं यथान्यत्र स्थितं तोयक्रियावशात्।
तत्प्रवृत्तिमिवान्वेति स धर्मः स्फोटनादयोः ॥४९॥

परस्परव्यावृत्तता। ते च क्वचिदविभागेनाप्यवतिष्ठन्त इति विभक्तग्रहणम्। उद्देशरूपा येऽवच्छेदास्ते विभक्ताः परस्परव्यावृत्ताकारेणास्येति। तर्हि तथोपलम्भो भेदवानेवेत्याह **तस्य तु** इति। **क्रमयौगपद्ये** इति। नित्यत्वेन क्रमो विरुध्यते। नित्यानां हि कालो[1] नानुग्राहक इति। प्रतिबन्धाभ्यनुज्ञाभावात् कुतः क्रमयौगपद्यम्। भेदाधिष्ठानत्वात्तस्य। नन्वेकत्वेन क्रमो विरुध्यते। तत्किमुभयत्वा(स्या ?)भिधानम्। उच्यते। द्वयप्रतिषेधो विवक्षितः। स एकेन द्वाभ्यां वेत्यदोषः। **तेन** इति। यतः क्रमयौगपद्ये न स्तः। **एकत्वम्** इति। नित्यत्वात् स्वरूपात्यागम्। यदाह **अनतिक्रामन्** इति। **संसर्गिणः** इति। संबन्धिनोऽभिव्यक्तुः। कथं पुनः स्वरूपमजहतः संसर्गिरूपेण प्रत्यवभासनमित्याह **संसर्गिधर्म एवायम्** इति। प्रतीतमेतत्, न प्रत्याख्येयमिति। **तथा हि** इति। प्रतीतं कथयति। **अत्यन्तम्** इति। न तस्यावयविन एकत्वाद्भेदोऽस्ति। अथवावयवेषु देशभेदेनावतिष्ठमानेष्वसावपि तथैव प्रत्यवभासते। यदाह **नानादेश** इति। नानादेशेषु स्थिता आधारा अवयवाख्या अस्येति। **वैचित्र्येण** इति। यथा तन्तुषु नीलादिगुणयुक्तेष्ववयवेषु समवायान्नीलादीनामविचित्रोऽप्यवयवी संबन्धिवशात्तथावभासते। येषां तु गुणाश्च गुणान्तरमारभन्ते इत्यवयविन्येव गुणान्तरमारभ्यते तेषामपि तद् गुणान्तरं विचित्रं तद्वशाद् द्रव्यमपि तथावभासत इति दृष्टान्तः। यद्वा स्वयमभिन्नत्वाद्देशोऽप्यवयविदेशभेदेनावयविसंबन्धोऽवभासत इति वैचित्र्यम्॥ ४८ ॥

निदर्शनान्तरमाह **प्रतिबिम्बम्** इति। यथा चन्द्रादिप्रतिबिम्बम्। **अन्यत्र** इति। तोये। **क्रियावशाद्** इति। चलनस्वभावे एतदपि प्रतिबिम्बं चलमिव लभ्यते। यदाह **तत्प्रवृत्तिमिव** इति। तोयप्रवृत्तिम्। **स्फोटनादयोः** इति। तथा स्फोटोऽथाभूतो नादप्रवृत्तिं भेदवतीमनुगच्छतीति।

तत्त्वपक्षे इति। चन्द्रादिबिम्बसन्निधाने तच्छायोपरक्तास्तोयावयवाः परितः परितः प्रतिबिम्बन्तीत्येके। **अन्यत्र** इति। बिम्बं तोयहेतुरन्यदेव तोयात् प्रतिबिम्ब-

---

1. ACD कालेना°.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्त्वपक्षेऽन्यत्वपक्षे वा चन्द्रादिप्रतिबिम्बं यत्राधारे संसृष्टमिवोपलभ्यते न हि तत्तथा। तत्तु निष्क्रियमपि तोयतरङ्गादिक्रियाधर्मोपग्रहेणैव तोयादीनां भिन्नां प्रवृत्तिमनुपतत्येव। प्राकृतस्य वैकृतस्य च नादस्य ह्रस्वदीर्घप्लुतेषु द्रुतमध्यमविलम्बितासु च वृत्तिषु तावानेव स्फोटो विचित्रां वृत्तिमनुविधत्ते ॥ ४९ ॥

आत्मरूपं यथा ज्ञाने ज्ञेयरूपं च दृश्यते।
अर्थरूपं तथा शब्दे स्वरूपं च प्रकाशते ॥ ५० ॥

मित्यपरे। तथा चक्षूरश्मयो भास्वरद्रव्यप्रतिहताः स्वमेव मुखमीक्षन्त इति नानार्थपक्षः, आदर्शादन्यत्वात्। तत्र च प्रतिबिम्बमेव च प्रतिबिम्बम्। यद्वा आदर्श एव तथोत्पन्न इति। इदमप्रकृतत्वादसंबद्धम्। **संसृष्टमिव** इति। संबद्धमिवेति। स्वपक्षे व्यतिरेकाभावादिवशब्दो युक्तः। नानात्वपक्षे त्वस्त्येव संयोग इति कथमिवशब्दः ?। उच्यते। यथान्येषु पृथक्सिद्धेषु संयोगस्तथात्र नोपलभ्यते इतीवशब्दः[1]। **न हि तत् तथा** इति। प्रतिबिम्बं चलं दृश्यते, न तु तच्चलम्। अत्रोदके यत्तच्छायोपरक्ततोयावयवपक्षे तोयावयविनि सा क्रियोत्पन्ना, अवयवास्तु तद्वशात् क्रियावन्तोऽवभासन्ते। यदि त्ववयवेषु क्रिया स्यात् तदुत्पत्तावयवविभागपूर्वकोऽवयविनाशः स्यात्। अन्यत्वपक्षेऽपि वायुना तस्य संबन्धान्नास्ति क्रियोत्पत्तिरिति निष्क्रियम्। वायुसंयुक्तोदकयोगात् क्रिया भविष्यतीत्येतद्वैशेषिकदर्शने स्यात्। न च तद्दर्शने प्रतिबिम्बमर्थान्तरम्। यद्वा स्वयमक्रियमावेशात् क्रियावदिति नैव प्रस्तुतस्यालोपः। **तोयतरङ्गादि** इति। .... क्रियाया यो धर्मः तस्योपग्रहः स्वीकारः। **प्रवृत्तिम्** इति क्रियाम्। **अनुपतति** इति। अनुविधीयते। **प्राकृतस्य** इति। वक्ष्यमाणलक्षणस्य प्रथमस्य करणाभिघातस्य ध्वनेः। **वृत्तिषु** इति। ह्रस्वादिषु। **वैकृतस्य** इति। ध्वनीनां वृत्तिषु द्रुतादिषु। **तावानेव** इति। नित्यत्वादप्रचयः। **अनुविधत्ते,** अनुकरोति। एतदाह—यथा व्यञ्जकध्वनिभेदाद् भेदवान् तथा प्राकृतवैकृतध्वनिभेदाद् ह्रस्वद्रुतादिभेद इति ॥ ४९ ॥

इदानीमर्थाभिधानप्रकारमाह **आत्मरूपम्** इति। यथा ज्ञानं स्वरूपविषयरूपप्रकाशकं तथा शब्दः(अर्थस्वरूप ?) योः प्रकाशक इति।

ज्ञेयपरतन्त्रम् इति। सदैव ज्ञानं विषयाकारपरायत्तं तदवच्छादितस्योत्पत्तेः। तत् तेन च स्वरूपेण व्यपदेश्यत्वात्, तदपि स्वतन्त्रम् यत् क्वचिदनायत्तस्वरूपम्। **ज्ञेयरूप** इति। तत् ज्ञेयादुत्पन्नमिति (न ?) तत्तन्त्रम्, अपि तु तदाकारारोपेण[1] सदा प्रत्यवभासनात् **अनिर्देश्यस्वरूपमपि** इति। न तज्ज्ञेयाकारापोद्धारे स्वेन रूपेण ज्ञातुं शक्यते।

---

1. ACD इवशब्देन. 1. ACD °रोपणे.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथा ज्ञानं ज्ञेयपरतन्त्रं ज्ञेयरूपप्रत्यवभासत्वादनिर्देश्यस्वरूपमपि ज्ञानान्तरस्येव भिन्नं स्वस्यैवात्मनः स्वरूपमात्रं दर्शयति। तथा ह्यतीतमनुपलब्धमप्यन्येन ज्ञानेन स्मृतिविषयत्वं प्रतिपाद्यते। तद्वद्यमर्थे शेषभावमापद्यमानः शब्दोऽभिधेयतन्त्रस्तद्रूपोपग्राही शेषिणीमिव स्वरूपमात्रां प्रत्यवभासयति। सा तु सन्निहितप्रत्यवभासापि लोके भुज्यादिक्रियासंबन्धविरोधान्नाश्रीयते। व्याकरणे त्वर्थस्य कार्यविरोधित्वात्तस्याश्चाभिधेयरूपेण व्यवस्थानादविरुद्धः कार्यैर्योगः ॥ ५० ॥

ज्ञानान्तरस्येव इति। यथा ज्ञानान्तरेण ज्ञाने परिच्छिद्यमाने स्पष्टपरिच्छेद्यता ज्ञानस्य तथा रूपादिविषयपरिच्छेदिन्यपि ज्ञाने ज्ञानरूपस्य संवेद्यत्वम्। ततः ज्ञाने(ज्ञानं ?) सन्निधानकृतं न पुनः क्रिया काचित्। तच्च ज्ञाने स्वरूपस्यापि सन्निधानमस्तीति यदि विषयाकारत्वं प्रतिपद्यतेऽत्रादिना स्वरूपत्यागो विपयज्ञानरूपतया संवेदनाभासः स्यात्। स्वस्यैवात्मनः इति। एतदाह—यथा ज्ञानान्तरस्य स्वरूपमात्रं दर्शयति तथा स्वस्यैवात्मनोऽप्यतिरिक्तं स्वरूपम्। तथा हि इत्येतद्[2] द्रढयति। अनुपलब्धम् इति। यद् रूपादिविषयं ज्ञानं ज्ञानान्तराननुभूतं तत्र स्मृतिर्न स्यात्। सा च दृष्टा। तस्मात्स्मर्यमाणत्वादनुभूयते[3] ज्ञानस्वरूपमिति। शेषभावम् इति। गुणभावम्। यतोऽ(र्थ ?)प्रत्यायनाय श .... पानं तद्रूपोपग्राहिशब्दार्थयोरभेदलक्षणेन संबन्धेन संबद्धत्वात्। शेषिणीमिव[4] इति। प्रधानभूतामिव प्रकाश्यतयार्थवत् प्राप्तप्राधान्याम्। अर्थादिद्योतनार्थन्तु तस्यानुवादादिवशब्दोपादानम्। प्रत्यवभासयति इति। ग्राहयति। यद्यभिधेयस्वरूपं तस्मादर्थवन्न क्रियया संबध्याह सा तु इति। एतदाह—प्रकाशमानापि सा अर्थक्रियाविरोधाल्लोके नाश्रीयते। तदस्य नाशे क्रियासंबन्धविरोधस्वरूपस्य, यथा जात्यादयश्चोदिता अपि न क्रियया संबध्यन्ते, विरोधात् तथा स्वरूपाविति (स्वरूपमिति ?)। यत्र तु स्वरूपमर्थक्रियाविरोधि न भवति तत्र क्रियासंबन्धो यथा 'अग्नेर्ढक्' इति। यदाह व्याकरणे तु इति। न शक्यतेऽर्थात् परः प्रत्ययः कर्तुमिति विरोधः। न च तदर्थस्य ज्ञानवाच्यत्वम्। तस्याश्च इति। स्वरूपमात्रायाः। अभिधेयत्वेन (-यरूपेण ?) इति। यतः स्वरूपपदार्थकोऽग्निशब्दः। तस्य भाक्तत्वम्(भाक्तत्वम् ?) ॥ ५० ॥

---

2. C °त्येकं, L उक्तं द्र°. 3. ACD अननुभू°. 4. ACD शेषिणमिव.

Dr. Urmila Sharma Collection, Varanasi

आण्डभावमिवापन्नो यः क्रतुः शब्दसंज्ञकः ।
वृत्तिस्तस्य क्रियाभूता[1] भागशो लभते क्रमम् ॥ ५१ ॥

सर्वविभागोद्ग्राहप्रतिसंहारेण बाह्यो व्यावहारिकः शब्दोऽन्तःकरणे मयूराण्डरसवत् पूर्वविभागोद्ग्राहभावनामात्रामव्यतिक्रामन् प्रतिलीयते। यथा चैकस्य शब्दस्य प्रतिलयस्तथा दाशतयादीनामपि। स त्वेवं प्रतिलीनः प्रत्यस्तमितभागः

यदुपन्यस्तं क्रमवान्निमित्तमक्रमः प्रतिपादकः, तथैतदेव विपरीतमिति दर्शनद्वयं तदुदाहरणदर्शनेन स्पष्टीकरोति **आण्डभावम्** इति। अण्डे भवो रसः, तद्भावमिव। **आपन्नः**, प्राप्तः, मयूराण्डरसतुल्यः। **क्रतुः** इति शास्त्रान्तरे बुद्धिरुक्ता। साप्यर्था.... मत्याकारावग्रहात् शब्दोऽप्यर्थान्नातिक्रामतीति क्रतुः। तदिह शब्दग्रहणमात्रायाः। यदाह **शब्दसंज्ञकः** इति। **वृत्तिः** इति। आविर्भावतिरोभावौ शब्दस्य वृत्तिः। **क्रियाभूता** इति। भूतशब्द इवार्थे। सा वृत्तिः तस्य क्रियातुल्या[2]। **भागशः** इति। क्रियास्वभाव एवायं यत्क्रमवदनेकावयवता। यदाह **भजते** (**लभते ?**) **क्रमम्** इति। स तथैव (सा यथैव ?) हि क्रमोत्पा[3]दविनाशाभ्यां क्रमवती, तथाविर्भावतिरोभावाविति।

बाह्यः इति। श्रोत्रानुपाती। **व्यावहारिकः** इति। येनार्थप्रतिपादनम्। **स अन्तःकरणे** बुद्धौ प्र(ति ?)लीयत इति संबन्धः। कथमित्याह **सर्वविभाग** इति। विभज्यन्त इति विभागा अवयवाः। तेषामुद्ग्राहः स्वीकारः, तस्य प्रतिसंहारस्तिरोभावः। एतदाह-उपसंहृतावयवरूपो बुद्धौ शब्दः प्रलीयत इति। यद्यवयवविभागोपसंहारः कथं ततः क्रमवदवयवार्थगतशब्दाभिव्यक्तिरित्याह **पूर्वविभाग** इति। पूर्वे ये विभागोद्ग्राहाः तेषां भावनामात्राम्[4]। **अव्यतिक्रामन्**, अपरित्यजन्। यद्यपि व्यक्तिरूपोपसंहारः शक्त्यनुषङ्गस्तु विद्यते। **मयूराण्डरसवद्** इति। यथा मयूरादीनामण्डेषु रस उत्पत्स्यमानाङ्गप्रत्यङ्गचन्द्रकादीनां रूपोपसंहारेण तदुत्पादनविभक्तशक्तिमात्रतामपरित्यजन् प्रलीयते तथान्तःकरण उत्पत्स्यमानाः शब्दा इति। **यथा चैकस्य** इति। यथैको युगपदनेकवर्णप्रविभागोपसंहारेण प्रलीयते **तथा [5]दाशतयादीनाम्** इति। दश अवयवा आसामृचां ता इमाः, दशानां समूहो दाशतय्यः। चतुःषष्टेरेतन्नाम। आदिग्रहणाच्छतपथस्य। एतेऽपि स्वऽय(म्य ?)स्तग्रन्थानामेकस्यां बुद्धौ भेदोपसंहारेण युगपदवतिष्ठन्ते। स तु

---

1 L क्रियारूपा.
2. ACD क्रियातुल्य भाग शब्द इति.
3. ACD क्रमवत्पदविना°.
4. ACD °मात्रादव्यति क्रामन् परित्यजन्.
5. ACD गतवादिनाम्.

CC0. In Public Domain, Digitizagtion by eGangotri

प्राप्तविवक्षाप्रतिबोधायामन्तःशब्दवृत्तौ वाक्यपदविवर्तधर्ममुद्गृह्य प्रत्येकमवयवोद्ग्राहेण क्रमशक्तिं प्रतिगृह्णाति। सा चास्योदयप्रत्यस्तमयनिर्भासमात्रा क्रियारूपेणावसीयते ॥ ५१ ॥

यथैकबुद्धिविषया मूर्तिराक्रियते पटे।
मूर्त्यन्तरस्य त्रितयमेवं शब्देऽपि दृश्यते ॥ ५२ ॥

इति। **प्रतिलीनः** शब्दः। **क्रमशक्तिं परिगृह्णाति** इति संबन्धः। **प्राप्तविवक्ष** इति। विवक्षाकृतप्रबोधः[6] कार्यनिष्पादनाभिमुख्यं संप्राप्तो यया सा प्राप्तविवक्षाप्रबोधा। **अन्तःशब्दवृत्तौ** इति। प्रलीनशब्दायां बुद्धिसन्तानविवक्षायां(बुद्धौ सञ्जातविवक्षायां ?) शब्दवासनापरिपाको भवति। **वाक्यपद** इति। वाक्यपदात्मका ये विवर्तास्त एते विभागवन्तः उपलभ्यन्ते वाक्यपदादयः तेषां धर्मः स संगृह्णाति, तद्रूपतां प्रतिपद्यते, तथावभासते इति यावत्। **प्रत्येकम्** इति। एकैकस्मिन् शब्दे वर्णभेदाद्। **अवयवोद्ग्राहेण,** अवयवस्वीकारेण। **क्रमशक्तिम्,** क्रमाख्यां शक्तिम्। यतस्तेऽवयवाः क्रमेणावभासमुपगच्छन्ति क्रमशक्तिपरिहाराच्च(परिग्रहाच्च ?) तेषामवयवानां यः क्रमेणोदयप्रस्तमयप्रत्यवभासः सैवास्य क्रिया। न ततो व्यतिरिक्ता क्रियास्तीति। यदाह **सा चास्य** इति ॥ ५१ ॥

तदेवं प्रथमतः क्रमवान् ततोऽक्रमः पुनश्च क्रमवानिति प्रदर्श्य दृष्टान्तान्तरेण कथयति **यथैक** इति। तस्या बुद्धेर्विषयभूता। **मूर्तिः**[1]। एकबुद्ध्यधिरूढेति यावत्। **आक्रियते,** आकारवती क्रियते। क ?। पटे। तत्र हि लिखिता[2]न्येनापि[3] परिच्छिद्यते। कस्य मूर्तिरित्याह **मूर्त्यन्तरस्य** इति। देवदत्तादेः। **त्रितयम्** इति। प्रथमतो देवदत्तं वक्त्रादिक्रमेणोपलभते[4]। ततो बुद्ध्या संकलय्यैकतया गृह्णाति। पुनस्तमेवावभेदक्रमेण (अवयवभेदक्रमेण ?) लिखति। **एवं शब्देऽपि** इति। प्रथमतः श्रवणे क्रमवान्। ततोऽल्पभूतः क्रमः, ततः परप्रतिपादनाय क्रमवान् इति।

सावयवा इति। सहावयवैः सर्वैरिति यावत्। **आचिकीर्षिता** इति। आकारवतीं कर्तुमिष्टा। **क्रमोपलब्धावपि** इति। यद्यप्यवयव्येका .... थाप्यवयवे .... समाह[5] .... प्रतिपत्ता तु स्पष्टतां जिघृक्षुरवयवानिदन्तया प्रत्येकं क्रमेण निरूपयति। मध्यपरभागयोर्वा दर्शनेन प्रथमतः क्रमोपलब्धिः। **एकबुद्धिनिबन्धनत्वम्** इति। एकस्या

---

6. C °बोधात्, D °बोधा.
1. ACD प्रकृतिः.
2. ACD लिखितापन्ये°.
3. C ins. न before परि°.
4. ACD उपलभ्यते।
5. A समह.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथा सावयवा पुरुषादिमूर्तिराचिकीर्षिता क्रमोपलब्धावप्येकबुद्धिनिबन्धनत्वं प्राप्ता पटकुड्यादिषु क्रमेणाक्रियते तथा व्यावहारिकोऽपि क्रमग्राह्यः शब्दः प्रतिसंहृतक्रम एकबुद्धिनिबन्धनो भूत्वा निरवयवक्रमं बुद्धिरूपं तस्यामात्मप्रत्यवभासमात्रायां पृथग्भूतायामिव प्रत्यस्य तद्भावमिवोपनीय करणवृत्तिक्रमध्वनिधर्मप्रतिपत्त्या पुनरपि व्यवहारमवतरति। तथा चासौ तिसृभिरवस्थाभिरविच्छेदेनावर्तमानो ग्राह्यग्राहकभावं नातिवर्तते ॥ ५२ ॥

बुद्धेर्निबन्धनत्वम् विषयत्वम्। निबध्यतेऽनेनेहेति[6] निबन्धनं विषयः। क्रमेणोपलभ्य पुनरेकधिया[7] सङ्कलय्य[8] परिच्छिनत्ति। एकस्यां वा बुद्धौ निबध्यत इत्येकबुद्धिनिबन्धनः। **आक्रियत** इति। पुनः क्रमेणैव पटे आकारवती क्रियते। **व्यावहारिकः** इति। श्रोत्रग्राह्यः। **क्रमग्राह्यः** इति। वर्णानां क्रमेणोपलम्भात्। **एकबुद्धिनिबन्धनः** इति। पूर्ववत्। न च तदा बुद्धिशब्दयोर्भेदः। यदा तु शब्दस्य बुद्धौ निवृत्तिः तदाह **अवयवम्** (**निरवयव ?**) इति। **शब्दरूपम्** (**बुद्धिरूपम् ?**)। तद्धि तदा बुद्ध्यव्यतिरेकाद् बुद्धिरूपमित्युच्यते। अतश्च तदक्रमम्। भेदाभावात्। **तस्याम्** इति। तस्या एव शब्दबुद्ध्योर्यो ग्राहकांशस्तत्र। **पृथग्भूतायामिवेति**। सा हि तस्य शब्दरूपात् पृथगिव शब्दो विषयतया प्रत्यवभासते, न तु बुद्धिः। यदाह **आत्मप्रत्यवभासमात्रायाम्** इति। सा हि बुद्धिः न विषयस्वभावा स्वत इति। **प्रत्यस्य** इति। तदात्मानं तच्छब्दरूपं पृथग्भूतायामिव बुद्धौ प्रत्य(स्यति ?)। विभागेनैव तत्रानुप्रवेश इति कथयति। तं प्रत्यासमाह **तद्भावम्** इति। तदनुप्रवेशाद् बुद्धिरूपतामुपनीय[9]। बुद्धिरेव सा तथेतिव शब्दः। **करणवृत्ति** इति। करणानां वृत्तिः स्थानकरणाभिघातः, तत्समुत्थोऽयं क्रमः। स च ध्वनिधर्मः। करणवृत्तीनां वा यः क्रमः स एव ध्वनीनां धर्मः क्रमः, तज्जत्वात् तस्य। **प्रतिपत्तिः** स्वीकारः। **पुनरपि** इति। यतो बुद्ध्यनुसंहारात् प्रागपि व्यवहार्य एवासीदिति। **तिसृभिरिति**। प्रथमतः क्रमरूपता, ततः प्रतिलयः, ततः क्रम इति। **आवर्तमानः** इति। श्रोतृवक्तृपरम्परया। **ग्राह्य** इति। ग्राह्यत्वं स्वरूपप्रकाशनाद्, अर्थप्रकाशनाद् ग्राहकत्वम्॥ ५२ ॥

---

6. L नह्यते, AC °ध्यते नेहेतिनि°.

7. AD पुनरोपाधिमा, C पुनरौपाधिकतया.

8. ACD सङ्कप्य.

9. CD उन्नीय.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथा प्रयोक्तुः प्राग् बुद्धिः शब्देष्वेव प्रवर्तते ।
व्यवसायो ग्रहीतॄणामेवं तेष्वेव जायते ॥ ५३ ॥

यथैव प्रयोक्ता शब्दविशेषविषयं प्रयत्नमभिपद्यमानः प्रतिशब्दं परितः परिच्छिन्नाञ्शब्दात्मनः संस्पृशन्निव मनः प्रणिधत्ते। तथैव प्रतिपत्तापि शब्दरूपपरिच्छेदाधीनमर्थग्रहणं मन्यमानस्तं तं शब्दं सर्वैः संबन्धिभिर्विशेषणैराश्रितसंसर्गानुग्रहं निर्धारयति। अर्थप्रतिपत्तिभावनाभ्यासात्तु सा शब्दरूपपरिच्छेदावस्था न चित्रीक्रियते। तस्माच्छेषिभावकाष्ठामनुभूय सर्वार्थयोनयः सर्वे शब्दाः शेषभावमर्थेषु प्रतिपद्यन्ते ॥ ५३ ॥

तदिदानीं स्वरूपग्राहकत्वं पुनः साधयन्नाह **यथा** इति । **प्रयोक्तुः** इति । उच्चारयितुः । **प्राग्**[1] इति । प्रथमम् । **ग्रहीतॄणाम्** इति । श्रोतॄणाम् । **तेष्वेव** इति । शब्देषु ।

प्रयत्नम् इति । शब्दोच्चारणाय प्रयत्नमारभमाणः प्रथमतः शब्दरूपं बुद्धया निरूपयति तदिति रूपेण । विशिष्टप्रयत्नोपादानं तत् स्यात् । भिद्यन्ते हि प्रतिप्रयत्नं शब्दाः । यदाह **परितः** इति । (**परिच्छिन्नान्** इति ?) शब्दान्तरविविक्तेन रूपेण परिच्छिन्नरूपान् । **संस्पृशन्निव** इति । तदा बुद्धेरव्यतिरेकाच्छब्दस्य इवशब्दोपादानम् । संस्पर्शो हि विषयभावगमनम् । यदा तु परितः परिच्छिन्नानिति बुद्धेर्विभक्तान् संस्पृशन्निवेत्यर्थः तदा वाक्यार्थ उपमीयते । यतो न तत्र शब्दः श्रुतः परिच्छेदः संस्पर्शो वेति । **प्रणिधत्ते** इति । [2]नियुङ्क्ते । **संबन्धिभिः** इति । उदात्तादिभिः । तथापि परिच्छिन्नो व्यावृत्तरूपेण परिच्छिन्नो भवति । **विशेषणैः** इति । (**आश्रितसंसर्गानुग्रहम्** इति ?) स्वसमवेताभिः जातिभिर्यः संसर्गस्तत्कृतोऽनुग्रहोऽन्यतो व्यवच्छेदः, स आश्रीयते येन । संसर्ग एवानुग्रहः स आश्रितोऽनेन[3] इति [वा]। यदि शब्दो विशिष्टं स्वरूपं प्रतिपाद्यार्थं प्रत्याययति, कस्मान्न[4] पुनः पृथक्त्वेन प्रथमतो निमित्तीक्रियत इत्याह **अर्थप्रतिपत्ति** इति । अर्थप्रतिपत्तिरर्थावबोधः, ततो भावना क्रियानुष्ठानम्, तस्या अभ्यासः पुनः पुनरासेवा, तस्य परिच्छेदोऽभ्यासः, तस्य शब्देऽपि भावात् सोऽपि तेनाभ्यस्त एव । **न चित्रीक्रियते** इति । निमित्तीक्रियते । यतः प्रत्यवमर्शप्रत्ययोऽयं तत्र निमित्तीकरणम् । स त्वर्थक्रियाभ्यासाद् व्याक्षिप्तः परिच्छिन्दन्निव [5]प्रत्यवमृशति । **शेषिभावकाष्ठाम्** इति । शेषिभावः प्राधान्यम् । काष्ठा प्रकर्षः । स्वरूपप्रतिपादनेन प्रकृष्टः (प्रकृष्टं ?) प्राधान्यमनुभूय । **सर्वार्थयोनयः** इति । सर्वार्थप्रत्यायनहेतवः । **शेषभावं** गुणभावम् । **अर्थेषु प्रतिपद्यन्त** इति ॥ ५३ ॥

---

1. ACD प्रादित्यः प्रथमं(मः). 2. ACD नियुक्तम्.
3. ACD °श्रितेन. 4. ACD om. न before पुनः, but it is required.
5. ACD ins. न before प्रत्य°.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अर्थोपसर्जनीभूतानभिधेयेषु केषुचित् ।
चरितार्थान् परार्थत्वान्न लोकः प्रतिपद्यते ॥ ५४ ॥

यथैवायं शुक्ल इति सगुणे गुणिनि प्रतीयमाने क्रियाविशेषविषयमुपलक्षणत्वमपि गुणस्य क्वचिदेवान्यत्र शिष्टत्वात् प्रतीयते। तथा यो गोशब्दः सोऽर्थं पिण्ड

कथं पुनस्तस्यार्थवत् क्रियाङ्गता नास्तीत्याह **अर्थोपसर्जनीभूतान्** इति। **लोकः प्रतिपद्यते** इत्यनेन संबन्धः। अर्थस्य प्रधानतया, स्वरूपस्य च तदुपलक्षणभावेन। अत्र हेतुः **परार्थत्वाद्** इति। तदेव कुतः इत्याह—चरितार्थत्वादन्य(र्थे ?)प्रतिपादने उपयुक्तत्वात् परार्थतया न लोकः क्रियाङ्गतया प्रतिपद्यते। क्व चरितार्थतेत्याह **अभिधेयेषु केषुचिद्** इति। अन्ये तु अथोपसर्जनीभूतान् इति पठन्ति। अथ इति निपातः। उपसर्जनस्थानां विषयमाह **अभिधेयेषु** इति। केषुचिच्चरितार्थानित्यनेन संबन्धः।

अयं शुक्लः इति। शुक्लशब्दो हि द्रव्यं प्रतिपादयति, गुणं गुणिनं च। यदाह **सगुणे** इति। तत्र गुणिवत् शब्देन गुणस्य प्रतीतौ गुणस्य क्रियासंबन्धो गुणिलक्षणतयैव प्रतीयते। यदाह **उपलक्षणत्वम्** इति। अपिशब्दात् क्वचित् क्रियाङ्गतापि साक्षात् पारम्पर्येण वा। तथा हि भाष्य उक्तम्—

"कटोऽपि कर्म, भीष्मादयोऽपि"

इति। तत्र यदा क्रियोपकारायैवोपादानमिति पक्षः तदा शुक्लं पश्यतीत्युभयं दृश्यते। यदा तु तद्व्यवच्छिन्नक्रियोपयोगः तदा पारम्पर्यमेव। यदा तूपलक्षणायैव गुणस्योपादानं तदा दृष्टान्तः। यदाह **क्वचिद्** इति। अथवा यः शुक्लो दृष्टस्तमानयेत्युपलक्षणाय गुणः। अत एवाह **अन्यत्र शिष्टत्वाद्**[1] इति। दर्शने गुणस्य शिष्टत्वात्। इह तु शुक्लमानयेति क्रियासंबन्धोऽपीत्यपिशब्दार्थः। **क्रियाविशेष** इति। यद्यपि द्रव्यमेवोपलक्ष्यते गुणेन तथापि तत् क्रियाङ्गभावायैवेति क्रियैवोपलक्षणविषयत्वेनोपात्ता। **अन्यत्र** इति। गुणादन्यस्मिन् द्रव्ये, यस्य स गुणः। **शिष्टत्वाद्** इति। द्रव्योपलक्षणार्थमुपात्तत्वात् गुणस्य। तत्र सा द्रव्येऽपि शिष्टत्वाद् विहितत्वात् क्रियाया इति। अन्यत्राविशिष्टत्वाद् इति पाठे तद्गुणावि(व ?)च्छिन्नाद् द्रव्यादन्यत्राविहितत्वात् क्रियाया इति। यथोक्तम्—

"अथवा कट एव कर्म, तत्सामानाधिकरण्याद् भीष्मादिभ्यो द्वितीया"

इति। **यो गोशब्द** इति। अभेदसंबन्धव्युत्पत्तावुभयस्य प्रतीतिमाह **क्रियायोग** इति। गामानयेत्यादौ। **चरितार्थम्** इति। अर्थप्रतिपादन उपक्षीणम्। तदेवाह **शेषताम्** इति।

---

1. ACD शिष्टाचारमिति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्यभिसंबन्धे सति क्रियायोगविवक्षायामर्थस्योपलक्षणे चरितार्थं शब्दं शेषतां प्रतिपन्नमभिधेयमिव क्रियासाधनभावेन(न) लौकिकाः प्रतिपद्यन्ते ॥ ५४ ॥

ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा ।
तथैव सर्वशब्दानामेते पृथगवस्थिते ॥ ५५ ॥

घटादयो हि ग्राह्यत्वेनैव व्यवस्थिता इति घटादीनां ग्रहणकाले नैव काञ्चिदुपलब्धिसहकारित्वेनेन्द्रियस्य विषयस्य वा स्वल्पामप्यनुग्रहमात्रां कुर्वन्ति। तथा ग्राह्यत्वमप्रतिपद्यमानान्येव सर्वेन्द्रियाणि ग्राह्यस्य विषयस्य ग्रहणनिमित्तत्वाय कल्पन्ते। तेजस्तु तमोरूपविरोधिना रूपभेदेन युक्तमवधार्यमाणस्वरूपमनुग्राहकत्वेनोपलब्धौ कारणभावं प्रतिपद्यते। शब्दोऽपि भावान्तरविरोधिना शब्दान्तरविरोधिना च स्वरूपेणावध्रियमाणभेदः परिगृहीतविशेषशब्दस्वरूपः प्रत्याय्यमर्थं

अङ्गताम्। **अभिधेयमिव** इति। यथा पिण्डं कर्मतां प्रतिपद्यते नैवं शब्द इति। पूर्वत्र शब्दस्य विरोधात् कर्माङ्गता प्रतिषिद्धा, सम्प्रति अर्थोपलक्षणे चरितार्थत्वाद् इति विशेषः ॥ ५४ ॥

यदि (यद्यपि ?) शब्दो ग्राह्यग्राहकभेदेन स्थितः तथापि तेजोवदेकत्र द्वयं न विरुध्यत इति कथयिष्यन् प्रक्रमते [**ग्राह्यत्वम्** इति ?]।

ग्राह्यत्वेन इति। ग्राह्यत्वेनैवावस्थिताः। **घटादीनामेव**[1] [इति]। स्वात्मनामेव। **इन्द्रियस्य** इति। अञ्जनेनेव। **विषयस्य** इति। उदकसेकेनेव। **स्वल्पमपि** इति। अल्पमपि। अनुग्रहं न कुर्वन्ति। स्वात्मनि वृत्तिविरोधान्न विषयानुग्रहः। न चापीन्द्रियस्य, कृतविशेषादर्शनात्। सहकारित्वेनापि नास्ति ग्राहकत्वमिति कथयति। यद्यपि कर्मणः कारकत्वात् क्रियायामुपयोगस्तथापि ग्राह्यतयैव कारकत्वं न ग्राहकत्वेन, लोकप्रतीत्यभावात्[2]। न लोकः क्रियायाः कर्मकृतमुपकारं प्रतिपद्यत इति। **सर्वेन्द्रियाणि** इति। मनसा सह षडिन्द्रियाण्यगृहीतान्येवार्थं प्रकाशयन्ति। **तमोरूपविरोधिना** इति। तमो नामालोकविरोधी पदार्थः। तदपचा(सा ?)रयद्घटादिभ्यस्तेजो यथा तान् प्रकाशयति तथास्मादपि रूपाद् विरोधितमोपसाराय[3] तदात्मानं प्रकाशयति। अतश्च **अवधार्यमाणस्वरूपं** गृहीतं सत् प्रकाशयतीति। **भावान्तरविरोधिना** इति। येन रूपेण स्वार्थमश्वादिशब्दः प्रत्याय्यमर्थं व्यावृत्तेन रूपेणोपस्थापयति सासौ विशिष्टार्थसरूपता। **शब्दान्तर** इति। यदश्वादिशब्दव्यवच्छिन्नं रूपं समानत्वाद्व्यवच्छेदस्योद्भवं प्रतिपादय-

---

1. ACD पटादी°, एव is not found in the Vṛtti, but all Mss. of the Paddhati have it.

2. BCD °प्रतीत्या वा. 3. ACD °धिक्रमोप°.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकाशयति। ते चास्य प्रतिपाद्यप्रतिपादकशक्ती नित्यमात्मभूते पृथक्त्वेनेव प्रत्यवभासेते ॥ ५५ ॥

यतश्चैतदेवं तस्मात्

विषयत्वमनापन्नैः शब्दैर्नार्थः प्रकाश्यते ।
न सत्तयैव तेऽर्थानामगृहीताः प्रकाशकाः ॥ ५६ ॥

यदि ग्राह्यत्वेन शेषिभावमप्रतिपन्नाः शब्दाः शेषत्वमर्थेषु प्रतिपद्येरन् ते सत्तासंबन्धमात्रेणोपलब्धाश्च अनुपलब्धाश्च विषयत्वमनपेक्षमाणाः स्वं स्वमर्थं प्रत्याययेयुः, न तु प्रत्याययन्ति। तस्मादङ्गभूत एषामर्थेषु गुणभावापत्तौ प्राधान्यमात्रारूपेण संस्पर्श इति ॥ ५६ ॥

अतोऽनिर्ज्ञातरूपत्वात् किमाहेत्यभिधीयते ।
नेन्द्रियाणां प्रकाश्येऽर्थे स्वरूपं गृह्यते तथा ॥ ५७ ॥

शब्दस्वरूपसम्प्रत्ययाधीनमेवार्थप्रत्ययायनं मन्यमाना लौकिकाः प्रयुक्तेष्वपि शब्देष्वप्रतीतस्वरूपेषु शब्दस्वरूपविशेषप्रतिपत्त्यर्थं किं भवानाहेत्याहुः। इन्द्रियाणि

तीति। **परिगृहीत** इति। यद्यप्यवध्रियमाणभेद इत्युक्तोऽयमर्थस्तथापि स्वरूपमात्रकथनं तत्र। इदं तु परिगृहीतविशिष्टस्वरूपविशिष्टः सन् प्रकाशयतीति प्रत्यायनाङ्गभूतं पुनरुपात्तम्। **प्रतिपाद्यप्रतिपादकशक्ती** इति। भिन्नव्यापारदर्शनात्रसितभेदे। **आत्मभूते** इति। अव्यतिरिक्ते। **पृथक्त्वेन** इति। इव [इति]। शब्दादन्ये इव प्रत्यवभासमात्रापरिग्रहेण ॥ ५५ ॥

यतश्च इति। यस्माद् ग्राह्यग्राहकशक्ती तस्य, तस्माद्। **विषयत्वम्** इति। ज्ञानविषयताम्। **अनापन्नैः** इति। अप्राप्तैः। **प्रकाश्यते** इति। प्रत्याय्यते। **सत्तया** इति। नित्यत्वाद्धि सदैवैषां सत्तासंबन्धः। **अगृहीताः** इति। अनुपलब्धाः। तदेतेन स्वकार्ये तमनियमं शक्त्योराह।

[1]**यदि** इति। यदि ग्राह्यतामनुपगच्छन्तः शब्दाः प्रतिपादयेरन्। **उपलब्धाश्च** इति। उपलब्धानुपलब्धव्यवस्थायां सत्ताया अविशेषादनुपलब्धेऽ(ब्धा अ?)पि प्रत्याययेयुः। **अङ्गभूतः** इति। निमित्तभूतः। **प्राधान्यमात्रारूपेण संस्पर्शः**। कः क पुनः प्राधान्येन व्यवस्थितो गुणीभूत इत्याह **अर्थेषु** इति। तत्प्रतिपादने गुणभाव इति ॥ ५६ ॥

यतश्च गृहीतानामङ्गभावोऽर्थप्रत्यायने, **अतः** इति। अस्माद्धेतोः। **अनिर्ज्ञातरूपत्वाद्** इति। अगृहीतरूपत्वात्। **किमाह** इत्येवं प्रश्नः। **नेन्द्रियाणाम्** इति। ये त्वङ्गीकृता (अगृहीता?) अङ्गतां यान्ति न तेषु ग्रहणं प्रति यत्नः।

---

1. ACD यान्तीति.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तु शेषिभावमात्रासंस्पर्शेनासंसृष्टान्त्यपरिच्छिन्नस्वलक्षणानि विषयोपलब्धौ शेषभावमुपगच्छन्ति ॥ ५७ ॥

भेदेनावगृहीतौ द्वौ शब्दधर्मावपोद्धृतौ ।
भेदकार्येषु हेतुत्वमविरोधेन गच्छतः ॥ ५८ ॥

यथैव व्यपदेशिवद्भावविषयेष्वर्थात्मसु निमित्तभेदाद् बुद्धिप्रकल्पनया व्यवस्थापितभेदेषु लोके [1]शास्त्रेषु च मुख्यभेदविषयाणि सर्वाणि कार्याणि क्रियन्ते । तथा शब्देष्वपि बुद्ध्या परिगृहीतग्राह्यग्राहकशक्त्यपोद्धारेषु मुख्यार्थविषयाणि इव शास्त्रे संज्ञासंज्ञिसंबन्धादीनि भेदकार्याणि विधीयन्ते ॥ ५८ ॥

लौकिकाः इति लोकस्थितिं प्रामाण्येनोपन्यस्यति । **अप्रतीत** इति । अव्यक्तस्वरूपगृहीतेषु । न त्वेकान्ततोऽपरिच्छिन्नेषु प्रश्नसंभवः ॥ ५७ ॥

पृथक्त्वेनेव प्रत्यवभासेते इत्यतः प्रभृति शक्त्योः भेदकथनस्य प्रक्रान्तस्य फलं कथयति **भेदेन** इति । पृथक्त्वेन । **अवगृहीतौ** परिच्छिन्नौ । **द्वौ** इति । व्यतिरिक्तौ । **शब्दधर्मौ** इति । ग्राह्यग्राहकत्वे । **अपोद्धृतौ** इति । कार्यार्थं स्वातन्त्र्येणैकस्मात् पृथक्कृतौ । **भेदकार्येषु** इति । भेदनिमित्तेषु संज्ञासंज्ञिसंबन्धादिषु । **हेतुत्वम्** इति । निमित्तभावः (वम् ?) । **अविरोधेन** इति । यद्यपि परमार्थतो न व्यतिरिक्तौ तौ तथापि भेदाधिष्ठानं कार्यं तत्र न विरुध्यत इति ।

व्यपदेशिवद्भाव इति । व्यपदेशिवद्भावस्य विषयो यो योऽर्थात्मा । यथा सुवर्णस्याङ्गुलीयकमित्यस्य(त्र ?)योऽर्थः । **निमित्तभेदाद्** इति । सन्निवेशविशेषोऽङ्गुलीयकशब्दस्य निमित्तम्, सुवर्णशब्दस्य जातिः । अतो यद्यपि वस्त्वेकम्, निमित्तं तु भिद्यते । तद्भेदाच्च बुद्धयस्तन्निबन्धना भेदमत्रकल्पयन्ति न वस्तुतः । यदाह **बुद्धिप्रकल्पनया** इति । तस्य बुद्धिप्रकल्पितं भेदमङ्गीकृत्य लोके सुवर्णस्याङ्गुलीयकमिति षष्ठी भेदनिबन्धना । **शास्त्रेषु** इति । तत्र व्यपदेशिवद्वचनम्

'एकाचो द्वे प्रथमस्य '[2] (P. 6.1.1.)

इति । इयायेत्यादावे(का ?)ज्व्यपदेशो निमित्तभेदात् । **मुख्यभेदविषयाणि** इति । यथा राज्ञः पुरुष इति मुख्यो भेदः, तथा सर्वत्र शब्दार्थत्वेन मुख्य(अमुख्य ?)एव भेदः । वस्तुगतो नास्तीति । **तथा शब्देष्वपि** इति । भेदव्यवहारः । **परिगृहीतेति** । परिच्छिन्नो ग्राह्यग्राहकशक्त्यपोद्धारो येषु शब्देष्वाश्रितः । शक्तिभेदाच्च शब्द एव भेदावसायः । यद्यपि शब्दार्थत्वेनामुख्यो भेदः वस्तुभेदस्तु नास्तीति इव-शब्दप्रयोगः । **शास्त्रे** इति

'स्वं रूपं शब्दस्य ' (P. 1.1.68.)

इत्यत्र संज्ञासंज्ञिसंबन्धः । आदिशब्दो यथा वक्ष्यति 'प्राक् संज्ञिनाभिसंबन्धाद्' इति । ॥ ५८ ॥

---

1. L शास्ते.   2. AD प्रथमार्थम्.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृद्धयादयो यथा शब्दाः स्वरूपोपनिबन्धनाः ।
आदैच्प्रत्यायितैः शब्दैः संबन्धं यान्ति संज्ञिभिः ॥ ५९ ॥

इह हि भिन्नरूपसंज्ञाप्रतिपाद्येषु

'इको यणचि' (P. 6.1.77.)

इत्यादिषु नोच्चार्यमाण इक्च्छब्दः स्थानी, नापि यण्शब्द आदेशः, तत्प्रत्यायितानां तु रूपान्तरयुक्तानां संज्ञानां (संज्ञिनां ?) स्थान्यादेशभावः शास्त्रेऽन्वाख्यायते । तुल्यरूपसंज्ञेष्वपि संज्ञिषु तादृशी संबन्धप्रतिपत्तिरिति सिद्धमेतत् । तत्र वृद्धयादयः शब्दाः स्वरूपाधिष्ठानाः स्वेनार्थेनार्थवन्तः स्वरूपेण शब्दान्तरस्वरूपाण्युपजिघृक्षन्तः

तदेवं संज्ञासंज्ञिसंबन्धं शक्तिभेदप्रकल्पितं शब्दभेदनिबन्धनमभिधाय ... प्रसङ्गेन विशिष्टविषयतां तस्य संबन्धस्य दर्शयितुं वक्ष्यमाणस्यार्थस्य दृष्टान्तेनोपक्रमते वृद्धयादयः इति । **स्वरूपोपनिबन्धनाः** इति । स्वरूपमुपनिबन्धनमभिधेयमेषामिति ।

'वृद्धिरादैच्' (P. 1.1.1.)

इत्यत्र संज्ञासंज्ञिव्युत्पत्तिकाले वृद्धिशब्दस्य न लौकिकोऽर्थः, विरोधात् । न चादैचः, संज्ञित्वस्य व्युत्पाद्यमानत्वात् । ततः स्वरूपमेवार्थः । **आदैच्प्रत्यायितैः**[1] इति । आदैकं कौकारैः प्रबुध्याद्वृद्ध्यादय इति चरति शब्दस्योपादानादादैज्ग्रहणं संज्ञोपलक्षणाय वक्ष्यमाण एवार्थे समुदेतीति दर्शनमाहुः ।

इको यणचीत्यत्रेगित्यपि संज्ञा इकारादीनां चतुर्णां, यणित्यपि यकारादीनां चतुर्णाम् 'आदिरन्त्येन सह'त्यनेन विहितेति संज्ञिभ्यः संज्ञे भिन्नरूपे । तत्र यथा इगिति यणिति च संज्ञे संव्युपलक्षणे चरितार्थे न कार्यभाजौ अपि तु तत्प्रतिपादिताः संज्ञिनः । **तुल्यरूपसंज्ञिषु**[2] इति । 'स्वं रूपं शब्दस्य' इत्राग्नेरग्निः संज्ञा । नोच्चार्यमाणयोः संज्ञासंज्ञिसंबन्धप्रतिपत्तिः । अपि तु तत्प्रत्यायिनयोः । एवं वक्ष्यमाणोपयोगिना श्लोकानुपातेन निदर्शनेन भेदमाख्याय श्लोकमनुसरति [3]**तत्र** इति । **स्वरूपाधिष्ठानाः** इति । अधिष्ठानमभिधेयम् । तदेव कथयति **स्वेनार्थेन** इति । तन्निबन्धनं संस्कारमनुभूय । [4]**स्वेन रूपेण** इति । तेनाभिधेयेन स्वरूपेण । उपग्रहीतुकामा **उपजिघृक्षन्तः** । यदाह **शब्दान्तरस्वरूपाणि** इति । यतः संज्ञाः संज्ञिरूपमुपाददते तदनुप्रवेशात् संज्ञिरूपस्य । **स्वरानुनासिक्यभिन्नैः** इति । आदैच्छब्दोऽपि न स्वतः संज्ञितामनुभवति,

---

1. ACD अनेनैव प्रत्याभिकैरिति.

2. The Vṛtti has तुल्यरूपसंज्ञेष्वपि संज्ञिषु. Vṛṣabha's reading has not been adopted for the Vṛtti because no Ms. of the Vṛtti has it.

3. WW²L अत्र in the Vṛtti. 4. WW²L स्वरूपेण in the Vṛtti.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वरानुनासिक्यभिन्नैराकारादिभिरादैच्छब्दादिभिः प्रत्यायितैः संबन्धं येन प्रकारेण प्रतिपद्यन्ते, तेनैव प्रकारेण दुरवधारत्वेऽपि भेदस्य ॥ ५९ ॥

अग्निशब्दस्तथैवायमग्निशब्दनिबन्धनः।
अग्निश्रुत्यैति संबन्धमग्निशब्दाभिधेयया ॥ ६० ॥

स्वं रूपं शब्दस्येति संज्ञासंज्ञिनौ भेदेनोपादीयेते। तत्र द्वौ शब्दौ श्रूयमाणौ प्रतिपादकौ, प्रतीयमानावपि द्वावेव संबन्धभाजौ कार्यिणौ। तस्मादग्निशब्दो येनार्थभूतेनाभिन्नरूपेणाग्निशब्देनार्थवान् तमग्निशब्दान्तराभिधेयस्य तुल्यश्रुतेरग्निशब्दस्य संज्ञाभावं प्रतिपादयतीति ॥ ६० ॥

अपि तु प्रति .... घोदात्तादिभिन्नाकारादिद्वारेण। ततश्च वृद्धिशब्देन प्रत्यायितो[यो] वृद्धिशब्दः स संज्ञा। आदैच्छब्देनापि ये प्रत्यायितास्ते संज्ञिनः इति। **येन प्रकारेण** इति। न स्वतः संज्ञासंज्ञिसंबन्धोऽपि तु तत्प्रतिपादितयोः। **दुरवधारत्वेऽपि** इति। ग्राह्यग्राहकशक्तिभेदोपहितो भेदः सन्नपि सारूप्यादविभावित इति ॥ ५९ ॥

अग्निशब्दः इति। योऽयमुच्चार्यतेऽग्निशब्दः [सः] संज्ञा भवतीति। **अग्निशब्दनिबन्धनः** इति। अग्निशब्दो निबन्धनं प्रत्याय्यमस्येति। **अग्निश्रुत्या** इति। यदेतदग्निशब्दस्येति। **अग्निशब्द** इति। अग्निशब्दोऽभिधेयो यस्याः सा अग्निशब्दाभिधेया। एतदाह—अग्निशब्दस्या[ग्नि ?]शब्दः संज्ञा भवतीत्यत्र यावेतावुच्चार्येते नानयोः स्वतः संबन्धः, अपि तु तत्प्रतिपाद्याग्निशब्दद्वयस्य। राज्ञः पुरुष इत्यत्राप्यर्थद्वारक एव संबन्धः।

स्वं रूपं शब्दस्य इति। निमित्तभूतशक्तिभेदे प्रकल्पितनानात्वयोः शब्दरूपयोः षष्ठीप्रथमाभ्यामुपादानम्। तदाह—**भेदेन** इति। तत्र **शब्दस्य** इति। सर्वे शब्दा उपतिष्ठन्ते, अग्निरुदश्विदित्यादयः। तेषां यदात्मीयं रूपं तत्संज्ञा। ततश्चेदं संज्ञासंज्ञिवाक्यं कल्प्यते। अग्नेरग्निः उदश्वित उदश्वित् संज्ञा भवतीति। **श्रूयमाणौ** इति। यावेतावग्निशब्दावग्निशब्दस्य (अग्निशब्दः ?) संज्ञेत्युच्चार्येते तौ। **प्रतिपादकौ**। यतः शब्दद्वयमेतावुपस्थापयतः। **प्रतीयमानौ** इति। यौ ताभ्यामुपस्थाप्येते। स्वं रूपमित्यत्र व्यवस्थितमग्निरग्नेः संज्ञेति। ततः संज्ञोपस्थापितौ संबन्धादिकार्यभाजौ। **अग्निशब्दः** इति। योऽयं संज्ञात्वेन नियुज्यते। **अभिन्नरूपेण** इति। वस्तुतो भेदाभावात्। **तम्** इति। योऽयमुपस्थापितोऽर्थभूतोऽग्निशब्दस्तम्। **संज्ञाभावम्**, संज्ञात्वम्। **प्रतिपादयति**, गमयति। कस्येत्याह '**अग्निशब्दान्तराभिधेयस्य** इति ॥ ६० ॥

---

1. ACD रतिशब्दा°.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यो य उच्चार्यते शब्दो नियतं न स कार्यभाक् ।
अन्यप्रत्यायने शक्तिर्न तस्य प्रतिबध्यते ॥ ६१ ॥

प्रतिज्ञातस्यार्थस्योत्तरस्मिञ्श्लोके हेतुं वक्ष्यति । प्रत्यायको हि परार्थमुच्चारितो यदर्थमुच्चारितः तं कार्येषु नियुङ्क्ते तत्र कार्याण्यासजति । तस्यापि प्रत्याय्यस्य यदा प्रदर्शनार्थं करणसन्निविष्टस्योच्चारणं क्रियते तदा तुल्यरूपमन्यप्रतिपाद्यं शब्दान्तरं प्रति न तस्य प्रत्यायकत्वं प्रतिबध्यते । सर्वस्यैवायमुच्चार्यमाणस्यात्मधर्म इति ॥ ६१ ॥

उच्चरन् परतन्त्रत्वाद्गुणः कार्यैर्न युज्यते ।
तस्मात्तदर्थैः कार्याणां संबन्धः परिकल्प्यते ॥ ६२ ॥

यथैव गामानय दध्यशानेत्यर्थतन्त्रा श्रुतिः क्रियासु साधनत्वं न प्रतिलभते

तदेव द्रढयन्नाह **यो यः** इति । योऽसौ संज्ञासंज्ञिशब्दः प्रत्यायितः (प्रत्यायकः ?) । स कीदृश इति [आह] **उच्चार्यते** [इति] तस्यापि नैव संबन्धः । स तु यमन्यं प्रत्याययति स कार्यभाक् । कुत एतदित्याह **अन्यप्रत्यायने** इति ।

प्रतिज्ञातस्य इति । उच्चार्यमाणो न कार्यभागित्यस्य । **उत्तरस्मिन्** इति । उच्चरन् परतन्त्र(त्वाद्)इत्यत्र । **प्रत्यायकः** इति । सर्वप्रत्यायकधर्म एवायमिति कथयति । यदर्थं प्रत्यायकमुच्चारयति[1] तं प्रत्याय्यमर्थं कार्येषु योजयति । एतदेव व्याचष्टे [2]**तस्मिन् कार्याणि** इति । **प्रत्याय्यस्य** इति । यदासौ प्रत्याय्यः कथयितुमुच्चार्यते । **करणसन्निविष्टस्य** इति । करणसन्निवे[शे ?]न प्रत्याय्यमानाद्भेदमाह । यो हि प्रत्याय्यः स प्रतिपत्तृबुद्धौ निविशते, प्रत्यायकस्तु प्रयोक्तृकरणे, यदभिघाताच्छब्दनिष्पत्तिः । **तुल्यरूपम्** इति । येनार्थेनार्थवत्त्वाद्विभक्तिः । **शब्दान्तरम्** इति । शक्तिप्रकल्पितभेदम् । **सर्वस्यैव** इति । सर्वप्रत्यायकधर्मोऽयमिति ॥ ६१ ॥

परतन्त्रत्वाद् इति । प्रत्याय्यपरतन्त्रत्वात् । अनेनाप्रधान(नतां ?)तन्त्रतामाह । यदत्र पारतन्त्र्येणाप्रधानत्वं तेनाप्यकार्यभाक्त्वम्, गुणत्वात् । यदाह [1]**कार्यैः** इति । **तदर्थैः** इति । तेषामुच्चार्यमाणानां येऽर्थास्तेषां प्राधान्यात् ।

अर्थ[2]**परतन्त्रा** इति । यत एते गवादयः शब्दा अर्थप्रतिपादनाय प्रयुक्तास्तेऽर्थं प्रतिपाद्य चरितार्थत्वान्निवृत्ताः तत्र गुणतामुपगताः असन्निधानान्नयतिक्रियया [न ?]

---

1. WW²L अन्तःकरणस° in the Vṛtti. But Vṛṣabha's text करणसं° agrees more with उच्चारणं which follows in the Vṛtti. See his explanation also.
2. A उच्चरति, C उच्चरि. 3. WW²L तत्र in the Vṛtti. 1. ABCD गुणैः.
2. The Vṛtti has अर्थतन्त्रा. Vṛṣabha's reading may be due to the influence of परतन्त्रत्वात् in the Vṛtti.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तथा शब्दान्तरतन्त्रापि। पारार्थ्यस्याविशिष्टत्वात्। तस्मात् सर्वस्य प्रत्याय्यस्यार्थस्य चक्षुरादिग्राह्यस्य श्रोत्रग्राह्यस्य च क्रियासाधनत्वं विज्ञायते ॥ ६२ ॥

सामान्यमाश्रितं यद् यदुपमानोपमेययोः ।
तस्य तस्योपमानेषु धर्मोऽन्यो व्यतिरिच्यते ॥ ६३ ॥

इहोपमानमुपमेयं तयोश्च साधारणो धर्म इति त्रितयमेतत् सिद्धम्। तत्र ब्राह्मणवदधीते क्षत्रिय इत्युपमेये श्रूयमाणं सामान्यमुपमानेऽपि प्रतीयते। यदा तु ब्राह्मणाध्ययनेन तुल्यं क्षत्रियाध्ययनमित्यध्येतारौ उपमानोपमेयत्वेनो-पादीयेते तदाध्ययनयोराश्रयविशेषभिन्नयोः सौष्ठवादयो धर्माः साधारणत्वेन प्रती-

---

संबध्यन्ते। स्यादेतत्। उभयसन्निधाने कथं शब्दस्य न कार्यसंबन्ध इति। तन्न नास्ति, यतोऽर्थ एव व्याप्यमानत्वात् कर्म, न शब्दः, तत्र चेयं द्वितीयेति। शब्दान्तरतन्त्रा इति। अग्न्यादिशब्दाः शब्दान्तरप्रतिपादने परतन्त्राः [न] कार्यभाजः। अविशिष्टत्वाद् इति। पारार्थ्यस्य हेतोस्तुल्यत्वात्। चक्षुरादिग्राह्यस्य इति अन्यपदार्थ-कविषयोपलक्षणम्। श्रोत्रग्राह्यस्य च इति शब्दपदार्थकविषयस्य ॥ ६२ ॥

अविद्यमानेऽपि वास्तवभेदे यावन्न कल्प्यते भेदस्तावन्न पर्यवस्यतीति दृष्टान्तमाह सामान्यम् इति। साधारणयो धर्मः। यद् यद् इति अनवस्थामाह। तस्य तस्य इति। तस्यापि सामान्यस्य। उपमानेषु इति। उपमितिषु क्रियमाणासु। केन इति सामर्थ्यादपरेण सामान्येनोपमानेन। अन्यः इति। ताभ्यां सामान्याभ्यां भिन्नः साधारणभूतोऽपरो धर्मो व्यतिरिच्यते।

[1]त्रितयमेतद् इति। प्रसिद्धा एवैते पदार्थाः। तत्र सिद्धोऽयं यत्रासौ धर्मो निवेश्यते तदुपमानम्, यत्र निवेश्यते तदुपमेयम्। स च धर्मः साधारणः [इति ?]। उपमेये इति। क्षत्रिये। श्रूयमाणम् इति। अधीते इति। तत्र लकारस्योपदेशः। सामान्यम् इति। अध्ययनम्। उपमाने इति। ब्राह्मणे। प्रतीयते इति। उपमानो-पमेयभावस्य सामान्यनिबन्धनत्वात्, श्रुतत्वाच्चाध्ययनस्य। अध्येतारौ इति। ब्राह्मण-क्षत्रिययोरध्ययनावच्छेदायोपादानम्। तत्र [[2]न ?] तयोरुपमानोपमेयभावः, अपि त्वाश्रयभिन्नयोरध्ययनयोः। यदाह आश्रयविशेषभिन्नयोः इति। सौष्ठवादयः इति। यथा पूर्वत्राध्ययनं साधार[ण] तथाध्ययनयोस्तुल्यताविवक्षायां सौष्ठवं साधारणो धर्मः।

---

1. ACD त्रयमेवैतद्.

2. None of the Mss. has 'न' but it seems to be neede d.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यन्ते। सौष्ठवादीनामप्यध्ययनसंबन्धिनां परिनिष्पत्त्यादयो धर्मा इति नास्ति व्यतिरेकस्यावच्छेदः ॥ ६३ ॥

गुणः प्रकर्षहेतुर्यः स्वातन्त्र्येणोपदिश्यते ।
तस्याश्रिताद् गुणादेव प्रकृष्टत्वं प्रतीयते ॥ ६४ ॥

यावदिदं तदिति प्राधान्येनोपादीयते तद् द्रव्यम्। न च द्रव्यस्य प्रकर्षापकर्षौ स्त इत्याश्रितैर्भेदहेतुभिः परतन्त्रैः संसर्गिभिर्निमित्तैः प्रकर्षे सव्यापारैः प्रचिकीर्षितोऽर्थः प्रकृष्यते। तद्यथा प्रकृष्टः शुक्ल इति शुक्लेन रूपेण सत्यप्युपलक्षणत्वे प्रकर्ष

आदिशब्दान्माधुर्य्यम्। **सौष्ठवादीनाम्** इति। यदा ब्राह्मणाध्ययनसौष्ठवेन तुल्यं क्षत्रियाध्ययनसौष्ठवमिति। **परिनिष्पत्यादयः** इति। आदिशब्दाद् दीप्त्यादयः। एते सौष्ठवादेः साधारणधर्माः। **नास्ति** [इति]। तयोरुपमानचिन्तायामपरो धर्मः साधारणः कल्पयितव्य इति ॥ ६३ ॥

अत्रैवापरं दृष्टान्तं कल्पयति **गुणः** इति। द्रव्यस्य स्वतोऽप्रकृष्यमाणस्य यः प्रकर्षहेतुः। **स्वातन्त्र्येण उपदिश्यते**[1]। **तस्याश्रिताद्** इति। तस्यापि स्वतोद्रव्यभूतस्यान्यो गुणभूतः प्रकर्षहेतुः, तस्यापि द्रव्यविवक्षायामन्य इति।

[2]**यावद्** इति। यत् यस्य द्रव्यस्य व्यवच्छेदकं स्वतश्च निमित्तान्तरेणावच्छेद्यं तद् द्रव्यमिति स्वसिद्धान्तस्थितं द्रव्यलक्षणमाह। न त्वेवं वैशेषिकप्रकल्पितं क्रियावद् गुणवदिति। गुणोऽपि चैवं निरूप्यमाणो [3]द्रव्यतां नातिपतति। [4]**न च** इति। न हि द्रव्यं स्वतोऽन्यविविक्तेन रूपेण निर्धारयितुमपि शक्यते, किमङ्ग प्रकर्षुम्। तद्धि स्वपरिनिष्पन्नमन्यूनानधिकमभेद्यतयैवावस्थितम्। प्रकर्षश्चापेक्षिततया आश्रितगुणनिबन्धनः। यदाह **आश्रितैः** इत्यादि। तत्र **भेदहेतुभिः** इति। ते गुणाः स्वाश्रयं भेद्यत्वेनाधिष्ठितं विशिष्टमाश्रयान्तरान् भिन्दन्ति। तद्धेतुत्वं राज्ञः पुरुष इत्यत्र राजन्यप्यस्तीत्यवच्छिनत्ति **आश्रितैः** इति। न राजा पुरुषमाश्रितः। तदाश्रितत्वं स्वातन्त्र्येणापि विवक्षिते गुणेऽस्ति [इति] शुक्लः पटस्येत्यवच्छिनत्ति **परतन्त्रैः** इति। तत् सर्वं पुरुषेऽप्यस्ति पुरुषस्य स्वामीत्यवच्छिनत्ति **संसर्गिभिः** इति। ये यत्र संसृष्टा एकतामुपगच्छन्तो भेदहेतव इति। तत्र जातावपीदं सर्वमस्ति न च प्रकर्षहेतुरिति व्यवच्छिनत्ति **प्रकर्षे सव्यापारैः** इति। .... तस्या जननमात्रलभ्यायाः प्रकर्षेऽव्यापारः। **प्रचिकीर्षितः** इति। प्रकर्षु-

---

1. ACD व्यपदिश्यते. 2. ACD यावदन्त इति. 3. AC °णोऽप्येतान्नाति°.

4. ABCD. At this point, all the Mss. repeat the commentary on Kā. 26–28 from अभिधेये इति। पश्चिमात्रात्तस्यानगवतेरन्वयव्यतिरेकाभ्यां प्रत्ययस्य सोऽर्थः to यदत्र पूर्वकालवाचिप्रत्यययोऽभिदधातेरुत्पद्यमानः शब्दगतस्याभिधाख्यव्या. See from p. 73, l. 9, to p. 74, l. 27.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रति सव्यापारेण तद्वानप्रकृष्टाश्रयः प्रकृष्टव्यपदेशं लभते। शुक्लतरं रूपमस्येत्र तु रूपस्य द्रव्यत्वेनोपादाने क्रियमाणे रूपाश्रितनिमित्तात् प्रकृष्टव्यपदेशः प्रकल्पते। न च गुणसामान्यं श्वेतसमवायि श्वैत्यमेकत्वाद्भेदहेतुः संभवतीति संसर्गिधर्मान्तराश्रयोऽवान्तरस्यैकस्यापि भेदः परिकल्प्यते। संविज्ञानपदान्तराभावाद्वा भावप्रत्ययैरनिर्देश्याः तुल्यश्रुत्युपगृहीताः शौक्ल्यवदेव रूपाश्रिता विशेषाः प्रकृष्टव्यपदेशहेतवो विज्ञायन्ते। यावच्चेदं तदिति व्यपदेश्यस्य प्राधान्येनाश्रितस्य प्रकृष्टव्यपदेशः क्रियते तावदविच्छिन्नोऽयं निमित्तान्तरपरिकल्पनाधर्मप्रसङ्ग इति ॥ ६४ ॥

मिष्टः (?)। तमुदाहरति **प्रकृष्टः शुक्लः** इति। पटादि(दिद्र ?)व्याभिधायी शुक्लशब्द उपात्तः। **सत्यपि** इति। यद्यप्यत्र द्रव्यस्योपलक्षणार्थं गुणोपादानं तथापि तस्यैव प्रकर्षे व्यापारः, शब्दोपात्तत्वात्। **शुक्लतरं रूपमस्य** इति। यदा आश्रयादपोद्धृत्य स्वातन्त्र्येण विवक्ष्यते तदा विशेषणत्वाभावाद् भेद्यत्वाच्च द्रव्यत्वम्। यदाह **द्रव्यत्वेन** इति। **निमित्ताद्** इति। भास्वरत्वात्। यतो गुणो द्रव्यं न च तस्य स्वतः प्रकर्ष इत्याश्रितो गुणो निमित्तम्। ननु च यथा पटे शुक्लशब्देनाभिधीयमाने शब्दोप-(पात्तो ?) गुणः प्रकर्षहेतुस्तथात्र शुक्लगुणसमवेता जातिः किमिति न प्रकर्षहेतुरित्याह **न च** इति। **एकत्वाद्** इति। सर्वत्र जातेस्तुल्यत्वात्। **संसर्गिधर्मान्तराश्रय** इति। एव .... यन्ते भास्वरादयोऽशब्दार्थाः। शब्दार्थस्तु जातिः। तद्वरं सैव केनचिदेकार्थसमवायिना भास्वरादिना धर्मान्तरेणाभिन्न .... स्वाश्रयं प्रकर्ष[5]यति। यथा सम्पन्नो व्रीहिरिति जातेस्तद्रूपत्वेऽप्याश्रयनिबन्धनो व्यपदेश इति जातेरपि शब्दार्थत्वेऽवश्यं भास्वरादयोऽशब्दार्थास्तस्या भेदहेतवोऽङ्गीकर्तव्याः, तन्निबन्धनश्च जातिभेद इति बहु कल्प्यम्। तद्वरमेव भास्वरादयो भेदहेतव इति कथनायाह **संविज्ञानपदान्तराभावाद्वा** इति। न हि तेषां किंचित् संविज्ञानपदं भास्वरादिशब्दवदिहास्ति। तत्रैतत् स्यात्। यथा द्रव्याभिधायिनः शुक्लशब्दा[द् ?]भावप्रत्ययाः प्रकर्षहेतुं गुणमभिदधते तथा गुणाभिधायिनोऽपि भावप्रत्ययाः प्रकर्षहेतुं भास्वरादिकं गुणमभिदधतीत्याशङ्क्यमान आह **भावप्रत्ययैः** इति। प्रवृत्तिनिमित्ते हि भावप्रत्ययाः स्मर्यन्ते, न प्रकर्षहेतौ। [6]**तुल्यश्रुत्युपगृहीताः** इति सामान्यरूपेण भास्वरादीनां शुक्लशब्देनाभिधानमाह। विशेषरूपेण संविज्ञानपदत्वम्। शुक्लविशेषा हि भास्वरादयः, ते तुल्यतया शुक्लश्रुत्या गृहीताः क्रोडीकृता अनियतसन्निधय आक्षिप्यन्ते। तदनेन शब्दोपादानत्वमप्यस्तीति कथितम्। **शौक्ल्यवदेव** इति। यथा शुक्लो गुणः स्वस्याश्रयस्य तथा भास्वरादयोऽपीति। **यावच्च** इति। तेऽपि भास्वरादयो द्रव्यतामापन्ना यदा प्रकृष्टा विवक्ष्यन्ते 'रूप[म ?]स्य भास्वरतरम्' इति। **तावद्** इति। तस्यापरो धर्मः, स्तस्याप्यन्य इत्यनवस्था ॥ ६४ ॥

---

5. AD प्रकर्षयन्ति, 6. L श्रुत्युपगृहीताः

Dr. Urmila Sharma Collection, Varanasi

एवं च कृत्वोच्चार्यमाणस्य

तस्याभिधेयभावेन यः शब्दः समवस्थितः ।
तस्याप्युच्चारणे रूपमन्यत्तस्माद्विविच्यते ॥ ६५ ॥

हेतुदृष्टान्ताभ्यां व्यतिरेकव्यवस्थानिदर्शनं कृत्वा यथाप्रकृतं स्वरूपमेव पुनरनुसंह्रियते। तस्याभिधेयभूतस्य यदा यदा निदर्शनार्थमुच्चारणं प्रक्रम्यते तदा तदा सर्वस्यैवोच्चार्यमाणस्यैवंधर्मत्वात्तस्यापि निबन्धनभूतं रूपान्तरमन्यद्विविच्यते। केचिदाहुरभिधानमावर्तते तदेव त्वभिधेयत्वान्न प्रच्यवते। एवं हि संग्रहे उक्तम्

"न हि स्वरूपं शब्दानां गोपिण्डादिवत् करणे संनिविशते। तत्तु नित्यमभिधेयमेवाभिधानसंनिवेशे सति तुल्यरूपत्वादसंनिविष्टमपि समुच्चार्यमाणत्वेनावसीयते"

तस्य इति। उच्चार्यमाणस्य। अभिधेयभावेन। प्रत्याय्यत्वेन। तस्यापि इति। यदैवंरूपोऽस्य प्रत्याय्य इति तमुच्चारयति। अन्यद् इति। अपरं। तस्यापि प्रत्याय्यम्। [1]विविच्यते। विभागेनावतिष्ठते[2]।

[3]हेतुदृष्टान्ताभ्याम् इति। नायमपूर्वः पक्षः। परतन्त्रत्वादिति हेतुः (का. ६२.)। सामान्यमाश्रितम् (का. ६३.) गुणः प्रकर्षहेतुर्यः (का. ६४.) इति दृष्टान्तः। तस्य इत्यनेनोपसंहारः। उपनयप्रदर्शनमेतदिति। तस्याभिधेयभूतस्य इति। यदा यदाभिधेयरूपप्रदर्शनाय प्रयुज्यते तदा तदास्य प्रत्याय्यत्वम्। [4]निबन्धनभूतमिति। निबन्धनं तदेव हि स्वाभिधायकं प्रयुङ्क्त इति प्रवृत्तिकारणत्वान्निबन्धनम्[5]। विविच्यते पृथग्भवति। केचिदाहुः इति। प्रत्याय्यमानस्योच्चारणमेव नास्तीत्याह। आवर्तते इति। कीदृशोऽसौ प्रत्याय्य इति प्रत्याय्यघटादयः पृष्टाः प्रत्यायकेन शब्दान्तरेण कथ्यन्ते। तथा चासावपि [6]प्रत्याय्यते। न चान्यस्तस्य वाचक इति स एव चावर्तते। अत एव चानुकरणशब्दात् संज्ञाशब्दस्य विशेषः स्पष्टो भवति। केचिदुच्चार्यमाणेऽभिधेयमनुकरणम्, संज्ञायास्तु प्रत्याय्यमेवाभिधेयं नोच्चार्यमाणमिति। तदेव तु इति। नाभिधेयमभिधेयात्मतां विहायाभिधायकं भवति। [7]यतः प्रतिपादका उच्चारयन्तस्तदेव प्रत्याययन्ति। स्वरूपम् इति। प्रत्याय्यम्। गोपिण्डादिवद् इति। आदिग्रहणाज् जातिः। यथा जातिद्रव्ये प्रत्याय्ये तथा स्वरूपम्। [8]करणे इति

---

1. ACD विविच्यन्ते. 2. ACD °तिष्ठन्ते. 3. ACD हेतुदृष्टाभ्याम्.
4. ACD अन्यनिबन्धन°. 5. ACD ins. प्रतिबन्धनं after निबन्धनम्.
6. B ins. शब्दान्तरेण before प्रत्याय्यते.
7. ACD ins. स after यतः. 8. ACD कारण.

CC0. In Public Domain, Digitizagtion by eGangotri

इति ॥ ६५ ॥

प्राक्संज्ञिनाभिसंबन्धात् संज्ञा रूपपदार्थिका ।
षष्ठ्याश्च प्रथमायाश्च निमित्तत्वाय कल्पते ॥ ६६ ॥

अभिधेयान्तरप्रविवेकेऽप्यभिधानस्य स्वरूपेणाप्रविवेकं दर्शयति। स्वरूपाधिष्ठानं चोपसर्जनीभूतस्वरूपार्थः शब्दोऽर्थान्तरे वर्तते। यावत्संज्ञिना तु संज्ञा न संबद्धा तावन्न संज्ञिपदार्थिकेत्यर्थान्तराभावे तस्याः प्रातिपदिकसंज्ञाभावाद्विभक्तियोगो न स्यात्। वाचकानां च व्यतिरेकहेतुत्वात् संबन्धिनि शब्दान्तरे प्रातिपदिकार्थव्यतिरेको न प्रकल्पते ॥ ६६ ॥

उच्चार्यमाणतां प्रतिषेधति। जात्यादिवत् प्रत्याय्यत्वान्नोच्चार्यते स्वरूपम् इति। कथं तर्हि तदेवोच्चारितं यत् पृथभित्येकत्वावसाय इत्याह। तत् तु इति। स्वरूपम्। अभिधानसन्निवेशे इति। यत्तदभिधायकं तत्करणं सन्निविशते, स्वरूपं त्वसन्निविष्टमपि सारूप्यात् तथावसीयत इति ॥ ६५ ॥

भेदकार्येषु हेतुत्वं गच्छतीत्युक्तम्। तद्दर्शयन्नाह प्राक् संज्ञिना इति। यावत् संज्ञा संज्ञिनि स्वरूपं नार्पयति। रूपपदार्थिका इति। या(ता ?)वत् स्वरूपमेव प्रकाशयति। षष्ठ्याश्च इति कार्यमाचष्टे।

अभिधेय इति। स्वरूपादन्यो बाह्यो देवदत्तादिरभिधेयान्तरं तस्य [1]प्रविवेकः तेन शून्यता। यद्वैकपिण्डत्यागेन पिण्डान्तरेऽपि प्रवृत्तेः प्रविवेकः। स्वरूपेण त्वशून्यता। तदाह [स्वरूपेणाप्रविवेकम् इति ?] नित्यस्वरूपसंबन्धो बाह्यार्थमभिधत्ते, तदा स्वरूपं नाभिधत्ते इति कथिते न नित्यसंबन्ध इत्याह स्वरूपाधिष्ठानं च इति। स्वरूपमधिष्ठानं प्रत्याय्यमस्येति। उपसर्जनीभूत इति। उपसर्जनीकृत्य स्वरूपं तदुपलक्षितमेव बाह्यार्थमाह, यतः स्वरूपमभिधायैव बाह्यार्थे वर्तते। केवलं गुणता स्वरूपस्येति। यावद् इति। [2]संज्ञासंज्ञिसंबन्धव्युत्पत्तिकाले 'अयं पनसः' इति। न हि संज्ञायास्तदा सोऽर्थः। यदि स्वरूपमपि न प्रतिपादयेदर्थवन्निबन्धना प्रातिपदिकसंज्ञा न स्यात्। तदभावादर्थाभावाच्च प्रातिपदिकार्थनिबन्धना प्रथमा न स्यात्। वाचकानां च इति। नानर्थका संबन्धिनी व्यतिरेकमुपजनयति। भय .... विजि षष्ठी प्रथमे ॥ ६६ ॥

---

1. ACD प्रविवेकात्.   2. ACD संज्ञिसंबन्धि व्यु°.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्रार्थवत्त्वात् प्रथमा संज्ञाशब्दाद्विधीयते।
अस्येति व्यतिरेकश्च तदर्थादेव जायते ॥ ६७ ॥

स्वरूपाध्यारोपचिकीर्षायां बाह्येष्वर्थात्मसु शब्दार्थानां स्वरूपेणाधिष्ठानभूतेनार्थवत्त्वात् प्रथमा विधीयते। सोऽयमिति च संज्ञिना शक्त्यवच्छेदलक्षणः संबन्धो नियम्यते। तद्यथा गौर्वाहीकः, सिंहो माणवक इति। प्रातिपदिकार्थव्यतिरेकः षष्ठीप्रवृत्तिहेतुः स्वरूपाभिधेयेनार्थवता तद्वतां संज्ञाशब्देन योगात् संज्ञिशब्दानामुप-

[1]अनयोर्विषयविभागमाह **तत्रार्थवत्त्वात्** इति। वृद्धिरिति संज्ञाशब्दात् प्रथमा। आदैचामिति व्यतिरेकः **तदर्थादेव** इति।

स्वरूपाध्यारोप इति। अयं देवदत्त इति शब्दरूपं यदा तस्मिन् संज्ञिनि निवेशयितुमिच्छति। **बाह्येषु** इति। स्वरूपव्यतिरेकेषु। **अधिष्ठानभूतेन** इति। अभिधेयरूपेण। तदेतेनानित्यपक्षे[2]ऽप्यनित्यसंबन्धवादिना यदृच्छाशब्देष्वभेदलक्षणः संबन्धोऽङ्गीकृत इति। नित्यपक्षेऽपि व्यापित्वात् स एव सर्वत्र। यदाह **सोऽयम्** इति। **शक्त्यवच्छेदलक्षणः** इति। अनित्यसंबन्धपक्षे संज्ञाशब्दानामविद्यमानप्रत्यायनशक्तीनामेव संज्ञासंज्ञिसंबन्धव्युत्पत्तिवाक्येनाभिधीयते शक्तिः। सा च व्यवच्छिन्ना व्यावृत्तेवाभिधीयते। तत्र च निमित्तं स्वरूपम्। तच्च यद्यपि क्वचिद् दृष्टमिति नियमानुपपत्तिः। किंस्वभाव इत्याह **शक्त्यवच्छेदलक्षणः** [इति]। स पुरुषस्तां शक्तिं तद्विषयतया नियच्छति। प्रत्यया(त्याय्या?)र्थप्रतिपादिका [न] बह्वयोऽसङ्कीर्णाः शक्तयः। तत्र पुरुषस्तदन्याः शक्तीरवच्छिद्यैकां शक्तिं व्यवहार्यतां नयतीति नियमः। अर्थान्तरप्रतिपादनशक्तिं वापास्य तद्विषयैव शक्तिः प्रबोध्यत इति। नियमश्चार्थान्तरेभ्यो व्यावर्तनात्। सोऽयमीदृशो नियमः। **स्वरूपेणैवाधिष्ठानभूतेन** इति। **गौर्वाहीकः** इति शक्त्यवच्छेद उदाहरणम्। शक्तिर्वा नियम्यते। सर्वथा संबन्धव्युत्पादनवाक्यम्। एकस्य गौरित्येषा संज्ञा। गामध्यापयेदिति संव्यवहारार्थमिति दृष्टान्तो वा। यदा सर्वे शब्दा गुणसमुदाये वर्तन्ते इति पक्षः तदायं गोशब्दः सर्वान् जात्यादीनाह। तत्र यदा वाहीकशब्देन शक्त्यवच्छेदे जात्यादिनिवृत्त्या विशिष्टार्थाभिधायित्वं गोशब्दस्य तदा पुरुषेण संज्ञाशब्दानां शक्त्यवच्छेद इति। **स्वरूपाभिधेयेन** इति। स्वरूपमभिधेयं यस्य तेन संज्ञाशब्देन। **योगात्** व्यतिरेकः उपजायते इति संबन्धः। [3]**तद्वता** इति। यतोऽस्माद् व्युत्पत्तिकाले अयं देवदत्तोऽस्य वा देवदत्त इति व्यपदेशो नानर्थको भवति। न च तदान्योऽर्थः। तस्मात्स्वरूपमर्थः। स च सदा सन्निहितत्वान्नित्यः। तत्र यदि बाह्ये-

1. L अनयोर्विभक्त्योर्विषयमाह. 2. ACD °नाति व्यपेक्षे. 3. ACD तद्वतीति.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जायते। एवं ह्याह—

"अर्थवता व्यपदेशः सोऽयं तस्येति वा यतो भवति।
नानर्थकेन तस्मान्नित्यः शब्दार्थसंबन्धः॥" इति॥ ६७॥

स्वं रूपमिति कैश्चित्तु व्यक्तिः संज्ञोपदिश्यते।
जातेः कार्याणि संसृष्टा जातिस्तु प्रतिपद्यते॥ ६८॥
संज्ञिनीं व्यक्तिमिच्छन्ति सूत्रे ग्राह्यामथापरे।
जातिप्रत्यायिता व्यक्तिः प्रदेशेषूपतिष्ठते॥ ६९॥

इह केचिद् वृत्तिकाराः पठन्ति

"स्वं रूपं शब्दस्य ग्राहकं भवति द्योतकं प्रत्यायकम्"

व्यर्थेष्वाधीयन्ते तथा (दा?) नित्येन संबन्धेन संबद्धाः। स्वरूपात्तु परि .... नित्यता संबन्धस्येति। ये त्वत्र हेतोः पररूपार्थत्वेन व्यर्थे स्वार्थविपर्ययसाधनेन विरुद्धतामुद्भावयन्ति तेषां व्युत्पत्तिकाले पररूपार्थत्वं प्रतीत्यैव बाध्यत इति विरुद्धता। न हि तस्मिन् काले पररूपार्थत्वं प्रतीयते। अथवा ये (यो?)

"मृजेर्वृद्धिः
सिचि वृद्धिः"

इत्यादौ वृद्धिशब्दः सोऽस्य वृद्धिशब्दस्यार्थः। प्रदेशेष्वादेशपदार्थयोरन्यतरपदार्थकः। ऐकरूप्यात्तु तत्त्वव्यवसायात् स्वरूपपदार्थकत्वम्। वस्तुतस्तु तत्पदार्थकत्वात् पररूपार्थक एवेति सिद्धसाध्यता॥ ६७॥

एवं शक्तिभेदकल्पनया सूत्रार्थं वर्णयित्वा जातिव्यक्तिभेदेनान्यथा व्याचष्टे स्वं रूपम् इति। व्यक्तिः संज्ञा। कस्य संज्ञिन इत्याह जातेः इति। तेन [1]शब्देन जातिरुपात्ता। ननु च जातिः प्रदेशेषु प्रतिपादिताप्यसमर्था कार्याणि प्रतिपत्तुमित्याह कार्याणि इति। संसृष्टा, व्यक्त्युपगृहीता। जातिः, कार्याणि प्रतिपद्यते। यथा जातौ शब्देन चोदितो सा(चोदितायामपि?)तत्संबद्धायां व्यक्तावेव कार्याणि क्रियन्ते। यतोऽयं.... लो यो जातेः कार्यसंबन्धस्य संज्ञिनि निमित्त[2]विपक्षेऽस्मिन् न .... तिविवक्षे स्वरूपमित्येतद् व्यक्तावेव वर्तते केवलम्। सा व्यक्तिं संज्ञिनि शब्दस्येति। जातेः सा त्वर्थसंज्ञा। यदाह जातिप्रत्यायिता इति। अग्निशब्दे या जातिः सा संज्ञा, व्यक्तिस्तु संज्ञिनीति।

इह केचिद् इति। प्रथमश्लोके स्वं रूपमिति व्यक्तिः, सा च संज्ञा। शब्दस्य

---

1. L शब्दशब्देन. 2. ACD om. विपक्षे.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति। अपरे तु

"स्वं रूपं शब्दस्य ग्राह्यं द्योत्यं प्रत्याय्यम्"

इति। तदनेन श्लोकद्वयेनोपन्यस्तम्। जातावपि द्वयी प्रतिपत्तिराचार्याणाम्। केचिदाहुः—प्रतिनियतस्वरूपभेदा व्यक्तयः। न ह्यसंवेद्यमव्यपदेश्यमविद्यमानं वा व्यक्तीनां स्वरूपम्। व्यक्तिरेव हि गौर्नाकृतिः। गुण एव हि नीलो न हि गुणसामान्यं नीलत्वं नीलम् इति। आकृतेस्त्वकृतसमवायानामपि स एवायमिति बुद्ध्यनुवृत्तौ भेदवत्स्वर्थेषु निमित्तत्वम्। एतद्धि तस्याः सत्तायामनुमानम्।

इति जातेः। संज्ञा संज्ञिनि (सा च संज्ञिनी ?)। ततश्चायं वृत्तिग्रन्थः—स्वं रूपं शब्दस्य ग्राहकम् इति। द्वितीये स्वं रूपमिति व्यक्तिरेव केवलं संज्ञिनी। शब्दस्येति जातिमेवम् (जातेरेव ?)। सा तु संज्ञा। ततोऽयं वृत्तिग्रन्थः—स्वं रूपं शब्दस्य ग्राह्यम् इति। यदाह तदनेन इति। [3]द्वयी इति। [4]'सोपादानानुपादानाभ्याम्[5]'। केचिन्मन्यन्ते शब्दा व्यक्ति[6]मेव प्रतिपादयन्तीति। अन्ये तु शब्दप्रतिपाद्यां जातिमाहुः। प्रथमं पक्षमाश्रित्याह प्रतिनियत इति। प्रतिनियतः स्वरूपभेद आसामिति। यथा जातयः स्वत एव जात्यन्तरेभ्यो व्यावृत्तास्तथा गोव्यक्तयः कर्मादिव्यक्तिभ्यः प्रतिनियतभेदाः। तेन विनैव जातिं गोशब्दः तासु, न कर्मादिव्यक्तिषु। तत्रैतत् स्यात्—वस्तुमात्रतया सम्प्रमुग्धत्वात् न जात्युपरागमन्तरेण गवादिभेदोऽवसीयते इत्याह न ह्यसंवेद्यम् इति। स्वत एव व्यावृत्तेन निरूपणक्षमम्। संवेद्यमानमपि न शब्दविषयतां प्रतिपद्यत इत्याह [7]अव्यपदेश्यम् इति। स्यात् कल्पनारचितं संवेद्यत्वं व्यपदेश्यत्वं वेत्याह [8]अविद्यमानं वा इति। वस्तुभूतमेव तदित्याह। तदेव द्रढयति व्यक्तिरेव हि इति। न गोत्वयोगाद्[9] गोव्यक्तिर्गौः, किन्तु स्वत एव। द्रव्यं निरूप्य गुणमाह गुण एव इति। न नीलो गुणो नीलत्वयोगात्तथा। यदि तर्हि गौर्नाभिधीयते अभिन्नशब्दप्रवृत्तित्वावसीयमानसत्त्वा[10] शब्दविषयावच्छेदिका सा भिन्ना नास्त्येवेत्याह [11]आकृतेस्तु इति। स एवायमिति योऽयं भिन्नास्वभिन्नप्रत्ययः स एव तस्याः सत्त्वे प्रमाणम्। तत्रैतत् स्याद्—विनापि [12]जातिसमवायादेकशब्दारोपेण प्रत्ययानुवृत्तिः यथा प्रत्ययो द्रव्यगुणकर्मस्वित्याह अकृतसमवायानाम् इति। भेदवत्सु इति। गोव्यक्तिषु। अभिन्नाकारप्रत्ययविषयत्वात्

---

3. ACD पीडीति, B विधीति.
4. AD शवापादा°, C गगेपादा°.
5. B °भुवादाभ्याम्.
6. AD शक्तिमेव, BC शब्दशक्तिमेव.
7. ACD व्यपदेश्यमिति.
8. ACD विद्यमानं वेति.
9. ACD न गोत्वयोगोर्व्यक्तिः.
10. ACD °ससत्वा.
11. ACD कृतेस्तु.
12. ACD °तिसमुदायाद्.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अन्ये तु मन्यन्ते—जातौ प्रतिलब्धस्वरूपाः शब्दास्तद्रूपतयैव व्यक्तिमव्यपदेश्यस्वरूपां प्रत्याययन्ति। सर्वत्रैव हि निमित्तान्निमित्तवत्यर्थे निमित्तस्वरूपः प्रत्यय उत्पद्यते। तत्र हि भेदेन दृष्टाभिधानान्यदृष्टाभिधानानि च निमित्तानि शब्दप्रत्ययावेकदेशसारूप्येणात्यन्तसारूप्येण च प्रवर्तयन्ति। तथा च स्वं रूपमिति जातिरेव कैश्चित् प्रतिज्ञायते। शब्दस्येति तु शब्दशब्देन व्यक्तिर्व्यपदिश्यते। केषांचित्तु

कल्पनाय सामान्यं प्रकल्प्यते। **एतद्धि** इति। न शब्दात्, अपि तु बुद्धिरेवाकृतसमवायानामपि तावत्। **जातौ** इति। जातिसहार्थ(शब्दार्थ ?)पक्षे जातिः प्रयोजिका शब्दानामिति तत एव आत्मलाभः। यदाह **प्रतिलब्धस्वरूपाः** इति। **तद्रूपतयैव** इति। जातिरूपोपरक्ता व्यक्तयो जातिरूपतामापादिता अभिधीयन्ते। **अव्यपदेश्य** इति। स्वरूपं व्यक्तीनां व्यपदेष्टुमशक्यम्। तस्य व्यपदेश्यत्वे जातियोगकल्पनावैयर्थ्यम्। तत्रैतत् स्यात्—यद्यव्यपदेश्यं स्वरूपं व्यक्तीनां ताश्च जातेर्व्यावृत्ति(त्त ?)स्वभावा एवेति कथं जात्यभिधानपूर्वकं तासामभिधानमित्याह **सर्वत्रैव** इति। यद्यप्यन्या जातेर्व्यक्तयस्तथापि जात्यानुरज्यन्ते। तदनुरागाच्च जातिस्वरूपप्रत्यय उपपद्यते। **दृष्टाभिधानानि** इति। दृष्टमभिधानं येषां निमित्तानां यथा गोत्वादीनि। गोशब्दादयो हि तेषामभिधातारः[13]। **अदृष्टाभिधानानि**। उत्पलगन्धादीनि। न ह्युत्पलगन्धशब्दस्तदाह। संबन्धावच्छिन्नसंबन्ध्यभिधानात्। अथैतत् स्यात्—नैवास्त्युत्पलगन्धत्वम्, उत्पलजातिरेवैका एकाश्रयसमवायाद् गन्धस्यावच्छेदिका इति। एतच्च न। यस्माद् दृष्टोत्पलद्रव्यस्यासकृद् गन्धमात्रदर्शनेऽपि स एवायमिति प्रत्यायनवृत्तिर्भवति। न च तदा जातेरवच्छेदकत्वम्, तया सहास्याननुभूतत्वात्। अथवा राजपुरुषादावदृष्टाभिधानः संबन्धो निमित्तम्। **एकदेशसारूप्येण** इति। [14]प्राणीति शब्दप्रयोगो वाक्कायव्यापारमात्रदर्शनात् प्रवर्तते। **अत्यन्तसारूप्येण**। यथा गौरिति शब्दप्रत्ययौ भूयोऽवयवसन्निवेशतुल्यत्वेन। तत्र दृष्टाभिधानेषु त्रयमनुवर्तते, जातिः शब्दः प्रत्यय इति। अदृष्टाभिधानेषु द्वयम्। जातिर्बुद्धिश्चेति। तदेवं जातिव्यक्त्योर्व्यतिरेकं प्रतिपाद्य स्वं रूपमित्येतन्निबन्धनं संज्ञासंज्ञिभेदमन्यथा व्युत्पादयति **जातिरेव** इति। **स्वं रूपम्** इत्यनेन जातिः संज्ञा। **शब्दस्य** इत्यनेन व्यक्तिः संज्ञिनीति। ततः स्वं रूपं ग्राहकमिति द्वितीयकारिकोपात्तोऽर्थः। **विपर्ययेण** इति। स्वरूपशब्देन व्यक्तिः संज्ञोपात्ता, शब्दशब्देन जातिः संज्ञिनी। ततश्च स्वं रूपं ग्राहकमिति प्रथमकारिकोपात्तोऽर्थः। तेन स्वं रूपं ग्राहक-

---

13. ACDL °मभिधाः. 14. ABCD प्राणिनि.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विपर्ययेणायं व्यपदेशः। तत्र जातेर्व्यक्तिः संज्ञा व्यक्तेर्वा जातिः। सा च प्रदेशेषूच्चरिता व्यक्तिं कार्ययोगेन प्रत्याययति। सा च जातिरसंसृष्टा व्यक्त्या नोच्चरति। व्यक्तिरप्यसंसृष्टा जात्या प्रयोगविषयं नावतरति। तात्पर्येण तु विवक्षा भिद्यते। किंचिदत्र प्रधानं किंचिन्नान्तरीयकमिति। तच्च प्रतिज्ञाभेदमात्रम्। जातिः शास्त्रे कार्ययोगिनी संचिकीर्षिता व्यक्तिः शास्त्रे कार्ययोगिनी संचिकीर्षितेति।

स्वं रूपं शब्दस्येति बहुविकल्पो वैयाकरणाधिकरणेष्वागमः। तद्यथा। रूपमात्रमेकदेशोऽर्थवतो रूपार्थसमुदायस्य सामान्यविशेषादिशक्तियुक्तस्य शब्दस्य

मित्ययमेव द्विधा व्याख्यातः। तत्र जातौ संज्ञायां प्रथमो विकल्पः। सापि न केवलोच्चारयितुं शक्येति संसृष्टोच्चार्यते। यामपि व्यक्तिः (क्तिं ?) प्रतिपादयति तस्यामपि जातिरस्त्येव। यदा व्यक्तिः संज्ञा तदा द्वितीयो विकल्पः। तदा व्यक्तिं संज्ञात्वेनोच्चारयन्तो जातिसंसृष्टामेवोच्चारयन्ति। या तु जातिं प्रतिपादयति सा व्यक्तिद्वारेण कार्ययोगिनीत्युभयत्रोभयानुषङ्गः। यदाह **सा च प्रदेशेषूच्चारिता** इत्यादि। यदि तर्हि जातिव्यक्त्योः परस्पराविनाभावेन वृत्तिः, किंकृतः पक्षभेद इत्याह **तात्पर्येण तु** इति। जातौ विवक्षितायां नान्तरीयका व्यक्तिरित्युच्यते, जातिः प्रधानमिति। व्यक्तौ विवक्षितायां जातिर्नान्तरीयका, व्यक्तिः प्रधानमिति। तथा सरूपसूत्र उक्तम्

'[न हि] आकृतिपदार्थकस्य द्रव्यं न पदार्थः'

(M. Bhā. on P. 1.2.64.)

इत्यादि। ननु सर्वत्र क्रियैकविषयैव पक्षद्वयेऽपीत्याह **प्रतिज्ञाभेदमात्रम्** इति। न वस्तुतो भेद इति। यद्यपि जातिव्यक्तिसंसर्गे तत् कार्यं क्रियते, किन्तु जातिः संस्कर्तुमिष्टा, नान्तरीयको व्यक्तिसंस्कारः, व्यक्तिर्वा संस्कर्तुमिष्टा, तद्द्वारको जातिसंस्कार इत्युभयमुभयत्र संस्क्रियते। **बहुविकल्पः** इति। अन्येऽपि दर्शनभेदाः सन्तीति। **वैयाकरणाधिकरणेषु** इति। वैयाकरणसिद्धान्तेषु। **रूपमात्रम्** इति। श्रुतिमात्रम्। यदेतत् स्वं रूपमित्युपात्तं तत् संज्ञा। तच्चैकदेशः। [15]कस्येत्याह **रूपार्थसमुदायस्य** इति। इह शब्द उच्चारिते रूपपदार्थौ हीयमानः शब्दस्य स्वं[16] भवति। एतच्च स्वरूपग्रहणस्य प्रयोजनमुक्तम्—'स्वं शब्दस्य' इत्युच्यमानेऽर्थोऽपि शब्दस्य स्वमिति। **अर्थवतः** इति। तस्य स्वरूपार्थसमुदायस्यार्थ एकदेशभूतः। तेन तद्वान् समुदाय उच्यते, अर्थवानिति। न च पुरुषार्थमात्रमपि तु **सामान्यविशेषादिशक्तियुक्तस्य** इति। याः काश्चन संसर्गिण्यः सामान्यविशेषादिशक्तयः तत्र समुदाये तस्यानेकसामान्यादिशक्तियोगात्। आदिग्रहणात् कारकशक्तयः। अथवा सामान्यं शब्दत्वं विशेषो गोशब्दत्वम्। एवमर्थोऽपि।

---

15. ACD तस्ये°. 16. C स्वं रूपं भ°.

Dr. Urmila Sharma Collection, Varanasi

शब्दत्वेनाश्रितस्य संज्ञा। रूपवान् वा संसर्गिणीभिः शक्तिभिर्भिन्नः सार्थकः समुदायः श्रुतिमात्रस्य ग्राहकः। मात्राकलापो हि शब्दः। तदेकदेशाः स्वरूपादयो मात्राः। मात्राभिश्च मात्रावतामप्यस्ति भेदव्यपदेशव्यवहारः वार्क्षी शाखेति यथा।

अपर आह—यद्यपि वस्तु न भिन्नं शब्दार्थस्तु भिन्नः। शब्दो ह्येकवस्तुविषयाणामपि शक्तीनामवच्छेदेनोपग्रहे वर्तते। तद्यथा। अयं दण्ड इति प्रत्यक्षरूपतया तदेव वस्तु सर्वनाम्नाभिधीयते, नोपलभ्यमानेनापि दण्डजातियोगेन। दण्ड-

---

आदिग्रहणात् प्रमेयत्वादयः। शक्तिशब्देन कारकशक्तय इति। **शब्दत्वेन** इति। स्वं रूपं शब्दस्य इत्यनेन शब्दशब्देन। एतदाह—अग्निशब्दस्य सामान्यविशेषादिशक्तिरूपार्थत्रत एकदेशो रूपमात्रं संज्ञा। ततश्चायं पक्षः स्वं रूपं ग्राहकमिति। **रूपवान् वा** इति। य एव पूर्वत्र समुदायः सञ्ज्ञी सोऽत्र संज्ञा, तस्यैकदेशो रूपमिति रूपवान् समुदायः स [17]इहार्थेन। **संसर्गिणीभिः** इति। पूर्वसामान्यादिशक्तिभिः। **भिन्नः** इति। विशिष्टः। कस्य संज्ञेत्याह **श्रुतिमात्रस्य** इति। स्वरूपस्यैकदेशस्य। **ग्राहकः** इति। संज्ञा। ततश्चायं पक्षः स्वं रूपं ग्राह्यमिति। तदेवं पक्षद्वयेऽपि समुदायैकदेशभेदात् संज्ञासंज्ञिभेद इति व्युत्पादयति **मात्राकलापोऽपि हि** इति। मात्रा अवयवाः। स्वरूपार्थौ .... ततश्च सामान्यशक्तयः। एतासां कालाः (कलापः ?)। **स्वरूपादयः** इति। स्वरूपं जातिर्द्रव्यमित्यादि। **वार्क्षी शाखा** इति। यदा शाखासमुदायमात्रं वृक्षस्तस्यैकदेशः शाखा। [18]यदाप्यवयवेभ्यो व्यतिरिक्तोऽवयवी, समुदायस्तत्र भेदतिरोधायक [19]इति भेदसमाश्रयेण व्यपदेशः। न [20]ह्यन्यत्वे गौर्वृक्षस्यावयवः। सत्यन्यत्वे कारणत्वादवयवव्यपदेश इति चेन्न। सत्यपि कारणत्वे न बीजमङ्कुरस्यावयवः। आरम्भकत्वाद्वा तथा व्यपदेशः। **वस्तु न भिन्नम्** इति। न श्रोत्रग्राह्याद् वस्तुनो द्रव्यरूपं भिनत्ति। स्वरूप शब्दा .... र्था .... शब्दस्य कथमभिन्नेऽर्थे भेदनिबन्धनो भिन्नशब्दोपनिपात इत्याह **शब्दो हि** इति। एकस्मिन्नपि वस्तुनि निमित्तभेदान्नानाशब्दप्रवृत्तिः। यदाह **शक्तीनाम्** इति। तर्हि शक्तय एव वस्तुविषयाः परस्परव्यावृत्तरूपाः। तत्रैकस्मिन्नपि वस्तुन्येकः शब्दोऽन्यशक्त्यसंस्पर्शेऽनेकशक्तिप्रयोगे न (शेनैकशक्तियोगेन ?) प्रवर्तते। तथा परशक्त्यसंस्पर्शेनापरः। यदाह **अवच्छेदेन** इति। व्यावृत्तेन रूपेण। **उपग्रहे** इति स्वीकारे[21]। **अयं दण्डः** इति। अयंशब्दः प्रत्यक्षासन्नवचनो दण्डजात्याश्रयसमवेतं प्रत्यक्षासन्नत्वं त .... ति। संबद्धा(तज्जातिसंबन्धा ?)संस्पर्शेनैवाह। यदा (ह ?)

---

17. ACD सहार्थेन. 18. L यदप्यवयवेभ्योऽव्य°. 19. ABD इत्यभेद°.
20. ACD न ह्यन्यत्वे गोवृ°. 21. CD स्वीकारः.

CC0. In Public Domain, Digitizagtion by eGangotri

जातियोगाभिधाने हि तस्यासामर्थ्यं सर्वनाम्नः। दण्डशब्दस्य च विशिष्टजातीयार्थाभिधायिनः प्रत्यक्षत्वेऽपि सति तस्य वस्तुनः प्रत्यक्षरूपतया प्रत्यायने प्रतिबध्यते शक्तिः। तथा स्वं रूपमित्यनेनाग्न्यादिश्रुतयः सत्यपि शब्दजातियोगेऽग्न्यादिरूपतयैव प्रत्याय्यन्ते। न[22] शब्दजातियोगित्वेन। शब्दशब्देन तु शब्दजातियोगित्वमेवाख्यायते, नाग्न्यादिश्रुतियोगः। तत्र शब्दान्तरार्थः शब्दान्तरार्थस्य प्रसिद्धभेदस्य संज्ञात्वेनोपादीयमानस्य संज्ञिभावं प्रतिपद्यत इति तदेतन्निदर्शनमात्रम्। प्रसक्तानुप्रसक्तविचारणाप्रसङ्गनिवृत्त्यर्थन्तु न सर्वे स्वरूपसूत्रमतभेदा उदाह्रियन्ते ॥ ६८–६९ ॥

प्रत्यक्षरूपतया इति। **नोपलभ्यमानेन** इति। परिच्छिद्यमानोऽपि जातिसंबन्धो न कारणमिति। **तस्यासामर्थ्यम्**। यतो न अयंशब्दश्रवणाज्जातिसमवेता प्रतीतिः। तत्परित्यागेन चान्यत्रापि प्रयोगात्। न हि स तस्यार्थो यो येन विनापि भवति। **विशिष्टजातीय** इति। दण्डत्वसंबद्धार्थाभिधायिनः। **प्रत्यक्षत्वेऽपि** इति। अयंशब्दस्य सन्निधानेऽप्रयोजकत्वमाह (सन्निधानं प्रयोजकमाह ?)। **प्रतिबध्यते** इति। ततो प्रतिरन्यत्र च (ततोऽन्यत्रापि ?) प्रयोगात् तथा इत्याह (दि ?)। यद्यप्यग्निशब्दो वस्तुत एकः स तु स्वरूपश्रुत्या अग्निशब्दरूपतया प्रत्याय्यते। शब्दश्रुत्या शब्दत्वसामान्योपरक्तेन रूपेण। तयोश्च शब्दप्रकल्पितयोरर्थयोर्भेदः प्रतीत एव। तयोश्च स्वरूपश्रुतिसन्निधापितस्य स्वरूपस्य संज्ञात्वे स्वं स्वरूपं ग्राहकमिति पक्षः। स्वस्यैव संज्ञित्वे स्वरूपं ग्राह्यमित्ययं पक्षः। **शब्दजातियोगे** इति। शब्दत्वयोगे। **अग्न्यादिरूपतया** इति। अग्निशब्दादिरूपेण। ननु च सामान्येनापादाने द्वैतम्। यद्वा तयोरेव संबन्धप्रतिपत्तिः। अथवा तन्मुखेन[23]विशेषावुपस्थाप्य संबन्धं प्रतिपद्यन्ते। तत्र पूर्वस्मिन् पक्षे शब्दवस्तुस्वरूपशब्दोऽपि विशेषवचन इति नास्ति भेदः। उच्यते। यदि स्वरूपसूत्रे यथा प्रदेशेषु सर्वथा न सामान्ययोर्नापि शुद्धस्य विशेषस्य संज्ञासंज्ञिभावः, किन्तु सामान्यद्वयोपरागादवाप्तभेदस्य विशेषस्य स्वरूपमिति न स्वरूपादिगतं सामान्यम्। अपि तु स्वशब्देनावच्छेदाद् यस्य यदात्मीयं .... दादिष्विति। अथवा वस्त्वर्थपरित्यागे बौद्धं शब्दार्थयोर्भेदमङ्गीकृत्य ग्रन्थो व्याख्यातव्यः। शक्तीनामवच्छेद इत्यपि बाह्यवस्तुगता एव शक्तिभेदा बुद्धिष्वर्थभेदनिबन्धनमिति शक्तिभेदाद्भेदव्यवस्थाप्रयोजनकथनेन स्वं रूपमित्येतत् प्रसक्तम्। तत्रापि दर्शनभेदा अनुप्रसक्ताः। तेषां विचारणप्रसङ्गान्नान्त इति इज्यते[24] (त्यज्यते ?)॥ ६८, ६९ ॥

---

22. L om. न. 23. ABD तन्मुखौ. 24. B भुज्यते.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कार्यत्वे नित्यतायां वा केचिदेकत्ववादिनः ।
कार्यत्वे नित्यतायां वा केचिन्नानात्ववादिनः ॥ ७० ॥

येषामेकशब्दत्वं तेषामयं जातिव्यक्तिव्यवहारो न सम्भवतीति जात्युपन्यासादनन्तरमिदमुपन्यस्तम्। तत्र नित्यतायामत्यन्तमुख्यमेकत्वम्। कार्यत्वे तु सकृदुच्चरितस्य वर्णस्य पदस्य वा पुनरुच्चारणे स एवायमित्यव्यभिचारिप्रत्ययाभेद उत्पद्यमान एकत्वं प्रकल्पयति। एकत्वदर्शनं चाश्रित्योक्तम्

"एकत्वादकारस्य सिद्धम्" (Vā. 5. on प्रत्याहारसूत्र–1.)

कार्यत्वे इति। उत्पाद्यत्वे। प्रक्रान्तत्वाच्छब्दस्येति संबन्धनीयम्। एकत्ववादिनः इति। अर्थभेदेऽप्येकगोशब्द इति दर्शनम्। नानात्ववादिनः इति। भिन्नेषु अर्थेषु भिन्नाः शब्दा इत्यपरे।

प्रक्रान्तां कारिकां संबन्धयति–येषामेक एव गोशब्दो न बह्वः, तेषां जातिमन्तरेण स्वयमेकप्रत्ययप्रवृत्तेः नास्ति जातिपरिकल्पना। ततश्च जातिभेदनिबन्धनः संज्ञासंज्ञिसंबन्धो नास्तीति। जात्युपन्यासाद् इति। प्रक्रान्तश्लोकद्वयानन्तरम्। अत्यन्तमुख्यम् इति। मुख्यम् अनुपचरितम्। तदपि क्वचित् कारणभेदादवसिते भेदेऽप्यभिन्न[1]प्रधानवृत्तेर्निर्व्यभिचारितया प्रकल्पितमेकत्वं मुख्यकल्पमेव। यथा कार्यपक्षेऽनन्तरं वक्ष्यतीत्यत्यन्तग्रहणम्। सर्वथाभेदाभावात्। यतः स्थानकरणाभिघाता अन्यस्य वोपलब्धिविषयतामुपनयतोऽनेककर्तृका अपि नैकान्ता अस्य[2] विरुद्धमिति। सकृदुच्चारितस्य इति। कार्यपक्षे स्थानकरणाभिघातो जनकविषय एव, स चान्यश्चान्यश्च भवति, कार्यं तर्ह्यन्यच्चान्यच्च जनयति। स एवायम् इति प्रत्ययस्त्वभिन्नाकारोऽनुवर्तमान एकत्वं त्वत्र[3] व्यवस्थापयति। यद्यपि क्वचिद्भेद[4]ज्ञानमर्थान्तरे यदा देवदत्तभेदज्ञानम्, अपि तु तत्रेति। इयन्त्वभ्युत्थायी, कदाचिदपि भेदवृत्त्यभावादिति मुख्यकल्पं कारणान्वयव्यतिरेकानुविधानाच्च नैकत्वं वस्तुतो घटत इति। यदाह प्रकल्पयति इति। अस्य पक्षद्वयस्थितस्यैकत्वस्य निबन्धनं वार्तिककार आह एकत्वाद् इति।

"तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वात्"

(Vā. 4. on Pratyāhārasūtra 1.)

इति। तत्रायं परिहारः

"एकत्वादकारस्य सिद्धम्"

(Vā. 5. on Pratyāhārasūtra 1.)

---

1. L °प्रत्ययवृत्ते°. 2. B नैका अस्य विरुद्धमिति.
3. AC तत्र. 4. ACD °दभेदज्ञा°.

Dr. Urmila Sharma Collection, Varanasi

इति । उपलब्धिव्यवधानन्तु कालशब्दाभ्यां न वर्णरूपव्यवधानम् । देशपृथक्त्वदर्शनं सत्ताकृतिजलबिंबदर्शनवत् । अनेकत्वपक्षेऽपि कार्येष्वपि शब्देष्ववश्यं पुनरुच्चारणे व्यवहारार्थमौपचारिकमेकत्वमाश्रयणीयम् । भिन्नार्थानां तु पदानां भिन्नपदस्थानां च वर्णानामत्यन्तनानात्वं नित्यपक्षे कार्यपक्षे वा नानात्ववादिभिरभ्युपगम्यते ॥ ७० ॥

इति । तत्र चैकत्वापाकरणायोक्तम्

“ आन्यभाव्यं तु कालशब्दव्यवायात् । ”

(Vā. 11. on Pratyāhārasūtra 1.)

“ युगपद्देशपृथक्त्वदर्शनात् ॥ ”

(Vā. 12. on Pratyāhārasūtra 1.)

इति । दण्ड इत्याद्यन्तयोरकारयोरुपनिपातिना शब्देन व्यवधानम् । क्वचिच्चान्यवर्णद्रव्यकलावस्थान्तरालकालव्यवधानम् । एतच्चैकत्वविरोधिनानात्व एव दृष्टम् । तद् यथा नैको देवदत्तो युगपत् स्रुघ्ने मधुरायां च । वर्णाः पुनरेवमिति नैकत्र मात्रा वा ।

उपलब्धि इति । अत्राप्युपलब्धिर्व्यवधीयते कालशब्दाभ्यां न वर्णः । सन्निहिताभिव्यक्तिनिमित्तोऽकार उपलभ्यते । विनष्टे व्यक्तिनिमित्ते नोपलभ्यते । पुनश्चोपजाताभिव्यक्तिनिमित्तः स एवाकार उपलभ्यते । एवं कालव्यवधानाद्युपलब्धिनिमित्तभावाभावाभ्यामिति [न ?] नानात्वम् । **सत्ताकृति** इति । यथा भिन्नदेशेष्वपि द्रव्यादिषु युगपदुपलभ्यमाना सत्ता नैकत्वं जहाति । आकृतिर्गोत्वादयः, तेऽपि भिन्नदेशेषु युगपदुपलभ्यन्ते । प्रतिबिम्बत्वमकिञ्चित्करमिति प्रतिपादितम् । तदेव बिम्बं चन्द्रादिगतमेकदेशभेदेन हि भिन्नेषूदकपात्रेषु भिन्नं गृह्यते । तथैक एवायं भिन्नदेशावस्थिताभिव्यक्तिनिमित्तवशात् तथोपलभ्यत इति । **कार्येष्वपि** इति । अनित्यपक्षेऽपि प्रत्युच्चारणं शब्दभेदं मन्यमान आह **व्यवहारार्थम्** इति । योऽयं शाब्दो व्यवहारो नासावेकत्वं विना घटते । भेदे ह्येकेनोच्चारिते तु गोशब्दे कृतसमयस्तदन्योच्चारिते न प्रतिपद्येतार्थमकृतसङ्केतत्वात्तस्येति । कस्तर्ह्येकत्वपक्षान्नानात्वपक्षस्य विशेष इति । नानात्वमपि .... विभक्तं विभजन्ति । **भिन्नार्थानाम्** इति । नवस्वर्थेषु नवशो गोशब्दाः, गोपिण्डेषु तु सर्वेष्वेक एव । तथा गवादिषु प्रत्येकम् । **भिन्न[5]पदस्थानां च** इति । अनर्थकत्वाद् वर्णानां भेदागमनिमित्तं दर्शयितुमुपलक्षणार्थं न भिन्नपदस्थमेकपदव्यवस्थितानामप्यक्षादिषु कारणभेदाद्भेदोऽस्त्येव । त एवैकवर्णं पदं यथा [6]अ इति कस्यचित् संज्ञा । तस्य पुनः पुनरुच्चारणेऽप्येकमेवाद्यन्तमिति नौपचारिकमभ्युपगम्यत इति प्रतिज्ञामात्रमेतत्तावदिति कथयति ॥ ७० ॥

---

5. ACD भिन्नावस्थानां. 6. ABCD. अथ इति.

CC0. In Public Domain, Digitizagtion by eGangotri

पदभेदेऽपि वर्णानामेकत्वं न निवर्तते ।
वाक्येषु पदमेकं च भिन्नेष्वप्युपलभ्यते ॥ ७१ ॥

अर्कः अश्वः अर्थ इति भिन्नेष्वप्येतेषु पदेषु कालशब्दान्तराभ्यां व्यवहितोपलब्धिरभिव्यक्तिनिमित्तासंनिधानात्तिरोभूतरूपो निभित्तभेदाद्भिन्नेषु प्रयोक्तृषु देशपृथक्त्वे भेदरूपेण प्रत्यवभासमान एक एवायमकारश्छायादर्शजलादिप्रतिबिम्बकल्पेन लोके प्रयुज्यते। वाक्येषु च प्रविवेकि निर्ज्ञातार्थभेदं वा यावत् तुल्यरूपं पदं गौरक्ष इति सर्वं तदेकम्। नामाख्यातभेदेऽपि चैकमेवाक्ष्यश्च इत्येवम्प्रकारं पदम् ॥ ७१ ॥

---

[1]एकत्ववादिमतं वर्णयन्नाह पदभेदेऽपि इति। येऽसमानजातीये च पदे वर्णा नैकत्वं जहति

भिन्नेष्वपि इति। अर्थभेदभिन्नेष्वपि वाक्येषु .... वेति। पदेषु इति। अर्थभेदादेव पदभेदः। व्यवहितोपलब्धिः इति। व्यवहितोपलब्धिर्यस्येति। एक-एवायमकारो लोके प्रयुज्यते इति संबन्धः। केनेत्याह कालशब्दान्तराभ्याम् इति। कालेन ' दण्ड अग्रम् ' इति। शब्दान्तरेण दण्डक इत्याह। अभिव्यक्ति इति। अभिव्यक्तिनिमित्तं [2]करणान्तराभिघाताः तज्जाता ध्वनयः, तेषामन्तरालेऽ[3]संनिधानात् तदास्य तिरोहितं रूपं भवति। युगपद् देशपृथक्त्वेनोपलब्धिमाह निमित्तभेदाद् इति। स्थानकरणाभिघाताद् ध्वनयोऽभिव्यक्तिनिमित्तम्। कथमित्याह भिन्नेष्विति। प्रयोक्तृभेदात्। देशपृथक्त्वे इति। यदा बहवः प्रयोक्तारो युगपद् देशपरिग्रहेण स्थिताः तदायमेकोऽपि, भेदरूपेण इति। देशभेदेन प्रत्यवभासते। छाया इति। छायावादर्शः स्वच्छजलं प्रतिबिंबति द्वन्द्वम् (छायादर्शजलप्रतिबिम्ब इति द्वन्द्वः ?), तद्वदकारः। न हि छाया नाम किंचिद् वस्त्वन्तरम्। स एव त्वेकः पुरुषः भिन्नदिक्स्थः प्रदीपभेदाद् भिन्न इव दृश्यते। यथादर्शेषु जलभाजने चैकोऽप्यनेकः संदृश्यते। यथा च पदभेदे वर्णानामेकत्वं तथा वाक्यभेदेऽपि पदानामित्याह वाक्येषु च इति। प्रतिबिम्बक (प्रविवेकि ?) इति। अपोद्धारे यान्येतानि वाक्ये पदानि विविच्यन्ते। [4]निर्ज्ञातार्थभेदम् इति। यथा गोशब्दो नवस्वर्थेषु भिन्नार्थः। यथा स एव गोशब्दो भूयः सास्नादिमति। तस्य तूपादानं सकलगोशब्दोपग्रहाय। तुल्यरूपम् इति। श्रुत्यभेदः कारणमेकत्वे। गौः इति व्याख्यातम्। तथाक्षशब्दोऽपीति (शब्दोऽपि विभी ?)

---

1. L एकत्वमेवाभिमतं. 2. ACD कारणा°.
3. ACD °राले सन्नि°. 4. ACD दिङ्नानार्थ°

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न वर्णव्यतिरेकेण पदमन्यच्च विद्यते ।
वाक्यं वर्णपदाभ्यां च व्यतिरिक्तं न किञ्चन ॥ ७२ ॥

न हि क्रमजन्मभिरुच्चरितप्रध्वंसिभिरयुगपत्कालैः सावयवैर्वर्णैः शब्दान्तरारम्भः सम्भवतीति वर्णमात्रमेव पदम् । तेषामपि सावयवत्वात् क्रमप्रवृत्तावयवानामा व्यवहारविच्छेदात्तुरीयतुरीयकं किमप्यव्यपदेश्यं रूपं व्यवहारातीतमस्तीति न वर्णपदे विद्येते । वर्णपदाभावे कुतो वाक्यस्य व्यतिरेकः । तथा चोक्तम्

तकादिषु भिन्नार्थौ विभीतक एव भूयः । भिन्नार्थनामपदानामपि [5]कयाचिन्मात्रया अर्थसामान्यम्, न पुनर्नामाख्यातयोर्यत्रात्यन्तविलक्षणोऽर्थ इति । तत्राप्येकत्वकथनायाह **नामाख्यात** इति । **अक्षि** इति । अक्षतेरशेर्वा अप्रत्ययेन शपि लुकि च [6]कृते सिपि रूपम् । अदेर्वा लुङि घस्लृभावे कर्मण्युत्तमैकवचने मन्त्रत्वाच्च्लेर्लुकि । नाम प्रसिद्धमेव । तथा **अश्व** इति । श्वयतेर्लुङि मध्यमपुरुषैकवचनेन । अगम इत्यर्थः[7] । इदमेकत्वदर्शनमेव युज्यते यदि वर्णव्यतिरिक्ते पदवाक्ये न स्तः, तयोस्तु सत्त्वे गोगवयशब्दयोरत्यन्तभेदान्न वर्णाना .... मनुगमोऽस्ति ॥ ७१ ॥

यदि तु वर्णा एव पदं पदानि च वाक्यं तत एकत्वमिति प्रदर्शयति **न वर्णव्यतिरेकेण** इति । गतार्थः श्लोकः ।

न हि इति । नैको वर्ण आरम्भकः, समुदायोऽपि नास्ति यौगपद्याभावात्, तच्चोत्पत्तौ नास्ति । **क्रमजन्मभिः** इति । स्थितावपि नास्ति[इत्याह]**उच्चरितप्रध्वंसित्वाद्**[1] इति । **वर्णमात्रम्** इति । एवमेकत्वं समधिगतम् । तेषां च वर्णानान्तरसहायानां (वर्णान्तरासहायानां ?) सञ्चारिणां पदान्तरव्यवस्थानेऽपि न निष्पन्नरूपा इत्याह **तेषामपि** इति । वर्णानाम् । **सावयवत्वाद्** इति । शक्यन्ते ते बुद्ध्या प्रविवेक्तुम् । **आ व्यवहारविच्छेदात्** इति । तावद् बुद्ध्या प्रविभागो यावदपकर्षपर्यन्त इति । तत्र तु व्यवहारविच्छेदः । इदं नामैतदवयवस्य भागः इति । **तुरीयतुरीय**[2] इति । तुरीयतुरीयमिति चतुर्थस्य चतुर्थो भागः, षोडशी कलेति । अपकर्षवाचिनो वा तुरीयशब्दात्

" प्रकारे गुणवचनस्य " (P. 8.1.12.)

इति द्विरुक्तम् । **अव्यपदेश्यम्** इति । अत्यन्तापकृष्टत्वात् । अत एव **व्यवहारातीतम्** इति निष्पन्ने[3] वर्णे नाम कुतो व्यतिरिक्ते पदवाक्ये । **तथा च** इति । एकत्वपक्षे

---

5. CD कदाचित्. 6. ABCD स ति. 7. D om. तथा अश्व to इत्यर्थः.

1. All the Mss. have °प्रध्वंसित्वात् though all the Mss. of the Vṛtti have प्रध्वंसिभिः. 2. Vṛṣabha has तुरीयतरीयम् though the Vṛtti has तुरीयतुरीयकम्. 3. ACD निष्पन्नो.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"अनित्यत्वमेवं संप्राप्नोति"

इति। समुदायाभावादुपगृहीतार्थे उपगृहीतो वा न कश्चिच्छब्दो विद्यत इति ॥ ७२ ॥

अपर आह

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।
वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन ॥ ७३ ॥

वर्णप्रतिपत्तिनिर्भासाभ्यो बह्वीभ्यः प्रतिपत्तिभ्यः समुदायविषयस्य प्रयत्नस्य

"कालशब्दव्यवायात्"

(Vā. 11. on Pratyāhārasūtra 1.)

"यदि पुनरिमे वर्णाः शकुनिवत्स्युः इत्युक्तम्।"

(M. Bhā. on Vā. 12. on Pratyāhārasūtra 1.)

इति। तत्र च भाष्यकारेण चोदितम्

"अनित्यत्वमेवं स्याद्"

(M. Bhā. on Vā. 12. on Pratyāhārasūtra1.)

इति। तत् कथम्। असामर्थ्यत इत्याह समुदायाभावाद् इति। लोकेऽर्थेषु प्रयुक्तानां समुदायानां नित्यत्वमभ्युपगम्यते। एकत्र दर्शने गौज इत्यत्र य .... रं स एव पुनर्गर्गत्वावतिष्ठते इति कुतः समुदायरूपे वाक्यपदे। शास्त्रे च वाचकस्य नित्यत्वमङ्गीक्रियते। न च वाचकः[4]सन्निवेशविशिष्टो व्यवस्थितः शब्दोऽस्ति। वर्णानां सत्त्वात्। तदभावान्नित्यताया अभाव उक्तः, न पुनरनित्यं न। उपगृहीत इति। परितः परिच्छिन्नरूपः। [5]उपकृतार्थः इति। अर्थेषु कृतावधिः ॥ ७२ ॥

नानात्वदर्शनमधिकृत्याह पदे न वर्णाः इति। यदि तानि पदानि वर्णभागवन्ति तेषां स्वस्वारादेकदर्शनम्, तानि तु तथा न सन्तेरघनाभ्यपूर्वपरभागच्छेदा वर्णादयः। तेनान्य एव वकारोऽन्यत्र वृक्ष इत्यत्र विलक्षणः, तस्मान्नैषामंशेनाप्यनुगमः यथा वाक्ये पदानि न सन्तीति। तदेव शब्दानामंशेनाप्यनुगमो नास्तीति स्पष्टम्। नानात्वं भागत्वात् तेषाम्।

कथं भागभेदरूपानुपातिनी बुद्धिरित्याह वर्णप्रतिपत्तिनिर्भासाभ्यः इति।

---

4. ABC वाचकसन्निवेशे वि°.

5. WW[2]SL have उपगृहीतार्थः in the Vṛtti. But Vṛṣabha had obviously उपकृतार्थः.

Dr. Urmila Sharma Collection, Varanasi

भेदात् सत्यपि पदाभिव्यक्तिविषयस्य ध्वनेर्भेदे सादृश्यानुगमाद्वर्णविभागप्रतिपत्त्युपाया पदे प्रतिपत्तिरुत्पद्यते। तत्त्वक्रममपूर्वापरमेकमेव नित्यमभेद्यं वर्णतुरीयोपपादित इवैकात्मा। वर्णानां त्वव्यपदेश्यानि व्यवहारातीतानि भिन्नरूपाभिमतान्यकारादीनां तुरीयाणि प्रतिपादकानि कल्पितानि। तेन तेषां सुज्ञानतरमेकत्वं प्रसिद्धं शास्त्र-

---

प्रतिपत्तिशब्देन वर्णाख्ये विषये ज्ञानस्य व्यापार उच्यते। तस्मिंश्च यत्तस्य कर्तृत्वं [1]तद्धि निर्भासशब्देनोच्यते निर्भासत इति। तेन वर्णप्रतिपादनाख्ये व्यापारे ये निर्भासाः प्रतिपत्तयः इति। यद्वा परमार्थवर्णपरिच्छेदनवन्निर्भासनं यासामिति। वर्णविवक्षानिष्पादितध्वन्यभिव्यक्तवर्णविषया बुद्धिरन्या। तदविवक्षानिष्पादितध्वन्यभिव्यक्तात् पदादपोद्धारपरिकल्पनापोद्धृतवर्णविषयान्या। सा[2]दृश्यात्तद्वन्निर्भासत इति युज्यतेऽन्यपदार्थः। ताभ्यः प्रतिपत्तिभ्यः **पदे प्रतिपत्तिरुत्पद्यत** इति संबन्धः। अथवा वर्णा एव प्रतिपत्तयः, प्रतिपद्यन्त इति। तन्निर्भासाभ्यस्तदाकाराभ्यः इति। **भेदात्** इति। यतो गवय शब्देभ्यः (व्देऽन्यः ?) प्रयत्नोऽन्यश्च गकारे, प्रयत्नभेदात् तत्प्रेरितस्य वायोर्भेदः, तद्भेदात् करणाभिघातभेद इति तन्निष्पन्नव्यञ्जकध्वनिभेदो यथा गकारवकारयोः। **पदाभिव्यक्तिविषयस्य** इति। पदे व्य .... तस्य व्यापार इति तद्विषयत्वम्। **सादृश्यानुगमाद्**[3] इति। केवलैर्वर्णैः तस्मिन् वा पदैः सादृश्यमुत्प्रेक्ष्यमेव। **वर्णविभाग** इति। वर्णात्मका ये प्रविभागाः तेषु प्रतिपत्तिः। सा पदप्रतिपत्तेरुपायः। तस्याश्च वर्णविभागप्रतिपत्तेः [4]यथावर्णितस्य स(र्णितसा ?)दृश्यानुगमो हेतुः। एतदाह—यो य उपायगतो भेदः तमुपेये निवेश्य पदमेव भेदवत् [5]प्रतियन्ति। तात्त्विकं तु तस्य रूपमाह **अक्रमम्** इति। कालभेदाभावः। **अपूर्वापरम्** इति। यौगपद्येन सावयवभेदाभावः। यतोऽपूर्वापरः तत एकम्, यतोऽक्रमं ततो **नित्यम् अभेद्यम्**। **वर्णतुरीय** इति। यैषा वर्णप्रतिपत्तिर्वर्णभेदोपाया तदेतल्लोके वर्णानां भागवत्ता प्रतीतेति दर्शनम्। पदवाक्ययोस्तु भागवदभिमानः। यदाह **वर्णानां तु** इति। तदभावेन प्रसिद्धस्य च तथाभावख्यापना च। सिद्धस्यैव दृष्टान्तत्वेनोपन्यासो यतो लोके वर्णभागा अप्रतीता एव शास्त्रव्यवहारार्थमाश्रिताः

" तस्यादित उदात्तमर्धह्रस्वम् "

इति वादयन्ति। **अव्यपदेश्यानि** इति। व्यपदेष्टुं [न] शक्यन्ते। अत एव **व्यवहारातीतानि**। पदवाक्यभागाभिमतास्तु व्यपदेश्याः, भाग इति देवदत्त इति च। [6]**भिन्नरूपाभिमतानि** इति। भिन्नरूपाणीत्यभिमतानि, केवलं स्थानादिभेदो वर्णानां

---

1. ABCD तर्हि. 2. L सा च दृश्या तद्व°. 3. ABCD सादृश्यानुमानात्.
4. ABCD यथावर्णी तस्याः. 5. D प्रतीयते. 6. AUD अभिन्न°.

CC0. In Public Domain, Digitizagtion by eGangotri

व्यवहारे। वाक्यस्य चैकानेकपदस्वरूपस्यार्थे प्रयोगाद् वाक्यप्रतिपत्त्युपायभूता पदे प्रतिपत्तिरुत्पद्यते। अतत्त्वभूतास्तस्मिन्नेव वाक्यात्मनि वर्णपदरूपनिर्भासाः क्रमवत्यो बुद्धय उत्पद्यन्ते। तस्मादेवंभूताद्वाक्यादभेद्यान्निर्भागाच्छब्दात्मनो वर्णानां पदानां चात्यन्तमविवेक इति ॥ ७३ ॥

भिन्नं दर्शनमाश्रित्य व्यवहारोऽनुगम्यते ।
तत्र यन्मुख्यमेकेषां तत्रान्येषां विपर्ययः ॥ ७४ ॥

आचार्या हि परस्मिन्नक्रमेऽन्तःसंनिवेशिनि शब्दतत्त्वे प्रत्यधिकरणमागमभेदपरिग्रहेण भिन्नानि दर्शनानि श्रिताः शास्त्रव्यवहारमनुगच्छन्ति। तद्यथा। श्रुत्यभेदादनेकार्थत्वेऽप्येकशब्दत्वम्, अर्थभेदादेकश्रुतित्वेऽप्यनेकशब्दत्वमिति। तत्र

तुरीयाणां, तानि हि नैव सन्ति। कुतस्तेषां भेदः। अत एव च **कल्पितानि**। **सुज्ञानतरम् शास्त्रव्यवहारे** इति। लोकेऽस्याप्रतीतेः। अत्रापि सिद्धान्ते सिद्धत्वाद् दृष्टान्ते यदाह—

"वर्णैकदेशा वर्णग्रहणेन [7]गृह्यन्ते"

इति। दार्ष्टान्तिके एकत्वमाह **वाक्यस्य च** इति। **एकानेकपदस्वरूपस्य** इति। एकशब्दसरूपं (एकपदस्वरूपं ?) एकतर(द्वार ?)मित्यत्र ह्य(हि ?)प्रकरणादिना क्रियाविशेषावगतिः विधेभिदेहीति (पिधेहि इति ?) च। अनेकपदस्वरूपं यथा देवदत्त गामभ्याज शुक्लाम् इति। **अर्थे** इति। लोके प्रवृत्तिनिवृत्तिरूपव्यवहारख्यापनाय वाक्यमेव प्रयुज्यते। [8]**तत्प्रतिपत्त्युपायभूता** इति। यथा वर्णप्रतिपत्त्युपायभूता पदप्रतिपत्तिर्व्याख्याता। **तस्मिन्नेव** इति। उच्चार्यमाणे। **तस्मात्** इति [नि ?] गमयति। **अभेद्याद्** इति। अभिधेयनिबन्धनभेदाभावाद्। **निर्भागाद्** इति। यौगपद्यव्यवस्थित भागाभावादवयवसञ्चाराभावमाह। ॥ ७३ ॥

द्वे अपि एकत्वनानात्वदर्शने आश्रित्य शास्त्रे व्यवह्रियत इत्याह **भिन्नम्** इति। **व्यवहारः** इति। शास्त्रव्यवहारः। कथं भिन्ने परस्परविरोधिनी दर्शने एकत्रेत्याह **तत्र** इति। एकत्वे मुख्ये नानात्वमुपचरितम्। नानात्वे त्वेकत्वमिति।

आचार्या भिन्नानि दर्शनान्याश्रित्य व्यवहारमनुगच्छन्ति इति संबन्धः। तत्र कः पन्था न शक्य आस्थातुमिति संव्यवहारार्थं सर्वाणि दर्शनान्याश्रिताः। **परस्मिन्** इति। योऽसौ बुद्ध्यव्यतिरिक्तपरशब्दः तस्यैव परमार्थतः शब्दत्वम्, तदनुकारात्तु बाह्यस्य शब्दत्वम्। **प्रत्यधिकरणम्** इति। प्रतिसिद्धान्तम्। **आगमभेद** इति। तं तमागमं परिगृह्य। आगमभेदमाह **श्रुत्यभेदाद्** इति। स्वरूपस्याभेदात्। यस्त्वर्थस्त-

---

7. ACD दृश्यन्ते, 8. WW^{2}SL वाक्यप्रति in the Vṛtti.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चैकेषामौपचारिको भेदो मुख्यमेकत्वम्। अन्येषां तु प्रथक्त्वं मुख्यं व्यावहारिकमेकत्वमिति। तथा ह्युक्तम्

"एकश्च शब्दो बह्वर्थोऽक्षाः पादाः माषाः"
(M. Bhā. on Vā. 9. on P. 1.2.45.)

इति। तथा

"ग्रामशब्दोऽयं बह्वर्थः"

इत्युक्त्वा भेदेनोपसंहारं करोति

"ततः (द्यः ?) सारण्यके ससीमके सस्थण्डिलके वर्तते तस्येदं ग्रहणम्"
(M. Bhā. on Vā. 8. on P. 1.1.7.)

इति। ॥ ७४ ॥

स्फोटस्याभिन्नकालस्य ध्वनिकालानुपातिनः ।
ग्रहणोपाधिभेदेन वृत्तिभेदं प्रचक्षते ॥ ७५ ॥

स्मादर्थो भिद्यमानः कथं ततोऽवसीयमानभेदं भिन्द्यात्, न वान्यतो भेदोऽर्थान्तरस्य भेदः । **अर्थभेदाद्** इति । अभेदलक्षणे संबन्धे न् सर्वार्थरूपता युगपत् सम्भवतीति एकार्थोपग्रह एव तत्र तस्य तस्यार्थाकारस्य स्वीकारादन्यत्वम् । योग्यतालक्षणे ह्येकैकार्थप्रतिपादनेन कार्येण शक्यमवसातुमेकैत्र तस्य शक्तिरिति । नियत उच्चारणे न तासां प्रबोधो न च सर्वा उपादायोच्चारयतीत्यदृष्टकार्याणामभाव एवेति । **औपचारिकः** इति । केचिच्छ्रुत्यभेदवादिनो भेदव्यवहारं प्रवर्तयन्त्येत्र शास्त्रे, स चौपचारिक इति । तं शास्त्रव्यवहारमाह **बह्वर्थ** इति । अ .... त्व(अभेद ?)पक्षमाश्रित्योपक्रमः । **तद्यः सारण्यके** इति भेदपक्षमाश्रित्योपसंहरति ॥ ७४ ॥

स्वरूपप्रत्ययप्रतिपादनप्रसङ्गेनानुषङ्गिकं समाप्य सामान्येन यदुक्तं नित्याः शब्दार्थसंबन्धाः इति तत्र नित्यस्य कालभेदाभावः । प्रसङ्गेन तदुपदर्शनार्थमाह **स्फोटस्य** इति । **अभिन्नकालस्य** इति । नित्यत्वाभिन्नेन (अनित्यत्वं भिन्नेन ?) कालेनानुग्रह इति । तस्य प्रतिषेधः । [1]**ध्वनिकाल** इति । न सर्वथा कालप्रतिषेधः । ये त्वस्य ध्वनयोऽभिव्यंजकाः तदीयं भिन्नकालमनुवर्तन्ते । **ग्रहणोपाधि** इति । ग्रहणं बुद्धिः, तस्यैवौ[2]पाधिकस्य भेदेन तस्य स्फोटस्याभिन्नस्यापि वृत्तिभेदो ह्रस्वत्वादिभेदः । गृह्यतेऽनेनेति वा ग्रहणं ध्वनयस्त एवोपाधयः, तद्भेदेन वृत्तिभेदः ।

---

1. ABCD शश्वत्वाविकल इति. This is obviously a scribal mistake. The text printed has been adopted on the basis of the explanation which follows. 2. AD तस्यैवोपाधिः । तस्य भे°.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इह नित्यत्वादात्मतत्त्वस्य स्फोटानां स्थितौ नास्ति कालपरिमाणवृत्तेः स्वल्पोऽपि व्यापारः। ध्वनिना तु संसृष्टं स्फोटस्य स्वरूपमुपलभ्यते यस्मात् तस्माद् ध्वनेः स्थितिकालः स्फोटोपलब्धिरूपः परिवर्तते। तेन च स्फोटविषयेण ग्रहणेनोपाधिना भिन्नकालेन प्रकल्पितभेदाः स्फोटस्य द्रुतमध्यमविलम्बिता वृत्तयस्त्रिभागोत्कर्षेण युक्ताः समाख्यायन्ते ॥ ७५ ॥

यद्येवं ह्रस्वदीर्घप्लुतेष्वऽपि ध्वनिरेव कालभेदहेतुः।

"तपरः तत्कालस्य" (P. 1.1.70)

इति दीर्घप्लुतयोर्यथैव वृत्तिभेदेऽपि तथैव तत्कालव्यपदेशप्रसङ्गः।

"द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कालभेदाद्"

(Vā. 4. on P. 1.1.70.)

इत्येतस्मिन् पर्यनुयोगे प्रसक्ते प्रतिविधीयते ॥ ७५ ॥

स्वभावभेदान्नित्यत्वे ह्रस्वदीर्घप्लुतादिषु।
प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्यते ॥ ७६ ॥

नित्यत्वाद् इति। नित्यानां नास्ति कालवृत्त्यनुग्रहः। चिरं क्षिप्रमिति च कालकृता व्यपदेशाः। ते स्फोटे न सम्भवन्ति। **स्थितौ** इति। स्फोटस्यापि स्थाने। **कालपरिमाणवृत्तेः** इति। काल एव परिमाणम्, क्रियान्तरस्य परिच्छेदकत्वात्। तस्य वृत्तिः क्रमयौगपद्ये। प्रतिबन्धाभ्यनुज्ञयोः ध्वनिना यस्माद् वृत्तिकालभेदः स्वतः तुल्यकालत्वात्। या तु कालभेदप्रतीतिः सा ध्वनिकृता। यदाह **संसृष्टम्** इति। ध्वनिस्फोटयोर्विभागापरिच्छदाद् ध्वनिकृतं भेदं स्फोटे पश्यन्ति। अतश्च सदावस्थानेऽपि ध्वनिस्थितिकालमेवानुवर्तन्ते। तस्योपलम्भः। **ग्रहणेन** इति। यासौ स्फोटग्राहिका बुद्धिः ध्वनयो वा तेषां च स्फोटो विषयो व्यङ्ग्यत्वेन। **भिन्नकालेन** इति। अभिन्नेऽपि स्फोटे ता एव बुद्धय उपाधिभूताः कालभेदेनावर्तमाना भिद्यन्ते। तत्कृतश्चायं द्रुतादिवृत्तिभेदः। **त्रिभागोत्कर्षेण** इति। द्रुतायां यत्परिमाणा वर्णास्त्रिभागेनोत्कृष्यन्ते मध्यमायां ततोऽपि त्रिभागेनोत्कृष्यन्ते विलम्बितायाम्। **समाख्यायन्ते** इति।

"तपरः तत्कालस्य" (P. 1.1.70.)

इत्यत्र वार्तिके ॥ ७५ ॥

यद्येवम् इति। यथैव द्रुतादिभेदो न यतः(स्वतः ?)तथा ह्रस्वादिभेदोऽपि परोपहितः, एवं **दीर्घप्लुतयोः यथैव** इति। एतावदेव छिद्यते(भिद्यते ?)ततो वृत्तिभेदे तथैव। ततश्च यथा दीर्घप्लुतयोरतत्कालता तथा मध्यमविलम्बितयोः पितृ कालभेदात् तत्कालता प्रसज्यते। एतस्मिंश्चोद्ये तदुपसंख्यानं

Dr. Urmila Sharma Collection, Varanasi

इह द्विविधो ध्वनिः प्राकृतो वैकृतश्च। तत्र प्राकृतो नाम येन विना स्फोटरूपमनभिव्यक्तं न परिच्छिद्यते। वैकृतस्तु येनाभिव्यक्तं स्फोटरूपं पुनः पुनरविच्छेदेन प्रचिततरं कालमुपलभ्यते। एवं हि संग्रहकारः पठति—

शब्दस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।
स्थितिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते ॥

तत्र तथा सन्निवेशविशेषात्तुल्यमात्राविभागपरिमाणानि गर्गादिवाक्यानि कानिचिदुच्चारणावृत्तिप्रचयग्राह्याणि। कानिचिदपचितरूपावृत्तिग्राह्याणि। तथा स्वभावभेदादपचितध्वनिद्योत्यो ह्रस्वः। तावताऽभिव्यक्तिनिमित्तेन स्वरूपस्य ग्राहिका बुद्धि-

“ द्रुतायां तपरकरणे ” (Vā. 4. on P. 1.1.70.)

इति।

नित्यत्वे इति। नित्यः शब्द इत्यस्मिन् दर्शने औपचारिकः कालभेदः, अनित्यपक्षे तु स्वत एव कालभेदः। क्व पुनरुपचार इत्याह **ह्रस्वदीर्घप्लुतादिषु** इति। आदिग्रहणाच्चतुर्मात्रिकग्रहणम्। न पुनर्द्रुतादिवृत्तिषु। प्राकृतस्य ध्वनेः यः कालः ह्रस्वदीर्घप्लुतादिषु शब्दस्य स्फोटस्योपचर्यते। कस्मात्पुनर्ह्रस्वादीनां[1] भिन्नकालत्वे ह्रस्वोपचरितद्रुतध्वनिव्यङ्ग्यो दीर्घप्लुतोचितप्रचिततरध्वनिव्यङ्ग्या इत्याह **स्वभावभेदाद्** इति। स्वभाव एवास्य स्फोटस्य तादृश इति। **प्राकृतस्य** इति। ध्वनिस्फोटयोः पृथक्त्वेनानुपलम्भात् तं स्फोटं तस्य ध्वनेः प्रकृतिमिव मन्यन्ते। तत्र भवः प्राकृतः। तदुत्तरकालभावी तस्माद्विलक्षण एवोपलभ्यत इति विकारापत्तिरिव स्फोटस्येति वैकृत उच्यते।

ध्वनिसत्ता तस्य वा प्रकृतिः करणाभिघातस्य सतो (ध्वनिसंघातस्य वा प्रकृतिः करणाभिघातः। ततः ?) प्रथमतो भवः प्राकृतः, ततस्तु वैकृतः। अनभिव्यक्तस्यापातेनाभिव्यक्तेः ध्वनिप्रकृतिः, तदुद्भवो विकृतिः, यतोऽस्वार्थिको येनेति। स्फोटस्वभावाभिव्यञ्जकः प्राकृतः उपलब्धरय तूत्तरकालभावी प्रबन्धवृत्तिरुपलब्धिप्रबन्धनिमित्तं वैकृतः, यदाह **वैकृतस्तु** इति। **येन** इति। अस्य **प्रचिततरं कालमुपलभ्यते** इत्यनेन संबन्धः। [2]अभिव्यक्तं रूपं तु प्राकृतेनैव। **पुनः पुनः** इति। यावद् ध्वनिर्नोपरमति तावल्लभ्यते स्फोटः। यद्यभि[3]व्यक्तस्याभिव्यञ्जको वैकृतः द्विस्त्रिश्चाकारस्योच्चारणे वैकृतत्वं ध्वनेः प्राप्नोति। नैतदस्ति। पूर्वप्रयत्नोपसंहारेण

1. ABCD °स्वादिना. 2. ACD अभिव्यक्तिरूपं. 3. ACD यद्यपि व्यक्त°.

CC0. In Public Domain, Digitizagtion by eGangotri

स्तत्रोत्पद्यते। प्रचितध्वनिद्योत्यस्तु दीर्घः। प्रचिततरध्वनिप्रतिपाद्यस्तु प्लुतः। स च प्राकृतध्वनिकालो व्यतिरेकाग्रहणादध्यारोप्यमाणः स्फोटे स्फोटकाल इत्युपचर्यते शास्त्रे ॥ ७६ ॥

शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदं तु वैकृताः।
ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते ॥ ७७ ॥

प्रयत्नान्तराक्षेपेण च य उत्पद्यते स प्राकृत एव। एकप्रयत्नाक्षिप्तास्तूत्तरध्वनयो वै [कृताः ?] .... यैरनुपलभ्यमानान्तराल एकघनो वर्ण उपलभ्यते। **ग्रहणे** इति। प्रथमतो ग्रहणमात्रे। **स्थितिभेदे** इति। उपतिष्ठते इति व्यपदेशहेतुः। **सन्निवेशविशेषाद्** इति। कानिचित् प्रसन्नसंन्निवेशानि स्ववधारणानि, कानिचिद् विषमसन्निवेशानि दुरवधारणानि। [**तुल्यमात्राविभागपरिमाणानि**[4] इति]। तुल्यो मात्राणां विभागः संख्यापरिमाणं च कालकृतं येषामिति। एवमभिन्नाकाराण्यभिन्नकाल....ति वाक्यानीति। उच्चारणे या आवृत्तिः पुनः पुनर्भावः तस्याः प्रचयो बहुत्वम्। **अपचित** इति। अपचितरूपाभिरल्पीयसीभिरावृत्तिभिः। अपचिताभिर्वा रूपावृत्तिभिर्गृह्यते। यथा विनापि कालभेदं सन्निवेशभेदो वा। उच्चारणप्रवृत्तिः भेदग्राह्याणि। **तथा** इति। ह्रस्वादीनामपि स्वभाव एव भेदः तया नानित्यत्वात् तुल्यकालानामपि। **अपचित** इति। यथापचितध्वनिव्यङ्ग्यो ह्रस्वस्तथा प्रचितप्रचिततरध्वनिव्यङ्ग्यौ दीर्घप्लुतौ। यथाह [5]**प्रचित** इति। स्वाभाविकमेतत्। किमत्र युक्तयेति। तत्र गर्गादिवाक्यानि तुल्यकालान्यपि भिन्नाभिरावृत्तिभिर्धारणक्षमाणि। तथा तुल्यकालत्वेऽपि ह्रस्वादयः प्रचिताप्रचितध्वनिव्यङ्ग्यस्वभावा इत्येतावता दृष्टान्तः। **व्यतिरेकाग्रहणाद्** इति। न कदाचिदयं स्फोटस्ततो व्यतिरेकेणोपलब्ध इति तं कालं तस्यैवावस्यतीति। नियतोऽप्युत्तरकालं स [6]तपरत्वेन द्विमात्रत्रिमात्रयोर्नातादीनां तैर्विनापि प्रत्येकं तस्योपलम्भात् ॥ ७६ ॥

[1]वैकृतमाह **शब्दस्य** इति। **वृत्तिभेदम्** इति संबन्धः। **ऊर्ध्वम्** इति। प्राकृतेन ध्वनिना व्यक्तेरुत्तरकालम्। **वृत्तिभेदम्** इति। द्रुतादिभेदम्। **समुपोहन्ते** सम्पादयन्ति। **वैकृताः** इति। ये विभागेन तत उपलक्षिता उत्तरकालभाविनो ध्वनयः। **तैः** इति। वृत्तिभेदैः।

---

4. Though this is not found in the Mss. it is a scribal omission, because Vṛṣabha always cites a text before explaining it.

5. ACD पतेति. 6. B om. तपरत्वेन .... तस्योपलम्भात्.

1. B om. वैकृतमाह ... उत्तरकालं.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तद्यथा प्रकाशो जन्मानन्तरमेव घटादीनां ग्रहणे हेतुः, अवतिष्ठमानस्तु ग्रहणप्रबन्धहेतुर्भवति, एवमभिव्यक्ते शब्दे ध्वनिरुत्तरकालमनुवर्तमानो बुद्ध्यनुवृत्तिं शब्दविषयां विषयाभिव्यक्तिबलाधानादुपसंहरति। तस्मादुपलक्षितव्यतिरेकेण वैकृतेन ध्वनिना संसृज्यमानोऽपि स्फोटात्मा ताद्रूप्यस्यानध्यारोपात् शास्त्रे ह्रस्वादिवत् कालभेदव्यवहारं नावतरति ॥ ७७ ॥

कथं पुनर्ध्वनिः शब्दोपलब्धिनिमित्तत्वं प्रतिपद्यते—

इन्द्रियस्यैव संस्कारः शब्दस्यैवोभयस्य वा ।
क्रियते ध्वनिभिर्वादास्त्रयोऽभिव्यक्तिवादिनाम् ॥ ७८ ॥

प्रकाश इति। बाह्यं प्रदीपादि। **जन्मानन्तरम्** इति। उत्पन्नमात्रमेव। **ग्रहणे हेतुः**, तदभिव्यक्तेः (क्तौ ?)। **प्रबन्धहेतुः** इति। प्रबन्धाभिव्यक्तिं कुर्वन् ग्रहणप्रबन्धहेतुः, न पुनरुपलभ्यस्य घटादेः प्रचिततामन्यद् वा धर्मान्तरं दर्शयति। **शब्दविषयाम्** इति स्फोटविषयाम्। **विषयाभिव्यक्तिबलाधानाद्** इति। विषयाभिव्यक्तिरेव बलमाधत्ते पुनः पुनर्भावात्। अत एव बुद्ध्यनुवृत्तिः। **उपलक्षितव्यतिरेकेण** इति। प्राकृतेन ध्वनिना स्फोटेऽभिव्यक्ते उपलब्धेः पश्चाद्भावित्वात्तस्य स्फोटाव्यतिरेक उपलक्ष्यते। तदेतयोर्भेदमुपलक्षयन्तो नान्यगतं कालभेदमत्राध्यारोपयन्ति। यतो वैकृतं ध्वनिरूपं नाध्यारोप्यते स्फोटे। **संसृज्यमानोऽपि** इति। निर्ज्ञातस्योत्तरकालमपि तदुपलब्ध्यनुप्रवृत्तेः। **ह्रस्वादिवद्** इति। यथा प्राकृतध्वनिरूपाध्यारोपाद् ह्रस्वादिभेदेन कालभेदव्यवहारमवतरति तथा वैकृतेन ध्वनिभेदेन कालभेदव्यवहारं[न][2]अवतरति। ततस्तपरसूत्रे तत्काला एव ते इति द्रुतादयो निरस्यन्ते ॥ ७७ ॥

अभिव्यक्तिजाः (अभिव्यञ्जकाः ?)ध्वनय इत्युक्तम्। केनोपायेन तेऽभिव्यञ्जका इति पृच्छति **कथं पुनः** इति। **इन्द्रियस्यैव** इति। श्रोत्रेन्द्रियस्य। **संस्कारः**, विशेषाधानम्। **शब्दस्य** इति। स्फोटस्य। **उभयस्य** इति। यौगपद्येन द्वयोरपि विषयेन्द्रिययोः।

अभिव्यक्तिप्रक्रियामात्रम् इति। स्वरूपकथनमात्रमेतत्। नात्र हेत्वपदेशः। **उत्तरौ तु** इति। उत्तरत्र सोपपत्तिकमेतत् सर्वं दर्शयिष्यति। **श्रोत्रं** [1]**संस्करोति** इति। ग्रहणासमर्थस्य वा श्रोत्रस्य अपूर्वशक्त्याधानेन संस्कारः विद्यमानशक्तिप्रबोधो वा अर्थक्रियायां वा द्वयस्यापि केवलं सान्निध्यमात्रमेव संस्कारो बाह्येनैव चिकीर्षित[2] इति त्रयः संस्कारविकल्पाः। **द्वारताम्** इति। तथा संस्कृतेन्द्रियोत्पन्ना **बुद्धिः**

---

2. ABCD om. न, but it was certainly there.

1. ACD श्रोत्रसंस्कारो हि. 2. ACD चिकीर्षयेति.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एतस्मिञ्श्लोके शब्दाभिव्यक्तिप्रक्रियामात्रं प्रतिज्ञायते। उत्तरौ तु दृष्टान्तप्रदर्शनविषयौ। तत्र केचिन्मन्यन्ते ध्वनिरुत्पद्यमानः श्रोत्रं संस्करोति। तच्च संस्क्रियमाणं शब्दोपलब्धौ द्वारतां प्रतिपद्यते। अन्ये त्वभिव्यक्तिवादिनो मन्यन्ते शब्द एव ध्वनिसंसर्गात् प्राप्तसंस्कारः श्रोत्रस्य विषयत्वमुपगच्छति। केषाञ्चिद् ध्वनिरुभयोः शब्दश्रोत्रयोरनुग्रहे वर्तते। ताभ्यामिन्द्रियविषयाभ्यां सहकारिणा निमित्तान्तरेणानुगृहीताभ्यां शब्दविषया बुद्धिरुत्पाद्यते। प्रदीपप्रकाशानुग्रहादिवद् दृश्येष्वर्थेषु सहकारिनिमित्तान्तरापेक्षया हि शक्तयो निमित्तानां समग्रतां नातिक्रामन्ति ॥ ७८ ॥

इन्द्रियस्यैव संस्कारः समाधानाञ्जनादिभिः।
विषयस्य तु संस्कारस्तद्गन्धप्रतिपत्तये ॥ ७९ ॥

समाधानं हि प्राकृतमलौकिकं वा न विषयात्मनि दृश्ये विशेषमादधाति। तथाञ्जनादिद्रव्यं चक्षुरेव संस्करोति न वाह्यं विषयम्। अलौकिकमपि समाधानं सूक्ष्मव्यवहितविप्रकृष्टोपलब्धौ चक्षुरेवानुगृह्णाति। विषयानुग्रहे हि तस्यान्यैरपि ग्रहणं

स्वविषयपरिच्छेदायालमिति। **शब्द एव** इति। स्फोटः। **संसर्गाद्** इति। व्यङ्ग्यव्यञ्जकभावेन संसर्गात्। **प्राप्तसंस्कारः** इति। शब्दस्याशक्तेः शक्त्याधानेन शक्तिप्रबोधेन वा पूर्ववत् संस्कारो योग्यः (संस्कारयोगः ?)। **उभयोः** अपि (इति ?)। द्वयोरप्येकैकस्य त्रिविधेन संस्कारेण। **सहकारिणा** इति। मे.... यथा व्याख्यातः। संस्कारं कुर्वन् सहकारित्वाद् ध्वनिः प्रतिपद्यते। **प्रदीप** इति। चक्षूरूपे[3] [4]ह्यालोकादिसंस्कृते यथा रूपोपलब्धौ निमित्तम्। न चायं ज्ञानोदय एव विधिः किं त्वन्यत्रापीति दर्शयति **शक्तयः** इति। निमित्तानि शक्तिमन्त्यपि सहकारिनिमित्तान्तराण्यपेक्षन्ते इति। यदाह—**निमित्तानां शक्तयः सहकारिनिमित्तान्तरापेक्षया**[5] **समग्रतां** [6]**नातिक्रामन्ति** इति। यदि सामग्र्येऽपि कार्यं न स्यात्, वैकल्येऽपि च स्यात् ततोऽतिक्रमः, न चैवम् इति ॥ ७८ ॥

इन्द्रियस्यैव इति। न विषयस्य। **समाधान** इति। समाधानं चेतसोऽभिसंस्कारः। अञ्जनद्रव्यमितरच्च। आदिग्रहणात् पादाभ्यङ्गादि। **विषयस्य** इति। द्रव्यस्य। **तद्गन्ध** इति। द्रव्यस्य यो गन्धः तस्य प्रतिपत्तये प्रबोधाय।

प्राकृतम् इति। लौकिकम्। यदर्वाग्दर्शनानाम्। विषयान्तरोपसंहारेण। सूक्ष्मविप्रकृष्टाभिमतमुदकं जत्वादिवस्त्विति [1]चिकीर्णमाणतां। मनसः समाधानमलौकिकं वक्ष्यति [2]यद् दिव्यदर्शनानाम्। **विषयात्मनि** इति। यदि विषयात्मनि संस्कारो

---

3. ACD रूपेण. 4. CD व्यालोका हि सं°. 5. ABCD °न्तरापेक्षः सत्यां समग्रतरं. 6. CD नातिपतन्ति. 1. B चिकीर्षमाणां यदि. 2. ABCD यदि.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रसज्येत। विशेषाभावात्। विषयसंस्कारस्तु तैलादीनामातपादिभिः पृथिव्याश्चोदकेन गन्धप्रतिपत्तिकाले दृष्टो न घ्राणेन्द्रियस्य। घ्राणेन्द्रियसंस्कारे तु संस्कृतासंस्कृतेषु विषयेषु प्रतिपत्तिभेदो न स्यात्। विशेषाभावात् ॥ ७९ ॥

चक्षुषः प्राप्यकारित्वे तेजसा तु द्वयोरपि।
विषयेन्द्रिययोरिष्टः संस्कारः स क्रमो ध्वनेः ॥ ८० ॥

इहालोकानुगृहीतं घटादिविषयं सन्तमसेऽवस्थितोऽयं प्रतिपद्यते। तत्र येषामप्राप्यकारि चक्षुस्तेषामालोकेन विषयः प्रायेणानुगृह्यते। प्राप्यकारित्वे तु चक्षुषस्तुल्यजातीयेन तेजसा नयनरश्म्यनुग्रहः क्रियते ॥ ८० ॥

भेदेन, नियमेन सर्वैरेवासंस्कृतेन्द्रियैरप्युपलब्धिः स्यात्। विषयस्य संस्कृतत्वात्। तथा इति। [3]लोकेऽल्पप्रसिद्धमेतदिति **अलौकिकम्** इति। प्राकृतं प्रसिद्धत्वान्न व्याचष्टे। **सूक्ष्म** इति। सूक्ष्मशब्देनात्र यो[4] .... पलब्धानां दिव्यदृशामेवेन्द्रियगोचरः स उपात्तः। [5]**अन्यैः** इति। अलब्धाभिज्ञैः। **विशेषाभावाद्** इति। विषयस्य। **तैलादीनाम्** इति। गन्धतैलादीनाम्। आदिशब्दात् पृथिव्यादीनाम्। **आतपादिभिः** इति। आदित्यरश्मिभिः। (आदि ?) शब्दादु(दु ?)दकसेचनादिभिः। आतपेन [6]तैलगन्धोपसंस्कारो [7]नेन्द्रियस्य, छायान्धैरपि तद्गन्धग्रहणात्। **संस्कृतासंस्कृतेषु** इति। सर्वविषयोपलक्षणमेतत्। न पुनरिन्द्रियसंस्कारवादिनः संस्कृतो विषयोऽस्ति ॥ ७९ ॥

प्राप्यकारित्वे इति। येषां प्राप्यकारीन्द्रियमिति दर्शनम्। **पक्ष** (क्रम ?) इति। उभयसंस्कारो ध्वनिना क्रियते इति।

आलोकानुगृहीतम् इति। आलोकेन विषयानुग्रहे विप्रतिपत्तिरेव नास्ति। **सन्तमसे** इति। सन्तते तमसि। **येषामप्राप्यकारि** इति। अप्राप्यकारिपक्षे सन्तमसावस्थितस्यालोकेन चक्षुषः [1]असंबन्धान्नानुग्रहः। [2]संबद्धस्तु विषय एव संस्क्रियते। **तुल्यजातीयेन** इति। चक्षुस्तेजोमयम्। तत्र द्वे दर्शने बुद्बुदमानं रश्मिमात्रं वेति। तत्र यदा सन्तमसेऽवस्थितो भिन्नदेश आलोके [3]स्थितं द्रव्यमुपलभते तदा नयनरश्मयः सूक्ष्मा नयनात् सन्ततं निर्गत्य व्यापित्वात्तेजःपरमाणूनामन्तरालवर्तिभिस्तेजःपरमाणुभिः संबध्यमानाः सूक्ष्मतरं रश्मिद्रव्यान्तरं पृथक्प्रमारभमाणास्तावद् गच्छन्ति यावदालोकः। ततस्तेन संस्कारस्तेषां रश्मीनामिति। यदा **नयनरश्म्यनुग्रहः** इति ततः संस्कृतमिन्द्रियं संस्कृतविषयं गृह्णातीति ॥ ८० ॥

---

3. ABCD लौकिके. 4. C °त्र चोपल°. 5. A अन्येऽन्यैः, B अन्यैरन्यैः.
6. A °गन्धः सं°, D °गन्धोऽसंस्का°. 7. ABCD नेन्द्रियैः.
1. B उपसंबन्धा°, ACD उपसन्धानानु°. 2. ABCD संबन्धस्तु. 3. ABD सन्तता.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्फोटरूपाविभागेन ध्वनेर्ग्रहणमिष्यते ।
कैश्चिद्ध्वनिरसंवेद्यः स्वतन्त्रोऽन्यैः प्रकल्पितः ॥ ८१ ॥

अथापरेऽभिव्यक्तिवादिनां त्रयो दर्शनभेदाः। शब्देन संसृष्टो ध्वनिरुपाश्रयानुराग इव स्फटिकादीनामविभक्त उपलभ्यते। केषाञ्चित्तु यथेन्द्रियाणीन्द्रियगुणाश्चासंवेद्यरूपा एव विषयोपलब्धिहेतवस्तथायं ध्वनिरनुगृह्यमाणरूपः शब्दग्रहे निमित्तं भवति। अन्ये त्वाहुः—दृष्टा केवलस्य ध्वनेः स्फोटरूपानवधारणे दूरादुपलब्धिः। शब्दोपलब्धिकल्प एवासावित्यपरे। तद्यथा—मरुष्वपचितपरिमाणानां द्रव्याणां परि-

---

स तु ध्वनिर्यथाभिव्यञ्जकस्तत्र दर्शनभेदानाख्यातुकाम आह **स्फोटरूपाविभागेन** इति। अविभक्त एव स्फोटाद् ध्वनिर्गृह्यते इत्येके। अगृह्यमाण एव ध्वनिरभिव्यञ्जक इत्यपरे। केवलोऽपि ध्वनिः स्वतन्त्रवद् भाव्यत इत्यपरे।

संसृष्टः इति। संबद्धः। **अविभक्तः** इति। एकतां गतः। यथोपधानोपरक्तो रक्तस्फटिको न ततो विवेकेनावधारयितुं शक्यः तथा स्फोटेन [1]संसृष्टो ध्वनिर्न विवेकेनावधार्यत इत्यपरे। यथेन्द्रियाण्यसंवेद्यमानान्येव[2] ज्ञानहेतवः। **इन्द्रियगुणाः** इति। येषां दर्शनं भौतिकानीन्द्रियाणीति। भौतिकत्वेऽपीन्द्रियाणां तत्तद्भूयस्त्वेन तदाश्रिता रूपादयः समानजातीयरूपादिग्रहणहेतवः। तदुक्तम्

"भूयस्त्वाद् गन्धवत्त्वाच्च पृथिवी गन्धवत्त्वज्ञाने हेतुः"

इति। तत्र यथा घ्राणेन्द्रियस्य पृथिवीभूयिष्ठगन्धवत्त्वात् समवेतो गन्धस्तत्समवायिकारणमिन्द्रियमनुगृह्णन् गन्धोपलब्धेर्निमित्तम्। न च समवेतो गन्धः संवेद्यते। तथा ध्वनिरसंवेदित एवान्येनोपायेन स्फोटोपलब्धेर्निमित्तं भवतीति। **दृष्टा** इति। अर्थप्रकाशं हि विभक्तगन्धादिशब्दकं यदारूपमवधार्यते तदा स्फोटोपलब्धिः। यदा त्वनवधारिताकारध्वनिमात्रमुपलभ्यते तदानवधृत एव स्फोटे ध्वन्युपलब्धिः। यदाह **दूराद्** इति। एतस्यानन्तरस्यायुक्ततामाह **शब्दोपलब्धि** इति। स्फोटोपलब्धिरेण (ब्धेरेवाप?) रिसमाप्तिः सा यत् आरूपमात्रन्तु स्फोटस्य परिच्छिन्दन्[नः?]विशेषमवधारयति। एतदेव [3]दृष्टान्तेन स्पष्टयति **मरुषु** इति। मरुषु स्वल्पमपि द्रव्यं [4]पर्वतपरिमाणं दृश्यते। **चन्द्रादीनां** च इति। महापरिमाणाश्चन्द्रमण्डलादयः श्रूयन्ते। अपचितपरिमाणाश्च दृश्यन्ते। तदेवं यथा देशविशेषोपसंबन्धादाकारान्तरव्यवस्थितानामाकारान्तरेण ग्रहणं

---

1. A संस्पृष्टो.
2. AD °द्यमाद्येव.
3. AD दर्शनेन.
4. AD °परमाणुर्द°.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

माणोपचयग्रहणं दृष्टम्, चन्द्रादीनां च परिमाणापचयग्रहणम्, वृक्षाद्यारूपग्रहणं च, शकलकोटरादीनां सामान्यविशेषाणां च धवखदिरादीनामप्रतिपत्तिः ॥ ८१ ॥

यथानुवाकः श्लोको वा सोढत्वमुपगच्छति ।
आवृत्त्या न तु स ग्रन्थः प्रत्यावृत्ति निरूप्यते ॥ ८२ ॥

वर्णपदवाक्यविषयाः प्रयत्नविशेषसाध्या ध्वनयो वर्णपदवाक्याख्यान् स्फोटान् पुनः पुनराविर्भावयन्तो बुद्धिष्वध्यारोपयन्ति। क्रमेण तु वर्णतुरीयग्रहणे सति समु-

---

तथा स्फोटो विभक्तेन रूपेण स्थितः आरूपेण परिच्छिद्यत इति। वृक्षाद्यारूपग्रहणं च इति। यथा दूरादुपलभ्यमाना वृक्षादयो न सर्वकारकाः परिच्छिद्यन्ते शकलादीनां सतामपि सामान्यविशेषाणां च खदिरत्वादीनामनवधारणादेवमारूपमात्रं स्फोटस्य दूरादुपलभ्यते, तदेव समीपे विशेषेणेति ॥ ८१ ॥

तत्र यद्येको ध्वनिस्तदभिव्यक्तिसमर्थो द्वितीयध्वन्युच्चारणानर्थक्यम्। [1]अथान्त्यः सर्वेषामसामर्थ्यम्। अविशेषात्। स [2]एकैकमुच्चार्यते, समुदायोऽपि नास्तीति [3]कथमभिव्यक्तिरित्याशङ्क्याह यथानुवाकः इति। सोढत्वम् इति। स्मृतिबुद्धेरेकस्या विषयभावम्। बुद्धावेकस्यां तद्रूपमारोहतीति तत् संगृह्यते। कथमित्याह आवृत्त्या इति। उच्चारणस्य। पौनःपुन्येनोच्चारणमावृत्तिः। प्राप्तविषयायां बुद्धावेकस्यामवस्थानात्। न तु इति। नैकस्यामावृत्तौ स ग्रन्थस्तथापि निरूप्यते, आरूपमात्रेण तूत्तरविशेषानुगुणेन गृह्यते। [4]एवमत्राप्यनवधारणमिति। अस्योत्तरश्लोके तथेत्यनेन संबन्धः।

तत्र श्लोकोपात्तं दृष्टान्तं विभज्य दार्ष्टान्तिकं भाष्ये विभजति वर्णपद इति। वर्णपदवाक्यस्फोटाभिव्यक्तिहेतुत्वाद् ध्वनयः तद्विषया उच्यन्ते। प्रयत्नविशेषसाध्याः इति। प्रयत्नविशेषनिष्पाद्याः। गोशब्दमुच्चारयिष्यामीति गोशब्दविषयेण प्रयत्नेन जन्यमानो गकारध्वनिर्भिद्यते गवयशब्दद्योतकाद् गकारध्वनेः। कारणभेदो हि भेदकः पदार्थानामिति। पुनः पुनः इति। एकैको ध्वनिः कृत्स्नं स्फोटमभिव्यनक्ति। आविर्भावयन्तः इति। द्योतयन्तः। अध्यारोपयन्ति इति। बुद्धिविषयतां नयन्ति इति। [5]एवमावृत्त्या प्रकाशनं स्फुटदर्शनम्। तस्मादेकैकेन ध्वनिना निरवयवं कृत्स्नस्फोटोऽभिव्यज्यत इत्यभ्युपगन्तव्यम्। भागशस्त्वभिव्यक्तावुत्पत्तौ च दोषं ददाति क्रमेण तु इति। वर्णतुरीयग्रहणे इति। उत्पत्तिपक्षे तावद्वर्णत्रिभागाः परमाणुकल्पाः

---

1. AD अथार्थः. 2. ABD स एवैक उ°. 3. AD अव्यक्ति.
4. B एवमाभूदन्तेऽप्यव°, D एवमात्रादन्तोऽप्यव°.
5. A आहत्य, B आंह्वत्या, D आद्धृत्य.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दायाभावादविषयत्वमन्त्याया बुद्धेः प्राप्नोतीति संहितासूत्रभाष्यविवरणे बहुधा विचारितम्। कृत्स्नमपि शब्दरूपं प्रकाशीकृतं यावदस्वीकृताकारमनुपगृहीतविशेषं बुद्धावसंनिविष्टं तावदनुपलब्धेनैव तेन व्यवहारो न कश्चिदपि प्रकल्पते ॥ ८२ ॥

प्रत्ययैरनुपाख्येयैर्ग्रहणानुगुणैस्तथा ।
ध्वनिप्रकाशिते शब्दे स्वरूपमवधार्यते ॥ ८३ ॥

व्यक्तरूपग्रहणानुगुणा अनुपाख्येयाकारा बहवः उपायभूताः प्रत्यया ध्वनिभिः प्रकाश्यमाने शब्दे समुत्पद्यमानाः शब्दस्वरूपावग्रहहेतवो भवन्ति ॥ ८३ ॥

क्रमोत्पन्नाः अतीन्द्रियाः एवेति समुदायग्रहणाभावान्निर्विषयत्वं सुगममेव। अथ निरवयववर्णपक्षो वर्णभागानां चेन्द्रियगम्यत्वं स्यात् तथापि तेषां क्रमोत्पादादनन्तरं विनष्टत्वाच्च समुदायभावस्मृतिरपि न। सति प्रत्येकमनुभवे समुदायस्मृत्ययोगात्। न चापि तेषां स्मृतिबीजाधाने शक्तिः, तद्विषयाणामपाटवादभ्यासाभावाच्च। अथापि निरवयववर्णा ध्वनिभिर्व्यज्यन्ते तथाप्यभिव्यञ्जकेन व्यङ्ग्यग्रहणादन्ते च तेषां समुदितानां व्यञ्जनानामभावात् कुतः सकलशब्दग्रहणम्। एवं भागवत्यपि स्फोटे भागशोऽभिव्यक्तौ वाच्यम्। अथापि पूर्वपूर्ववर्णोऽभिव्यक्त उत्तरोत्तरस्मिन् वर्णे संस्कारमाधत्ते यावदन्त्यो वर्ण इति तदालम्बना बुद्धिः समस्तशब्दाकारा आविर्भविष्यतीत्येतदपि नास्ति। यतोऽभिव्यक्तः संस्कारमाधत्ते। यदा च स उत्तरोऽनभिव्यक्तस्तदा क्व संस्काराधानम्। यदा च स उत्तरोऽभिव्यज्यते तदा पूर्वोऽनभिव्यक्त इति कः संस्कारमादध्यात्। स्वाभिव्यक्ते संस्काराधानं नानभिव्यक्ते, नित्यत्वात्, सर्वैः सर्वत्राधानप्रसङ्गात्। **अन्त्यायाः** इति। समस्तशब्दाकारायाः पश्चिमध्वन्यभिव्यक्तशब्दावग्रहाया विषयो न स्यात् **समुदायाभावाद्** इति। **विचारितम्** इति।

"परः सन्निकर्षः ...." (P. 1.4.109.)

इत्यत्रायमर्थो निरूपित एव। यदि प्रथमध्वनिभागेन सकलस्य स्फोटस्य व्यक्तिः कथं [6]तदाकारावग्रहस्तदा नास्तीत्याह **कृत्स्नमपि** इति। [7]**अस्वीकृताकारम्** इति। बुद्ध्यावनरोहान्न स्वीकृतः। किमर्थं तर्ह्युच्चारणं प्रथमस्येत्याह **अनुपगृहीतविशेषम्** इति। आरो-(रू?)पमात्रग्रहणाद्विशिष्टरूपाग्रहणम्। कथमस्वीकृताकार उपग्रहश्चेत्याह **बुद्धौ** इति। **अनुपलब्धेन** इति। स्फोटरूपानुपलम्भादारो(रू?)पमात्रोपलम्भाच्च तेन न व्यवहारः ॥ ८२ ॥

तदेवाह **प्रत्ययैः** इत्यादिना। **अनुपाख्येयैः** इति। इदं तदिति तस्य बुद्ध्यारूढस्याख्यातुमशक्यत्वात्। **ग्रहणानुगुणैः** इति। ते प्रत्ययास्तस्य स्फोटस्याकारग्रहणानुकूलाः। के पुनस्ते प्रत्यया इत्याह **ध्वनिप्रकाशिते** इति। ध्वनिभिः प्रकाशिते शब्दे य उत्पद्यन्तेऽन्तरालवर्तिनः। **स्वरूपम्** इति। अवधारणम्। यतः स्फोटरूपमवधार्यत इति। तेन प्रत्ययास्तत्परिच्छेदहेतुरिति तथोक्ताः। न तु तत्परिच्छेदका एवेति ॥ ८३ ॥

---

6. AD तदन्ताकार°. 7. AD अस्वीकारमिति, B अस्थिकारकृताकारमिति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्र त्वयमाकारपरिग्रहक्रमः

नादैराहितबीजायामन्त्येन ध्वनिना सह।
आवृत्तपरिपाकायां बुद्धौ शब्दोऽवधार्यते ॥ ८४ ॥

नादैः शब्दात्मानमवद्योतयद्भिर्यथोत्तरोत्कर्षेणाधीयन्ते व्यक्तपरिच्छेदानुगुण-संस्कारभावनाबीजानि। ततश्चान्त्यो ध्वनिविशेषः परिच्छेदसंस्कारभावनाबीजवृत्ति-

---

[1]स्वरूपमवधार्यत इति व्याचष्टे **तत्र त्वयम्** इति। तथा यस्य (यथा तस्य?) स्फोटस्य रूपं बुद्धावारोहयति[2] तत्र प्रक्रियां वर्णयति **नादैः** इति। ध्वनिभिः। स्फोटम् अवद्योतयद्भिः इति। यत् स्फोटस्यात्मन्यवच्छिन्नं विशिष्टरूपं, तस्य ग्रहणेऽनुकूलास्तेऽन्तरालवर्तिनः प्रत्ययाः, तद्वशेन तस्योत्पत्तेः। [3]अथवा ध्वनिभिः स्फोटमवद्योतयद्भिरिति शेषः। **आहितबीजायाम्** इति। बीजानि शक्तयः, ता आधीयन्ते तस्यां शक्तिद्वारेण। **ध्वनिना सह** इति। तस्मिन् काले [4]**शब्दोऽवधार्यते** इति संबन्धः। **आवृत्तपरिपाकायाम्** इति। आवृत्तः परिपाको यस्याः इति। परिपाकः कार्योत्पादनं प्रति विशिष्ट आत्मलाभः। स च [5]बीजानामपि वर्तते। [6]सहसन्निधानात्। यतः प्रतिध्वनिविभागं विशेषप्रतिपत्तेः तस्य वृत्तिलाभः, अन्त्यध्वनिकाले[7] चावस्थानात् कालान्तरावभासोऽप्यस्ति। स तु बीजानामपि परिपाको बुद्धेरव्यतिरेकात् बीजानां बुद्धेरेव संबन्धित्वेनोपात्तः, न तु बुद्धेः परिपाकः। आवृत्तः परिपाको यस्यामिति विग्रहः।

यथोत्तरोत्कर्षेण इति। प्रथमेन भावेनाभिव्यक्ते स्फोट आरूपमात्रग्रहणेन बीजाधानम्। तत उत्तरोत्तरेण विशिष्टतररूपग्रहणेन[8] बीजाधानम्। **व्यक्तपरिच्छेद** इति। व्यक्तपरिच्छेदो विशिष्टस्वरूपावधारणम्। व्यक्तस्य वा स्फोटस्य परिच्छेदः। **संस्कारभावना** इति। शक्तय एवाधीयन्ते। तास्तु संस्कारादिशब्दैरुच्यन्ते। तथा हि। शक्तयः चेतः संस्कुर्वन्ति विशिष्टं जनयन्तीति संस्कारशब्दोक्ताः। तद्रूपभावनं च भावना। यतश्चेतनेनाकारेण भावयन्ति। विशिष्टोत्तरबुद्धिजनकत्वेन बीजानि, तेन संस्कारश्चासौ भावना च बीजं चेति समानाधिकरणसमासः। **परिच्छेद** इति। पूर्वं

---

1. BL °नुरूपाः. 2. ABD व्यक्तिरूपरूपम°, AD °द्धावाहयति.
3. BD अनु वा, A अनुपमध्व°.
4. ABD at this point rep. इति व्याचष्टे तत्र त्वयम् इति ... ध्वनिभिः स्फोटमवद्योतयद्भिः.
5. ABD °नामावर्तते। 6. A सहायसन्नि°, BD सहायसहामसन्नि°.
7. ABD °कालं. 8. ABD °ग्रहणवी°.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लाभप्राप्तयोग्यतापरिपाकायां बुद्धावुपग्रहेण शब्दस्वरूपाकारं संनिवेशयति ॥ ८४ ॥

असतश्चान्तराले याञ्छब्दानस्तीति मन्यते ।
प्रतिपत्तुरशक्तिः सा, ग्रहणोपाय एव सः ॥ ८५ ॥

इह निर्भागेष्वपूर्वापरेष्वभेद्येषु वर्णपदवाक्येषु ध्वनिनाभिव्यज्यमानेषु वर्णे तावद्वर्णावयवग्रहणसरूपा भागाभिनिवेशिन्य इव बुद्धय उपजायन्ते, पदे वर्णग्रहणसरूपाः, वाक्ये पदग्रहणसरूपाः। ताभिश्च बुद्धिभिरुपलब्धारो भागभूतानसतः

पूर्वं व्यक्तरूपा ये परिच्छेदास्तदाहितानि संस्कारभावनाबीजानि। पूर्ववत् स्फोटपरिच्छेदोपायाः संस्कारादयः इति। तेषां वृत्तिलाभो विशिष्टकार्योन्मुखता। [9]प्राप्त इति। योग्यतैवात्र परिपाकः, स प्राप्तो यया। स्फोटपरिच्छेदसमर्थेति यावत्। बुद्धौ सन्निवेशयतीति संबन्धः। उपग्रहेण इति। स्वीकारेण॥ ८४ ॥

यदि ध्वनिभागाः प्रत्येकं कृत्स्नमेव शब्दमभिव्यञ्जयन्ति कथमन्तरालेऽसमस्तशब्दग्रहणमित्याह असतश्च इति। नैव ते शब्दा विद्यन्ते। अन्तराले इति। स्पष्टशब्दग्रहणादर्वाक्। अस्तीति[इति]। ननु चास्तिक्रियायाः शब्दकर्तृकत्वात् बहुवचनप्रसङ्गः। निपाता अपि [1]त्रय एव, अस्ति स्तः सन्तीति विशिष्टसंख्याविषया एवेति न निपातः। एवं तर्हि शब्दा मन्यन्ते। कथमित्याह अस्ति इति। शब्दे [2]मननस्यारोपो[3]ऽस्तीति। ते तु तस्य मननस्य किं समुदायतोऽवयवतो वा कर्मेति निरूपणायामस्तीत्येकवचनश्रुतेः प्रत्येकमिति गम्यते। अशक्तिः इति। तेभ्योऽक्रमं स्फोटमवधारयितुं ध्वनिव्यतिरेकेणाक्षमाः। तत्संसर्गाच्चान्तराले प्रतिपत्तॄणां शब्दाभिमानः। ये तु व्युत्पन्नास्ते तस्मादेव प्रतिपद्यन्त इत्याह ग्रहणोपायः इति। तेषामप्ययमेव ग्रहणोपायो यदसतामन्तराले ग्रहणम्।

इह इति। भगवान्, निर्भागेषु अत एव अपूर्वापरेषु, बुद्धावप्यन्वयवशोऽ[4]सत्यत्वात् अभेद्येषु। वर्णावयवैः समानरूपाः। भागाभिनिवेशिन्य[5] इव इति। इवग्रहणं भागानामभिनिवेशस्यासत्यत्वात्। यद्यपि च न वर्णभागाः केचन सन्ति यैः सारूप्यम्, तथापि सरूपग्रहणं [6]सन्तो भागा इव दृश्यन्ते इति तन्त्रे प्रतिपादनार्थम्।

---

9. ABD प्राप्नोति.
1. D अपीति। य एवास्ति°.
2. AD शब्दमन°, B शब्दमौन°.
3. ABD °स्यारोस्ती°.
4. AB °शोत्यत्वात्, D °शोन्यत्वात्.
5. ABD भागास्तेभेदि(स्तेऽभि, स्तेदेभि)निवेद्य इव.
6. D असन्तो, D अन्मेन वा प्रदर्शनमाह विषयमिति, B अन्येन वा प्रदर्शनमानविषयमिति.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शब्दानस्तित्वेनाभिमन्यन्ते। सा खलु परप्रदर्शितविषयग्राहिणामशक्तिः प्रतिपत्तॄणाम्। तथाभूतोपायक्रमवर्णान्तरसाध्यमेव हि तेषां शब्ददर्शनम्। निष्क्रमं तु दाशतयमप्युपायान्तरेण प्रतिपद्यन्ते प्रतिपादयन्ति च ॥ ८५ ॥

भेदानुकारो ज्ञानस्य वाचश्चोपप्लवो ध्रुवः ।
क्रमोपसृष्टरूपा वाग् ज्ञानं ज्ञेयव्यपाश्रयम् ॥ ८६ ॥

अभिन्नमपि ज्ञानमरूपं सर्वज्ञेयोपग्राहित्वाद्भेदरूपतया प्रत्यवभासते पञ्च वृक्षा विंशतिर्गाव इति। संहृतसर्वबीजश्चायमान्तरः शब्दात्मा व्यञ्जकध्वनिभेदक्रमानुकारेणाविर्भावकाले प्रत्यवभासते। तेन चान्यभेदरूपोपग्रहणोपप्लुतं शब्दतत्त्वमेवेदं

अन्यथा वर्णेष्ववयवसरूपेत्येवं वाच्यं स्यात्, यथा **पदे वर्णग्रहणसरूपा** इति वक्ष्यति। **परप्रदर्शित** इति। परैः ध्वनिभिर्व्यञ्जकैरुपदर्शितं व्यक्तं विषयं स्फोटं ये ग्रहीतुं समर्थाः। अन्येन वा प्रदर्श्यमानविषयमिति नान्येन प्रकारेण ये प्रतिपद्यन्ये। यदाह **तथाभूत** इति। तथाभूत एवोपायो यः स एव क्रमः। ते साध्यताशयमिति(**दाशतयम्** इति ?) चतुःषष्टिः। **उपायान्तरेण** इति। विना क्रमेणोच्चारणेन ये ध्वनीनभिव्यञ्जकान् विना उपायान्तरेण त्वार्षेण ज्ञानेन पश्यन्ति। आराधिताश्च परप्रदर्शनेन परान् प्रतिपादयन्ति। सर्वत्र क्रममन्तरेण नास्ति ग्रहणमिति मन्यमानस्येदमुपायान्तरकथनेन व्यभिचाराख्यानं कथमस्य रूपमन्येनोपगृहीतमिति [7]दर्शनाय ॥ ८५ ॥

ज्ञेयव्यपाश्रयम् इति।

अभिन्नम् इति। एकत्वात्। **अरूपम्** इति। यत्तद्विषयकमभिन्नं रूपं ज्ञानस्य। तेषां परस्परतो ज्ञानेषु व्यभिचारात्। ततो [1]ज्ञानमरूपम्। **पञ्च वृक्षाः** इति। परस्परतो भिन्नाकाराः पञ्च वृक्षा एकया बुद्ध्या परिच्छिद्यन्ते। [2]यदा न विषयरूपबुद्धिर्वस्तुनः, प्रतिपद्यन्ते तदा पञ्च बुद्धयः। ततश्च प्रचितवस्तुप्रत्यवमर्शाभावः। अथैका बुद्धिस्तानेकतया गृह्णाति, वनादिविभागा[3]प्रतिपत्तिः। अतो बुद्धिरभिन्नापि विषयभेदमनुकरोति[4]। **संहृतसर्वबीजश्च** इति। सर्वेषां वाधिकारबीजानां तत्र विवृत्तानामवस्थानात्। **व्यञ्जकध्वनि** इति। [5]भेदक्रमरहितोऽपि व्यञ्जकध्वनेर्भेद[6]क्रममनुकुर्वन्नभिव्यक्तिकाले प्रत्यवभासते। **अन्यभेद** इति। अन्यस्य [7]विषयस्य यद् भेदरूपं तदुपग्रहेण।

---

7. ABD दर्शन. 1. ABD ज्ञानस्य रू°. 2. ABD न यदि.
3. BD °भागाः प्रति°, 4. ABD °दमनु. 5. AD भेदकृतमरहि°,
6. AD भेदकृतमानुकु°. 7. D भेदविषयस्य.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वाङ्मनसाख्यमविभागमन्यथा प्रतीयत इति। एवं ह्याह

> ज्ञेयेन न विना ज्ञानं व्यवहारेऽवतिष्ठते।
> नालब्धक्रमया वाचा कश्चिदर्थोऽभिधीयते ॥ ८६ ॥
> यथाद्यसंख्याग्रहणमुपायः प्रतिपत्तये।
> संख्यान्तराणां भेदेऽपि तथा शब्दान्तरश्रुतिः ॥ ८७ ॥

यथा शतसंख्यां सहस्रसंख्यां वा भेदिकामाश्रयस्य प्रतिपित्समानः तदुपायभूतानेकत्वादीन् भिन्नकार्याञ्शतादीनामवयवानिव प्रतिपद्यते तथा देवदत्तादिशब्दान्तरश्रुतिपरिच्छेदोपाया वाक्यरूपप्रतिपत्तिरिति नान्तरीयकं तासामुपादानम् ॥ ८७ ॥

> प्रत्येकं व्यञ्जका भिन्ना वर्णवाक्यपदेषु ये।
> तेषामत्यन्तभेदेऽपि सङ्कीर्णा इव शक्तयः ॥ ८८ ॥

---

[8]शब्दतत्त्वम् इति सर्वबीजां बुद्धिमाह। वाङ्मनस इति। तदेव शब्दत्वाद् ध्वनिनोपप्लुतं [9]वागित्युच्यते। विषयोपपत्तितः। ज्ञेयेन न विना इति। न ज्ञेयरूपोपरागमन्तरेण ज्ञानेन शुद्धेन व्यवह्रियते। [10]परिशुद्धज्ञाना अपि [11]न तेन व्यवहरन्ति। तथापि (वाचापि ?) क्रमरहितया नास्ति व्यवहार इति ॥ ८६ ॥

कथमत्यन्तविलक्षणप्रतिपत्त्युपाय इत्याह यथाद्यसंख्य इति। यथान्येषां संख्याभेदानामर्थान्तरभूता आद्या पूर्वा संख्या ग्रहणोपायः। भेदेऽपि इति। वैलक्षण्येऽपि[1]। तथा देवदत्तादिश्रुतिर्वाक्यप्रतिपत्तौ।

भेदिकाम् इति। व्यवच्छेदिकाम्। भेदापोद्धारविलक्षणत्वात् संख्या स्वाश्रयमाश्रयान्तरेभ्यो भिनत्ति एको द्वौ इति। [2]भिन्नकार्यान् इति। कार्यभेदेन वैलक्षण्यमाह। स्वानुरूपाभिधानप्रत्ययौ[3] कार्यतश्च भिद्येते। अवयवानिव इति। एकत्वादिसङ्घातमिव पश्यति। वैशेषिकदर्शनसमाश्रयेण चेह दृष्टान्तः, यतो व्यावृत्तलक्षणाः परस्परतः संख्या इति। तथा देवदत्तादि इति। [4]देवदत्त गामभ्याजेत्यन्ते वाक्ये वाक्यभिन्नलक्षणानि देवदत्तादिपदानि [5]वाक्योपायभूतानीति ॥ ८७ ॥

भवन्तु नाम ध्वनयस्तस्य प्रतिपत्तावुपायः। ते तु [1]विलक्षणास्तमात्मरूपनिवेशनेन कथं गमयन्ति। न हि धूमोऽग्निं प्रतिपादयन् धूमरूपतामापाद्य प्रतिपादयतीत्याशङ्क्याह

---

8. ABD शब्दत्वम्. 9. ABD वाचीत्यु°. 10. B परिशुद्धानामपि.
11. B ins. परिशुद्धिमन्ता वा before न and A ins. परिशुद्धज्ञावपि before न.
1. AB वैलक्षण्ये वितथेऽपि. 2. BD भिन्नकार्याविति.
3. D °प्रत्ययेन. 4. BD देवदत्तमभ्याज्यन्ते. 5. BD अथवोपायभूतानि,
1. A तेत्वि°, B तेत्यपिल°, C ते वि°, L तेत्वत्यन्तविल°.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वर्णपदवाक्यविषया हि विशिष्टाः प्रयत्नास्तत्प्रेरिताश्च वायवः स्थानान्यभिघ्नन्ति। स्थानाभिघातप्राप्तसंस्काराश्च ध्वनयो यद्यपि परस्परव्यावृत्तस्वभावास्तथापि गोगवयजात्युपव्यञ्जनवद् भ्रमणरेचनादिकर्मसामान्यविशेषाश्रयवच्च तेषामुपव्यञ्जनानां दुर्ज्ञानो भेदः। सामान्यमात्रया कयाचिदनुगतः प्रविभक्तकार्याणामपि शक्तीनामात्मा कुतश्चित् कार्यविशेषात् संकरेणैवावस्थितः। ततश्चायं निरवयवेषु

प्रत्येकम् इति। वर्णपदवाक्यव्यञ्जका ध्वनयः परस्परविलक्षणाः। **सङ्कीर्णाः इव** इति। तस्य भेदस्यानवबोधादेकरूपा इव। **शक्तयः** इति। [2]ध्वनीनां यानि सामर्थ्यानि।

विशिष्टाः इति। एवं शब्दमुच्चारयामीति विषयाकारावग्रहस्य भिन्नत्वाद् भिद्यन्ते शब्दाः। **तत्प्रेरिताः** इति। विशिष्टा इत्यनुवर्तते। तेऽपि च वायवो [3]भिन्नप्रयत्नप्रेरिता भिद्यन्ते। ततो [4]नियतस्थानाभिघातात्तत्रानेको वायुः प्रयत्नप्रेरित इत्यवच्छिनत्ति [5]**स्थान** इति। स्थानाभिघातनियतोऽसौ वायुरिति। अनेन च विशिष्टस्थानाभिघातेन कार्येण वायोर्भेदमाचष्टे। **व्यावृत्तस्वभावाः** इति कारणभेदेन ध्वनीनां भेदमाह। यतोऽन्य एव ध्वनिर्गकारस्य व्यञ्जकोऽन्यो गोशब्दस्य, अत्यन्तभिन्नो गामभ्याजेत्यस्य, मनागपि [न ?] समन्वयोऽस्ति। **तथापि तेषामुपव्यञ्जन**ध्वनीनां **दुर्ज्ञानो भेदः** इति संबन्धः। तत्र हेतुमाह **सामान्यमात्रया** इति। वस्तुभूतसामान्यं तेष्वन्त्य (त्यन्त ?) सादृश्यस्खलितबुद्धयस्तथा पश्यन्तो वस्तुत्वेनानुगमं पश्यन्ति। [6]विपर्यासस्तु भवति। यदाह **कयाचिद्** इति। केचिदेव सदृशज्ञानहेतव इति। दृष्टान्तमाह **गोगवयजाति** इति। यथा गोगवयजात्युपव्यञ्जनानां पिण्डावयवानां संस्थानस्य संयोगविभागानां वात्यन्तभेदात् सत्यप्यनुगमभावे दुर्ज्ञानत्वाद्भेदस्य भवति सदृशप्रत्ययः। पिण्डयोरनेकावयवत्वे संभाव्येताप्यवयवानुषङ्ग इत्याह **भ्रमणरेचन** इति। भ्रमणे रेचने च कर्म तदेव स्वस्य सामान्यविशेषस्याश्रय इति भ्रमणादिव्यपदेशः सामान्यस्यापि संभवतीत्येवं विशेषितम्। यथभ्रमणरेचनक्षणयोर्भिन्नभिन्नसामान्यान्वितयोरपि दुर्ज्ञानो भेद इति। ततः किमित्याह [7]**प्रविभक्तकार्याणाम्** इति। वर्णजन्याभिव्यक्तिः कार्यम्, तच्च तेषां ध्वनीना विभक्तम्। **कार्यविशेषाद्** इति। वर्णाद्यभिव्यक्तेरन्यत् प्रत्ययाभेदलक्षणं कार्यम्। [8]**संकरेणैव** इति। सादृश्यकल्पनया गौरित्येतदभिव्यञ्जके ध्वनौ गकारस्फोटव्यञ्जक-

---

2. AB ध्वनिना या यानि सा°, D ध्वनिना मानि सा°.

3. AD निःप्रवर्तन प्रे°; B °वोभिःप्रवर्तेतेन प्रे°.

4. A om. तत्रानेको ... स्थानेति. D anticipates नियतोऽसौ वायुरिति। अनेन च विशिष्टस्थानाभिघात before तत्रानेको°. 5. ABD मानिति.

6. ABD °र्यासात्तु. 7. ABD प्रविमुक्तका°. 8. ABD संस्कारेणैव.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वर्णेषु मात्राविभागाध्यवसायः, पदेषु च वर्णविभागाध्यवसायः, वाक्येषु च पदविभागाध्यवसाय इति ॥ ८८ ॥

यथैव दर्शनैः पूर्वैर्दूरात् सन्तमसेऽपि वा ।
अन्यथाकृत्य विषयमन्यथैवाध्यवस्यति ॥ ८९ ॥

यथा विषयेन्द्रियधर्म एवायं प्राकृतचक्षुषां दूरादाकृतिमात्रोपलब्धौ वृक्षादीन् हस्त्यादिवत् प्रतिपद्यन्ते। तद्देशावस्थिता एव प्रणिधानाभ्यासात् क्रमेण पुनर्यथावयवमुपलभन्ते। व्यक्तालोकाच्च देशात् सहसा मन्दसन्निविष्टप्रकाशान् अपवरकादीन् प्रविश्य रज्ज्वादीन् सर्पादिवत् प्रतिपद्य तथैव प्रणिधानाभ्यासाच्चक्षुषि प्रकृतिस्थे यथावदुपलभन्ते ॥ ८९ ॥

---

[9]ध्वनिमुत्प्रेक्ष्य गकारं तत्र व्यज्यमानं पश्यन्ति। अतो गकारादिवर्णरूपाविभागेन[10] स्फोटमवस्यन्ति। तथा गामभ्याजेति वाक्यव्यञ्जके ध्वनौ गोस्फोटव्यञ्जकध्वनिशक्तिमध्यारोप्य तत्र पदाध्यवसाय इति। **मात्राविभाग** इति। ह्रस्वाद्यवसायः। अयं हि शक्तीनां संकरो यत् पदव्यञ्जकशक्तिं वर्णव्यञ्जिकामपि कल्पयन्ति। तत्कल्पनावशाच्च वर्णव्यञ्जका एव संहताः पदव्यञ्जकाः, ते संहता वाक्यव्यञ्जका इति विपर्यस्यति ॥ ८८ ॥

कथमतद्रूपस्तदा(था ?)वसीयते। निदर्शनेऽप्येतच्चिन्त्यमेवेत्यत्यन्तप्रसिद्धं प्रतिपाद्यनिदर्शनमाह **यथैव** इति। व्यज्यमाने तथेत्युत्तरश्लोके संबन्धः। **पूर्वैः** इति। .... अस्पष्टार्थभासिनः प्राग् ये ....। **दूराद्** इति। अध्वनः प्रकर्षे। **सन्तमसे** इति। [1]अन्धकारे। **अन्यथाकृत्य** इति। अन्यथा कृत्यं कार्यमस्य विषयस्य सोऽन्यथाकृत्यो विषयः स्वाकारात्मानुकारिप्रत्ययजननसमर्थः। अथवा अन्यथाकृत्य परिच्छिद्य। एतदाह। यथा दूरावस्थितोऽन्धकारावस्थितश्च विषयोऽन्यथा प्रथममवसीयत इति।

विषयेन्द्रिय इति। [2]नावश्यमिन्द्रियं यथावस्थितमेव विषयं पश्यति। अन्यथोपादानसामर्थ्यमपि तयोर्विद्यते। **प्राकृतचक्षुषाम्** इति। असत .... तद्दर्शनम्। [3]**आकृतिमात्र** इति। [4]अवयवप्रविभागाग्रहणात्। ननु देशविप्रकर्षः तत्र कारणमित्याह[5]। **तद्देशावस्थिताः** इति। दूरदेशावस्थिता एव। **प्रणिधानाभ्यासात्** इति। यत्नात्तत्रैवेन्द्रियोपसंहारः प्रणिधानम्, तस्य पौनःपुन्यमभ्यासः। तेन च ज्ञानाभ्यास एवेति। **मन्दसन्निविष्ट** इति। मन्दसन्निविष्टः प्रकाशो येषु। **तथैव** इति। **क्रमेण** इत्यनेन संबन्धः। **प्रकृतिस्थे**। [6]आतपाहितविकारापगमात् ॥ ८९ ॥

---

9. D °ध्वनिशक्तिमु°. 10. ABD °रूपविभागेनापि भागरूपेण. 1. ABD समन्धकारे.
2. ABD क्वावश्यं, B कापश्यं. 3. ABD आरोपमा° 4. ABD °गग्रहणा.
5. ABD °गमाह. 6. L उत्पाताहित°, B अततपाहित°, D अततपातित°,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्यज्यमाने तथा वाक्ये वाक्याभिव्यक्तिहेतुभिः ।
भागावग्रहरूपेण पूर्वं बुद्धिः प्रवर्तते ॥ ९० ॥

वाक्ये हि निर्भागे तदभिव्यक्तिविषयैः **प्रयत्नविशेषैः** समुत्थाप्यमाना ध्वनयः सत्यपि भेदे सामान्यशक्तिसमन्वयाद्वर्णपदप्रत्ययभासावग्रहरूपां बुद्धिं प्रवर्तयन्ति ॥ ९० ॥

यथानुपूर्वीनियमो विकारे क्षीरबीजयोः ।
तथैव प्रतिपत्तॄणां नियतो बुद्धिषु क्रमः ॥ ९१ ॥

यथा क्षीरमुत्पत्तिपक्षेऽभिव्यक्तिपक्षे वा सर्पिरादिविकारप्रयुक्तं नियतक्रमरूपैर्मण्डकादिभिरवस्थाविशेषैर्विशिष्टसंविज्ञानपदनिबन्धनैरसंविज्ञानपदैश्च युज्यमानं यथायथं प्रकृतिधर्मप्रत्यासत्तिमनुवर्तमानमन्यतमानुपूर्वीनियमानतिक्रमेण प्रयोजिकां विकारशक्तिं प्रदर्शयति। शाल्यादिबीजं च तण्डुलादिप्रधानविकारप्रयुक्तं नान्तरीयकैर्नालाङ्कुरादिभिरवस्थाविशेषैर्युज्यमानं प्रयोजकेन प्रधानविकारधर्मेण

वाक्ये इति। तस्यैव वाचकत्वं वक्ष्यति। **भागावग्रह** इति। प्रथमतो विपर्ययस्ततो भागग्रहणमिव।

प्रयत्नविशेषैः इति। ध्वनीनां विशिष्टतया विशिष्टग्रहणमेव युक्तं मन्यन्ते ॥ ९० ॥

यदि तर्ह्यसत्या एव भावाः कल्प्यन्ते, कल्पनाया अनियतत्वान्नियतौ रूपक्रमौ किंकृतौ। तथा हि। दूरतरे वृक्षं कश्चिद्धस्तीत्यपरो वल्मीक इति कल्पयतीत्यनियतः क्रम इत्याशङ्क्याह **यथानुपूर्वी** इति। व्यञ्जका ध्वनयो नियतक्रमा एव। ते न विपर्यस्ता उपायतां प्रतिपद्यन्ते। उपायौ च रूपक्रमनियमौ दृष्टान्तयतः तथैव तेऽपि विपर्यस्यन्तो निबन्धनमिति। **विकारे** इति। सर्पिस्तण्डुलादौ। **नियतः** इति। प्रथमतो गोशब्दाद्धि (गकारबुद्धिः ?) तत औकारविसर्जनीयबुद्धी इति।

सर्पिरादि इति। प्रधानं कार्यस्या(मा ?)त्मलाभाय कारणानि प्रयुङ्क्ते [1]**नियतक्रमरूपैः** इति। नियतक्रमो रूपो येषामिति। मतकः .... त्रिकमुत्तरकं संघातध्वनि। **संविज्ञानपदनिबन्धनैः** इति। एतान्येव मण्डकादीनि तेषामवस्थाविशेषाणां पदानि। एतेषामेव च येऽन्तरालविभागाः सूक्ष्मा अवस्थाविशेषाः, न तेषां वाचकोऽस्तीत्यसंविज्ञानपदाः। नैता अवस्था नैरन्तर्यं मणति। [2]**प्रकृतिधर्म** इति। विलक्षणकार्योत्पादेऽपि [3]स्वजात्यनतिक्रमात्। पूर्वस्या वा प्रकृतेर्यो धर्मः प्रत्यासन्नस्तमनुवर्तते। न द्रागित्य-

---

1. WW²L नियतरूपैः in the Vṛtti.
2. D पृथक्कृतिध°.
3. AD पिण्डजात्य°.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रत्यवभासते। तथैषामर्वाग्दर्शनानां प्रतिपत्तॄणां वाक्यस्वरूपग्रहणपूर्वकेण वाक्यार्थग्रहणेन प्रधानेन प्रयुक्तानां नियतोपाये साध्ये तस्मिन्नर्थे नियतक्रमपरिणामभागाकारप्रत्यवभासमात्रायुक्ता बुद्धयः प्रवर्तन्ते स्फोटेषु ॥ ९१ ॥

भागवत्स्वपि तेष्वेव रूपभेदो ध्वनेः क्रमात् ।
निर्भागेष्वभ्युपायो वा भागभेदप्रकल्पनम् ॥ ९२ ॥

येऽपि भेदवादिनो गौरिति गकारौकारविसर्जनीयमात्रमेव प्रतिपन्नाः, नान्यस्तद्व्यतिरिक्तो वर्णरूपग्रहणोपायग्राह्यो निर्भागः शब्दात्मा विद्यते इति मन्यन्ते नित्यत्वं च शब्दानामभ्युपगच्छन्ति तेषां क्रमेणाव्यपदेश्यवर्णतुरीयांशाभिव्यक्तौ

त्यन्तविलक्षणं कार्यं भवतीति। अनुत्पन्नम् इति। [4]अनतिक्रमाद् इति संबन्धः। **प्रधानविकार** इति। प्रधानं विकारस्तण्डुला एव [5]धर्मत्वेन बीजस्योक्ताः। [6]**प्रत्यवभासते** इति। तथा [7]परिणामात्। **अर्वाग्दर्शनानाम्** इति। ये क्रमसंस्पृष्टाया वाचकावहरन्ति (क्रमसंस्पृष्टया वाचा व्यवहरन्ति ?) समध्वनिभिराहिताः। दिव्यदृशस्त्वभिव्यञ्जकध्वनिरहितं निरवयवं स्फोटं पश्यन्ति। **प्रधानेन** इति। वाक्यार्थप्रतिपत्तिः प्रधानम्। **नियतक्रम** इति। नियतः क्रमो यस्य तस्य ये भागास्तदाकारप्रत्यवभासाः त एव मात्राः ताभिर्युक्ताः। **बुद्धयः** इति। वृक्ष इति पदं प्रथमतो वकाररूपेण परिणतमवभासते। तत ऋकाररूपेण, ततः ककाररूपेण, ततः षकाररूपेणेति। ततो वाक्यग्रहणपूर्विका वाक्यार्थप्रतिपत्तिरिति ॥ ९१ ॥

भागवत्सु इति। ये भागवन्तं स्फोटमास्थिताः। **रूपभेदः** इति। स्वभावभेदः भागाख्य इति। **ध्वनेः** इति। ते .... मविगतभेदत्यागेन ध्वनिभेदादेव भेदो यतः सन्नप्यनभिव्यक्तेः कारणम्। अभिव्यञ्जकान्त्यध्वनयः क्रमवत्कारणजाः तेषां क्रमानुरूपामेवाभिव्यक्तिं कुर्वन्ति इति दोषदर्शनात् पक्षान्तरमाह [1]**उपायो वा** इति। तत्रापि ध्वनिभेद [2]एवोपाय इति।

भेदवादिनः इति। ये वर्णसमाहारः पदं पदसमाहारो वाक्यमिति मन्यन्ते। **नित्यत्वं च** इति। कार्यपक्षेऽभिव्यक्त्यभावात् कस्य ध्वनिकृतो भेदः। **अव्यपदेश्य**

---

4. Though the Vṛtti has अनतिक्रयेण, all the Mss. of the Paddhati have अनतिक्रमात्.

5. L ins. परिणामरूपतया before धर्मत्वेन.

6. ABD प्रत्यवभासन्ते.

7. ABD तथा परिमाणात्.

1 The text in the Kā. is अभ्युपायो वा।

2. AD om. एव.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वरूपानवधारणमविषयत्वं चान्त्यस्य व्यक्तरूपोपग्राहिणः परिच्छेदस्य प्रसज्यते। यौगपद्येन तु सर्वावयवाभिव्यक्तौ श्रुत्यविशेषप्रसङ्गो गवे इति च वेग इति च, तेन इति च न ते इति च। तत्र शब्दान्तरेऽर्थान्तरसम्बन्धिनि नैवायं दोषः। तस्मिन्नपि तु शब्देऽभिव्यञ्जकध्वनिक्रमकृता भेदेन प्रतिपत्तिः। दृष्टो हि मण्डूकादिवसासंबद्धप्रदीपाभिव्यक्तेषु रज्ज्वादिषु सर्पादिप्रतिपत्तिभेदः। निर्भागेषु वा भागभेदप्रकल्पनाकृतशक्तिविशेषपरिग्रहा बुद्धयो यथोपायत्वं प्रतिपद्यन्ते तदनन्तरश्लोकेषु वर्णितम् ॥ ९२ ॥

इति। अपकर्षकाष्ठागतत्वाद् ध्वनिभागेषु न व्यपदेशः। ते [3]चास्यानुरूपमेव [4]भागमभिव्यञ्जयन्ति। ते च भागाः सूक्ष्मत्वादतीन्द्रियाः, इन्द्रियगम्या वा अव्यक्तगता इत्याह **स्वरूपानवधारणम्** इति। [5]**अविषयत्वं च** इति। निरवयववर्णाभिव्यक्तावपि साकल्याभावादुपव्यंजकानां तदानीमविषयत्वं व्याख्यातम्। अथ नित्यत्वाद्यौगपद्येन स्थितानां यौगपद्येनैकैको ध्वनिरुत्तरोत्तरोत्कर्षेणाभिव्यञ्जक इत्याह **यौगपद्येन तु** इति। **श्रुत्यविशेष** इति। वेगगवेशब्दयोः स एव वर्णस्फोटः, केवलमानुपूर्वी भिद्यते [6]सा च कालकृता, नित्यत्वात् स्वतो नास्ति। यौगपद्येनाभिव्यक्तेर्ध्वनिकृतापि नास्तीति [7]सदोषत्वात्सावयवपक्षस्य पक्षान्तरमवश्यमभ्युपेतव्यम्। यदाह [8]**शब्दान्तर** इति। यत्र [9]वर्णेतरस्फोटः तत्र कथं भागावसाय इत्याह **व्यञ्जकध्वनि** इति। व्यञ्जकानां ध्वनीनां यः क्रमस्तद्गतः। कथमन्यगतेन भेदेनान्यत्र भेदावसाय इत्याह **दृष्टो हि** इति। यथा [10]असक्ता[11]ज्यातिच्छत्रतैलमण्डूकपूर्वगर्भालक्तकवर्तिप्रज्वलितप्रदीपाभिव्यक्तानि दीर्घसन्निवेशद्रव्याणि अपवरकादिषु सर्पवद् दृश्यन्ते। अनेनाभिव्यञ्जकवशादन्यथाभासनं दृष्टमिति। [12]**भागभेद** इति। भागभेदेन या कल्पना तत्कृतः शक्तिपरिग्रहो यासु। प्रतिभागमुत्तरत्र [13]विशिष्टभागा[14]वधानात्। अर्थान्तर[15]गतो भागावग्रहोऽन्यत्र कल्प्यमानस्तथा प्रतिपत्त्युपायो

" यथाद्यसंख्याग्रहणम् " (Vāk. I. 87.)

इत्यत्र व्याख्यातम् ॥ ९२ ॥

---

3. AD °नुरूपतामेव°, B °नुरूपतावत्त्वमेव.
4. B सावं.
5. B अवियतत्वं. D अनियतत्वं.
6. BL साध्यकालकृता.
7. ABD दोषत्वात्.
8. BD शब्दानाम्.
9. AD यथावस्थितः स्फोटः, B यथावर्णितः स्फोटः तत्कथं.
10. L अलक्ताज्य.
11. AD °क्ताज्योतिष्मती°, B °क्ताज्योतिष्ठति°.
12. B भागेति भेदेति.
13. BD विशिष्टविशिष्टभा°.
14. ABD भावा° व.
15. L अर्थान्तरभागाव°.

Dr. Urmila Sharma Collection, Varanasi

अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता।
कैश्चिद् व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ॥ ९३ ॥

आकृतिनित्यत्वाच्छब्दनित्यत्वं केचिदाचक्षाणाः

"उभयतः स्फोटमात्रं निर्दिश्यते, रश्रुतेर्लश्रुतिर्भवति"

(M. Bhā. I. p. 26, l. 1.)

इत्येवमादिषु स्फोटशब्दवाच्यां शब्दत्वादन्यां क्रमजन्मभिरयुगपत्कालैराश्रयैः क्रमेण प्रकल्पितोपलब्धिनिमित्तसंस्कारां शब्दाकृतिमाचक्षते। उत्पत्तिमत्यस्तु शब्दव्यक्तयः सत्यव्यपदेश्यरूपत्वे स्फोटं व्यपदेश्यरूपमवद्योतयन्त्यो ध्वनिव्यपदेशं लभन्ते ॥ ९३ ॥

स्फोटदर्शनमाह **जातिः स्फोट** इति। केचिज्जातिमेव स्फोट इति वदन्ति। कथमत्रायं व्यपदेशः। व्यक्त्यभिव्यङ्ग्यत्वात्। व्यञ्जकत्वादेव तस्य ध्वनयो व्यक्तय इत्युच्यन्ते। यदाह **अनेकव्यक्त्यभिव्यङ्ग्या** इति।

अस्य दर्शनस्य निबन्धनमाह **आकृतिनित्यत्वाद्** इति।

"सिद्धे शब्दार्थसंबन्धे" (M. Bhā. I. p. 6, l. 16.)

इत्यत्र जात्याश्रयेण शब्दस्य नित्यत्वमुक्तम्। तत्र ते(तच्च जातेः ?)शब्दत्वे घटत इति स्फोटाख्यमागमादेशे गमयत इति

"कृपो रो लः" (P. 8.2.18.)

इति स्थान्यादेशेत्युभयत्र (स्थानिन्यादेशेप्युभयत्र ?)। **स्फोटमात्रम्** इति। जातिमात्रम्। [1]**लश्रुतिः** इति। लत्वजातिर्भवतीति। प्रधानस्य तत्र निर्देशो नान्तरीयकं तु व्यक्त्युपादानम्। अतो न तत्राश्रितस्यानवस्थिततायामादर इति। [2]आदिग्रहणात्

"स्फोटः शब्दः, ध्वनिस्तस्यायाम उपजायते"

इत्यादयः। **शब्दत्वादन्याम्** इति। शब्दत्वं हि सर्वशब्दसाधारणम्। तस्य वाचकत्वे हि [3]संकरः स्यात्। एतत्तद्व्यक्त्यवच्छिन्नमवाचकमित्येदपि नास्ति यतोऽनन्तरमेव [4]वक्ष्यति **सत्यव्यपदेश्यरूपत्वे** इति। व्यक्तयो ह्यव्यपदेश्याः स्वतोऽवस्थिताः। तासामन्यप्रकाशिता स्वरूपावधानोपकाराक्षमेति न व्यवच्छेदिकाः। अवच्छेदे हि स्फोटमात्रं निर्दिश्यत इति हीयते। **प्रकल्पित** इति। उपलब्धिनिमित्तं ये संस्काराः ते प्रकल्पिता यस्याम्। केनेत्याह **क्रमजन्मभिः** इति। यथा व्याख्यातम्

"यथा त्ववयवप्रबन्धः क्रमेणोपलब्धो भवति, अथ शब्दजातिनिबन्धना व्यवहाराः प्रवर्तन्ते"

---

1. ABD बहुश्रुतिः. 2. ABD आग्रह°. 3. ABD संस्कारः. 4. ABD वक्ष्यन्ति।

CC0. In Public Domain, Digitizagtion by eGangotri

अविकारस्य शब्दस्य निमित्तैर्विकृतो ध्वनिः ।
उपलब्धौ निमित्तत्वमुपयाति प्रकाशवत् ॥ ९४ ॥

अन्ये त्वाकृतिव्यक्तिव्यवहारप्रक्रियावैधर्म्यादेकमेव शब्दतत्त्वं नित्यमलब्धपरिणामं स्वनिमित्तेभ्यः प्राप्तविकारैर्ध्वनिभिरनाश्रितं ध्वनिषु प्रदीपादिप्रकाशन्यायेनासति वस्तुसंप्रमोहे प्राप्तव्यञ्जकध्वनिविक्रियानुरागमुपलब्धरूपमिवाभिव्यज्यत इत्याहुः ॥ ९४ ॥

[5]इत्यादिना । [6]कृतः पक्षद्वयप्रदर्शनप्रबन्धः । **अव्यपदेश्यरूपत्वे** इति । ध्वनिरूपोपगममन्तरेण न सामान्यतोऽपि पक्षेणाव्यपदेश्यत्वात् । (अ ?) व्यपदेश्यरूपमित्यत्रापि तस्य व्यपदेशहेतुत्वात् ॥ ९३ ॥

अपरे त्वाकाशगत[1] एकः स्फोटवर्ण इत्याहुः **अविकारस्य** इति । यदुक्तं

" तस्मिन् (अनेकध्वनिव्यङ्ग्यां ?)नित्यां शब्दव्यक्तिं प्रतिजानते "
(Vṛtti on Kā. 23, p. 57, l. 3.)

इति । [2]करणाभिघातो ध्वनेरेव भेदे निमित्तं न बाह्यस्य स्फोटस्येति कथयन्ति । यदाह **निमित्तैः** इति । निमित्तमित्युपलब्धेः ।

प्रक्रियावैधर्म्याद् इति । [3]इहोत्पत्तौ स्थितौ चावयवाः कारणतामुपगच्छन्तोऽवयविन आधारः, न तावन्नित्यत्वाज्जातीनामुत्पादकत्वेन व्यक्तय आधारः । नापि स्थित्याम्, महाप्रलये घटादिजातीनां व्यक्तिभिर्विनाप्यवस्थानात्[4] । तस्माद् द्रव्यं तदाधारो व्यक्तिश्च तासां जातीनां स्वानुरूपप्रत्ययाभिधाने हेतुः । न चैतच्छब्देऽस्ति । यौगपद्याभावाच्छब्दभागानाम् । एतस्मिंश्च तदस्याभ्युपगमे व्यक्तत्वात्तत एव स्फोटोपलब्धिः स्यादिति दोषत्वात् पक्षान्तराश्रयणम् । **एकमेव** इति । स्वगतभेदाभावात् । **नित्यम्** इति । कालभेदाभावात् । **अलब्धपरिणामम्** इति । **ध्वनिभिः** इति वक्ष्यति । तेन प्रत्यासत्तेर्ध्वनिविकारादलब्धः परिणामोऽनेनेति नित्यत्वेऽपि प्रधानस्य परिणामदर्शनादत्र प्रतिषेधः । ध्वनिभिः नित्यमभिव्यज्यते इत्यनेन संबन्धः । **अनाश्रितम्** इति । [5]यदसमवेतं ध्वनिषु । एतेन न जातेर्विशेष उक्तः । [6]**प्रदीपादि** इति । यथा घटादयः प्रदीपेनाभिव्यज्यन्ते तथा शब्दोऽपीति । **वस्तुसम्प्रमोहे** इति । सम्प्रमोहः [7]अपरिच्छेदः । यथा सन्तोऽपि तमस्यपरिच्छिन्ना घटादयः [8]सम्मुग्धा इत्युच्यन्ते । तथानभिव्यक्ताः । **प्राप्तव्यञ्जक** इति । व्यञ्जका ये ध्वनयः तेषां या विक्रिया स्वकारणेभ्यो भेदकस्यानुरागरूपं तत् प्राप्तो येन । यतो निर्भागोऽपि भागवानिव भासते । नित्योऽपि कदाचिदुपलभ्यत इति ॥ ९४ ॥

5. See Vṛtti on Kā. 23, p. 55, l. 2–3. 6. ABD कृतं. 1. ABD °गतमेकं. 2. ABD कारणाभि°. 3. BL ग्रह उत्प°. 4. ABD व्यक्तिभिरव्यवस्थानात्. 5. ABD पदसम°. 6. B प्रदीपवदिति. 7. ABD परिच्छेद. 8. ABD संबुद्धाः.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न चानित्येष्वभिव्यक्तिर्नियमेन व्यवस्थिता ।
आश्रयैरपि नित्यानां जातीनां व्यक्तिरिष्यते ॥ ९५ ॥

इह केचिदभिव्यक्तिमेवानित्यत्वसमधिगमहेतुत्वेनापदिशन्ति। अनित्यः शब्दोऽभिव्यङ्ग्यत्वाद्, घटवत्। इहानित्यानां घटादीनां प्रदीपादिभिरभिव्यक्तिर्दृष्टा, शब्दश्चायं ध्वनिभिरभिव्यज्यते इत्युपगम्यते, तस्मादनित्यः। अथ नाभिव्यज्यते प्राप्तमिदमुत्पद्यत इति। अतोऽप्यनित्य एव। तत्र येषां जातयः सन्ति नित्याश्च तान् प्रत्युच्यते—उभयथा दृष्टत्वादनपदेश इति। येषां तु नैव किञ्चिन्नित्यमस्ति तेष्वसिद्धत्वेन प्रत्यवतिष्ठमानेष्वनैकान्तिकत्वस्य नित्यशब्दवादिनः प्रथमतरमसिद्धत्वेनैव प्रत्यवतिष्ठन्ते। कथम्। परं हि प्रत्यभिव्यङ्ग्यत्वादित्यनपदेशः संदिग्धत्वात्, विकल्पप्रसङ्गो वानुषङ्गिणामित्यनवस्था स्यात्तर्कस्य ॥ ९५ ॥

न चानित्येषु [1]इत्याद्युत्तरपक्षश्लोकाः ।

पूर्वपक्षा अपि वर्णा उपात्ताः (पूर्वपक्षोऽप्यत्रोपात्तः ?)। तद्यथा। [2]**अनित्यः शब्दः, अभिव्यङ्ग्यत्वाद्,**[3] **घटवद्** इति पूर्वः पक्षः। **इहानित्यानाम्** इति अद्वैतदर्शनम्। **शब्दश्चायम्** [इति]उपनयः। **तस्मादनित्यः** इति निगमनम्। **तत्र येषाम्** इति। वैशेषिकादीनाम्। **नित्याश्च** इति। बौद्धेन(बौद्धो न ?)साध्यता(तां ?) अङ्गीकरोति। **उभयथा** इति। तेषामेव वादिनां जातिषु नित्यासु घटादिषु[4] चानित्येषु दर्शनादभिव्यक्तेः। **अनपदेशः** इति। अहेतुः। संशयजननात्। **येषां च**[5] इति। बौद्धानाम्। **असिद्धत्वेन** इति। अनैकान्तिकत्वस्यासिद्धत्वेन। यतस्तस्य नित्यानभ्युपगनाद्विपक्षे वृत्तिरसिद्धा। **प्रथमतरम्** इति। साधनप्रयोगकाल एव। **असिद्धत्वेनैव** इति। यथैवानित्यवादी नित्यत्वस्यानङ्गीकरणेनानैकान्तिकतां परिहरति [6]तथाभिव्यक्तिवाद्यपि नित्यानां जात्यादीनामङ्गीकरणेन[7] व्यतिरेकसिद्ध्या प्रत्यवतिष्ठते। **परं प्रति**। नित्यवादिनं प्रति। **अनपदेशः** इति। अहेतुः। **संदिग्धत्वाद्** इति। उभयसिद्धस्य व्यतिरेकस्याभावात् सन्देहः। यदाह **संदिग्धत्वाद्** इति। **विकल्पप्रसङ्गो वा** इति। यद्यनपेक्ष्य व्यतिरेकं पदसाम्यादनित्यत्वं भवता साध्यते नित्यजातिसाधर्म्यान्नित्यत्वं प्राप्नोतीति विकल्पः। अवयवा नैवं द्रवीति मातये (जातयो ?) स्वाश्रयेषु स्वानुरूप-

---

1. AB इत्युत्तरत्र पक्षश्लोकाः, D इत्युत्तरत्र लोकाः
2. AD तद्यो नित्यः.
3. AD °त्वाच्च भवतीति.
4. L ins. व्यवितपु before घटादिषु.
5. तु in the Vṛtti.
6. B तथापि व्यक्ति°, L तथैव व्यक्ति.
7. BD °मनङ्गीक°.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

देशादिभिश्च संबन्धो दृष्टः कायवतामपि।
देशभेदविकल्पेऽपि न भेदो ध्वनिशब्दयोः ॥ ९६ ॥

अथापरः पूर्वपक्ष इहोपादीयते। देशभेदान्नाभिव्यज्यते शब्दः। समानदेशस्था हि घटादयः प्रदीपादिभिर्व्यज्यन्ते। करणसंयोगविभागाभ्यां तु व्यञ्जकाभ्यामन्यत्र शब्दोपलब्धिरिति। स चायं ध्वनिषु व्यञ्जकेष्वप्रसङ्गः। तत्रापि ब्रुवते। कथमेकदेशस्थः शब्दो नानादेशैरतिविप्रकृष्टैर्ध्वनिभिर्व्यज्यत इति। तत्रेदं प्रतिविधीयते। देशैकत्वं देशनानात्वमिति कायवतामेष धर्मः। कायवन्तोऽपि तावदादित्यादयः

प्रत्ययहेतवः न तु शब्दः इति न जातिसाधर्म्यम्। घटसाधर्म्यमपि नास्ति, घटस्य न वाच्यत्वाच्चाक्षुषत्वाच्चेति। यदाह **अनुषङ्गिणाम्** इति। यावन्तो धर्मा घटे जातौ चानुषज्यन्ते तेषाम्। विकल्पानां जात्युत्तरत्वेन **अनवस्था तर्कस्य** इति ॥ ९५ ॥

अभिव्यञ्जकादभिव्यङ्ग्यस्य भिन्नदेशत्वेऽप्यभिव्यक्तिर्युक्तेत्याह **देशादिभिश्च** इति। भिदा नामशो नाभैकदेशशब्देनागतबन्यान्। आदिशब्देन भिन्नैर्बहुभिर्देशैरिति [1]यावत्। **कायवताम्** इति। ये च तावन्मूर्तिमन्तस्तेषाम्। सर्वगतत्वेऽपि स्वदेशव्यतिरिक्तेन देशेन संबन्धो [न ?] दृष्टः। देशभेददर्शनस्यासत्यत्वात्। प्रागेव मूर्तानामिति। **देशभेदविकल्पेऽपि** इति। सत्य[2]देशभेदस्याभावाद्विकल्पशब्देनाह। ध्वनिशब्दयोरदेशत्वान्न प्रसङ्गः एव दोषस्येति।

देशभेदाद् इति। भिन्नदेशत्वादिति हेतुः। अन्यथा[3] व्यधिकरणासिद्धता स्यात्। **समानदेशस्था**[4] **हि** इति। वैधर्म्यमाह। यावन्तमालोकः स देशं ततो बहिर्ये भिन्नदेशाः तेनाभिन्नदेश इति साधर्म्यनिदर्शनम्। **अन्यत्र** इति। आकाशे। संयोगविभागौ पुनः करणेषु। एतत् पक्षधर्मत्वकथनम्। **स चायम्** इति। ध्वनिशब्दयोरदेशत्वादसिद्धो हेतुः संयोगविभागपक्षस्येत्यदोषः। **एकदेशस्थः** इति। स्फोट एकः। तेनैकत्वादे(दने ?)कदेशध्वनिसमानदेशो न भवति। **नानादेशैः** इति। वक्तृदेशत्वाद् ध्वनीनां नानादेशतामाह। ते यदा समुत्पन्नास्तदा नानादेशस्था भवन्ति। **विप्रकृष्टैः** इति। विप्रकर्षेण देशभेद एव स्पष्टीक्रियते। ततश्च सिद्धो देशभेदः। **कायवताम्** इति। मूर्तानां भावानामेकदेशतां नानादेशतामाह। ध्वनिशब्दयोस्त्व[5]मूर्तयोरिदं नास्त्येवेति। कथं तर्हि देशभेदप्रतिपत्तिरित्याह **कायवन्तोऽपि** इति। येऽपि मूर्तिमत्त्वाद्

---

1. D क्रियावत्. 2. BD सत्व दे°. 3. B °थाप्यधिकरणात् सि°.
4. BD °स्थानिति हीति. 5. ABD °स्तु मूर्त.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परिच्छिन्नदेशा नानाधिकरणस्था इहोपलभ्यन्ते । अमूर्तयोस्तु ध्वनिशब्दयोर्देशदेशि-व्यवहारातिक्रमात् सत्यपि देशभेदविकल्पाभिमाने नैवासौ तयोर्भेदो विद्यत इति ॥ ९६ ॥

ग्रहणग्राह्ययोः सिद्धा योग्यता नियता यथा ।
व्यङ्ग्यव्यञ्जकभावेन तथैव स्फोटनादयोः ॥ ९७ ॥

अथापरः पूर्वपक्षः । अभिव्यञ्जकनियमान्नाभिव्यज्यते शब्दः । इहाभिव्यङ्क्तव्यं नाभिव्यञ्जकं नियतमपेक्षते । घटादीनां हि मणिप्रदीपौषधिग्रहनक्षत्रैः सर्वैः सर्वेषामभिव्यक्तिः क्रियते । नियतनादाभिव्यञ्जकाश्चाभ्युपगम्यन्ते शब्दाः । वर्णान्तराभिव्यक्तिहेतुभिर्नादैर्वर्णान्तराणामनभिव्यक्तेः । तस्मान्नाभिव्यज्यन्ते इति । तत्र प्रतिविधीयते ग्रहणग्राह्ययोः इति । तद्यथा चक्षुःसमवेतं रूपमेव बाह्यरूपस्याभिव्यक्तौ निमित्तं न गुणान्तराणि नापीतराणीन्द्रियाणि नेन्द्रियान्तरगुणाः तथा बाह्यार्थाभिव्यक्तिहेतवो भवन्ति ॥ ९७ ॥

देशभेदाद्धस्तेऽप्येकदेशस्थाः सन्तो नानादेशस्था इवोपलभ्यन्ते । देशि (देशदेशि ?) इति । [देशः] आधारो देशिन आधेयभूताः । एवं च व्यवहारः, मूर्तत्वादिति । तदतिक्रान्तौ ध्वनिशब्दौ । सत्यपि इति । देशभेदाभिमानमात्रमेतत् सर्वत्र । नैवासौ तयोः इति । सति हि देशे तस्य भेदाभेदौ । अदेशयोस्तु ध्वनिशब्दयोरेतन्नास्तीति चोद्यम् । ॥ ९६ ॥

तत्परिहारायाह (चोद्यान्तरपरिहारायाह ?) ग्रहणग्राह्ययोः इति । ग्रहणं चक्षुःसमवेतं रूपम्, तद्धि भास्वरत्वात्समानजातीयबाह्यरूपप्रकाशकम् । सिद्धा इति । न साध्या । योग्यता इति । शक्तिः । नियता[1] इति । चक्षुर्गतं रूपमेव, न स्पर्शादयः, घटतेस्यरूपमेवेति । तथैव इति । कस्यचिदेव स्फोटस्य कश्चिदेव ध्वनिरभिव्यञ्जक इति ।

इह हि[2] इति । नाभिव्यञ्जकानामग्न्यादीनां घटाद्यभिव्यक्तिं[3] प्रति .... ग्रता । नियतनाद इति । नियतो नाद अभिव्यञ्जको येषाम् इति । तदेव व्यतिरेकेण स्फुटयति वर्णान्तर इति । [4]न गुणान्तराणि इति । सन्तोऽपि तस्मिन् स्पर्शादयः । नापीतराणि इति । श्रोत्रादीनि । तथा इति । चक्षुर्निविष्टं रूपम् । बाह्यार्थे इति । यथा प्रक्रान्तस्य बाह्यस्य नीलादेः ॥ ९७ ॥

---

1. BD नीयतेति.
2. 'हि' is not found in the Vṛtti.
3. BD घटादिष्वभिः व्यक्तिं प्रति.
4. ABD ननु.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तुल्येन्द्रियग्राह्येष्वयं नियमो न विद्यत इति पर्यनुयोगे प्रतिविधीयते।

सदृशग्रहणानां च गन्धादीनां प्रकाशकम्।
निमित्तं नियतं लोके प्रतिद्रव्यमवस्थितम् ॥ ९८ ॥

तुल्येन्द्रियग्राह्येष्वप्येष धर्मो दृश्यते। तद्यथा नदीशैलेयादीनां द्रव्याणां किंचिदेव संयोगिद्रव्यान्तरं कस्यचिदेव द्रव्यस्य गन्धविशेषाभिव्यक्तौ समर्थं भवति ॥ ९८ ॥

प्रकाशकानां भेदांश्च प्रकाश्योऽर्थोऽनुवर्तते।
तैलोदकादिभेदे तत् प्रत्यक्षं प्रतिबिम्बके ॥ ९९ ॥

अथापरः पूर्वपक्षः। नाभिव्यज्यते शब्दः। वृद्धिह्राससंख्याभेदेष्वभिव्यञ्जकानामभिव्यङ्ग्यस्य तद्धर्मसमन्वयात्। न ह्यभिव्यञ्जकानां वृद्धिह्रासयोरभिव्यङ्ग्यानामर्थानां वृद्धिह्रासावुपलभ्येते। तद्यथा प्रदीपस्य वृद्धिह्रासौ न घटादीनाम्। न खल्वपि प्रदीपस्य संख्याभेदे संख्यान्तरयुक्तानां घटादीनां प्रदीपसंख्याभेदनिमित्तः संख्यान्तरयोगो दृश्यते। शब्दस्य त्वभिघातभेदे दृश्यते संख्यापरिमाणभेदः। तस्मान्नाभि-

---

तुल्येन्द्रिय इति। योऽयं नियमो भवतोपदर्शितः स भिन्नेन्द्रियविषयगतः। तुल्येन्द्रियविषयगतं न मृष्यत इति।

सदृशग्रहणानां च इति। सदृशमेकं[1] ग्रहणमिन्द्रियं येषाम् इति। गन्धादीनाम् इति। आदिग्रहणाद्रूपादीनाम्। लोके इति। प्रसिद्धमेतल्लोक इत्याह।

नदीशैलेयादीनाम् इति। कस्यचिदेव द्रव्यस्य इत्यनेन संबन्धः। तद (यदा?) प्रत्येकं द्रव्याणां संयोगेन संस्कारे क्रियमाणेऽवस्थितस्यैव गन्धस्यावबोधः। तदैतदुदाहरणम्। ननु (न तु?) द्रव्याणामेकीकरणेन यो गन्धः स हि संयोगित्वादया एव। द्रव्याणाम् इति निर्धारणे षष्ठी। यथा चरं गतं सदेव तेजोविशिष्टद्रव्यसंयोगादविभज्यते ॥ ९८ ॥

अनुवर्तते इति। अभिव्यञ्जकभेदानुकारमभिव्यङ्ग्येऽनुवर्तत इति। तैलोदकादि इति। तैलभेदे उदकभेदे च वृत्ति (प्रति?) बिम्बं तद्भेदमनुकरोति। आदिशब्दात् खड्गादिभेदे। प्रत्यक्षम् इति। नैव साध्यम्।

[1]वृद्धिह्राससंख्याभेदेषु इति। अभिव्यञ्जकस्य वृद्धिह्रासभेदे परिमाणभेदे नाभिव्यङ्ग्यस्य भेदः। संख्याभेद इति। अभिव्यञ्जकसंख्याभेदे नाभिव्यङ्ग्यस्य संख्याभेदः। खड्गे दीर्घम् इति। घटादीनाम् इति परिमाणाननुगमे दृष्टान्तः। संख्या[2]न्तरयुक्तानाम् इति संख्याभेदाननुविधाने दृष्टान्तः। शब्दस्य तु इति। अभि-

---

1. BD एवं. 1. ABD प्रसिद्ध ह्रास°. 2. AD संख्यानाम् इति.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्यज्यत इति। तत्र प्रतिविधीयते। दृष्टमभिव्यङ्ग्यानामभिव्यञ्जकभेदानुविधानम्। तद्यथा। निम्नेष्वादर्शतलादिषु मुखप्रतिबिम्बमुन्नतं दृश्यते, उन्नतेषु निम्नम्, खड्गे दीर्घं प्रियङ्गुतैले श्यामं चीनशब्दयवनकाचादिष्वादर्शप्रमाणभेदानुपातीत्यपरिमाणो भेदविकल्पः। संख्याभेदोऽप्यादर्शभेदे जलतरङ्गभेदे च दृश्यते सूर्यादिप्रतिबिम्बानाम्। ॥ ९९ ॥

तत्रैतत् स्यात्। प्रतिबिम्बमादर्शादिषु चन्द्रादिभ्यो भावान्तरमेव संनिविष्टमुपलभ्यत इति। तत्र प्रतिविधीयते।

विरुद्धपरिमाणेषु वज्रादर्शतलादिषु।
पर्वतादिसरूपाणां भावानां नास्ति संभवः ॥ १०० ॥

न हि वज्रादिष्वाधारेषु विरुद्धपरिमाणानामन्तःसन्निवेशिनां पर्वतादिसरूपाणांभावानामुत्पत्तिः संभवतीति ॥ १०० ॥

व्यङ्ग्यधर्म(ा ?)भावमाह। **अभिघातभेदे** इति। अल्पेऽभिघाते सोऽल्पो भवति शब्दः, महति महानिति परिमाणभेदः। एकस्मिन्नभिघात एको द्वयोर्द्वाविति संख्याभेदः। अत्रानैकान्तिकत्वमाह **दृष्टमभिव्यङ्ग्यानाम्** इति। निम्नेष्वादर्शतलेषु मुखमुन्नतम्, उन्नतेषु च निम्नं दृश्यत इति संस्थानभेदः। **खड्गे दीर्घम्** इति प्रमाणभेदः। [3]**प्रियङ्गुतैले श्यामम्** इति वर्णभेदः। चीनदेशे यवनदेशे भवे काचे। आदिशब्दात् पारसीकभवे च काचे रूप्यकादिषु च। **आदर्शप्रमाण** इति। आदृश्यते एषु[4] एतैर्वादर्शाः। तेषां तेषां प्रमाणभेदमनुवर्तमानेषु। आदर्शतलेषु जलतरङ्गेषु चैकस्यैव बिम्बस्य बहूनि प्रतिबिम्बकानि। प्रतिबिम्ब[नि ?]दर्शनेनैतदाह यथा बिम्बकमेकमपि प्राप्तोपरागं लक्ष्यते तथा स्फोटोऽपीति ॥ ९९ ॥

भावान्तरमेव इति। बिम्बमेवाभिव्यक्तिवशात्तथैवालक्ष्येत तस्यां निदर्शनम्, ध्वनयस्तु स्वेभ्यः कारणेभ्यः।

[1]वज्रादर्शतलादिषु पदार्थान्तराण्येवोत्पद्यन्ते, न तु किंचिदभिव्यज्यत इति चोद्ये सत्याह **विरुद्धपरिमाणेषु** इति। खड्गादयोऽल्पपरिमाणाः पर्वतादयो महान्त इति न तेषां तावतां तत्र संभव इति न तत्र भावान्तरोत्पत्तिः। तावत्यवकाशे ततोऽधिकप्रमाणस्य विरुद्धोत्पत्तिः। निबिडितावयवसंनिवेशोपलक्षणाय [2]वज्रतलग्रहणम्। सूक्ष्मतरस्याप्यवयवस्य तत्रानुप्रवेशाभावात्।

---

3. ABD तैले प्रियङ्गुश्याम इति. 4. BD योष्विति, A एष्विति.
1. ABD अस्यादर्श. 2. ABD बहुल प्र°.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

तस्मादभिन्नकालेषु वर्णवाक्यपदादिषु ।
वृत्तिकालः स्वकालश्च नादभेदाद्विभज्यते ।। १०१ ।।

नित्यानां हि स्थितौ सहकारिण्याः कालशक्तेर्व्यापारो न विद्यते। लोके व्यवहारेण तु बुद्ध्या पूर्वान्तापरान्तयोरनुगम्यमानात्मतत्त्वाः स्थितिं प्रति न भिद्यन्ते सर्व एव प्रचितापचितरूपा वर्णपदवाक्याख्याः स्फोटाः। उपलब्धिविषयतापत्तौ तु तेषामभिन्नकालानामुपलब्धिस्थित्यभिमानः। वृत्तिकालः स्वकालश्च इति। नादो

आधार्यन्तेऽस्मिन्निति [**आधारेषु**] भाजनेषु । **अन्तःसन्निवेशिनाम्** इति । भवा .... निदर्शनं प्रमाणम्, अपरतः[3] सन्निविष्टद्रव्यदर्शनात्, सत्ताप्रतिविम्बकस्य प्रतिपन्ना महत्तापि च तत्र दृश्यत इति न सा निराकर्तुं .... तस्यां च तत्र संभवः । तस्मात्तदेव तक्षैक[4] इति सिद्धम् ।। १०० ।।

एवं व्यञ्जकध्वनिकृतं कालभेदमुपपाद्य निगमयति **तस्माद्** इति। यतोऽभिव्यञ्जकधर्माननुवर्ततेऽभिव्यङ्ग्यः। **वर्णवाक्य** इति। वर्णादिस्फोटे। **आदिशब्दाद्** अनुवाक्येषु। **वृत्तिकालः** द्रुतादिः। **स्वकालः** ह्रस्वादिः। **नादभेदाद्** इति। ध्वनिभेदात्।

नित्यानां हि इति। अनित्या ह्यनुकूलकालशक्त्यनुगृहीताश्चिरमवतिष्ठन्ते। प्रतिकूलकालशक्त्यनुगृहीता आश्वेव तिरोधीयन्ते। नित्येषु तु नास्ति स्थितिं प्रति कालस्य व्यापारः। **अनुगम्यमानात्मतत्त्वाः** इति। उपलब्धेः पूर्वकालं **पूर्वान्त** इत्याह। पश्चाद्भाविनं च **अपरान्त** इति। तयोरप्यवस्थयोर्बुद्ध्यानुगम्यमानात्मतत्त्वं येषामिति प्रत्यक्षेणानुपलम्भेऽपि युक्तिः[1]। तयोरप्यवस्थयोस्तत्त्वस्यानुगम्यमानत्वान्नास्ति भेदः, सदात्रस्थानात्। कथं तर्हि पूर्वापरान्तव्यपदेश इत्याह **लोके व्यवहारेण तु** इति। प्रत्यक्षेणोपलभ्यमानस्य पूर्वपश्चादनुपलम्भे पूर्वान्तापरान्तव्यवहारो लोके दृष्ट इति। **प्रचितापचितरूपाः** इति। ह्रस्वादयः परस्परतः प्रचिताप्रचितरूपा इत्यपि ध्वनेर्न **स्थितिं प्रति भिद्यन्त इति**। अप्रचितप्रचित इति केचित् पठन्ति। सर्वेष्वेव प्रचयापचयौ स्वतो न विद्येते इति। **उपलब्धिविषयतापत्तौ** इति। उपलब्धिकाले। **उपलब्धिस्थित्यभिमानः** इति। उपलब्धेर्वा स्थितिकालप्रत्ययस्यायमभिमानो यदुत वृत्तिकालः स्वकालश्चेति। अन्यथा भेद एव न स्यात्। [2]तस्यैककालत्वात्। ननु बुद्धयस्तद्विषयाः।

---

3. D परगतः. 4. D तक्षैत. 1. D युक्ति.

2. D has तस्यैककालत्वात् ... द्रुतादिवृत्तिकालः after the words संयोगविभागजेन ध्वनि at the end of the Vṛtti on Kā. 102.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हि प्राकृतः शब्दात्मनि प्रत्यस्यमानस्थितिरूपो भेदस्याग्रहणार्थे ह्रस्वदीर्घप्लुतकालभेदव्यवहारव्यवस्थाहेतुः। वैकृतस्तु नादो वाद्यद्रुतादिवृत्तिकालव्यवस्थां प्रकल्पयति ॥ १०१ ॥

यः संयोगविभागाभ्यां करणैरुपजन्यते।
स स्फोटः शब्दजाः शब्दा ध्वनयोऽन्यैरुदाहृताः ॥ १०२ ॥

अनित्यपक्षे स्थानकरणप्राप्तिविभागहेतुकः प्रथमाभिनिर्वृत्तो यः शब्दः स स्फोट इत्युच्यते। तज्जातास्तु सर्वदिक्कास्तद्रूपप्रतिबिम्बोपग्राहिणः सर्वद्रव्याणां स्वेनात्मना निरवयवत्वाद् आकाशस्यापि मुख्यसमवायिदेशवत् संयोगिद्रव्यान्तरदेश-

---

स चाभिन्नकाल इति कुतो बुद्धेः स्थितिकालभेद इत्याह **नादो हि** इति। **प्राकृतः** इति। व्याख्यातम्। **प्रत्यस्यमान** इति। तस्य वा ध्वनेः स्थानकरणाक्षिप्तस्य या स्थितिः तस्या यद्रूपं तत् प्रत्यस्यमानं तत्रेति। **भेदस्याग्रहणात्**[3] इति। ध्वनिस्फोटयोः। **वैकृतस्तु** इति। स शब्देऽवधारिते पश्चाद्भवन्नवसितभेदत्वान्नाध्यारोपनिबन्धनमिति तदीयकालेन [4]द्रुतादिवृत्तिकालः ॥ १०१ ॥

कार्यपक्षे स्फोटध्वनिभेदं प्रदर्शयन्नाह **यः** इति। **संयोगविभागाभ्याम्** इति। आभ्यां करणभूताभ्याम्। केन कर्त्रेत्याह **करणैः** इति। स्थानकरणाभ्याम् इति। निमित्तोपलक्षणार्थत्वात् करणशब्दस्य। **अन्यैः** इति। अभिव्यक्तिवादिभ्यः।

स्थानकरणयोः प्राप्तिविभागौ संयोगविभागौ तद्धेतुकः। **सर्वदिक्काः** इति। तस्माद्धि स्थानकरणसंयोगविभागजाताच्छब्दाद्दशदिग्व्यापिनः कदम्बकोरकवद्वीचिसन्तानवच्च शब्दा जायमाना श्रोत्रदेशं दशदिगवस्थितानामुपगच्छन्तीति। नन्वाद्यः स्फोटः सदापरिच्छिन्नः, उत्तरे च ध्वनय इत्याह **तद्रूप** इति। तस्य रूपमनुकुर्वन्त उत्पद्यन्ते, ते च तच्छायोपरक्ताः श्रूयन्ते [1]विशिष्टदेशैरिति। तेन तस्योपव्यञ्जकेन। **देशनैरन्तर्यप्रत्यासत्त्येति** वक्ष्यति। तच्चैकत्वादाकाशस्य कथं शब्दस्य देशनैरन्तर्यमिति चोद्यं समाधातुमादावेव प्रक्रमते **सर्वद्रव्याणाम्** इति। एतदाह। आकाशस्य ये संयोगिनो घटादयः परिच्छिन्नदेशास्ते तं देशभेदमुपपादयिष्यन्तीति। स्यादेतत्। घटादिदेशभेदेन नाकाशस्यापि देशभेदः। तत्र तूपचरित इत्याह **सर्वद्रव्याणाम्** इति। एतदाह। न क्वचिन्मुख्यो देशः। यतः सूत्रारम्भकारणावयवा एकदेशो घटस्य, न तु तस्य स्वगतो भेदोऽस्ति। ते च ततोऽर्थान्तरमेवेत्युपचरित एव देशः। यदाह [2]**निरवय-**

---

3. WW²SL भेदस्याग्रहणार्थम् in the Vṛtti. 4. ABD तत्र वृत्तिकालः.

1. AD विकृष्टदेशैः. 2. ABD निरवयवात्.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रविभागोपचारे सति देशनैरन्तर्यप्रत्यासत्त्या कार्यकारणसन्तानाविच्छेदेन यथोत्तरमपचीयमानपूर्वप्रतिबिम्बोपग्रहशक्तयो मन्दप्रदीपप्रकाशितरूपकल्पाः क्रमेण प्रध्वंसमाना ये वर्णश्रुतिं विभजन्ति ते ध्वनय इत्युच्यन्ते। नित्यपक्षे तु संयोगजविभागजध्वनिव्यङ्ग्यः स्फोटः। एकेषां संयोगविभागजध्वनिसंभूतनादाभिव्यङ्ग्यः। स्फोटरूपानुग्राहिणस्तु यथोत्तरमपचीयमानाभिव्यक्तिसामर्थ्या द्रुतादिवृत्तिभेदव्यवस्थाहेतवोऽपचयात्मका ध्वनयः ॥ १०२ ॥

वत्वाद् इति। अवयवदेशोऽप्यवयविनः न च देशस्तस्यार्थभूता अवयवाः सन्तीति।

मुख्यसमवायि इति। मुख्यसमवायिनां हि कालादीनां ये देशास्ते घटे आरोप्यन्ते। ते च मुख्या अभिमता इति मुख्याः। तदनेन सर्वत्रोपचारमाह। सर्वसमवायिदेशभेदे केवलं मुख्याभिमानसंयोगदेशभेदे उपचाराभिमान इति विशेषः। देशनैरन्तर्यमेव प्रत्यासत्तिः। तया सह। **कार्यकारण** इति। पूर्वं पूर्वं कारणमुत्तरोत्तरं कार्यमिति। तत्र उत्तरोत्तरध्वनिर्जायमानोऽपचीयमानपूर्वप्रतिबिम्बोपग्रहशक्तिरुपजायते। येन विदूरदेशवर्तिनो मन्दं गृह्णन्ति, [3]विदूरतरवर्तिनस्त्वनभिव्यक्तम्। **मन्दप्रदीप[4]प्रकाशित** इति। मन्देन प्रदीपेन प्रकाशितमारूपं यत्तत्तुल्याः। यतः प्रदीपस्य समीपवर्तिनः स्फुटकं परिच्छेद्याः विदूरतरवर्तिनस्त्वारूपमात्रपरिच्छेद्याः। यद्यपि प्रदीपेन तुल्यो [5]ध्वनिः न प्रकाश्येन तथापि योऽसौ स्फोटः स एव मन्दस्फोटोपलभ्य इति ध्वनावभेदाभिमानादेवमुक्तम्। **वर्णश्रुतिम्** इति। येऽन्तरालवर्तिनः प्रविभक्ताक्षराः ते स्फोटरूपोपग्रहा व्यञ्जका एव ध्वनयः। ये त्वनिष्क्रान्ताक्षरभागाः तेऽपि ध्वनय इति वक्ष्यति। **नित्यपक्षे** इति। वर्णितमपि पक्षं निगमयति। **संयोगविभागज** इति। संयोगविभागाभ्यां यो ध्वनिर्जन्यते स स्फोटं व्यनक्ति। **एकेषाम्** इति। शब्दव्यक्तिस्फोटवादिनाम्। संयोगविभागजनितध्वनिसंभूतेन नादेन यदभिव्यंग्यं स्फोटरूपं तस्योत्तरे ध्वनिजा ध्वनयोऽपचीयमानाभिव्यक्तिशक्तयो द्रुतादिव्यवस्थाहेतवः, येषामन्तेऽनुरणनमात्रं भवति। ते चापि ध्वनय उच्यन्ते। तत्र संयोगविभागजेन केवलेन ध्वनिना स स्फोटरूपमिति व्यज्यते, संयोगविभागजेन ध्वनिसंभूतेन च तां .... गाद .... तसम्भूतदीर्घप्लुत स्फोटरूपम् ॥ १०२ ॥

---

3. A om. विदूरतरवर्तिनः. 4. BD मन्दप्रकाशित°.

5. D has ध्वनिः न प्रकाश्येन to संयोगविभागजेन ध्वनि after अन्यथा भेद एव न स्यात् in the Vṛtti on Kā. 101.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अल्पे महति वा शब्दे स्फोटकालो न भिद्यते ।
परस्तु शब्दसन्तानः प्रचयापचयात्मकः ॥ १०३ ॥

देशव्याप्तिसामान्यादल्पमहत्त्वे शब्दस्योपचर्येते । प्रसिद्धेर्वा । सर्वत्र हि प्रसिद्धिरेवार्थव्यवस्थाकारणम् । अनवस्थितैव हि तर्कागमाभ्यां भिन्नेषु प्रवादेषु वस्तुगता व्यवस्था । तत्राविशषेण कार्यशब्दानां कारणशब्दानां चोत्पन्नापवर्गित्वान्नास्ति महतोऽल्पस्य वा शब्दस्य सूक्ष्मोऽपि कश्चित् कालभेदः । हस्तिमशकज्ञानवत् ।

संयोगजो ध्वनिः स्फोटः तज्जास्तु ध्वनय इति अनित्यपक्षे प्रक्रियावर्णनायाह **अल्पे** इति । ह्रस्वे । **महति वा** इति । दीर्घप्लुतयोः । **स्फोटकालः** इति । तेषां ह्रस्वादीनां [1]प्राथमिकानामभिन्नः कालः, सर्वेषामेकक्षणावस्थानात् । कथं तर्हि कालभेदावगतिरित्याह **परस्तु** इति । ते हि स्फोटशब्दाः तत्कार्यभूतानामुत्तरेषां शब्दानां वशेन कालभेदमादर्शयन्ति । यदाह **प्रचयापचयात्मकः** इति ।

ननु चाल्पत्वमहत्त्वे परिमाणम्, तस्य गुणत्वाद् द्रव्ये समवायः, शब्दस्य तु गुणत्वात् कथमल्पत्वमहत्त्वे इत्याह **देशव्याप्तिसामान्याद्** इति । अथत्राल्पो महानिति मूर्तानां धर्मः । शब्दास्त्वमूर्ताः कथं तथोच्यन्त इत्युपक्षिप्तम् । [2]मुख्याल्पत्वमहत्त्वानां सूचिपर्वतादीनां यो धर्मः देशव्याप्तिः तस्मात्सामान्याच्छब्देऽपि ते उपचर्येते । अल्पसूच्यल्पदेशं व्याप्नोति । महान् पर्वतो महान्तम् । शब्दोऽपि चाल्पमहान्तौ देशौ व्याप्नुवंस्तथा [3]व्यपदिश्यते । सा चेयं व्याप्तिः शब्दस्य कार्यानुमेया । प्रत्यासन्नदेशावयवं नोपलभन्ते । अतोऽल्पदेशव्याप्तिमवकल्पेन लोके शब्देषु प्रसिद्धो बुद्धिरपीति तदेवास्याभिमुख्यम् । सुरूपसमारोपादुपचारो न यत्नानपेक्ष्य गोरूपा साधर्म्यं वाहीके प्रतीतिः । न चोभयं यौगपद्येन प्रतीयते । अल्पमहच्छब्दौ पुनरपेक्षसूच्यादिगतदेशव्याप्तिमवकल्पेन लोके शब्देषु प्रसिद्धो बुद्धिरपीति तदेवास्याभिमुख्यं रूपं व्यवस्थापितम् । तथा चात्रोपचार एवेत्याह **सर्वत्र हि** इति । न लोकप्रसिद्धिं विहायान्यथा पदार्थस्वभावव्यवस्थापना युक्ता । पुरुषप्रतिभावशात् तर्कस्यानवस्थानात्, सिद्धान्तभेदादागमस्येति न ताभ्यां वस्तुस्वभावव्यवस्था । यदाह **अनवस्थितैव** इति । [4]**अविशेषेण** इति । सर्वशब्दानाम् । **कार्यशब्दानाम्** इति । [5]संयोगविभागजस्फोटजानां ध्वनीनाम् । [6]**कारणशब्दानाम्** इति । संयोगविभागजानां स्फोटानाम् । उत्पत्त्यनन्तरविनाशित्वान्नास्ति ध्वनीनां स्थितौ

---

1. BD प्रथक्कानाम्.
2. AD प्रसिद्ध मुख्याल्प°.
3. ABD व्यपदेशः.
4. BAD विशेषेण.
5. ABD °गजानां स्फो.
6. ABD कार्यश°,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निमित्तभेदात्तु कार्यारम्भे शब्दस्य सामर्थ्यं भिद्यते। कस्यचिद्धि भेरीदण्डाभिघातजस्यैव कार्यपरम्परा दूरमनुपतति। कश्चित्तु लोहकंसाभिघात इव प्रत्यासन्नदेशग्राह्यं दीर्घकालं सन्तानमविच्छेदेनारभते ॥ १०३ ॥

दूरात् प्रभेव दीपस्य ध्वनिमात्रं तु लक्ष्यते।
घण्टादीनां च शब्देषु व्यक्तो भेदः स दृश्यते ॥ १०४ ॥

इह केचिदाचार्या व्यक्तं स्फोटं सहजेन ध्वनिना सर्वतो दूरव्यापिना प्रकाशस्थानीयेन गन्धेन युक्तं द्रव्यविशेषमिवाविर्भावकाल एव संवद्धं मन्यन्ते ध्वनिना।

कालभेद इनि। सूक्ष्मोऽपि इति। प्रत्यक्षगम्योऽनुमानगम्यो वा। हस्तिमशकज्ञानवद् इति। स त्वल्प(ल्पे ?)महति निर्भासावग्रहे तुल्य एव हस्तिमशकज्ञानयोरस्तीति कालः। उभयोरप्युदयानन्तरं निरोधात्। कथं तर्ह्यल्पमहदादिभेद इत्याह निमित्त[7] इति। [8]करणाभिघातः। स च प्रयत्नभेदाद् भिद्यते। कार्यारम्भे इति। तदुत्तरं नान्तरादेः (सन्तानादे ?) कार्यतो भेदमाह, भेरीदण्ड [इति] निमित्तमाह। [9]दूरम् इति। देशतः प्रसर्पणमाह। [10]लोहकंसाभिघातः इति। [11]प्रत्यासन्नदेशं [12]व्याप्नुवतोऽपि दीर्घकालानुवृत्तिर्यत्र तत्र महत्त्वम्। यस्त्वल्पकालः सोऽल्प इति ॥ १०३ ॥

दूराद् इति। दूराद् ध्वनिमात्रं तु लक्ष्यत इति संबन्धः। प्रभेव इति। यथा प्रदीपः प्रभया सहोत्पद्यते। अपरिच्छिन्नप्रदीपाश्च [1]प्रदीपमुपलभन्ते तथा स्फोटोऽपि ध्वनिभिरनुगत[2] एवोत्पद्यते। दूराच्चापरिच्छेदेऽपि तस्य तद्ध्वनिमात्रमुपलभ्यते। व्यक्तः इति। स्पष्टो भेदः। सः इति। सूपलक्षस्तत्र स्फोटनादयोर्भेद इति। तदनेन प्रदीपदृष्टान्ते सिद्धेन भिन्नकालत्वेन [3]स्फोटनादयोः स्पष्टो भेदः।

केचिद् इति। अनित्यशब्दवादिभिरेव पूर्वमन्यथोक्तम्। इदं तु दर्शनान्तरमिति। व्यक्तम् इति। अभिव्यक्तम्। केनेति। सहजेन ध्वनिना तत्प्रतिबिम्बोपग्रहात्। सर्वतो दूरव्यापिना इति। समन्ताद् दूरदेशव्याप्त्योत्पत्तिं ध्वनीनामाह। प्रकाशस्थानीयेन इति। यथा प्रदीपः समन्ताद् दूरदेशव्यापिना प्रकाशेन सह तमवस्फोटाद् ध्वनिना सहेति प्रस्तुतत्वात्। गन्धेन इति। यथा किंचिद् द्रव्यं परितो व्यापिना गन्धेन स्वाश्रयज(स ?)मायुक्तम्। आविर्भावकाल एव इति। उत्पत्तिकाले।

---

7. ABD निमित्तस्य. 8. ABD कारणा°. 9. ABD मुखम्.
10. ABD लोकं सामि°. 11. ABD मान्तरेशं. 12. B °ख्याप्लुवतो.
1. ABDL have प्रदीपम्, but I think that प्रभाम् is what is wanted here.
2. ABD अनुगम्यते. 3. AD om. स्पोटनादयोः to तत्प्रतिबिम्बोपग्रहात्.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथैव प्रदीपे घट(न?) संनिविष्टावयवं प्रत्युपादानं तेजोद्रव्यं तदाश्रितश्च तद्विक्रियानुपरिवर्ती प्रकाशः। घण्टायाश्चाभिघातेन व्यक्ततरौ स्फोटनादौ सर्वेषां वर्णानामभिनिष्पत्तौ धर्म इति। स चायं श्लोकद्वयेनानन्तरेण प्राकृतवैकृतयोर्नादयोर्विशेष आख्यातः ॥ १०४ ॥

द्रव्याभिघातात् प्रचितौ भिन्नौ दीर्घप्लुतावपि।
कम्पे तूपरते जाता नादा वृत्तेर्विशेषकाः ॥ १०५ ॥

अनित्यपक्षेऽपि नैव शब्दानां प्रचये दीर्घप्लुतौ प्रचीयेते। किन्तर्हि द्रव्याभिघातप्रचयादेव। स्वरूपमेव हि तयोस्तावद्भिरभिघातैर्निष्पादयितुं शक्यते। तस्मादा

यथा द्रव्यस्य गन्धेन सहैवोत्पत्तिस्तथा स्फोटस्य ध्वनिना। यतः स्फोटो बहुना कालेनोत्पद्यते। ततस्तु सम्पूर्ण एव प्रथमाद्भागात् स ध्वनिरुत्पद्यते। प्रथमभागो ध्वनिविकल्प एव जायते। एतच्चोत्तरत्र स्पष्टीकरिष्यते 'स्फोटादेवोपजायन्ते' (Kā. 106.) इति। यथैव इति। घट (न?) सन्निविष्टावयवं तत् प्रत्युपादानं चेति समासः। प्रदीपे तेजोद्रव्यं [4]तद्घनतरसन्निवेशावयवात् [5]सम्पिण्डितरूपम्, प्रकाशस्तु प्रभावन्त[6] एव तेजोऽवयवाः समन्ततः प्रशिथिलसन्धयः। तादृशः स्फोटनादयोर्भेदः। तदाश्रितः इति। तेन सहोत्पत्तेः। तद्विक्रियानुपरिवर्ती इति। तदाकारोपग्रहात्। नादस्यापि स्फोटावग्रहात् सर्वमेतदिति। घण्टायाः इति। प्रथमोऽभिघातजस्तारतरः शब्दः, तदन्यो नाद इति स्पष्ट एव भेदः। स्फोटनादयोर्भेदो हि कार्यपक्षेऽपीष्यते। सर्वेषाम् इति। योऽयं प्रदीपदृष्टान्तसिद्धः स चायम् इति। नापूर्वो[7] दर्शनभेदः किन्तु पूर्वेणानेन श्लोकेन प्राकृतवैकृतध्वनिभेद एवोपन्यस्तः[8]। "अल्पे महति वा" इत्यनेन वैकृतध्वनिविशेष उक्तः। "दूरात् प्रभेव" इति प्राकृतध्वनिभेदः ॥ १०४ ॥

तदेवं श्लोकद्वयोपात्तं प्राकृतवैकृतध्वनिविशेषं स्पष्टयन्नाह द्रव्याभिघाताद् इति। द्रव्यं स्थानकरणानि। अभिघातः स्थानस्य करणेन प्रहारः। वेगवद्द्रव्यसंयोगोऽभिघात इति। प्रचितौ इति। ह्रस्वादेकयात्र मात्रया दीर्घः प्रचीयते, मात्राद्वयेन प्लुतः। भिन्नौ इति। परस्परतो भेदात्। कम्पे तु इति। योऽसावभिघातजः कम्पः पुनः पुनरभिघातनिमित्तस्तस्योपरमे निवृत्तौ ये नादा उत्पद्यन्ते। वृत्तेः इति। द्रुतादिकायाः।

आद्यस्य ध्वनेः स्फोटाख्यस्य स्थितिकालस्तुल्यः। परः शब्दसन्तानः प्रचयापचयात्मक इति द्रुतादिभ्यो न कश्चिद्विशेषो दीर्घप्लुतयोः प्रतीत्युपक्षिप्य परिहरति

---

4. ABD °व्यरूपयोरेवं तद्ध°.　5. B समविन्धितरू°, L सन्निविष्ट°.
6. ABD प्रभात एव.　7. ABD ना ... पूर्वे.　8. ABD °न्यस्य,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वरूपलाभात्तयोः करणानामभिघातविशेषादितरेतरावयवसंस्पर्शी व्यक्तवायुप्रस्कन्दनानुगतः कम्पोऽनुवर्तते। कम्पे तूपरते ये नादजा नादास्ते द्रुतादिवृत्तिभेदव्यवस्थाहेतवो भवन्ति॥ १०५॥

अनवस्थितकम्पेऽपि करणे ध्वनयोऽपरे।
स्फोटादेवोपजायन्ते ज्वाला ज्वालान्तरादिव॥ १०६॥

कम्पेष्वप्यविच्छेदेनानुवर्तमानेषु यावानभिघातजः शब्दो नासौ कदाचिदप्यनारब्धकार्यो निवर्तते। तत्र ये कम्पजाः शब्दाः समानकाला ध्वनयः स्फोटात्मानमभिसंस्कुर्वन्ति तांश्चाभिमर्शिनोऽनुप्रकाशान् नादान्तरालाननुषङ्गानित्याचक्षते। तेषामपि च प्रत्यनुषङ्गं कार्यपरम्परा यावत्कम्पो न विच्छिद्यते तावत् स्फोटानुग्रहमात्रयानुवर्तत इत्याहुः। स चेयमुत्पत्तिरिन्धनज्वालाप्रवृत्तिप्रबन्धधर्मेणाख्यायते। तद्यथेन्धनाश्रिताभिर्ज्वालाभिर्ज्वालाकार्यसन्तानसमुद्भवा ज्वालाः संप्रवर्तन्ते। तत्प्रकाशनेन चार्थानामुपकुर्वन्ति तथेयमपि नादप्रवृत्तिरिति॥ १०६॥

---

[1]अनित्यपक्षेऽपि इति। नायं नादप्रचयकृतो दीर्घादिभेदः। किन्तर्हि?। स्फोटात्मरूपभेदः[2]। यदाह स्वरूपमेव हि इति। तौ दीर्घप्लुतावनेकावयवोपसंहाररूपेण बहुभिरभिघातैर्निष्पाद्येते। यदाह द्रव्याभिघातप्रचयादेव इति। निरवयवं[3] दीर्घप्लुतयोः स्वरूपमेव तत्तादृशादभि[4]घातप्रचयादभिनिष्पद्यते। आ[5] स्वरूपलाभाद् इति। अपरिपूर्णस्य आ परिपूरणात्, विशिष्टस्वरूपनिष्पत्तेर्वा। अभिघातविशेषाद् इति। विशिष्टैकप्रयत्नजनितेन वायुनाभिघातो विशिष्टशक्तिको निष्पाद्यते येन कम्पोऽनुवर्तते, यतोऽभिघातप्रबन्धः। इतरेतरावयवसंस्पर्शी इति। स्थानकरणानां येऽवयवास्तेषां परस्परेण यः संस्पर्शः स कम्पकृतः। तेन तद्वान् कम्पः। तमपाकर्तुं (संस्प्रष्टुं ?) शीलमस्येति। यतः प्रथमादभिघातात् करणानां चलनमुपजायते, तेन पुनः पुनरभिघातः। स चावयवसंस्पर्शात्मक इति। [6]व्यक्तवायु इति। व्यक्तेन वायुचलनेनोपेतः[7]। तत्स्वभावत्वात् कम्पस्य। प्रयत्नप्रेरितव्यक्तवायुप्रेरितत्वादभिघातस्य तज्जः कम्पः तेनानुगत इति। कम्प इत्यभिघातकृतचलनम्। अनेकावयवोपसंहाररूपत्वेऽप्येकप्रयत्ननिष्पन्नत्वादभिघातानामेकवर्णतैव दीर्घप्लुतयोः। कर्म वेति सुगमः॥ १०५॥

अनवस्थितकम्पेऽपि इति। अभ्युपकर्म वेति। अपरे इति। दीर्घप्लुतौ चानिष्पाद्यौ यावत्कम्पमनुयातानुवृत्तिः। उत्पद्य क्रियावत् कम्पजध्वन्युपपत्तिः।

---

1. WW²SL नित्यप°. 2. AB °भेदम्। 3. ABD निरवयवा,
4. A °शाद् दीर्घात् प्रच°. 5. ABD आत्मस्वरूप°,
6. ABD व्याक्तावयवेति, 7. ABD °वेतमिति,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते।
कैश्चिद्दर्शनभेदो हि प्रवादेष्वनवस्थितः ॥ १०७ ॥

तत्र वायोस्तावच्छब्दभावापत्तिमाचक्षते।

लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्तिना।
स्थानेष्वभिहतो वायुः शब्दत्वं प्रतिपद्यते ॥ [१०८]

तस्य कारणसामर्थ्याद्वेगप्रचयधर्मणः।
सन्निपाताद्विभज्यन्ते सारवत्योऽपि मूर्तयः ॥ [१०९]

इत्येवमादि सर्वमनुगन्तव्यम्

अणूनां शब्दत्वापत्तिमपरे प्रतिपन्नास्त एवमाहुः।

अणवः सर्वशक्तित्वाद्भेदसंसर्गवृत्तयः।
छायातपतमःशब्दभावेन परिणामिनः ॥ [११०]

स्फोटादेव इति। दीर्घप्लुतौ वा तावभिघातैरुत्पद्येते[1] इति। तदवयादुत्पत्ते .... एवो-त्पत्तिः। ज्वालान्तराद् इति। यथा काष्ठज्वालासमान इति पत्तिनो वा घ्नवयवानभिहत्य प्रचयं करोति इति ॥ १०६ ॥

सन्निपातात् इति। संश्लेषात्। विभज्यन्ते इति। नाभिघातमात्रात्, त्मादीनां शब्दनिष्पत्तेः अपि तु स्थानकरणानां योगविभागाख्यामिति। तदेवं विशिष्टात् प्रयत्नात्तस्य वायोरीदृशी क्रिया च नैतौ संयोगविभागौ वेगाख्यसंस्कार इति। सारव-त्योऽपि इति। सारवतां पर्वतादीनामपि वायुना विभागः क्रियते, किमङ्ग पुनस्ताल्वा-दीनामिति ॥ १०९ ॥

अणवः इति। परमाणवः। पूर्वत्र दर्शने वायुरेकघन इति विशेषः। शब्दपर-माणवो वा सूक्ष्मास्तत्तदवस्थापरिग्रहेण तथा व्यपदिश्यन्ते। कथमेकैकरूपाणामने-कच्छायादिरूपापत्तिरित्याह सर्वशक्तित्वाद् इति। छायादिभावोपगमसामर्थ्यनित्य-युक्तत्वात् परमाणूनां कस्मान्न सदा छायादय इत्याह भेदसंसर्गवृत्तयः इति। भेदो विभागः। संसर्गः संयोगः। तौ वृत्तिरेषामिति। यदा कुतश्चिन्निमित्तात् संयुज्यन्ते तदा परिणमन्ते, यदा तु विभज्यन्ते तदा परमाणुछायामवतिष्ठन्ते। करणसंयोगविभागौ वंशरूपतायामाह परिणामिनः इति। सन्निवेशविशेषग्राहिणः ॥ ११० ॥

---

1. A °रुपपद्यते.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वशक्तौ व्यज्यमानायां प्रयत्नेन समीरिताः ।
अभ्राणीव प्रचीयन्ते शब्दाख्याः परमाणवः ॥ [१११]

इत्यादि सर्वमनुयन्तव्यम्

ज्ञानस्य खल्वपि शब्दत्वापत्तिमपरे वर्णयन्ति ।

अथायमान्तरो ज्ञाता सूक्ष्मे वागात्मनि स्थितः ।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते ॥ [११२]

स मनोभावमापद्य तेजसा पाकमागतः ।
वायुमाविशति प्राणमथासौ समुदीर्यते ॥ [११३]

तेषां शब्दत्वापत्तौ विधिमाह **स्वशक्तौ** इति । यद्यपि ते शब्दत्वापत्तिशक्तियुक्तास्तथापि प्रयत्नेनैव संह्रियमाणाः शब्दतां प्रतिपद्यन्ते । **समीरिताः** इति । प्रेरिताः । ततश्च प्रयत्नेन शरीरान्तः[1]स्थिताः परमाणवः प्रेर्यन्ते न बाह्याः । छायादिभावानां शब्दपरिणामत्वात् शब्दा इत्याख्याताः । ननु शब्दत्वया । शब्दपरिणामपक्षे तु स्पष्टमेव ॥ १११ ॥

आन्तरो ज्ञाता वागात्मनि इति । ज्ञानात्मकेऽपि तस्मिन् ग्रहीतृत्वव्यवहारोऽस्ति । यथा शब्दतत्त्वमेवेदं वाङ्मनसाख्यप्रविभागम् इति । तेन ज्ञातर्यपि वाग्रूपानुषङ्गः । **सूक्ष्मे** इति । भेदरूपोपसंहारादतीन्द्रिये । **स्थितः** इति । सारूप्यानुषक्ते ज्ञानात्मनि स्थितो वाचि स्थित इत्युक्तः । **व्यक्तये** इति । तस्यामवस्थायां शब्दरूपस्य ज्ञानस्याविवेकेनानवधारणेन शब्दरूपव्यक्त्यर्थं स्थूलेन्द्रियगम्येन रूपेण विवर्तत इति ॥ ११२ ॥

स्थूलशब्दभावापत्तौ आत्मनः क्रममाह **स मनोभावम्** इति । मनो हि विषयपरिच्छेदक[1]मिति मनोऽवस्थामागच्छति । विषयपरिच्छेदेन योग्येन स्थूलेनात्मना व्यवतिष्ठते मनः, प्रकाशरूपत्वात् । **तेजसा** इति । शरीरान्तःस्थितेनोष्मणा । **पाकम्** इति । मनोरूपतामाप[2]न्नस्य ज्ञातुरतिशयो विषयावग्रहसामर्थ्यख्यापकः । स्वतो व्यापकत्वेऽप्यात्मनस्तेजोविगमाच्छतीति भूते(च्छीतीभूते ?) शरीरे न विषयावग्रहसामर्थ्यम् । **वायुम्** इति । प्राणाख्यं वायुम् । **आविशति** इति । स्वरूपं तत्र प्रत्यस्यात्मरूपतामापादयति । **अथासौ** इति । वायुसमावेशात् प्राप्तक्रियः[3] । **समुदीर्यते** इति । ऊर्ध्वस्थितानि स्थानान्युपसर्पति[4] ॥ ११३ ॥

---

1. ABD °रान्तरस्थि°. 1. ABD °च्छेदककर्मज्ञातिम°. 2. ABD मनोरूपानस्य ज्ञा°.
3. ABD °क्रियामुदी°. 4. AD °सर्पन्ति, B °वसन्ति.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अन्तःकरणतत्त्वस्य वायुराश्रयतां गतः।
तद्धर्मेण समाविष्टस्तेजसैव विवर्तते ॥ [११४]
विभजन् स्वात्मनो ग्रन्थीन् श्रुतिरूपैः पृथग्विधैः।
प्राणो वर्णानभिव्यज्य वर्णेष्वेवोपलीयते ॥ [११५]

इत्येवमादि सर्वमनुगन्तव्यम्। निदर्शनमात्रं चेदम्। बहुधा शिक्षासूत्रकारभाष्यकारमतानि दृश्यन्ते। तद्यथा ॥

"अन्तर्वर्तिना प्रयत्नेनोर्ध्वमुदीरितः प्राणो वायुस्तेजसानुगृहीतः शब्दवहाभ्यः शुषिभ्यः सूक्ष्मांशं धूमसन्तानवत् संहन्ति। स स्थानेषु शब्दघनः संहन्यमानः प्रकाशमात्रया कयाचिदन्तःसंनिवेशिनः शब्दस्याविभक्तं विम्बमुपगृह्णाति।"

अन्तःकरणतत्त्वस्य इति। मनोरूपतामापन्नस्य ज्ञातुः। **आश्रयताम्** इति। आधारताम्। तद्धि मनोरूपं तत्राविष्टम्। **तद्धर्मेण** इति। मनसो धर्मेण। **विवर्तते** इति संबन्धः[1]। **समाविष्टः** इति। यतः साधा .... रूपेण समाविष्टः। **तेजसेव**[2] इति। यथा तेज [3]इन्धनमाश्रयतां प्रतिपन्नं तत्समावेशाद् विहायेन्धनरूपतां तेजोरूपं भवति तथा वायुः स्वरूपहानेन मनोरूपतां प्रतिपद्यते इति ॥ ११४ ॥

विभजन् इति। विभागेनावस्थापयन्। **ग्रन्थीन्** इति। विकारान् समावासस्तुः कार्यतोरूपेण विभजत इति। कथमित्याह **श्रुतिरूपैः** [**पृथग्विधैः** इति।] नानाप्रकारैः। **प्राणः** इति। योऽयं प्रकान्तः। **वर्णान्** इति श्रुतिरूपाण्याह। **अभिव्यज्य** इति। नित्यानित्ययोर्यथेष्टमभिसंबन्धः। **वर्णेषु** इति। स च वर्णात्मतां प्रतिपद्य रूपान्तरमुपगृह्णातीति वर्णेष्वेवोपलीयत इत्युक्तम्। अत एव [1]ज्ञानविवृत्तेः शब्दस्य प्रकाशकत्वम्।

भाष्यकारमतानि इति। शिक्षाकारमतरयोक्तत्वात् शिक्षाणामेव ये भाष्यकारास्ते गृह्यन्ते। यथा 'विवृतमूष्मणां स्वराणाम्' इत्यत्र ईषदिति वर्तते निवृत्तमिति मतभेदः। संग्रहं तत्र भाष्यकारापाये वेदप्रामाण्येनाङ्गीकृताः। **अन्तर्वर्तिना** इति। बाह्योऽपि कायवाक्प्रस्पन्दो लोके प्रयत्नशब्दवाच्य इत्यवच्छिनत्ति। **तेजसा** इति। आन्तरेणोष्मणा। **अनुगृहीतः** इति। तेजसा तस्य सारतेव क्रियते। अतस्तेनाननुगृहीतो बाह्यो वायुः सत्यप्योष्ठादिसंयोगे न वर्णानभिव्यनक्ति। अतश्चोत्तरस्य शब्दघनस्य

---

1. ABD संबन्धमाचष्टे.
2. Vṛtti has तेजसैव.
3. ABD तेजः संबन्धनमा°.
1. D ज्ञानविनविवृत्तः.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्येवमादि सर्वमनुगन्तव्यम्। तद्यथा।

"नाभिप्रदेशात् प्रयत्नप्रेरितो वायुरूर्ध्वमाक्रामन्नुरस्यादीनां स्थानानामन्यतमं स्थानमभिहन्ति, ततः शब्दनिष्पत्तिः"

इत्यादिशिक्षाकारमतभेदप्रबन्धोऽनुगन्तव्यः। आचार्यः खल्वप्याह

आत्मा बुद्ध्या [4]समर्थ्यार्थान् मनो युङ्क्ते विवक्षया।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्॥

इत्येवमादि। तथापरः पठति।

प्रकाशस्वभावता। **शब्दवहाभ्यः** इति। सूक्ष्मांच्छब्दावयवानावहन्ति। **शुषिभ्यः** इति। छिद्रेभ्यः, याः शरीरान्तःस्थिता नाड्यः सूक्ष्मशब्दावयवपूर्णाः [2]ताभिश्च सूक्ष्माः शब्दावयवाः प्राणेन प्रेष्यमाणास्ताल्वादिषु संहन्यन्त इति। **धूमसन्तानवद्** इति। यथा धूमावयवा वायुना प्रेर्य संहतिमुपनीयन्ते तथा स्थानेषु घनीक्रियन्ते शब्दावयवा इति। **प्रकाशमात्रया** इति। स शब्दघनस्तेजोऽनुग्रहात् प्रकाशमात्रया कारणभूतया [3]बिम्बमुपगृह्णाति इति संबन्धः। **कयाचिद्** इति। स्वार्थप्रकाशनादन्येवेयं प्रकाशमात्रेत्याह। अथवा बुद्धिरत्र कारणमतद्रूपानुगम्योऽप्यस्तीति प्रकाशमात्रया स शब्दसंघातोऽनुगम्यत इत्यध्याहरणीयम्। **अन्तःसन्निवेशिनः** इति। बुद्धिस्थस्य। **अविभक्तम्** इति। अत्यन्तसारूप्यान्न तयोरन्तर्बहिःस्थितयोः शब्दरूपयोर्भेदः। यादृशमन्तः तादृगेव बहिरिति। न तु मुखादर्शतलप्रतिबिम्बयोरिव भेदावधारणमिति। अन्तःस्थितशब्दाकारानुगमात्तस्य शब्दत्वम्। एतावांश्च तस्योपयोगो नार्थप्रकाशनमिति। तथा इत्यापिशलीयशिक्षादर्शनम्। **नाभिप्रदेशात्** इति। तत्र वायोरवस्थानात्। **प्रयत्नप्रेरितः** इति। वायुः प्रयत्नेनोर्ध्वं प्रेर्यते। **उरस्यादीनाम्** इति। उरसि भवं स्थानमुरस्यम्। आदिग्रहणादष्टौ स्थानानि। **स्थानानामन्यतमं स्थानं वायुरभिहन्ति ततः शब्दनिष्पत्तिः**। वायोरन्य एव शब्दः। **आचार्य** इति पाणिनिः। [4]**समर्थ्य** इति। प्रथमं तावदयमात्मा बुद्ध्या [5]करणेनार्थमालोचयति। ततस्तं प्रतिपद्य तया निरूपयति। ततस्तस्य वाचकं शब्दं बुद्ध्यैव निरूपयति। ततो [6]योग्यशब्दोच्चारणे मनो व्यापारयति। [7]केनेत्याह **विवक्षया** इति। इच्छा ह्यात्मसमवेता। न सर्वत्र। मनसः [8]प्रेरयितेति। [9]**कायाग्निम्** इति। तन्मन इच्छया प्रयुक्तं कोष्ठमग्निं ज्वलयति। यदाह **आहन्ति** इति।

---

2. ABD तैः.
3. ABD °गृह्णन्ति.
4. Pāṇinīya Śikṣā 6. has समेत्य.
5. AD कारणेन.
6. AD योऽद्य.
7. AB तेन.
8. ABD प्रेरिता.
9. ABD कोयानिनि.

Dr. Urmila Sharma Collection, Varanasi

"वायुः कोष्ठस्थानमनुप्रदानमापद्यते। स कण्ठगतः श्वासतां नादतां वा"
इत्यादि। अथापर आह।

"मनोऽभिहतः कायाग्निः प्राणमुदीरयति। स नाभेरुद्यन्मूर्धन्यभिहतोऽन्येन पुनरुद्यता मरुताभिहन्यमानो ध्वनिः सम्पद्यते क इति वा ख इति वा"
इत्येवमादि प्रतिशाखं शिक्षासु भिन्नमागमदर्शनं दृश्यमानं सर्वं प्रपञ्चेन समर्थयितव्यम्।

अजस्रवृत्तिर्यः शब्दः सूक्ष्मत्वान्नोपलभ्यते।
[1]व्यजनाद्वायुरिव स स्वनिमित्तात् [2]प्रचीयते॥ १०८॥ [११६]

स प्रेरयति इति। स तदूर्ध्वज्वलनकर्म तेजःकर्मोत्पादयति। **वायुरनुप्रदानमापद्यते** इति संबन्धः। **अनुप्रदानम्** इति ध्वनिविशेषस्य संज्ञा। वायुः तथा परिणमते। ध्वनिजा ध्वनयो बाह्या अनुप्रदानमित्यवच्छिनत्ति **कोष्ठस्थानम्** इति। कोष्ठं स्थानमस्य। स चानुप्रदानरूपो वायुः कण्ठगतः श्वासतां नादतां च प्रतिपद्यते। यदाहुः

"श्वासतां नादतां वा" (Ṛ̣K. Prā. 13.1.)

इति। विवृते कण्ठे श्वासतां संवृते नादतामिति। यतः श्वासनादानुप्रदानभेदेन द्विविधा वर्णाः। यथा बह्वृचप्रातिशाख्ये शौनकः

"वायुः प्राणः कोष्ठ्यमनुप्रदानं कण्ठस्य खे विवृते संवृते च।
आपद्यते श्वासतां नादतां च वक्त्रीहायाम्॥" (Ṛ̣K. Prā. 13.1.)

"उभयं [10]वान्तरोभौ।" (Ṛ̣K. Prā. 13.2.)

इति। [11]**अन्ये पुनराहुः** इति। स [12]प्राणो मूर्धन्यभिहतोऽभिनिवर्तते। [13]ततश्च कायाग्न्यभिहत उद्गच्छति। तयोः सम्पेषेऽन्यः[14] शब्दो जायते। यदाह **ध्वनिः** इति। यत्र स्थाने सम्पेषः तदेव तेषां स्थानम्॥

अजस्रवृत्तिः इति। अजस्रं सदा वृत्तिरस्येति नित्यतामाह। कथं तर्हि सदानुपलम्भ इत्याह **सूक्ष्मत्वाद्** इति। **वायुरिव** इति। वायुपरमाणवः। **स्वनिमित्ताद्** इति। करणाभिघातात्। [2]**प्रचीयते** इति। संहन्यते। एतदाह। यथा वायुपरमाणवः सूक्ष्मा [1]व्यजनाभिघातेन संहन्यन्ते तथा शब्दपरमाणवः [3]करणाभिघातात् संहन्यन्ते इति।

---

10. AD उभयं चान्तरे तौ, Bl. चान्तरे तदपि.
11. The Vṛtti has तथापरः पठति.
12. ABD °न्यभितो.
13. ABD कायाद्यभिहित.
14. ABD °षेत्रायोऽन्यः अन्यः श°.

1. Though in all the other Mss. of the Kārikās and Vṛtti and in those of the Paddhati, the reading is व्यञ्जन, S has व्यजन both in the Kārikā 116 and the Vṛtti thereon. It is a better reading and so it has been adopted.

2. WW[2]L प्रतीयते in the Kārikā 108. S has प्रचीयते in the Kārikā and so have all the Mss. of the Paddhati.

3. AD om. स्वनिमित्तात्... शब्दपरमाणवः करणाभिघातात्.

CC0. In Public Domain, Digitizagtion by eGangotri

अथापर आगमोऽनुगम्यते। सूक्ष्मो वायुसंनिचय इवान्तर्बहिश्च सर्वमूर्त्तीनां ध्वनिरवस्थितः। स चैषामाकाश इति प्रतिपद्यते। स यथैव तु सर्वत्र परमाणुसंभवे संहतत्वात् व्यजनाभिघातेन वायुराश्रयस्थानात् प्रविभज्यमानः क्रियाभिराविश्यते तथैव ध्वनिः स्वनिमित्तैरभिव्यक्तप्रचितविक्रियारूपः श्रोत्रप्रदेशं प्राप्त उपलभ्यते संस्करोति च ॥ १०८॥

तस्य प्राणे च या शक्तिर्या च बुद्धौ व्यवस्थिता।
विवर्तमाना स्थानेषु सैषा भेदं प्रपद्यते॥ १०९॥ [११७]

अथापरः इति। शिक्षाकारमतभेद एवायमिति कथयति। **संनिचय इव** इति। असंहत्यापि प्रकीर्णा एवमुक्ताः। **अन्तर्बहिश्च** इति। शरीरेऽन्तश्च, बहिश्च शरीरात्। **सर्वमूर्त्तीनाम्** इति। प्राणिनामन्येषां च घटादीनामिति। अत एव शब्दपरमाणुपक्षादस्य विशेषः। तत्र ह्यन्तरेवावस्थिताः शब्दपरमाणव इति ख्याताः। **परमाणुसंभवे** इति। यतः सर्वत्र शब्दपरमाणवः सन्ति। ततः संहन्यन्त इति दर्शयति। केन वर्मिके संहन्यन्ते इत्याह[**व्यजनाभिघातेन** इति।] व्यजनाभिघातेन हि व्यजनस्थानगताः परमाणवः संहन्यन्ते। ते च तेन प्रेरिता अपरानपि संघ्नन्तीति। [4]**आश्रयस्थानात्** इति। यत्र [5]प्रथमं स्थिताः। **प्रविभज्यमानाः** इति। ततश्च्याव्यमानाः। **क्रियाभिराविश्यते**। येन स स्थूलद्रव्यस्येन्द्रियग्राह्यस्य कारणतां प्रतिपद्यते। [6]**अभिव्यक्त** इति। प्रचितमेव यद्रूपं तदेवास्य क्रिया। सूक्ष्मावस्थात्यागेन करणाभिघातेन प्रचेयरूपतास्य क्रियते। तेनाभिव्यक्तं प्राचिताख्यं विक्रियारूपमस्येति विग्रहः। **श्रोत्रप्रदेशम्** इति। अनित्यपक्षे स एव ध्वनिरुपलभ्यते। **संस्करोति** इति। नित्यपक्षे स ध्वनिरेवंभूतः श्रोत्रमाकाशस्थं स्फोटमुभयं वा संस्करोति॥ १०८॥

तस्य इति। वाचकस्य शब्दस्य। **बुद्धौ** इति। एनं शब्दमुच्चारयामीति बुद्धौ योऽयं शब्दाकारः स श्रोत्रग्राह्यशब्दकारणत्वात् तस्य [1]शक्तिरित्युक्तः। **प्राणे** इति। प्राणाख्ये वायौ। यतः स बुद्धिस्थ आकारो वा यतपोरोहति ते (वायुमारोहति तेन ?) प्राणे स्थितेति। **विवर्तमाना** इति। स्थूलशब्दाकारमुपदर्शयन्तीति। **स्थानेषु** इति। ताल्वादिषु। **भेदम्** इति। परस्परव्यवच्छिन्नं वाचकं रूपम्।

तस्येति सर्वनाम्नानन्तरस्य ध्वनेः प्रचयधर्मिणः प्रत्यवमर्शाशङ्का न करणीया

---

4. A °स्थातमिति, BD °स्थानामिति.
5. BD प्रमत.
6. AD अविभविष्यंति.
1. ABD शरीरीत्युक्तः.

Dr. Urmila Sharma Collection, Varanasi

पक्षभेदा एवैते। नायमनन्तरः प्रचयधर्मा ध्वनिरिह श्लोके निर्दिश्यते, शब्दस्तु पूर्वप्रकृतः प्रवादभेदैरन्वाख्यायते। शब्दः खलु प्राणाधिष्ठानो बुद्ध्यधिष्ठानश्च। स तु द्वाभ्यां प्राणबुद्धिमात्राशक्तिभ्यां संसृष्टाभ्यां प्रतिलब्धाभिव्यक्तिरर्थं प्रत्याययति। तत्र प्राणो बुद्धितत्त्वेनान्तराविष्टः। स चोर्ध्वमभिप्रवृत्तो ज्वालावद् वर्णस्थानेषु आक्षेपकप्रयत्नानुविधायी प्रतिविघातविवर्तेन नित्यशब्दोपग्राहिणा विवर्तते।

(इत्याह ?) [2]पक्षभेदा एव इति। य[3] एते शब्दनिष्पत्तावानुपूर्वीप्रतिपादनाय प्रक्रान्ताः तन्मध्ये इदमपरं दर्शनान्तरम्। [4]अनन्तरः इति। अजस्रवृत्तिर्य इति। कस्य तर्हि तस्य इत्यनेन संबन्ध इत्याह **शब्दस्तु** इति। **शब्दः खलु** इति। प्रथमतोऽस्य बुद्धौ विशिष्टशब्दाकारारोहः। यतस्तदनुरूपस्थानकरणाभिघातः। स बुद्धिस्थ आकारो योग्यः शब्दोत्पत्ताविति शक्तिरुक्ता। सा च बुद्धिः प्राणस्य प्रेरिकेति स्वमाकारं तत्र वायौ निवेशयति। स च प्राणः प्रतिबिम्बकल्पेन तदनुरागप्रतिपत्तेः स्वमाकारमुपगृह्णाति। तत्रापि स आकारो व्यवहारयोग्य इति शक्तिरित्युक्तः। **प्राणबुद्धिमात्राशक्तिभ्याम्** इति। प्राणबुद्धी एव मात्रे तयोः शक्ती तत्र यौ शब्दाकारौ। [5]**संसृष्टाभ्याम्** इति। संबद्धाभ्याम्, परस्परप्राप्तानुग्रहाभ्याम्। बुद्धिशक्त्या प्राणशक्तेरनुग्रहः विशिष्टशब्दाकारार्पणं येन स प्राणो विशिष्टस्थानाभिघातेन विशिष्टं शब्दं [6]जनयति। अप्राप्तोपरागस्तु[7] मात्राप्रेरितः प्राणोऽभिघा[8]ताद्व्यक्ताक्षरध्वनिमात्रं जनयति। प्राणशक्त्यापि बुद्धिशक्तेरनुग्रहः, यतः प्राप्तोपरागप्राणवृत्तिद्वारेण शब्दत्वेन विवर्तते बुद्धिशक्तिः। न हि [9]बुद्धिशक्तिः प्राणशक्तिमन्तरेण शक्नोति केवला शब्दत्वेन विवर्तितुम्। [10]**प्रतिलब्ध** इति। ताभ्यां कारणभूताभ्यां ताल्वादिषु व्यवहारयोग्यस्य स्थूलस्य निष्पत्तेः। स चायं तृतीयशब्दः करणाधिष्ठानः। तस्य शक्तिद्वयसंसर्गाद् यथोत्पत्तिस्तथा कथयति **अन्तराविष्टः** इति। अत्र बुद्धिरुपगृहीतशब्दाकारा संक्रान्तेव प्राणे। तेनान्तरनुप्रविश्य बुद्धिः प्राणं प्रेरयति। **ज्वालावद्** इति। यथोर्ध्वगमनं ज्वालायाः[11] तथा प्राणस्य बुद्धिप्रेरितस्येति। **वर्णस्थानेषु** इति। ताल्वादिषु। **भेदमुपगृह्णाति** इति वक्ष्यति। स पुनरभिन्ने प्राणाख्ये वायौ शब्दभेदः स्थानप्रयत्नभेदकृतः। तत्र **स्थानेषु** इति स्थानभेद उक्तः। प्रयत्नभेदमाह **आक्षेपकप्रयत्नानुविधायी** इति। स

---

2. ABD दर्शनभेदा. 3. ABD यतः. 4. ABD अनन्तरमनन्तरः.

5. Vṛṣabha's text of the Vṛtti must have had the word संसृष्टाभ्यां before प्रतिलब्ध°.

6. ABD जनयन्ति. 7. ABD °रागं तु मात्राप्रेरितं प्राणं.

8. ABD °घातपदव्यक्ताक्षरध्व°. 9. ABD बुद्धिः. 10. ABD प्रतिलभ्य.

11. ABD ज्वालायां.

CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स च संसृष्टप्राप्तशक्तिविवर्तः पृथिवीकललन्यग्रोधधानादिवद् भेदमुपगृह्णाति। भेदानुरागमात्रं च परस्मिन्नभेदे शब्दात्मनि संनिवेशयति ॥ १०९ ॥

शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी ।
यन्नेत्रः प्रतिभात्मायं भेदरूपः प्रतीयते ॥ ११० ॥ [११८]

तत्र केषाञ्चिदाकृतयः सूक्ष्मशब्दाधिष्ठाननिबन्धनाः। ताः खल्वात्माभिव्यक्ति-

---

हि प्राणो यद्वर्णविषयेण प्रयत्नेन प्रेर्यते तस्यैव स्थानमभिहन्ति। **प्रतिघातविवर्तेन** इति। वेगवता प्राणेन स्थानस्य संयोगः प्रतिघातः। स एव तस्य प्राणस्य विवर्तः। तस्यामेवावस्थायां प्राणस्य शब्दत्वापत्तिः। **नित्यशब्दोपग्राहिणा** इति। नित्यस्य शब्दस्य स्फोटाख्यस्य रूपोपग्रहेणोत्पद्यते। तदाकारावग्रहाच्च करणाधिष्ठानस्य शब्दार्थत्वम्। **स च** इति। प्राणः। **संसृष्टप्राप्त** इति। शक्तेर्विवर्तः कार्यरूपावस्थानं स प्राप्तः, संसृष्टश्च तज्जनितयोः शक्त्या संसर्गात्। तेन संसृष्टः प्राप्तः शक्तिविवर्तो येनेति विग्रहः। एतदाह। संसृष्टयोः शक्त्योर्विवर्तः प्राप्तो येनेति। **पृथ्वी** इति। यथैका पृथ्वी प्रत्ययान्तरसमवधानात् ताल्वादिभेदं (ताळादिभेदं ?) यथा च [12]कललमभिव्यक्तं कालादिभेदेन पश्वादिभेदं न्यग्रोधबीजं एकविकल्पमाह भूतान्तरसमवधानाच्च वा प्ररोहादिभेदं प्रतिपद्यते तथा वायुरपीति। **परस्मिन्** इति। प्रतिभाख्ये शब्दतत्त्वेऽभिव्यज्यमानस्तत्र भेदमारोपयति। भेदग्रहणात् प्राप्तस्तदुपराग इव। यदाह **भेदानुरागमात्रं च** इति ॥ १०९ ॥

एवं शिक्षाकाराभिमतभेदमाख्याय शब्दस्य माहात्म्यं तदुत्तरं प्रदर्शयति [1]शब्देषु इत्यादि। **आश्रिता** इति। स्थिता। **शक्तिः** इति। सामर्थ्यम्। **विश्वस्य** इति। सर्वस्य वाच्यवाचकरूपस्य। **निबन्धनी** इति। विश्वं यया[2] निबध्यते। **यन्नेत्रः** इति। नेत्रं हि परिच्छेदोपायः इति। तेन हि शब्देन विशिष्टशक्तिकेन[3] भिन्नगवादिपदार्थविषया प्रतिभोत्पद्यते। यदाश्रयो वा प्रतिभात्मानेकप्रकारः प्रतिपुरुषं विवर्तते।

आकृतयः इति। गोत्ववृक्षत्वशब्दत्वादिजातयः। ता हि महाप्रलयेऽवस्थान्तराभावान्नित्यं वाक्तत्त्वमेवाश्रयन्ते। यदाह **सूक्ष्मशब्द** इति। सूक्ष्मशब्दो वाक्तत्त्वम्। तदेवाधिष्ठानमाश्रयः। तदेव च निबन्धनं तासाम्। यतस्तस्मिन् गवादिपदार्थरूपेण गोशब्दादिरूपेण च विवर्ते गोत्वगोशब्दत्वाद(द्य ?)भिव्यक्तिर्भवति। **ताः**

---

12. ABD काल्मभि°. 1. B सवशब्दे°. 2. AD ययोर्नि°.
3. L °शक्तिः। न हि तेन विना. No mss. has the word विना.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मधिष्ठानपरिणामेन प्रतिलभमाना वाच्यवाचकभावेन व्यवतिष्ठन्ते। यथापरेषामिन्द्रियेषु विषयमात्राशक्तयः प्रतिलयं गच्छन्ति, तथेन्द्रियमात्राशक्तयो बुद्धिषु, बुद्धिमात्राशक्तयः प्रतिसंहृतक्रमे वागात्मनि। सा चेयं स्वप्नप्रबोधवृत्तिः प्रविभक्तपुरुषानुकारा महत्यपि वाक्तत्त्वे कारणे नित्यमवस्थिता। तथा परेऽप्याहुः—

वागेवार्थं पश्यति वाग्ब्रवीति वागेवार्थं निहितं सन्तनोति।
वाच्येव विश्वं बहुरूपं निबद्धं तदेतदेकं प्रविभज्योपभुङ्क्ते ॥ ११० ॥

खल्वपि[4] इति। ता हि जातयस्तत्रावस्थिता अपि न संवेद्या इत्यात्माभिव्यक्तये वाक्तत्त्वस्थगवादिभावेन परिणतिमपेक्षन्ते। यदाह **अधिष्ठानपरिणामेन** इति। अधिष्ठानस्य वाक्तत्त्वस्य। **वाच्यवाचकभावेन** इति। पिण्डपरिणामेनाभिव्यक्ता गोत्वादयो वाच्याः, गोवृक्षादिशब्दपरिणामेन गोशब्दत्वादिजातयो वाचिकाः। तदेवमाश्रयस्योत्पत्तौ जातीनामभिव्यक्त्या वाच्यवाचकरूपस्य विश्वस्य वाक्तत्त्वं निबन्धनमिति। **अपरेषाम्** इति। येषामिन्द्रियाणि विषया बुद्धिरिति सर्वम् (?)। **इन्द्रियेषु** इति। चक्षुरादिषु। **विषयमात्राशक्तयः** इति। प्रलये प्रथमतो रूपादयो विषयाः शक्तिरूपेणेन्द्रियेषु लीयन्ते, तान्यपि शक्तिरूपेण बुद्धिषु, बुद्धयोऽपि तथा परस्मिन् वागात्मनीति एतावद्धि सर्वम्। **स्वप्नप्रबोधवृत्तिः** इति। प्रलयात् [5]सर्गं यावत् मात्रयाप्यदर्शनात् स्वप्नवृत्तिः। सर्गात् प्रलयं यावद्भावावबोधात्प्रबोधवृत्तिः। **प्रविभक्तपुरुषानुकारा** इति। चैत्रो मैत्र इति योऽयं प्रविभागस्तमनुकरोति सा वृत्तिः। **महत्यपि** इति। योऽसौ महो देव इत्युच्यते। अपिशब्दात् सर्वोपसंहाररूपे तस्मिन् पुरुषे भेदानुकारो [6]नागतः, शक्त्यात्मनावस्थानात्। किमुत विवृत्तभेदेन। [7]**नित्यम्** इति। सदा। **अवस्थिता** स्वप्नप्रबोधवृत्तिः। इयं च सा विश्वस्य निबन्धनी शक्तिरित्युक्ता। **वागेव** इति। तदेव हि वाक्तत्त्वं बुद्धिरूपेण विवृत्तमर्थं जानाति। स्थूला वाक् करणस्था तर्हि ततोऽन्येत्याह **वाग्ब्रवीति** इति। सा व्यतिरिक्ता तत इति। **अर्थम्** इति। गवादिकम्। **निहितम्** इति। शक्तिरूपेणावस्थितम्। **सन्तनोति** इति। विस्तारयति। व्यक्तरूपेण जनयति। अत एवाह विश्वनिबन्धनमिति। एतद्धि तत्सर्वं यदुत ज्ञानं वागर्थश्चेति। भोक्तृभोग्यभोगविभागोऽपि तत्र नास्तीत्याह **उपभुङ्क्ते** इति। यदेतत् सर्वं प्रक्रान्तं तदेव प्रविभज्य भोक्तृभोग्यभोगप्रविभागभावेन विवर्तमाना उपभुङ्क्त इत्युच्यते ॥ ११० ॥

---

4. There is no अपि in the Vṛtti.
5. ABDL स्वर्गं.
6. AD न गतः.
7. ABD नित्यत्वम्.

Dr. Urmila Sharma Collection, Varanasi

षड्जादिभेदः शब्देन व्याख्यातो रूप्यते यतः ।
तस्मादर्थविधाः सर्वाः शब्दमात्रासु निश्रिताः ॥१११॥ [११९]

संविज्ञानपदनिबन्धनो हि सर्वोऽर्थः स्मृतिनिरूपणयाभिजल्पनिरूपणयाकारनिरूपणया च निरूप्यमाणो व्यवहारमवतरति। षड्जऋषभगान्धारधैवतनिषाद पञ्चममध्यमानां चानवस्थिता[1]प्रसिद्धसंविज्ञानपदानां विशेषोऽ(षा?)वधारणा निबन्धनपदप्रत्ययमन्तरेण नावधार्यते। गोपालाविपालादयो हि निबन्धनपदानि प्रकल्प्य

तथा शब्दशक्तिनिबन्धनं भेदावबोधं भावानां कथयति **षड्जादिभेदः**[2] इति। शब्दोऽर्थो ज्ञानमिति। **व्याख्यातः** इति। शब्देन प्रतिपादितः। **रूप्यते** इति। परिच्छिद्यते। **तस्मात्** इति। यतस्तन्निबन्धनं शब्दादिभेदनिरूपणम्। **अर्थविधाः** इति। अर्थप्रकाराः। **शब्दमात्रासु** इति। शब्दशक्तिषु।

स्मृतिनिरूपणया इति। न ह्यव्यपदेश्येनात्मना परिच्छिन्नेनापि व्यवहारः। तत्तु तथा परिच्छिद्योत्तरं शब्दानुविद्धया बुद्ध्या स्मर्यते इदमेवं च इति स्मृतिरूपेण। शब्दार्थयोरभेददर्शनमभि[3]जल्पनिरूपणा। 'इदमस्याः साधनम्', 'इयमेषां साध्या' इत्याकारनिरूपणा। ततो व्यवहारमवतरति। सर्वत्र संविज्ञानपदः....गमात्रः (संविज्ञानपदस्याङ्गभावः?) इत्याह **संविज्ञानपदनिबन्धनो हि** इति। अथवा **स्मृतिनिरूपणया** इति ज्ञानस्य निरूपणमाह। **अभिजल्पनिरूपणया** इति शब्दस्य। **आकारनिरूपणया** इत्यर्थस्याह। सर्व एते शब्दानुविद्धा व्यवहाराङ्गं न स्वलक्षणरूपेणेति। एतावान् हि सर्वोऽर्थः सदैव निरूपितो व्यवहाराङ्गमितिं। **षड्जर्षभ** इति दुरवधारभेदोदाहरणम्। अनवस्थितमप्रसिद्धं संविज्ञानपदमेषामिति। येन संविज्ञानपदेनैषां विशेषावधारणं तन्न प्रसिद्धं लोके। **निबन्धनपद** इति। येन पदेन तेषां निबन्धनं पदेन विशेषावधारणं तस्य वृत्त्यसंयतो (प्रत्ययः?) विशेषावधारणाय शब्दविशेषनिवेशमाश्रयन्ते। 'यत्र तारतर स्वरः कण्ठविवरस्य च वृत्तित्वं 'संवृतत्वम्' स षड्जः' इत्यादि। **गोपालाविपालादयः** इति। तेऽपि हि भेदव्यवहाराय निबन्धनपदानि कल्पयन्ति। **समाख्येयेषु** इति।

---

1. WW²SL °स्थित प्रसिद्ध°. Vṛṣabha had obviously अप्रसिद्ध as his explanation shows.

2. Though ABD have शब्दादिभेदः which certainly was what Vṛṣabha had in the Kārikā as his explanation shows, WW²SL have षड्जादिभेदः which fits in well with the Vṛtti. So I have retained it.

3. ABD °ममेदूजल्प°.

CC0. In Public Domain, Digitizagtion by eGangotri

गवादिषु विशेषविषयं व्यवहारमारभन्ते। तस्मात् समाख्येयेष्वसमाख्येयेषु च सामान्यविशेषशब्देष्वध्यारूढो भेदवानर्थः शब्दशक्तिसंसृष्टया शब्दानुविद्धया शब्दात्मिकया बुद्धया प्रकाश्यत उपगृह्यते स्वीक्रियते ॥ १११ ॥

शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः ।
छन्दोभ्य एव प्रथममेतद्विश्वं व्यवर्तत ॥ ११२ ॥ [१२०]

यथैवान्ये कार्यकारणभावमाचक्षाणाः कार्येषु कारणधर्मसमन्वयं दृष्ट्वा व्यावृत्तभेदं सूक्ष्ममसंवेद्यं सर्वविकारशक्त्यनुगतं प्रत्यस्तमितव्यक्तिशक्तिरूपमणुग्रामं

समाख्येयार्थाः गवादिपिण्डेषु ये शब्दाः प्रत्यस्यन्ते ते समाख्येया इत्युक्तम्। असमाख्येयार्थत्वादसमाख्येयाः षड्जादयः। समाख्येया इति शक्यार्थे कृत्यः, समाख्यातुं शक्या इति। गवादीनामर्थानां स्फुटतरं परिच्छेद्यतया शक्यत्वम्। षड्जादीनां तु दुराख्याना अर्था इति। **सामान्यविशेषशब्देषु** इति। सामान्यविशेषशब्दाः षड्जादयः। विशेषशब्दाः सन्निवेशिता ये गोपालकैः पिण्डेषु। **अध्यारूढः** इति। तस्मिन्नर्थे स शब्द उत्कीर्ण इवेति। **भेदवान्** इति, गवादिः। **शब्दशक्तिसंसृष्टया** इति। संसर्गः किं परमाण्वोरिवेत्याह **शब्दानुविद्धया** इति। व्यवधान(व्यधन ?)मन्तःप्रविष्टया सूच्या मण्यादीनां दृष्टमित्यवच्छिनत्ति **शब्दात्मिकया** इति। यत उपगृहीतार्थाकारशब्दरूपा सा बुद्धिः। **प्रकाश्यते** इति। प्रतिपाद्यते। प्रदीपेन घटादीनां पृथग्भावेऽपि दृष्टं प्रकाशनमित्यवच्छिनत्ति **उपगृह्यते** इति। यत उपग्रहः सन्दंशेनापि दृष्ट इत्याह **स्वीक्रियते** इति। ताद्रूप्योपगमनेनैकतामुपनीयत इति ॥ १११ ॥

न केवलं भेदावग्रहे शब्दः कारणमपि तूत्पत्तावपीत्याह **शब्दस्य** इति। **अयम्** इति। यदेतत् प्रत्यक्षं स्थावरजङ्गमं जगत्। **आम्नायविदः** इति। वेदविदः। न तु वयं कल्पयामः। यतो वेद एव तथा पठितम्। **छन्दःशब्देन** परं वाक्तत्त्वमाह।

यथैवान्ये इति। यथैवान्यैर्वैशेषिकादिभिः कार्यकारणभावोऽङ्गीकृतः तत्साधर्म्यं वाक्तत्त्वेऽपीति प्रसिद्धेन प्रतिपादयति। **कारणधर्मसमन्वयम्** इति। यतः कारणगतो धर्मः कार्येषु सम्यगन्वेति। तत्र परमाणवो घटादीनां कार्याणां पार्थिवत्वादिति स(दिस ?)मन्वयात् पृथिव्यात्मानः। तथा प्रधानं विकारग्रामस्य सुखादिसमन्वयदर्शनात् तद्रूपं संस्थापितम्। शक्तिसमूहवादिनामपि यतो विकारास्तत्कार्यजनकत्वेन संसृष्टरूपाः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]प्रधानं शक्तिसमूहमविद्याकारणं जन्मपरिणामासंसर्गं विवर्तं व्यवस्थापयन्ति तथैवाम्नाये संहृतभोग्यभोक्तृशक्तेर्वागात्मनो बहुधा कारणत्वमाम्नातम्।

"स इ एवैष ऋङ्मयो यजुर्मयः साममयो वैराजः पुरुषः। पुरुषो वै लोकः। पुरुषो यज्ञः। तस्यैता लोकम्पृणास्तिस्र आहुतयस्ता एव "त्र्यालिखिता वै त्रयो लोकाः"

इति। तथा—

"एष वै छन्दस्यः साममयः प्रथमोऽक्षन् वैराजः पुरुषो योऽन्नमसृजत। तस्मात् पशवोऽन्वजायन्त पशुभ्यो वनस्पतयो वनस्पतिभ्योऽग्निः। तस्मादाहुर्न दारुपात्रेण दुह्यादग्निर्वा एष दारुपात्रम्। तस्मान्न दारुपात्रेण दुह्यते।"

तेनैषां कारणतत्त्वं समूहमात्राभ्यो [2]बहिश्चैकत्र [3]समवायात्। [4]पृथिव्यादि। **मर्त्येषु** इति, जङ्गमम्, अनित्यं वा सर्वम्। वाच [5]उत्पन्नमिति। **बुभुजे** इति। भोग्यरूपम्, न केवलं भोक्तृभाव इति। **वागुवाच** इति। **पुरुत्रा** इत्यनेन संबन्धः पुरुशब्दाद्बह्वर्थाद् द्वितीयाबहुवचनान्ताद्

"देवमनुष्यपुरुषपुरुमर्त्येभ्यः ...." (P. 5. 4. 56.)

इति त्राप्रत्ययः। तेन वाग् बहूनर्थानुवाचेति। **वाचो न परम्** इति। वाचो व्यतिरेकेणान्यदभिधेयं [6]नास्ति। वाच्यापि सैवेति। अथवा **वाचा (वाचः ?)** इति वाक्यं प्रतिपादकम्। **पुरुत्रा वाचः** इति। न वाचोऽन्यत् किंचिद् बहूनर्थान् प्रत्याययति। **विभज्य** इति। वागादिरूपेण। **प्रजापतिः** इति। सर्वेषां कारणम्। तद्द्वारेण वाक्तत्त्वमाह। कथं विभज्येत्याह **छन्दोमयीभिः** इति। तस्मात् काश्चन न व्यतिरिक्ता व्यक्तयो विभज्यन्ते सर्गकाले इति कथयति। **विवेश** इति। तमेव च्छन्दस्यं ताभिर्विकार-

---

1. L प्रधानशक्ति°. But WW²S have प्रधानं श° which has been adopted.

2. AB हिश्चै°.

3. AB rep. पार्थिवत्वादिति ... समवायात्. The text which follows is still worse; it is a repetition of a part of the commentary on Kā. 23 and the Vṛtti thereon from the words: यस्य चैकत्र समकालनियतं सन्निधानमसन्निधानं च (p. 52, l. 27.) ... to ननु हेतुभूतप्रयत्नभेदाद् कर्मक्षण. (p. 55, l. 9.) This repetition is found in A, B and D, the three Mss. available for editing this portion of the Paddhati. This repetition has come *in place* of the Paddhati on the Vṛtti on Kā. 120, from the words व्यावृत्तभेदं to अमृतम्.

4. This may be a comment on the word अमृतं.

5. ABD वाचमनुत्पन्नमिति. 6. ABD om. न.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ऋग्वर्णः खल्वपि—

“ इन्द्राच्छन्दः प्रथमं प्रास्यदन्नं तस्मादिमे नामरूपे विषूची।
नाम प्राणाच्छन्दसो रूपमुत्पन्नमेकं छन्दो बहुधा चाकशीति ॥ ”

तथा पुनराह—

“ वागेव विश्वा भुवनानि जज्ञे वाच इत् सर्वममृतं यच्च मर्त्यम्।
अथेद्वाग्बुभुजे वागुवाच पुरुत्रा वाचो न परं यच्च नाह ॥ ”

पुराकल्पोऽप्याह—

“ विभज्य बहुधात्मानं स छन्दस्यः प्रजापतिः।
छन्दोमयीभिर्मात्राभिर्बहुधैव विवेश तम् ॥ क ॥
साध्वी वाग्भूयसी येषु पुरुषेषु व्यवस्थिता।
अधिकं वर्तते तेषु पुण्यं रूपं प्रजापतेः ॥ ख ॥
प्राजापत्यं महत्तेजस्तत्पात्रैरिव संवृतम्।
शरीरभेदे विदुषां स्वां योनिमुपधावति ॥ ग ॥
यदेतन्मण्डलं भास्वद् धाम चित्रस्य राधसः।
तद्भावमभिसम्भूय विद्यायां [7]प्रतिलीयते ॥ घ ॥ ११२ ॥

मात्राभिः प्राविशत्। स्वात्मानमेव प्रलयकाले प्रविष्ट इति। व्यक्तिरूपेण भूत्वा शक्तिरूपेणात्रतिष्ठन इति। **साध्वी** इति संस्कृता। **भूयसी** इति। अवैयाकरणोऽपि यदृच्छया कदाचित् साधु समुच्चारयेदिति। **पुरुषेषु** इति। ये [8]वैयाकरणास्तेषु। ये नासाधून् जानतो (जानते ?) प्रयुञ्जते च। **पुण्यम्** इति, तस्य वाक्तत्त्वाख्यस्य प्रजापतये साधवः शब्देन (प्रजापतेः साधवः शब्दाः ?) पुण्यं रूपमिति। **प्राजापत्यम्** इति। वाक्तत्त्वस्य प्रजापतेस्त एव शब्दाः। [**महत्तेजः इति ?**] अर्थप्रकाशकत्वात्। **तत्पात्रैरिव** इति। यथा प्रदीपतेजः पात्रेण घटादिना संवृतं तत्पात्रभेदे बहिर्विसर्पति तथा शरीरभेदे वैयाकरणानां तत्तेजः साधुशब्दाख्यं वाक्तत्त्वमनुप्रविशतीति। यदि (यद् ?) प्रक्रान्तवाक्तत्त्वरूपं शब्दब्रह्म। **मण्डलम्** इति। सर्वशक्तीनां तत्र समावेशान्मण्डलमिति। **भास्वद्** इति। परिशुद्धशब्दरूपतया प्रकाशस्वरूपत्वात्। **धाम** इति। स्थानम्। **राधसः** इति। योऽसौ मुक्तात्मनां परम आनन्दः तं राधःशब्देनाह। तस्य तदवस्थानम्। **तद्भावम्** इति। शब्दब्रह्मभावम्। तद्रूपतामिति यावत्। **अभिसम्भूय** इति। प्राप्य। **विद्यायाम्** इति। विद्यायां सत्यां तत्प्राप्तिरिति। **प्रतिलीयते** इति। यतस्तत्प्राप्तिरेव प्रतिलयस्तेनाह प्राप्य प्रतिलीयत इति। अथवा तदेव वाक्तत्त्वमभिसंभूय देवदत्तादिरूपतां प्रतिपद्य विद्यायां सत्यां तत्रैव प्रतिलीयत इति ॥ ११२ ॥

---

7. WW²SL प्रविलीयते. 8. ABD व्याकरणेषु.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इतिकर्तव्यता लोके सर्वा शब्दव्यपाश्रया ।
यां पूर्वाहितसंस्कारो बालोऽपि प्रतिपद्यते ॥ ११३ ॥ [१२१]

सदपि वाग्व्यवहारेणानुपगृहीतमर्थरूपमसता तुल्यम्। अत्यन्तासच्च प्रसिद्धं लोके शशविषाणादि प्राप्ताविर्भावतिरोभावं च गन्धर्वनगरादि वाचा समुत्थाप्यमानं मुख्यसत्तायुक्तमिव तेषु तेषु कार्येषु प्रत्यवभासते। समाविष्टवाचां च स्वजातिषु

तदेवं शब्दस्योत्पत्तौ निमित्तभावमाख्याय तस्य निष्पादकमेवंकर्तव्यमित्यत्रापि शब्दस्य व्यापारमाह **इतिकर्तव्यता** इति। **शब्दव्यपाश्रया** इति। शब्दप्रकल्पितेन वस्तुना व्यवहार इति। **याम्** इति। पूर्वस्मिन् जन्मनि [1]शब्देनाहितः संस्कारः। तद्वशाद् **बालोऽपि** इतिकर्तव्यतां **प्रतिपद्यते**।

[2]**सदपि** इति। न वस्तुनः सत्त्वमसत्त्वं वा व्यवहाराङ्गम् अपि तु शब्दकल्पित एवाकारः। यदाह **असता तुल्यम्** इति। सदपि तदसदेव, व्यवहारानङ्गत्वात्। **अत्यन्तासच्च** इति। [3]असतोऽपि शब्दप्रकल्पितेनाकारेण वस्तुसत इव व्यवहाराङ्गतामाह। **प्रसिद्धम्** इति। असत्त्वस्य लोके प्रसिद्धत्वात्। [4]**शशविषाणादि** इति। दृष्टान्तोपगमनं [5]शब्दारोपितमेव। **प्राप्ताविर्भावतिरोभावम्** इति। गन्धर्वनगरं हि परिच्छेदकस्य ज्ञानस्य विषयतामुपगच्छत् प्राप्ताविर्भावम्। अन्यथा प्राप्ततिरोभावम्। शब्दप्रकल्पितं तु सदेव। अथवा [6]वाचा स्पष्टं गन्धर्वनगरं दृश्यते विनश्यतीति जन्मविनाशावनुभवतीति प्राप्ताविर्भावतिरोभावा असन्तश्च ते। यदाह **वाचा** इति। अपरे पठन्ति -[7]**बलिकंसादयश्च** इति। बलिं बन्धयति, कंसं घातयति। ते बहिरसन्तोऽपि शब्देन समुत्थापिता जन्मविनाशावनुभवन्ति। कथं तर्ह्यप्रवृत्तशब्दव्यवहाराणां बालानामितिकर्तव्यताप्रतिपत्तिरित्याह **समाविष्टवाचां च** इति। समाविष्टा वागेषामिति। समावेशः सूक्ष्मवाग्रूपानुषङ्गः। **स्वजातिषु** इति। जातिभेदादपीतिकर्तव्यतासंप्रतिपत्तिभेदः। यथा जातमात्रस्य गोरुत्पद्यते जङ्घशोऽन्तरमुखप्रतिपत्ति-

---

1. ABD अभिहितः. 2. AD सापीति. 3. BAD अतोऽपि.
4. ABD शशविशाणवद्. But no Mss. of the Vṛtti has this reading.
5. BD शब्दार्थोऽपि तमेव. 6. ABD वाचः.
7. Vṛtti obviously knew a text of the Vṛtti in which this word also occurred in the sentence which is being explained. But the sentence has a singular verb and it is not clear how this word which is a noun in the plural number could be connected with it. Ww[2]s have not got it.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बालानामपि पूर्वशब्दावेशभावनासंस्काराधानात्तासु तास्वर्थक्रियास्वनाख्येयशब्दनिबन्धना प्रतिपत्तिरुत्पद्यते ॥ ११३ ॥

आद्यः करणविन्यासः प्राणस्योर्ध्वं समीरणम् ।
स्थानानामभिघातश्च न विना शब्दभावनाम् ॥ ११४ ॥ [१२२]

अनादिश्चैषा शब्दभावना प्रतिपुरुषमवस्थितज्ञानबीजपरिग्रहा। न ह्येतस्याः कथञ्चित् पौरुषेयत्वं संभवति। तथा ह्यनुपदेशसाध्याः प्रतिभागम्याः एव करण-

---

रन्यथा मनुष्यविशेषाः । तथा जल्पादिषु । पूर्वशब्दावेश इति । शब्दपरिच्छेदी प्रत्ययः अनुप्रविष्ट इव शब्दम् । तत्र तस्य भावना अभ्यासः । सोऽयं संस्कारमाधत्ते । [8]ततः इति । यतः स्पष्टवाचां शब्दपूर्विका सा दृष्टा ततस्तेषामपि पूर्वशब्दानुगमोऽवसीयते इति । [9]अनाख्येय इति । योऽसौ तस्य प्रतिपत्तिनिबन्धनभूतः शब्दो बुद्धिसंस्कारानुगतो नानुवर्तते नासावाख्यानं याति । अथवा समाविष्टवाचां च इति । ये वाचमुच्चारयितुं समर्थास्ते शब्दादर्थं प्रतिपद्यन्ते । तत्र निरूपयितुं शक्नुवन्ति शब्दार्थोऽयमस्येति । ते बालाः । स्वजातिषु [इति], जातिभेदाद् भिद्यन्तेऽभिलापाः । अनाख्येय इति । नासौ समर्थ आख्यातुम्, इदमस्य [10]वाच्यमिति । अथवा शब्दादेव प्रतिपद्यतेऽर्थमिति ॥ ११३ ॥

शब्दनिष्पादनेऽपि पूर्वशब्दभावनायाः कारणतामाह आद्यः इति । अशिक्षितशब्दोच्चारणस्य प्रथमतो यः करणानां शब्दोच्चारणे नियोगः स विन्यासः येनाकृताभ्यास एव तानि तानि करणानि तत्र तत्र वर्णे प्रथमतो नियुङ्क्ते । अथवान्तःकरणस्य प्रथमतो विन्यासो येन पूर्वमकृतशब्दोच्चारणोऽपि बालो विशिष्टवर्णशब्दोच्चारणेऽपि विशिष्टं प्रयत्नमारभते । [1]प्राणस्य इति । ततः प्राणमूर्ध्वं प्रेरयन्ति । स्थान इति । ततः स्थानाभिघात इति । न विना इति । पूर्वशब्दभावनामन्तरेण न भवति । पूर्वशब्दाहित एव नानुवर्त्ते .... तदिति ।

[2]तत्रापकृत्येत्याह अनादिश्चैषा इति । संसारस्यानादित्वादपौरुषेयतामाह । इति सर्वकालमवस्थिता । सर्वना कुतः शब्दोच्चारणायाः कदाचित् कथं कुतो वा प्रतिपत्तौ

---

8. ABD have ततः. It is clear that in Vṛṣabha's text of the Vṛtti, the word occurred before तासु, but WW^2s have not got it and without it also, the Vṛtti yields the same meaning.

9. BD अनेकाख्येय. 10. B न्याय्यमिति.

1. BD प्रमाणस्य. 2. D तत्राप्रकृत्य.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विन्यासादयः। को ह्येतान् पुरुषधर्मानन्यत्र शब्दात्मिकतायाः कर्तुं प्रतिपादयितुं वा समर्थ इति ॥ ११४ ॥

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥ ११५ ॥ [१२३]

यथास्य संहृतरूपा शब्दभावना तथा ज्ञेयेष्वर्थेषूत्पन्नेनाप्यविकल्पेन ज्ञानेन कार्यं न क्रियते। तद्यथा त्वरितं गच्छतस्तृणलोष्टादिसंस्पर्शात् सत्यपि ज्ञाने काचिदेव सा ज्ञानावस्था यस्यामभिमुखीभूतशब्दभावनाबीजायामाविर्भूतास्वर्थोपग्राहिणा-

---

प्रतिनियम इत्याह प्रतिपुरुषम् इति। अवस्थितो ज्ञाने बुद्धिस्थबीजपरिग्रहो यस्याः। सा हि ज्ञाने बीजपरिग्रहेण प्रतिपुरुषमवस्थिता। बीजानां तु वृत्तिलाभे कार्यनिष्पत्तिर्नान्यदेति। अनादित्वेऽपौरुषेयत्वं हि कथितम्। अनुपदेशसाध्याः इति। यद्यपीदमिदं च स्थानं व्यापारयेत्युपदिश्यते बालानां तथापि प्रतिभोद्घाटनमात्रमेव शब्दाः कुर्वन्ति। यतस्तेऽप्युपदेशशब्दा बालस्याप्रसिद्धसंबन्धा एव। तत उपदेशः पूर्वशब्दभावनाबीजवृत्तिलाभमेव करोतीति। पुरुषधर्मान् इति। करणविन्यासादयः। [3]शब्दात्मिकतायाः इति। यासौ बुद्धौ शब्दभावना। कर्तुम् इति। यत उच्चारयिता तामेवानुगच्छति निष्पादयति। प्रतिपादयितुं वा इति। उपदेष्टापि प्रतिभोद्घट्टनेन तामेवानुगच्छति ॥ ११४ ॥

सम्प्रति ज्ञाने शब्दरूपानुषङ्गमाह न सोऽस्ति इति। सर्वस्मिन् ज्ञाने शब्दानुगमः केवलमनुवृत्तिः क्वचिद् यथा निमित्तशून्यवस्तुग्राहिणि ज्ञाने लब्धवृत्तिः क्वचिद् यथा तदुत्तम(र ?)भाविषु भूतेषु। तमेवानुषङ्गमाह अनुविद्धमिव इति उपदेष्टापि प्रतिपन्नशब्दरूपम्।

[1]संहृतरूपा इति। यावज्ज्ञाने व्यक्तरूपता वृत्तिलाभेन भवति [2]तावद् भावनानुगम इति। [3]कार्यं न इति। ज्ञाने [4]शब्दानुगम इति। [5]ज्ञानकार्येण इति ज्ञाने परिच्छेद्य तन्निबन्धनो [6]भेवदेययोः व्यवहारो ज्ञानकार्यं तच्चोपमेवरूपं एतज्जनकर्म चापरिच्छिन्नमित्यतोज्ञानात् परित इत्यन्यपदार्थाभिसंबन्धो अने। त्वरितं गच्छतो न हि संहितविपरिच्छेदेषु ज्ञानेषु शब्दभावनावृत्तिलाभाभावे न ज्ञानकार्यम्। सत्यपि

---

3. ABD शब्दार्थकतायाः.
1. BD संभूतरूपेऽपि.
2. BD एवं भावना°.
3. ABD न कार्यान.
4. BD ज्ञानेच्छानु°, D ज्ञानेशानु°.
5, B कार्यादिनेति, D कार्यान्तमिति.
6. °नादेव देययोः.

Dr. Urmila Sharma Collection, Varanasi

माख्येयरूपाणामनाख्येयरूपाणां च शब्दानां प्रत्यर्थनियतासु शक्तिषु शब्दानुविद्धेन शक्त्यनुपातिना ज्ञानेनाक्रियमाण उपगृह्यमाणो वस्त्वात्मा ज्ञानानुगतो व्यक्तरूपप्रत्यवभासो ज्ञायत इत्यभिधीयते। स च निमित्तान्तरादाविर्भवत्सु श्रुतिबीजेषु स्मृतिहेतुर्भवति। तथैकेषामाचार्याणां सुप्तस्यापि जाग्रद्वृत्त्या सदृशो ज्ञानवृत्तिप्रबन्धः। केवलं तु शब्दभावनाबीजानि तदा सूक्ष्मां वृत्तिं प्रतिलभन्ते। तस्मात्तामसीं

इति। ज्ञानविशेषेऽप्यभिमुखीभूते। न स्वकार्यजननयोग्यता शब्दभावनाबीजस्याभिमुख्यम्। **आविर्भूतासु** इति। [7]**शब्दानां शक्तिषु** इति संबन्धः। [8]अवदाता अपि ज्ञानविशिष्टाः शब्दभावनाशक्तयः [9]इदन्तया अर्थानामुपग्रहे भानस्य निमित्तं भवन्ति[10]। **अर्थोपग्राहिणाम्** इति। अर्थप्रतिपादकानाम्। **शब्दानाम्** इति संबन्धः। **आख्येयरूपाणाम्** इति। आख्यातुं शक्यते [11]रूपं येषां गवादिशब्दवत्। **अनाख्येयरूपाणाम्** इति। [12]षड्जादिवत्। यतो न तेषामर्थः पर्यायान्तरेणाख्यातुं शक्यते। [13]**प्रत्यर्थनियतासु** इति। प्रतिनियतार्थपरिच्छेदोपयोगिन्यो हि ताः। अर्थनिरूपणयोग्यत शब्दस्य शक्तिरित्युक्ता। तस्यां हि प्रबुद्धायां तज्ज्ञानं तयार्थं निरूपयति। **शब्दानुविद्धेना** इति। [14]शब्दोपरक्तेन। स सूक्ष्मः सर्वज्ञानेऽस्तीत्याह [15]**शब्दशक्त्यनुपातिना** इति। शब्दस्य शक्तिरर्थप्रतिपादनम्, तदुपदर्शनेऽर्थरूपप्रतिपत्तेः, गौरयमश्वोऽयमिति। **आक्रियमाणः** इति। विशिष्टेनाकारेण शब्दानुविद्धेन स्पष्टेन [16]लभ्यमानः। तदेवाह **उपगृह्यमाणः** इति। **ज्ञानानुगतः** इति। प्रत्यवमर्शज्ञानेन[17]। **व्यक्तरूप** इति। व्यक्तरूपः प्रत्यवभासोऽस्मिन्। इदं तदिति व्यपदेश्यरूपत्वात्। **स च** इति। वस्त्वाभासः। **निमित्तान्तराद्** इति। सदृशग्रहणादेर्निमित्तात्। **श्रुतिबीजेषु** इति। शब्दशक्तिषु। यच्छब्दरूपनिवेशात्तथाभूतोऽर्थः तस्यैव शक्तिप्रबोधभेदात्ततः[18] स्मृतिरुत्पद्यते। यथानुभवं स्मृत्यु .... नादवसीयते तदनेनैव निरूपितनानाकारेणानुभूतः स विषय इति। [19]सर्वज्ञानानां च [20]शब्दभावनानुभवानुगमाज्जाग्रदवस्थया सदृशीं स्वप्नावस्थां वर्णयन्ति। यदाह **एकेषाम्** इति। केचित्तु तत्र ज्ञानस्याभावमेव प्रतिपन्नाः। सति तस्मिन्नविशेष एव जाग्रदवस्थया भवति सदृश इत्युभयत्राव्यवच्छिन्नो ज्ञानप्रबन्धः। कस्तर्हि विशेष इत्याह [21]**सूक्ष्माम्** इति। न व्यवहारयोग्यं [22]ज्ञानम्, शब्दभावनानां

---

7. ABD शक्तानां. 8. BD गवदा°. 9. BD इदं कायार्था.
10. ABD भवति. 11. BD °ते तो ये°. 12. BD षड्भागादिवत्.
13. BD प्रत्यय तासु. 14. ABD °रक्ते.
15. The Vṛtti has शक्त्यनुपातिना. 16. D पच्यमानः. 17. ABD °ज्ञाने.
18. AD तत्र. 19. BD सर्वज्ञानां. 20. ABD शब्दभावानुभावानु°.
21. ABD सूक्ष्मात्. 22. ABD have न before ज्ञानम्.

CC0. In Public Domain, Digitizagtion by eGangotri

चेति तामवस्थामाहुः। तदेतत् संज्ञानं शब्दप्रकृतिविकारभावेनाविर्भावतिरोभावावजस्रं प्रत्यनुभवति ॥ ११५ ॥

वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती ।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी ॥ ११६ ॥ [१२४]

यथा प्रकाशकत्वमग्नेः स्वरूपं चैतन्यं वान्तर्यामिणस्तथा ज्ञानमपि सर्वं वाग्रूपमात्रानुगतम्। याप्यसञ्चेतितावस्था तस्यामपि सूक्ष्मो वाग्धर्मानुगमोऽभ्यावर्तते। योऽपि प्रथमोपनिपाती बाह्येष्वर्थेषु प्रकाशः स निमित्तानामपरिग्रहेण वस्तुस्वरूपमात्रमिदं तदित्यव्यपदेश्यया वृत्त्या प्रत्यवभासयति। स्मृतिकालेऽपि तादृशानामुप-

---

स्पष्टानामा(मना ?)विर्भावात्, तस्मादनिष्पन्नस्य परिच्छेदस्याभावात्। ननु ज्ञानस्याभावः असंश्चेति ते निरूपितभेदविषयभेदलक्षणयो ज्ञातानां तस्यामवस्थायां नास्ति स्पष्टग्रहणाभावात्। तदेतत्[23] संज्ञानम् इति। यतः शब्दभावनाबीजवृत्तिलाभे तदर्थसंवेदनमुपजायते, ततः शब्दः प्रकृतिः, ज्ञानं विकारः। यतश्च तस्माज्ज्ञानादयं गौरिति शब्दो भवति ततो ज्ञानं प्रकृतिर्विकारः शब्द इति। अथवा शब्दभावनानुविद्धं ज्ञानं तदनुविद्धज्ञानकारणं ततस्तदव्यतिरेकिण्यपि शब्दभावना ज्ञानस्य कारणम्। कार्येऽपि ज्ञाने शब्दभावनास्तीति सा कार्यं पूर्वज्ञानस्येति ॥ ११५ ॥

ज्ञानेऽपि शब्दाकारानुगमोऽस्तीति द्रढयन्नाह **वाग्रूपता चेद्** इति। **उत्क्रामेत्** व्यपगच्छेत्। **शाश्वती** इति। नित्या। **प्रकाशेत** इति। प्रकाशस्य [1]स्वप्रकाशताख्यो व्यापारः। स एव वाग्रूपतायामसत्यां न भवति। **सा हि** इति। वाग्रूपता। **प्रत्यवमर्शिनी** इति। या निरूप्यते तया। यतः शब्दानुगममन्तरेण न प्रत्यवमर्शः।

यथा इति। यथाग्नेरन्तर्यामिणश्च स्वरूपं प्रकाशश्चैतन्यरूपता[च]तथा ज्ञानस्यापि वाग्रूपता। कथं स्वप्ने यत्र न वाग्रूपानुषङ्ग इत्याह **सूक्ष्मोऽपि** इति। सूक्ष्म इत्यलब्धवृत्तिस्तत्र शब्दभावना। **योऽपि** इति। यो [2]विषयोपनिपाती प्रथमः प्रत्यक्षः प्रत्ययः तत्रापि यः सूक्ष्मो वाग्रूपानुगम इति वर्तते। **निमित्तानाम्** इति। ततो हि प्रथमोपनिपातिप्रत्यया[3]दुत्तरकालं ग्रहणं यतस्तेषां वस्तुसंबन्धिनां गोत्वादीनां विशेषणानाम्। [4]**अपरिग्रहो**ऽपरिच्छेदः। **अव्यपदेश्यया** इति। शब्दभावना विद्यमानापि सा कार्याभावान्न तत्र वृत्तिं लभेत। ततो विशेषणरहितमेव वस्तु प्रत्याय-

---

23. ABD ज्ञान.
1. AD °एकाख्यो, B सप्रकारकाख्यो, L सप्रकारताख्यो.
2. L प्रथमोपत्ति°.
3. ABD °यानुत्तर°.
4. ABD परिग्रहो.

Dr. Urmila Sharma Collection, Varanasi

लब्धबीजानामाभिमुख्ये स्मर्तव्येषु श्लोकादिषु प्रकाशानुगममात्रमारूपमिव बुद्धौ विपरिवर्तते कोऽप्यसावनुवाकः श्लोको वा योऽयं मया श्रुतिमात्रेण प्रक्रान्त इति। वाग्रूपतायां चासत्यामुत्पन्नोऽपि प्रकाशः पररूपमनङ्गीकुर्वन् प्रकाशनक्रियासाधनरूपतायां न व्यवतिष्ठते। भिन्नरूपाणां चानुपकारिणामात्मान्तरानात्मनामितरेतरस्य वस्तुमात्राज्ञाने प्रत्यवभासमाने यदुत्तरकालमनुसंधानं प्रत्यवमर्श एकार्थकारित्वम-

यति। **तादृशानाम्** इति। अव्यपदेश्यवस्तुविषये [5]प्रत्याय्यत्वरहितानाम्। न विषयरूपस्य स्फुटस्य तदा स्फुरन्ति किं तु संवेदनमात्रस्येति। **आरूपमिव** इति। अनिर्धारितविशेषणं सामान्यमात्रम्। यदाह **कोऽप्यसौ** इति। **श्रुतिमात्रेण** श्रवणमात्रेण। तदनेन विषयरूपस्यास्पष्टस्य यथानुभवस्मरणेऽपीष्टवाग्रूपानुगममाह **वाग्रूपतायां च** इति। यदि ज्ञाने वाग्रूपता न स्यात्। **पररूपम्** इति। विषयस्य विशिष्टं व्यपदेश्यानुरूपं, वाग्रूपतायामसत्यां[6] च(ज्ञा?)नेन न परिच्छिद्यते। वाग्रूपतानुषक्तस्य तद्रूपोपग्रहणसामर्थ्यात्। ततश्च प्रकाशयतीति व्यवहारो न स्यात्। क्रियानिबन्धनभावो न स्यात्। वाक्यार्थविषयस्य पदार्थप्रत्यवमर्शस्य प्रत्ययवाग्रूपानुषङ्गं दर्शयति **भिन्नरूपाणाम्** इति। देवदत्त गामित्यादिपदार्थानां परस्परव्यावृत्तरूपता। **अनुपकारिणाम्** इति। यद्यपि विभक्त्योपकारिता द्योत्यते तथापि युगपदुपग्राह्योपग्राहकाणामिव परस्परावच्छेदरूपानुग्रहाभावः। स्वरूपप्रतिलम्भमात्रोपक्षयाच्च[7]। **आत्मान्तर**[8] इति। आत्मान्तरमेषामात्मा न भवति। **इतरेतरस्य** इति। इतरस्येतर आत्मा न भवति। इतरस्यापीतरो देवदत्तार्थो [9]गवार्थस्यात्मेत्यादि। ननूक्तं। **यदुत्तरकालम्** इति। अभिन्नपदार्थपरिच्छेदादुत्तरकालम्। **अनुसन्धानम्** इति। पदेभ्योऽवगतानामर्थानां परस्परावच्छेदेनावधारणमनुसन्धानम् देवदत्तकर्तृकं[10] गोकर्मकम्[11], देवदत्तः कर्तृत्वादि। **प्रत्यवमर्शः** इति। [12]पदेभ्योऽनुभूतानामर्थानामाकारनिरूपणा। पूर्वकालभाविनी[13] चेयमवस्था। ततो ह्यनुसंधानमिति अनुसन्धानकालमाह। **एकार्थकारित्वम्** इति। ततोऽप्रति[14]सन्धानवाक्याप्रत्ययादेकामितिकर्तव्यतां जनः। अन्ये त्वेकपरतां समीहन्ते। अन्ये त्वेतत्-

5. A प्रत्याप्यरहि°, B प्रत्यन्वेय्यन्यहितानि, D प्रत्यये मान्यहिता°.
6. AB °पतायमन्त्याछानेन, D °पतायामन्त्याच्छादनेन. 7. D °त्रोपलक्षणत्वाच्च.
8. Vṛṣabha seems to have had आत्मान्तरानात्मनाम् in the Vṛtti instead of आत्मान्तरात्मनाम् which the Mss. of the Vṛtti have.
9. AD नवार्थ°. 10. L देवदत्त कर्तृ.
11. A °कर्मको, B कर्तृतो, L गो कर्तृ. 12. ABD यदेभ्यो.
13. BD °लहानि चे°. 14. B ततो प्रतिसन्धानानन्तरं वाक्या प्र°.

CC0. In Public Domain, Digitizagtion by eGangotri

विभागेन शक्तिसंसर्गयोगोपग्रहः तद् वाग्रूपतायां बद्धम्। सा ह्यनुसंदधाना प्रत्यवमृशन्ती च सर्वविशेषणविशिष्टेऽप्यर्थक्रियाकारिणि प्रत्यये शक्त्यपोद्धारकल्पनया भेदसंसर्गमात्रां न विजहाति ।। ११६ ॥

सा सर्वविद्याशिल्पानां कलानां चोपबन्धनी ।
तद्वशादभिनिष्पन्नं सर्वं वस्तु विभज्यते ॥ ११७ ॥ [१२५]

विद्याशिल्पकलादिभिर्लौकिकेषु वैदिकेषु चार्थेषु मनुष्याणां प्रायेण व्यवहारः प्रतिबद्धः। मनुष्याधीनाश्चेतरस्य भूतग्रामस्य स्थावरजङ्गमस्य प्रवृत्तयः। विद्यादयश्च वाग्रूपायां बुद्धौ निबद्धाः। घटादीनां चाभिनिष्पादने प्रयोज्यप्रयोजकानामुपदेशसमीहादि सर्वं वाग्रूपतानुसारेण प्रकल्पते ॥ ११७ ॥

पदत्रयमुत्तरोत्तरव्याख्यया व्याचक्षते। **शक्तिसंसर्ग** इति। देवदत्तादिकर्तृशक्तीनां परस्परानुप्रवेशः संसर्गः। तेन योगः संबन्धः क्रियान्तरस्य, तस्योपग्रहः स्वीकारः। शक्तिसंसर्गात्मको वा योग इति। शक्तीनां संसर्गेण, विभागतेत्याह (न विभागेनेत्याह ?)।

वाग्रूपतायाम् इति। पदेभ्योऽवसितानर्थान् यदेदं तदिति वाग्रूपानुविद्धेन प्रत्ययेन निरूपयति ततः तत्पूर्वकमनुसन्धानं भवति। तदेवाह **सा हि** इति [भेद] **संसर्गमात्रां न विजहाति** इति संबन्धः। प्रत्यवमर्शादिभेदमात्रानुसन्धानसंसर्गमात्रां न जहातीति। ततो भेदेन प्रत्यवमृश्यानुसन्धत्त इति। **सर्वविशेषण** इति। सर्वशक्तिसंसृष्टतया विषयत्वात् प्रत्ययमपि तथाह। **अर्थक्रिया** इति। तत एव हि प्रत्ययादर्थक्रियायां प्रवर्तते। ननु तस्याभिन्नत्वात् कथं प्रत्यवमर्शः कथं तत्पूर्वकमनुसन्धानमित्याह **भेदशक्त्यपोद्धारकल्पनया** इति। समुदायरूपस्य युगपत् कर्तुमशक्यत्वाद् आनुपूर्वीप्रतिपत्त्यर्थं शक्तिमपोद्धरति। भेदः शक्त्यपोद्धारः। संसर्गोऽप्यनुसंहतिरूपता। तेनाभिन्नेऽपि वाक्यार्थप्रत्ययो व्यवस्थित एवेति साध्यसाधनमनुगमः प्रत्यवमासत इति। .... वमायायते या या मध्यानिष्पादितमिति वाग्रूपानुषङ्गतो विभजते अभिषेकतावित्यपरे ॥ ११६ ॥

अभिनिष्पन्नम् इति। वाग्रूपतावशादन्तस्तन्निष्पन्नं **वस्तु** पश्चाद् **विभज्यते** बहीरूपेण क्रियते। यद्वा निष्पन्नमपि वस्तु।

प्रयोज्यप्रयोजकानाम् इति। प्रयोजक एवं [1]क्रियतामित्युपदिशति। प्रयोज्योऽप्येवं करोमीति[2] समीहते। [3]तदसंभवं वाग्रूपतामन्तरेण। तथास्वपि इति ॥ ११७ ॥

---

1. BD एव यतमि°. 2. ABD करोतीति. 3. ABD तद्वसंवा°.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सैषा संसारिणां संज्ञा बहिरन्तश्च वर्तते।
तन्मात्रामव्यति[1]क्रान्तं चैतन्यं सर्वजातिषु ॥ ११८ ॥ [१२६]

योऽयं चैतन्ये वाग्रूपतानुगमस्तेन लोके ससंज्ञो विसंज्ञ इति व्यपदेशः क्रियते। एवं ह्याह

अर्थक्रियासु वाक् सर्वान् समीहयति देहिनः।
तदुत्क्रान्तौ विसंज्ञोऽयं दृश्यते काष्ठकुड्यवत् ॥

इति। अन्तःसंज्ञानामपि सुखदुःखसंविन्मात्रा यावद्वाग्रूपतानुवृत्तिस्तावदेव भवति। बहिःसंज्ञेषु तन्निबन्धनो लोकव्यवहारस्तदभावान्नियतमुत्सीदेत्। न हि सा चैतन्ये नानाविधा जातिरस्ति यस्यां स्वपरसंबोधो यो वाचा नानुगम्यते। तस्माच्चितिक्रियारूपमलब्धवाक्शक्तिपरिग्रहं न विद्यते। वाक्तत्त्वरूपमेव चितिक्रियारूपमित्यन्ये। तथाह

सैषा इति। वाग्रूपता। संसारिणाम् प्राणिनाम्। या संज्ञेत्युच्यते प्राणिनां वाग्रूपता सा। तेषां द्वैविध्यमाह बहिरन्तश्च इति। अन्तःसंज्ञिनो बहिःसंज्ञिनश्च। [2]तन्मात्राम् इति। [3]वाङ्मात्राम्। अव्यतिक्रान्तम् इति। न स प्राणिविषयो यस्य चैतन्ये वाग्रूपानुषङ्गो नास्तीति।

योऽयम् इति। यो विशिष्टाकारपरिच्छेदकेन वाग्रूपानुषङ्गेण प्रत्यवमर्शेन प्रत्ययो व्यवहारः। तेन [4]अतः। ससंज्ञः तदभावाद् विसंज्ञः। अनुजातमात्रस्य प्रवृत्तिभ्यां लब्धवृत्तिश्च शब्दानामङ्गीकृत्यैवमुक्तम्। समीहयति इति। वाग्रूपानुषङ्ग एव पदार्थानां समीहनं चेष्टनं भवतीति वाचैव युक्ताः प्राणिनश्चेष्टन्ते। विसंज्ञः इति। व्यवहारयोग्यस्य परिच्छेदस्याभावाद्विसंज्ञो यथा काष्ठादयः। [5]अन्तःसंज्ञानाम् इति। बहिर्विषयेभ्यो व्यावृत्ता तदन्तःसंनिवेशिता संज्ञा। यावद् इति। तदा हि तेषां चेतना सफला, अन्यदा त्वचेतनारूपा एवेति। [6]बहिःसंज्ञेषु इति। मनुष्यादिषु। तेषां वाग्रूपानुषङ्गमन्तरेण लोकव्यवहाराभाव इति। जातिरस्ति इति। [7]स्वसंबोधानुगम एव स्थावरेषु, उभयानुगमो जङ्गमेषु मनुष्यादिषु इति। [चिति?] क्रियानुरूपम् इति। चैतन्यक्रियानुरूपमिति। यतः संवेदनानि व्यापिशिष्टो व्यवहारः। अलब्ध इति। वाग्रूपानुषङ्गोपलम्भराहित्यम्। तदेव भेदः चैतन्यवाचोः। अन्ये त्वभेदमेव मन्यन्त इत्याह वाक्तत्त्वम्

---

1. WW^2S अप्यतिक्रान्तं.
2. ABD तन्मात्रम्.
3. ABD वाङ्मात्रम्।
4. ABD तिनमित्यतो संज्ञ.
5. ABD अन्तः संज्ञिनाम्.
6. ABD बहिः संज्ञिषु.
7. ABD संबोधना.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भेदोद्ग्राहविवर्तेन लब्धाकारपरिग्रहा।
आम्नाता सर्वविद्यासु वागेव प्रकृतिः परा ॥ (क)
एकत्वमनतिक्रान्ता वाङ्नेत्रा वाङ्निबन्धनाः।
पृथक् प्रत्यवभासन्ते वाग्विभागा गवादयः ॥ (ख)
षड्द्वारां षडधिष्ठानां षट्प्रबोधां षडव्ययाम्।
ते मृत्युमतिवर्तन्ते ये वै वाचमुपासते ॥ (ग) ॥ ११८ ॥

इति। परं शब्दं ब्रूमः। **भेदोद्ग्राहविवर्तेन** इति। भेदा गवादयः। भिद्यन्त इति। तेषामुद्ग्राहः स्वीकारः। [8]तदात्मको यो विकल्पो भेदः, तेन लब्ध आकारपरिग्रहो यया। यतश्च भावानामाकारपरिग्रहेण [9]परा प्रकृतिः विवर्तते। तच्चैतन्यात्मना परिणमत इति [10]वाक्चैतन्ययोरभेदः। **वाङ्नेत्राः** इति। तेऽर्थरूपाः शब्दरूपाश्च पदार्था वचनान्नीयन्त इति। [11]सामान्यशब्दा अपि तदनुषङ्गेण प्रतिपादयन्ति इति। तथाह **वाङ्निबन्धनाः** इति। अर्थास्तावद्वाचो विवर्तत्वात्तन्निबन्धनाः। शब्दा अपि वाचमर्थरूपापन्नां प्रतिपादयन्तीति तन्निबन्धनाः। **प्रत्यवभासन्ते** इति। अव्यतिरिक्ता अपि वाचः प्रत्यवभासन्ते केवलं पृथक्। अभिन्नवाचो विभागा गवादयः शब्दा अर्थाश्च भिन्ना अपि वागात्मतां नातिक्रामन्तीत्याह **एकत्वमनतिक्रान्ता** इति। **षड्द्वाराम्** इति। द्वारं प्रवृत्त्युपायः। तस्याश्च बहुधा शक्तयो या हि षड्विधां प्रतिभां जनयितुं प्रवर्तन्ते। या वक्ष्यति—

स्वभावचरणाभ्यास[12]योगादृष्टोपपादिताम्।
विशिष्टोपगतां चेति प्रतिभां षड्विधां विदुः ॥

इति। **षडधिष्ठानाम्** इति। तस्यां प्रतिभायां येऽर्थाकारास्तेऽस्या [13]अधिष्ठानम्। [14]भूयोऽपि तासां षण्णां शक्तीनामाश्रय इति षडधिष्ठानाम्। [15]**षट्प्रबोधाम्** इति-ताश्च प्रतिभास्तस्या व्यतिरेकस्येति ताभिरेव षट्प्रबोधाः। सर्वाणि चैतानि रूपाणि तस्या न सन्तीति [16]**षडव्ययाम्**। अथवा सकतादिवाभावः। तस्यां हि षड्भावविकार-प्रवृत्त्युपायोऽपरासां क्रियाणाम्, अधिष्ठानान्यपि भावविकारः, अधिष्ठानाः षडेव, तस्याः प्रबोधमिति, सैव तान् परिच्छिनत्ति षोढा भवतीति। अथवा वाचकान्यत्वादि। भेदो वक्ष्यमाणः। षोढा वाचः प्रवृत्त्युपायाः वाच्यद्योत्यादिष्वर्थेष्वधिष्ठानम्। षोढैव च तस्याः प्रतिपादनव्यापारोऽभिधाख्यः स्वरूपविषयभेदात्। प्रकार इति षट्प्रबोधना-व्ययत्वमाख्यातम्। उपासते, तामेव **वाचं य उपासते**, अभेदज्ञानपूर्वकेण योगेन, **ते** [17]**मृत्युमतिवर्तन्ते** इति ॥ ११८ ॥

8. BD तदात्मा योऽधिकल्पभेदः. 9. ABD धरा. 10. BD वाचैतयोर°.
11. BD सामागब्दाः. 12. BD °णासंयोगाह°. 13. AD °ष्ठानानि.
14. BD तु भूयोऽपि. 15. B षड्भ्रतबाधनामिति, D षट्प्रबोधनामिति.
16. L छडवयन्नाम, BD पड्व्यवायाम्. 17. D om. प्रकार ... अतिवर्तन्ते.

Dr. Urmila Sharma Collection, Varanasi

प्रविभागे यथा कर्ता तया कार्ये प्रवर्तते ।
अविभागे तथा सैव कार्यत्वेनावतिष्ठते ॥ ११९ ॥ [१२७]

प्रविभक्तसाध्यसाधनरूपो हि शब्दब्रह्मणो विवर्तः । प्राप्तजन्मादिविक्रिया वाग्विभागग्रन्थयो जागरणवृत्तिकाले वाग्रूपतामनुगच्छन्तो निर्वृत्तिविक्रियाप्राप्तिभिः कार्येषु यतन्ते । स्वप्नाद्यविभागे तु सैव वागविषया बाह्यवस्तुस्वरूपा सती निर्वृत्तिविक्रियाप्राप्तिषु कर्मभावं प्रतिपद्यते । आह च

प्रविभज्यात्मनात्मानं सृष्ट्वा भावान् पृथग्विधान् ।
सर्वेश्वरः सर्वमयः स्वप्ने भोक्ता प्रवर्तते ॥ ११९ ॥

स्वप्नेऽपि [1]वाच उपयोगमाह **प्रविभागे** इति । जाग्रदवस्थायां कर्तृकर्मविभागसंभवात् । **तया** इति । [2]वाचा । कार्यं कर्मोपलक्षणम् । **अविभागे** इति । स्वप्नावस्थायाम् । तत्र हि गवादिविभागो नास्तीति । **कार्यत्वेन** इति । कर्मत्वेन । यथा जाग्रदवस्थायां विभागेन [3]घटादिरूपेण [4]विवृत्तायां [5]वाचि [6]कर्मणि कर्ता प्रवर्तते तथा स्वप्नावस्थायाम् । तत्र हि गवादिविभागो [न] वर्तते ।

प्राप्तजन्मादि इति । जायते इत्यादिभावविकारैः प्राप्तो विक्रियेवाग्रन्थिभिः । **जागरण** इति । यदासावाजगाहारूपेण (यदा सा वाग् गवादिरूपेण ?) विवर्तते । जागरणाख्यो यो वृत्तिकालः । जागरणे ह्य (हि ?) वाचो वृत्तिकारवाश्रायतातिनुपङ्गमन्तरेणानुरूपतानीव प्रवर्तन्ते । **यतन्ते** इति । प्रवर्तन्ते । त्रिविधं कर्म प्रवर्तयति निर्वर्त्यं विकार्यं प्राप्यं चेति । **स्वप्नाद्यविभागे** इति । स्वप्नादौ यदा कर्तृकर्मविभागो नास्ति । न विद्यते विभागोऽत्रेति समासः । स स्वप्नादिरेवाविभागः । **अविषया** इति । बाह्येन रूपेणाविवृत्तेति । **बाह्यवस्तुस्वरूपा** इति । पर्यवस्यति यतस्तत्रापि त्रिविधकर्मानुगमः । **प्रविभज्य** इति । भोक्तृभोक्तव्यभोगविधानेन (विभागेन ?) पृथग्विरूपा विपर्ययाः (पृथग्विधान् विपर्ययान् ?) । **सर्वेश्वरः** इति । सर्वशक्त्यभ्युपेतत्वात्[7] सर्वत्रासावीश्वरः । **सर्वमयः** इति । सर्वस्य विकारग्रामस्य ततो व्यतिरेकाभावात् । **स्वप्ने** इति । यद्यपि जागरणेषु सर्वभोक्त्रादिरूपः स्वप्ने तु बाह्याभावस्य प्रसिद्धत्वादेवमुक्तम् ॥ ११९ ॥

---

1. AD षद्प्रयोगमाह. 2. BD वाचककार्यकर्मो°. 3. ABD घटरूपेण.
4. ABD विवृत्तायाः, L विवृत्तया. 5. L वाचा. 6. ABD कर्मणः.
7. A °भ्युपेतात्, B °भ्युपेतां, D °क्तोऽभ्युपेतात्.

CC0. In Public Domain, Digitizagtion by eGangotri

स्वमात्रा परमात्रा वा श्रुत्या प्रक्रम्यते यथा।
तथैव रूढतामेति तया ह्यर्थो विधीयते ॥ १२० ॥ [१२८]

सर्वो हि विकार आत्ममात्रेति केषांचिद्दर्शनम्। स तु प्रतिपुरुषमन्तःसन्निविष्टो बाह्य इव प्रत्यवभासते। रूढत्वाच्च व्यवहारमात्रमिदमन्तर्बहिरिति। न ह्येतदेकत्वेऽमूर्तत्वे वा संभवति। अपरेषां सर्वप्रबोधरूपः सर्वप्रभेदरूपश्चैकस्य चितिक्रियातत्त्वस्यायं परिणाम इत्यादि स्वमात्रावादिनां दर्शनम्। चैतन्यं भूतयोनिः तिल-

---

दर्शनान्तराण्यपि वाक्प्रकल्पितवस्तुविषयाणीति दर्शयति **स्वमात्रा** इत्यादि। अव्यतिरेकवादिनः परमात्रावादिनः। **श्रुत्या** इति। शब्देन। [1]**प्रक्रम्यते** इति। नियतेन रूपेण प्रत्याय्यते। **तथैव** इति। शब्दप्रत्याय्यमात्रां तेनैव रूपेण वस्तुत्वे [2]विनिविशते। कुत एतदेवमित्याह **तया** इति। वाचा। **विधीयते** इति। अर्थत्वेन प्रकल्प्यते।

सर्वो हि इति। गवादयो विकाराः सर्वे। स ... विषय .... मात्रा। तदेव स्फुटयति **स तु** इति। सर्व एव पदार्थ एकैकस्मिन् पुरुषेऽन्तःसन्निविष्टो विशेषेण त्वनवधृतो बुद्धिर्वा [3]ब्रह्म वेति। **बाह्य इव** इति। यथा वक्ष्यति।

" द्यौः क्षमा वायुरादित्यः .... " (Vāk. III. सा. 41.)

इति। तच्चैतदात्ममात्रम्, एकत्वाद्वस्तुनो मूर्तिरहितत्वाच्च। **अन्तःसन्निविष्ट** इति। नायद्यत इत्याह। [4]**रूढत्वाच्च** इति। लोकप्रतीतत्वादविद्यमानोऽप्य[5]वैरेवमुक्तः[6]। **न हि** इति। भेदविषयमूर्तद्रव्यविषयत्वाच्च बहिरवस्थानव्यवहारस्य। स चैकत्वान्मू(दमू?)-र्तत्वाच्च अन्तस्तत्त्वस्य [न संभवति?]। **अपरेषाम्** इति। आत्ममात्रावादिनाम्। एषाम् **सर्वप्रभेदरूपं** ज्ञेयात्मना रूपवादि(रूपादि?)रूपेण यः प्रभेदः। **सर्वप्रबोध** इति। नानारूपादिषु विषय(दिविषय?).... संज्ञानरूप वा (रूपेण?)। **चितिक्रियातत्त्वस्य** इति। चैतन्यस्य। **परिणाम** इत्यव्यतिरेकमाह। स्पष्टं चैतन्यमेकं कारणम्, पूर्वत्र [7]त्वनिरूपितोऽन्तःसन्निवेशी पुरुष इति विशेषः। **आदिशब्दोऽपरत्वे** कल्पा इत्याह परमात्रावादिनो कृता वा। **भूतयोनिः** इति। भूतानां कारणम्। तत्र हि सर्वाण्यवस्थितानि। ततः सर्गकाले कुतश्चिन्निमित्तात् प्रविभज्यते। **तिलक्षोदरसवत्**

---

1. AB प्रक्रम्य नियेन रू°, D प्रक्रम्य येन°.
2. AB वस्तुत्वेन निवेशते, D वस्तुत्वेन निवेशिते.
3. D ब्रह्मैवेति.
4. ABD रूपत्वाच्च.
5. A °प्यपरैः.
6. ABD °क्ताः.
7. B om. त्वनिरूपितो ... पुरुष इति.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्षोदरसवत् प्रविभज्यत इत्येके। अन्ये त्वाहुः। तद्यथा महतोऽग्नेर्विस्फुलिङ्गाः सूक्ष्माद्वायोरभ्रघनाश्चन्द्रकान्ताद्विभागिन्यस्तोयधाराः पृथिव्या वा सालादयो न्यग्रोधधानाभ्यो वा सावरोहप्रसवा न्यग्रोधा इत्येवमादि परमात्रावादिनां दर्शनम्। स्वपरमात्रावादिनां दर्शनं विद्याभाष्येभ्यः प्रतिपत्तव्यम्। श्रुत्या प्रक्रम्यते। शब्देनान्तःसंनिवेशिना सुखदुःखादिभावेन नानाप्राणिषु बहुधा प्रक्रम्यते, लोष्टक्षेपपातादिषु च लोकभावनासमयेन प्रसिद्ध्या व्यवतिष्ठते। तया ह्यर्थो विधीयते इति। सैव हि श्रुतिरर्थं कल्पयति संस्करोति च ॥ १२० ॥

इति। तत्रे(त्रा ?)विभागात्वे(गे ?)नात्रस्थितयोः स्नेहक्षोदयोर्विभागम्। तया चैतस्य स्थानीयं ज्ञानं क्षोदरूपादय उत्पद्यन्त इति। **विस्फुलिङ्गाः** इति। एवं हि श्रुतौ पठ्यते—

"यथाग्नेर्विस्फुलिङ्गा व्युच्चरन्ति [8]एवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एतस्मादात्मनो व्युच्चरन्ति।" (Br. Up. 2.1.20.)

इति। यथाग्नेरविभक्ताः सन्तो विस्फुलिङ्गाः पृथग् भवन्ति तथा एकस्मादपि प्राणादयः, आकाशव्यवस्थितेभ्यो वायुपरमाणुभ्यो घनीभूतान्यभ्राणि विभक्तानि जायन्ते। चन्द्रकान्ते विभागाभावेन व्यवस्थितपदार्थं निरूप्य स्वपरमार्थ(त्रा?)दर्शनयोर्भेदाभेदाभ्यां केवलं कारणस्थाने परेभ्यः प्रापयन्तीति विश्रुता, बुद्ध्यैव शब्दानुविद्धया तथा व्यवस्थापयन्ति। **सुखदुःखादि** इति। इदं सुखमिदं दुःखमित्यादीनि ग्रहणान्यपि प्राणिधर्मः। **नानाप्राणिषु** इति। विभिन्नजातीयेषु प्राणिषु। **बहुधा** इति। एकजातिसमन्वयेऽपि पुनरेकनारूपमाह। प्राणिधर्मेष्वाख्याय बाह्येष्वपि शब्दस्य व्यापारमाह **लोष्टक्षेप** इति। **व्यवतिष्ठते** इति। क्रियोपात्ता .... च तस्या तत्रोपात्त इत्येवं व्याख्येयम्। यतः स्थानेऽन्तरतमसूत्रभाष्ये

"लोष्टः क्षिप्तो बाहुवेगं गत्वा पृथिव्यामेव पतति नोर्ध्वं गच्छति न तिर्यक्" (M. Bhā. on P. 1.1.50.)

[9]इत्युक्तम्। तत् सर्वं **व्यवतिष्ठते** इति संबन्धः। तं चार्थं लोष्टपातादिशब्दादिनाह। यत एकत्वादिशब्दः तत्संबन्धाच्च बाहोः कुतो बाहुवेगपरिच्छेदः, कुत ऊर्ध्वतिर्यगादिव्यवस्था। तस्य शब्दकल्पित एव भेदव्यवहारः दर्शनयोर्घटक इति। यदाह **लोकभावना** [इति ?]। आभ्यां तदनुरूपसंकेतालोकभावनानेयो यथाभ्यासं संकेतानेनतच्चतादृशा न। [10]**प्रसिद्ध्या** इति। तया [11]प्रसिद्ध्या व्यवतिष्ठते ॥ १२० ॥

8 D om. एवं ... व्युच्चरन्ति.

9. The actual text in the M. Bhā. is : लोष्टः क्षिप्तो बाहुवेगं गत्वा नैव तिर्यग्गच्छति, नोर्ध्वमारोहति, पृथिवीविकारः पृथिवीमेव गच्छत्यान्तर्यतः।

10. ABD प्रसिद्ध्यर्था, 11. D om. तया ... व्यवतिष्ठते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्यन्तमतथाभूते निमित्ते श्रुत्युपाश्रयात् ।
दृश्यतेऽलातचक्रादौ वस्त्वाकारनिरूपणा ॥ १२१ ॥ [१२९]

श्रुतिरेव हि सर्वं शब्दार्थं स्वरूपपदात्मनि संनिविष्टं दर्शयति। सा तमर्थं जनयतीव। स हि तस्यां प्रत्याख्यात्मना नित्यमवस्थितः। न च बाह्यवस्तुगतं सदसत्त्वं श्रुतिरपेक्षते नापि विपर्ययाविपर्ययौ। तथा ह्यलातचक्रेऽपि सर्वप्रदेशव्यापिरूपा च क्रियादिशब्दरूपभावनानुगता श्रुतिरवतिष्ठमाना अलातचक्रादिशब्दानां व्यावहारिकाणामर्थवत्तां प्रकल्पयति। तच्छ्रुतिबीजाभिमुख्ये तथाभूतनिमित्तया श्रुत्या प्रकल्पितो वस्त्वाकारः सत्यप्यनुमानबलीयस्त्वे रूढीभवति।

प्रत्याख्यात्मना इति। न कुण्डवदरन्यायेन भवत्यया। **विपर्ययाविपर्ययौ** इति। तथाविधेऽर्थे पुनः प्रयोगाभ्यासपूर्विका प्रयोगाभ्यासाहितेति। एतदाह। यथा जीयते इति कटचका(शकटचक्रा)दौ प्रयोगाभ्यासौ [1]अलातचक्रश्रुतावपि तथाजातीयकमेव कल्पयन्तीति। **तच्छ्रुतिबीज** इति। येयमिन्द्रियबुद्धिप्रयोगाभ्यासपूर्विका प्रयोगाभ्यासाहितेति यावत्। **अवतिष्ठमाना** इति। व्यवहारा येषु पुरुषास्ते। येयं बुद्धिश्चक्रे चक्राकारा तस्य। अपि शब्दनिबन्धनतामाह। तया [2]श्रुत्यान्तः पौनःपुन्येन प्रयोगात् [3]बीजमाहितं तस्याभिमुख्ये कार्योपजननसाम[4]र्थ्योद्भवे। [5]आहितबीजवृत्तिलाभ इति यावत्। तस्य वृत्तिलाभस्तथादर्शनेन[श ?]कटचक्रे चक्रशब्दप्रयोगाभ्यासादलातचक्रश्रवणेऽलातबुद्धिः। अलातचक्रे तु येयं नियमबुद्धिः सालातचक्रशब्दप्रयोगाभ्यासाहितबीजवृत्तिलाभादित्याह **तथाभूतनिमित्तया** इति। अलातश्रुतेर्बहिस्तस्याभावात् तया प्रकल्पितः स वृत्तिलाभः। तथाभ्यासात्तच्छब्दाहित यावत्ताप्रबोधः तथाभावोत्पत्तेः। अन्ये तु बीजवृत्तिलाभस्य बीजाभिमुख्ये सति **प्रकल्पितो वस्त्वाकार** इति व्याचक्षते। **अनुमानबलीयस्त्वे** इति। न हि तत्रावयवास्तावन्तो गवये न देशा व्यापिनः, (यौगपद्येन देशव्यापिनः ?) नाप्यवयवी, नापि समुदायः परिच्छिन्नमूर्तित्वात्। उपगृहीतैकदेशवर्तिनस्तस्यानुमानादप्यसत्त्वं प्रतिपद्यते तथापि सदेव (सदिव ?) पश्यतीति। अर्थप्रकल्पनायां [6]सामर्थ्यं शब्दस्य प्रसिद्ध्यन्तरमाह[7] **अत्यन्तासत्सु च** इति। **जनयति** इति। ततः शब्दात्तदाकारप्रत्ययस्य प्रसूतेः सोऽर्थं [8]तेन

---

1. B तदलाकादौ. 2. L om. अन्तः. 3. B विक्रमाहितं, D पिक्रमाहितं.
4. B °र्थ्यात् भवे. 5. ABD अत्याहित°. 6. BD सामर्थ्यं,
7. D °द्द तमा°, 8. ADL अर्थः तेन जनितः.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्यन्तासत्सु च निर्ज्ञातेषु शशविषाणादिषु श्रुतिरेवार्थं जनयति प्रकल्पयति स्वात्मन्यवरुणद्धि। तथैवान्यान् प्रत्यक्षानर्थान्। नित्यसन्निविष्टो हि सनिबन्धनश्चा-निबन्धनश्च शब्देष्वभिधेयत्वेनार्थात्मा प्रतिपुरुषं तु भावनानुविधायिनी सत्यसति वार्थे स्वप्रत्ययानुकारेण भिन्नरूपा शब्देभ्यः प्रतिपत्तिरुपपद्यते ॥ १२१ ॥

अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम् ।
प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते ॥ १२२ ॥ [१३०]

जनितं प्रकल्पयतीति। स्वात्मनि इति। स्वापराधेन(स्वावरोधेन ?) हीति बहिः सदसत्तास्य कारणतामाह बद्धस्तत्रापोतस्य तत्रावस्थानात्। **अर्थान्** इति। य एव [9]पदार्थाः [10]प्रमाणान्तरसिद्धसत्त्वाः तानपीयं न [11]बहिःसदसत्तया प्रकाशयति, अपि तु बुद्धिप्रतिभासमानार्थाकारतया। स चाविशिष्टं सर्वत्र, उत्तरकालं तु प्रमाणान्तराद-सत्त्वावगमः। कथं पुनर्विद्यमानबहिरर्थैव शशविषाणादिशब्दस्यार्थमवरुणद्धीति गम्यत इत्यत आह [12]**नित्यसंनिविष्टः** इति। सदर्थाकारबुद्धिजननेन शब्देष्वभिधेयात्मना सन्निविष्टः। अगृहीतार्थरूपार्थत्वात् शब्दस्याभेदलक्षणसंबन्धेन संबन्ध इति रूपादि-शब्दानां बाह्यस्य वस्तुनः सत्त्वात् [13]सनिबन्धनः, शशविषाणादिषु [14]तस्याभावान्निर्नि-बन्धनः। यदि नित्यसंनिविष्टः तस्यैकरूपत्वात् कथमन्यथात्वोपलब्धिरिति कारणमाह **प्रतिपुरुषम्** इति। तत्तद्भिन्नदर्शनानुरोधेन या [15]भावनाः तदनुविधायिनी **प्रतिपत्ति-रुपपद्यत** इति संबन्धः। यथा वैशेषिकस्य घटश्रुतावयविनि प्रतिपत्तिरपरेषां संघातमात्रे। तदनेन [16]बहिरर्थानिबन्धनतां कथयति ॥ १२१ ॥

परमात्मनोऽपि शब्दरूपतां प्रतिपादयन्नाह **अपि प्रयोक्तुः** इति। **प्रयोक्तुः** अनुमानप्रयोक्तुरपि। **आत्मानम्** अपि शब्द एवेत्याहुः। शरीरादवच्छिनत्ति[1] **अन्तः** इति। **महान्तम्** इति। योऽसौ महानृषभ इत्युच्यते, येन सायुज्यं समानलोकता-मैकार्थ्यमिच्छन्ति। यदाहुः

"महो देवो...."

इति।

---

9. ABD तदर्थाः. 10. D °सिद्धयसत्वात्.
11. A °सदसत्तान्यः, B °सदसत्तायः, D °सदसत्तायाः.
12. ABD अर्थसन्निविष्टः. 13. ABD सतीव वस्तुनः. 14. ABD निर्बन्धः,
15. ABD °यान्याः. 16. ABD °र्थानिबन्धता.
1. ABD °च्छिनत्यवतरति,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इह द्वौ शब्दात्मानौ नित्यः कार्यश्च।[1]तत्र कार्यो व्यावहारिकः पुरुषस्य वागात्मनः प्रतिबिम्बोपग्राही। नित्यस्तु सर्वव्यवहारयोनिः संहृतक्रमः सर्वेषामन्तः संनिवेशी प्रभवो विकाराणामाश्रयः कर्मणामधिष्ठानं सुखदुःखयोः सर्वत्राप्रतिहतकार्यशक्तिर्घटादिनिरुद्ध इव प्रकाशः परिगृहीतभोगक्षेत्रावधिः सर्वमूर्तीनामपरिमाणा प्रकृतिः, सर्वप्रबोधरूपतया सर्वप्रभेदरूपतया च नित्यप्रवृत्तप्रत्यवभासस्वप्नप्रबो-

---

शब्दात्मानौ इति। द्वे शब्दरूपे विवृत्तोऽविवृत्तश्च। अविवृत्तो नित्यः, विवृत्तोऽनित्यः। व्यावहारिकः इति। येन लोकव्यवहारः। पुरुषस्य इति। योऽयं रथ्यापुरुषः स वाक्तत्त्वविकारत्वात् कार्यशब्दस्वभावः। विकाराणां प्रकृतिरूपान्वयात्। स एव व्यावहारिकः। [2]तस्य इति। नित्यस्य। [प्रतिबिम्बोपग्राही इति।]प्रतिबिम्बमुपगृह्णाति। प्रकृतिरूपानुगमादेव। सर्वव्यवहारयोनिः इति। साध्यसाधनव्यवहारस्य प्रतिसिद्धान्तं च पदपदार्थभेदव्यवहारस्य योनिः कारणं तन्निबन्धनत्वात्सर्वप्रवादानाम्। [3]संहृतक्रमः इति। अविवृत्तावस्थायामुपसंहृत[4]भेदत्वात्। सर्वेषाम् इति। प्रयोक्तृणाम्। [5]विकाराणाम् इति। कुशलाकुशलानां कर्मणां यावन्न जननी शक्तिः सा स्थितेति। कुशलानां वा कर्मणां स्वभाव इति आश्रयः। गमनागमनादीनां कर्मणां स एव इति आश्रयः। अधिष्ठानम् इति। तस्यैवानुग्रहोपघाताभ्यां सुखदुःखे उत्पद्येते। स एव फलानां भोक्तेति यावत्। सर्वत्र इति। सर्वकार्योत्पादनस्य शक्तिव्याघातः (शक्तेरव्याघातः ?)इति। एकत्वं तर्हि वाक्तत्त्वस्य शरीरान्तरसंबन्धि(त्वासंबन्धि ?)त्वाभ्यां शरीरान्तरगात्मनोऽपि संबन्धः स्यादित्याह घटादिनिरुद्ध इव इति। यथा बहिरवस्थितपदार्थप्रकाशन[6]शक्तिरपि प्रदीपप्रकाशो घटेनावरुद्धत्वादन्तश्चरिष्णुर्बहिरवस्थितरूपप्रकाशने प्रतिहतशक्तिः तथासावपि परिगृहीतभोगक्षेत्रावधिः। भोगाय क्षेत्रं शरीरं तदेवावधिः। तेनान्यत्र न भोगः। तच्छब्देन परिगृहीतं तद्द्वारेण तस्य सुखदुःखानुभव इति। एतदाह। सप्तदशकेनाहङ्कारपुरःसरेणावच्छिद्यमान एकोऽपि न भेदव्यवस्थितौ निबन्धनमिति। अपरिमाणा इति। अपरिणामेऽपि कारणस्य परिमितत्वे किंचित् कदाचिदुत्पद्य क्षीयेतेति कारणस्यापरिमाणतामाह। तेन सर्वदा मूर्तीनामुत्पादनेऽपि नास्ति क्षय इति। सर्वप्रबोध इति। सर्वपदार्थज्ञानरूपत्वेन। [7]सर्वप्रभेद इति। सर्वज्ञेयरूपतया च नित्यः सः एव प्रत्यवभासते। [8]स्वप्नप्रबोधानु-

---

2. ABD This seems to be a citation from the Vṛtti for the purpose of explanation. But there is no such word in the Vṛtti.

3. BD क्रमसंभृतक्रम. 4. BD °संभृतभे°. 5. ABD उपकाराणाम्.

6. B om. शक्तिरपि ... रूपप्रकाशने.

7. AD सर्वभेदेऽपि, B सर्वभेदेति. 8. ABD °धानकदाचिदिति.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धानुकारी प्रवृत्तिनिवृत्तिपदाभ्यां पर्जन्यवद् दवाग्निवच्च प्रसवोच्छेदशक्तियुक्तः सर्वेश्वरः सर्वशक्तिर्महान् शब्दवृषभः, तस्मिन् खलु वाग्योगविदो विच्छिद्याहङ्कारग्रन्थीन् अत्यन्तविनिर्भागेन संसृज्यन्ते। आह च—

चत्वारि शृङ्गा त्रयोऽस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवेश ॥ १२२ ॥

तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः।
तस्य प्रवृत्तितत्त्वज्ञस्तद्ब्रह्मामृतमश्नुते ॥ १२३ ॥ [१३१]

व्यवस्थितसाधुभावेन हि रूपेण संस्क्रियमाणे शब्दतत्त्वेऽपभ्रंशोपघातापग-

---

कारी इति। सर्गे प्रबुध्यत इव, प्रलये स्वपितीवेति तावनुकरोति। तदेवाह **प्रवृत्तिनिवृत्तिपदाभ्याम्** इति। प्रवृत्तिपदेन प्रसवशक्तिः पर्जन्यवत्। यथा पर्जन्यो वृक्षौषधिवनस्पतीनां प्रसवाय। निवृत्तिपदेनोच्छेदशक्तिर्दवाग्निवत्। यथा दवाग्निस्तेषा-[9]मुच्छेदाय। **सर्वेश्वरः** इति। तन्निबन्धनत्वात् सर्वेषां प्रवृत्तिनिवृत्त्योः। **सर्वशक्तिः** इति। अणिमादिशक्तियोगात्। **तस्मिन्** इति। [10]शब्दवृषभे। **वाग्योगविदः** इति। शब्दस्य[ज्ञान ?]प्रयोगाभ्यां योग उक्तः। तं स्वे(ये ?)विदन्ति। **अहङ्कारग्रन्थीन्** इति। [11]अहङ्कारोऽपि तस्यैव [12]विवर्त इति ग्रन्थिः। [13]तं छित्वा। **अत्यन्तविनिर्भागेन संसृज्यन्ते** इति। एकीभवन्ति। सायुज्यमित्यस्यायमर्थ आख्यातः। एतमर्थमागमेन दर्शयति। **द्वे शीर्षे** इति। **द्वौ शब्दात्मानौ** इत्यस्य प्रमाणम्। **वृषभः** इति वृषभत्वस्य। **महो देवो** इति **महान्** इत्यस्य। **मर्त्यान् आविवेश** इति **अन्तरवस्थितम्** इत्यस्य ॥ १२२ ॥

तस्माद् इति। यत एव तद्यथोचितं (एतद्यथोदितं ?) माहात्म्यं शब्दस्य। **शब्दसंस्कारः** इति। [1]अपभ्रंशविविक्तोऽन्यः। **सिद्धिः** इति। सिद्ध्युपायः सिद्धिः। **परमात्मनः** इति। नित्यस्य ब्रह्मणः। कथं पुनः [2]सिद्धिरेव सामानाधिकरण्येन शब्दसंस्कार इत्युक्तेत्याह **तस्य** इति। शब्दब्रह्मणः। **प्रवृत्तितत्त्वज्ञः** इति। प्रवृत्तिः क्रिया, ते च षड् भावविकाराः तेषां तत्त्वमेव सत्ता प्रतिभाख्या [3]तां यो जानाति। [4]**अश्नुते** इति। तेनैकीभवति। ततः पारम्पर्येण सिद्धेर्हेतुत्वात्संस्कारः सिद्धिः।

---

9. BD °मुच्छोयं. 10. ABD शब्देवृषभो. 11. ABD °ङ्कारे.
12. ABD विवर्तते. 13. ABD तच्छित्वा. 1. ABD अन्तः.
2. BD सिद्धिमेव, 3. D ताः. 4. BD अन अतः,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मादाविर्भूते धर्मविशेषे नियतोऽभ्युदयः। तदभ्यासाच्च शब्दपूर्वकं योगमधिगम्य प्रतिभां तत्त्वप्रभवां भावविकारप्रकृतिं सत्तां साध्यसाधनशक्तियुक्तां सम्यगवबुध्य नियता क्षेमप्राप्तिरिति। आह च—

प्राणवृत्तिमतिक्रान्ते वाचस्तत्त्वे व्यवस्थितः।
क्रमसंहारयोगेन संहृत्यात्मानमात्मनि॥ क॥

व्यवस्थित इति। यदा हि व्याकरणं शब्दतत्त्वं संस्करोति ततोऽयमधीतव्याकरणोऽपभ्रंशान् परिहरति, साधूंश्च प्रयुङ्क्ते। ततः अपपात(उपघात ?) परिहाराद् अयानुग्रहहेतुभूतसाधुप्रयोगाद्धर्मविशेष आविर्भवति, ततोऽभ्युदय इति। यदाह **अपभ्रंशोपघात** इत्यादि। एवं [5]स्वर्गाङ्गतामाख्याय मोक्षाङ्गतामाह **तदभ्यासाच्च** इति। पुनः पुनः प्रयोगेण धर्माभ्यासात्। **शब्दपूर्वकम्** इति। शब्दपूर्वको योगो व्याख्यातः। **प्रतिभामवबुध्य** इति संबन्धः। **तत्त्वप्रभवाम्** इति। [6]यदास्या भेदा असत्त्वभूता इति निश्चयः ततः प्रतिभोत्पद्यत इति। स्वभावचरणाभ्यासादिभ्योऽपि सा जायत इत्यवच्छिनत्ति **सत्ताम्** इति। सत्तानुगुण्यमात्रात्तस्या उद्भवः। [7]**भावविकारप्रकृतिम्** इति। यतः सत्ता भावविकाराणां षण्णां प्रकृतिरेव। तच्च [8]जातिसमुद्देशे वक्ष्यति। **साध्यसाधन** इति। एतावद्धि जगद्यदुत साध्यं साधनं च। तदभिनिर्वर्त्यमानसामर्थ्यं च तच्छक्तियोगः। सर्वे च भावाः सत्तामात्रमेवेति। **क्षेमप्राप्तिः** इति। सद्रोपद्रावाहा दपवर्गः क्षेम उक्तः। **प्राणवृत्तिम्** इति। बुद्धौ प्राणे च वाचोऽवस्थानमित्युक्तम्। यच्च प्राणवृत्तिमतिक्रान्तं [9]तस्य दूरीभूतैव करणवृत्तिरिति भेदरूपस्यासत्यतावबोधात् प्राणवृत्तिमतिक्रान्तमिति बुद्धिस्थ एव [10]शब्दो व्यवस्थितः। [11]तत्रापि शब्दात्मा प्रत्यवभासमानो [12]गृहीतक्रम [13]इवावभासते इत्यवच्छिनत्ति **क्रमसंहार** इति। अतीतस्यापि यदा योगवशात् क्रमोपसंहारः प्राणवृत्त्यतिक्रमे के(ते)एव वृत्तिता हि संभाव्येतेति तदवच्छेदाय क्रमसंहारेति। **आत्मनि** इति। बुद्धौ। तद्व्यतिरेकौ चात्मनो भावात्। सेवात्मना (संहृत्यात्मानमात्मनि ?) इति। सति हि संस्कारेऽपभ्रंशपरिहारेण साधुप्रयोगाभ्यासेन धर्माभिव्यक्त्या तत्पूर्वो योगो भवतीति। **ज्ञाने** इति। सर्वां वाचं ज्ञान एव [14]स्थापयति, वाचं करणात् प्राणे प्रत्यर्पयति, प्राणाद्

---

5. ABD सर्गान्तामा°. 6 BD यक्षस्य.
7. ABD विकारप्र°. 8. ABD जातिसमुदायदेशे.
9. D om. तस्य ... क्रान्तमिति. 10. BD शब्दे. 11. ABD लाभावपि.
12. AD अगृहीतमणिरिव, अगृहीतकर्म(णिव). 13. ABD इत्यवभासते.
14. ABD ज्ञापयति,

Dr. Urmila Sharma Collection, Varanasi

वाचः संस्कारमाधाय वाचं ज्ञाने निवेश्य च।
विभज्य बन्धनान्यस्याः कृत्वा तां छिन्नबन्धनाम् ॥ ख ॥
ज्योतिरान्तरमासाद्य छिन्नग्रन्थिपरिग्रहः।
परेण ज्योतिषैकत्वं छित्वा ग्रन्थीन् प्रपद्यते ॥ ग ॥ १२३ ॥

न जात्वकर्तृकं कश्चिदागमं प्रतिपद्यते।
बीजं सर्वागमापाये त्रय्येवातो व्यवस्थिता ॥ १२४ ॥ [१३२]

सर्वप्रवादेष्वागमवाक्यानां प्रणेतृपरिग्रहेण पौरुषेयत्वमभ्युपगम्यते। वेदवाक्यानि तु चैतन्यवदपौरुषेयाणि। तान्यागमान्तराणां प्रणेतृषु विच्छिन्नेष्वागमान्तरानुसन्धाने बीजवदनुतिष्ठन्ते ॥ १२४ ॥

बुद्धाविति कथयति। **विभज्य** इति। पृथक्कृत्य बुद्ध्या। **बन्धनानि** इति। अविद्याहङ्कारादीनि। **छिन्नबन्धनाम्** इति। तानि बन्धनानि मूले वर्ते छिनत्ति। उपायमाह **ज्योतिरान्तरम्** इति। ज्ञानविशेषमासाद्य। **छिन्नग्रन्थिपरिग्रहः** इति। विकारपरिग्रहछेदात्। **परेण**[15] इति। यत्तत्त्वा(यत्त्वा ?)न्तरं ब्रह्म। **छित्त्वा** इति। उक्तोऽप्यर्थः पुनरुपायभावेनोपात्तः ॥ १२३ ॥

ननु च [1]वेदादेषां साधूनां धर्मसाधनत्वमपवर्गहेतुता चागमप्रामाण्येन स्थाप्यते, आगमान्तराण्यपि [2]सांख्यादीनि सन्ति, तेष्वेतत् सिद्धमित्याह **न जातु** इति। न कश्चिद्वादी सांख्यादिः स्वमागमं [**अकर्तृकं**] अपौ[3]रुषेयं प्रतिपद्यते। पौरुषेयत्वाचासंभावनीयं प्रामाण्यमस्य। तेषां चागमानां विच्छेदे वेद एव बीजमिति।

प्रणेतृपरिग्रहेण इति। कपिलादीनागमप्रणेतृत्वेनाभ्युपगच्छन्ति। **पौरुषेयत्वम्**[4] इति। स्वयमेव तैः पौरुषेयत्वमभ्युपगतम्। पुरुषाणां च सापराधत्वादप्रामाण्यं तेषाम्। वेदस्तु चैतन्यवदविच्छेदादपौरुषेय इति प्रमाणानि वेदवाक्यानि। **विच्छिन्नेषु** इति। यद्यपि नित्यो[न ?]अभविष्यद्वेदो विभिन्नकर्तृषु विच्छिन्नेषु कुतः प्रावर्तिष्यत यावदेव कापिलकाणादादीनि हि दर्शनानि। एवं ह्याह

" तस्य साङ्गांश्चतुरो वेदानावर्तयनः क्रमेणेदं ब्राह्मणमाजगाम। "
"न [5]ह वै अशरीरस्यात्मनोऽपहतिरस्ति।
अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः।"
(Cf. Chā. Up. 8.12.1.)

इति। अतस्तदप्यागमापाये वेदो वेदिस्थितो वेदस्यापायः कारणमिति। यदाह तदिति ॥ १२४ ॥

---

15. ABD परिग्रहेण इति। 1. D वेदा दोषान्. 2. B पटव्यादीनि, L कापिलादीनि
3. No Mss. has अपौरुषेयं प्रतिपद्यते, but L has it. Some such text is required. 4. BD °पोयमिति.
5. Cf. Chā. Up. 8.12.1. where the text is : न वै सशरीरस्य सतः प्रियाप्रिययोर°.

CC0. In Public Domain, Digitizagtion by eGangotri

अस्तं यातेषु वादेषु कर्तृष्वन्येष्वसत्स्वपि ।
श्रुतिस्मृत्युदितं कर्म लोको न व्यतिवर्तते ॥ १२५ ॥ [१३३]

इह प्रणेतृवदागमानामपि प्रवादेषु विच्छेदोऽ[1]भ्युपगम्यते । तेषु प्रत्यस्तमितेषु यावदन्ये प्रणेतारो नोत्पद्यन्ते, आगमान्तराणि च न प्रतायन्ते तत्राप्यन्तराले श्रुतिविहितानि कर्माणि स्मृतिनिबन्धनांश्च भक्ष्याभक्ष्यादीन्नियमान्नातिक्रामन्ति शिष्टाः ॥ १२५ ॥

ज्ञाने स्वाभाविके नार्थः शास्त्रैः कश्चन विद्यते ।
धर्मो ज्ञानस्य हेतुश्चेत्तस्याम्नायो निबन्धनम् ॥ १२६ ॥ [१३४]

अनुपदेशं हि कस्यचिज्ज्ञानमभ्युपगच्छतामहितप्रतिषेधार्थानां हितप्रतिपादनार्थानां चोपदेशशास्त्राणां वैयर्थ्यं प्रसज्यते । यदि हि धर्मविशेषात् कस्यचिदेव पुरुषस्योपदेशमन्तरेण ज्ञानमुत्पद्यते, केचित्तु पुरुषाः शास्त्रेण प्रतिपादयितव्याः, तदा

तस्मादागमप्रणेतारो विच्छिद्यन्ते, नागम इत्याह अस्तं [2]यातेषु इति । यदा ते कृतकत्वाद्विच्छिद्यन्ते प्रणेतृवत् । कर्तृषु इति । यदा प्रणेतारो [3]हसन्ति । लोकः इति । अविच्छेदं श्रौतस्मार्तयोराह ।

[4]प्रणेतृवद् इति । कृतकत्वेनावश्यंभाविनमाह । अभ्युपगम्यते इति । नेदं साध्यमिति । अन्तराले इति । [5]पूर्व आगमाः प्रत्यस्तमिताः, [6]अपरश्चानुत्पन्न इत्याह । श्रुतिविहितानि इति । यज्ञानातिष्ठन्ति । स्मृतिनिबन्धनांश्च[7] इति । शाब्दमशब्दं वा स्मरणमङ्गीकृत्य । शिष्टाः इति । तेऽपि कपिलादयः तत एव तेषु कर्मसु प्रवृत्तवन्तः ॥ १२५ ॥

तैरपि कपिलादिभिरवश्यमविच्छिन्नो वेदाख्य आगमोऽभ्युपगन्तव्य इत्याह ज्ञाने स्वाभाविके इति । ते ह्यागमप्रणयनादेवात्मनो ज्ञानातिशयमङ्गीकुर्वन्ति । तच्च ज्ञानं तेषां यदि स्वाभाविकं तदन्येषामितरथै(षामपि तथै ?)वेत्यनर्थकं शास्त्रप्रणयनम् । धर्मो ज्ञानस्य इति । तत्रैतत् स्यात् । येषां धर्मानुग्रहस्तेषामेव ज्ञानातिशयः । ते चागमानां प्रणेतारः न तु गृहीतकर्माणो [1]मन्दावबोधाश्चेति । तस्याम्नायः इति । स एव धर्मस्तेषां वेदमन्तरेण कुतः ।

---

1. No Mss. has न, but L has adopted it. The sentence yields a good meaning without it.

2. BD अन्तयातेषु. 3. AD न यन्ति । 4. ABD प्रमाणवत्.

5. ABD पूर्वाः. 6. ABD अनुपपन्नः. 7. ABD निबन्धांश्च इति.

1. ABD °बोधाय.

Dr. Urmila Sharma Collection, Varanasi

तस्य पुरुषविशेषहेतोर्धर्मस्य व्यवस्थितेन निबन्धनेन भवितव्यम्। विच्छिद्यन्ते-चान्यानि निबन्धनानि। तस्मादाम्नायनिबन्धनं धर्ममासेवमानाः पृथक्प्रवादानां प्रणेतारस्तां तां बहुविकल्पां सिद्धिं लभन्ते ॥ १२६ ॥

वेदशास्त्राविरोधी च तर्कश्चक्षुरपश्यताम् ।
रूपमात्राद्धि वाक्यार्थः केवलान्नावतिष्ठते ॥ १२७ ॥ [१३५]

आगमवाक्यानामेव हि शब्दार्थप्रविभागव्यवस्था तर्केण क्रियते। स चायमर्वाग्दर्शनानामनुग्रहे वर्तत इति पूर्वैर्न्यायविद्यास्वित्थम्भूतस्तर्क आश्रितः। तत्र यावाननुगम्यमानस्तर्कः स्वशास्त्रं न बाधते तावाननुगन्तव्यः। तर्कातीतमपि बहु

अनुपदेशं हि इति। यदि विनोपदेशेन ज्ञानं तत्र शास्त्रवैयर्थ्यम्। कस्यचिदेव इति। कपिलादयं (लादेः ?)। केचित्तु इति। [2]प्राकृताः पुरुषाः। [3]पुरुषविशेषहेतोः इति। यत्कृतो विशेषो यत् केषांचिदनुपदेशं ज्ञानं केषांचिदुपदेशेनेति। व्यवस्थितेन इति। नित्येन नियतेन स्वयमेवाहितानि वृत्तिहेति च प्रवृत्तिरित्यन्ये, मह्यवन्धविशेषसन्तयः स्युः। निबन्धनानि इति। वैशेषिकादिनिबन्धनो ज्ञानविशेषः ॥ १२६ ॥

एवमवस्थापिते आगमप्रामाण्ये तीर्थिकान्तरकल्पितस्य च तर्कस्याप्रामाण्येऽभिप्रेतं तर्कप्रामाण्यं कथयति तर्कश्चक्षुः इति। चक्षुरर्थपरिच्छेदकत्वात्। नन्वनुमानस्याप्रामाण्यमुक्तमित्याह वेदशास्त्राविरोधी च इति। तीर्थान्तरप्रकल्पिततर्कं व्युदस्य वेदार्थव्यवस्थापकस्य मीमांसास्थापितस्य श्रुतिलिङ्गादेः प्रामाण्यमुद्भावयति। अपश्यताम् इति। [1]श्रुतिमात्रादसमर्था [2]वेदार्थान् द्रष्टुम्। यथा वा रूपमात्राद् इति। श्रुतिमात्रात्। केवलात् इति। श्रुतिलिङ्गादिप्रमाणाननु(पबृं ?)हितात्। आगमवाक्यानामेव भिन्ने तत्रापूर्वः कश्चिदर्थान्ते प्रणीयते, केवलं तैरेव वेदवाक्यैः प्रतिपादितस्य विभागमात्रं वा प्रति श्रुत्यादिभिः क्रियते इति।

[3]अर्वाग्दर्शनानाम् इति। ये प्रतिपादितमप्यर्थमसमर्था विवेक्तुम्। पूर्वैः इति। जैमिन्यादिभिः। न्यायविद्यासु इति। [4]मीमांसादिषु। इत्थंभूतः इति। शब्दोपात्तार्थाविपरीतप्रतिपत्तिहेतुः। न [5]बाधते इति। यावता तर्केणैवागमोपात्तो विभज्यते तावाननुगन्तव्यः। एवं च न बाधते। यच्छ्रुत्यादयो न वेदवाक्यमन्यस्य व्यतिरिक्तस्य

2. ABD प्रकृताः. 3. BD °विशेषतो.

1. D °र्थान्. 2. B वेदान्, D om. वेदार्थान्.

3. ABD पूर्वदर्शनामिति. 4. ABD मीमांसादयः. 5. ABD बाध इति.

CC0. In Public Domain, Digitizagtion by eGangotri

श्रद्धानुगम्यं सर्वेषु शास्त्रेषु दृश्यते। अथ तर्काननुगमेन यः केवलमागमं प्रमाणं करोति तस्य किं प्रयोजनम्। आगमवाक्यानां सम्यक्प्रतिपत्तिः प्रयोजनम्। वाक्यानां हि तुल्यरूपत्वेऽपि सति निमित्तान्तराच्छक्तिर्भिद्यते। तत्र यो रूपादेव केवलाद्वाक्यार्थं प्रतिपद्यते प्रकरणसामर्थ्यादि नापेक्षते स विवक्षिताविवक्षितयोः संमोहमापद्यते ॥ १२७ ॥

सतोऽविवक्षा पारार्थ्यं व्यक्तिरर्थस्य लैङ्गिकी।
इति न्यायो बहुविधस्तर्केण प्रविभज्यते ॥ १२८ ॥ [१३६]

" कर्तुरीप्सिततमं कर्म ॥ " (P. 1. 4. 49.)
" तस्यापत्यम् ॥ " (P. 4. 1. 92.)
" ग्रहं सम्मार्ष्टि ॥ "
" कर्मणा यमभिप्रैति स सम्प्रदानम् " (P. 1. 4. 32.)
" स्त्रियं ये चोपजीवन्ति प्राप्तास्ते मृतलक्षणम्। "

सत्ता कल्पयन्ति। तर्कातीतमपि इति। [6]तमेव तर्केणावबो[7]ध(णावाध ?)मागमस्य द्रढयति। यतो यैरपीति अर्थान्तरेऽनुमानादीनि कल्पितानि। ते ह्यनुमानं(वि ?)ना ह्यागममात्राद् गम्यात्(न् ?)पदार्थानिच्छन्त्येव। [8]तर्काननुगमेन इति। किं प्रयोजनम् इत्यनेन संबन्धः। आगमश्चेत् प्रमाणमर्थस्य तर्कस्य प्रमितत्वादनर्थकस्तर्क इति। सम्यग् इति। सुष्ठुतरम्। प्रतिपत्तिः। कथमित्याह तुल्यरूपत्वे इति। स्वरूपाभेदेऽपि। निमित्तान्तराद् इति। अर्थप्रकरणादेः। भिद्यते इति। तदेव शब्दरूपमन्यत्र प्रयुज्यमानं भिन्नार्थमवसीयते। रूपादेव इति। स्वरूपमात्रात्। संमोहम् इति। न जानाति किमिह विवक्षितं किं वाविवक्षितमिति ॥ १२७ ॥

तदेवोदाहरणैकदेशेन प्रतिपादयति [1]सतोऽविवक्षा इति। शब्देनोपात्तस्याप्यर्थस्याविवक्षा। पारार्थ्यम् इति। शब्दोपात्तस्यार्थस्योपलक्षणता। [2]लैङ्गिकी इति। शब्दसामान्येनावसीयमानस्य वाक्यान्तरप्रकल्पनेन विशेषाभिव्यक्तिः। बहुविधः इति। अनेकप्रकारः।

ईप्सिततमम् इति। नपुंसकलिङ्गस्य शब्दप्रतिपादितस्यापि नान्तरीयकत्वेनोपादानाद्विवक्षा नास्ति। स्त्रीपुंसयोरपि कर्मताख्यं कटं करोति। तथा

" कर्तुरीप्सिततमम् " (P. 1 4.49.)

---

6. ABD तामेव. 7. BD °वबाध°, 8. ABD तर्कानुगम.
1. ABD ततो विवक्षितेति। 2. BD लैङ्गिकैः.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति लिङ्गसंख्याकालानामविवक्षा, क्वचिच्च विवक्षेति लक्षणव्यवस्थापनं तर्काधीनम्। तथा च

"नक्षत्रं दृष्ट्वा वाचं विसृजेत्"

इति कालोपलक्षणार्थं नक्षत्रदर्शनं तत्। प्रधानस्यान्यथासिद्धौ परार्थत्वाद् दृश्यमानेषु ज्योतिःषु कालविशेषपरिच्छेदे सति तत् क्रियते। काकेभ्यो दधि

इति एकत्वसंख्याविवक्षिता। तेन कर्त्रोः कर्तॄणां चेप्सिततमयोरिति तत्रापि कर्मत्वम्। देवदत्तौ यज्ञदत्तादयश्च घटौ घटान् कुरुतः कुर्वन्तीति। ईप्सितशब्देऽपि यदीच्छार्थः मत्यर्थः

"मतिबुद्धिपूजार्थेभ्यः" (P. 3.2.188.)

इति वर्तमाने तस्याप्यविवक्षा। तेन यच्चेष्यमाणं यच्चेष्टं घटं करिष्यत्यकार्षीदिति तत्रापि कर्मसंज्ञा। अथ भूते तस्याविवक्षायां वर्तमानभविष्यतोरपि सिद्धा।

"तस्यापत्यम्" (P. 4.1.92.)

इति भाष्य एवं चोदितम्—

"पुँलिङ्गेन चायं निर्देशः एकत्वेन च"

(Cf. M. Bhā. on P. 4.1.92. where the text is a little different.)

इति। तथा चापत्यमिति नपुंसकैकवचनम्। तयोरविवक्षा। **ग्रहं सम्मार्ष्टि** इति। सोमपात्रस्य संज्ञा ग्रह इति। तत्र संख्याया अविवक्षा, ततो बहूनामपि सम्मार्गः। **कर्मणा यम्** इति। लिङ्गसंख्याकालानामविवक्षायाम्। यो यां चाभिप्रैष्यत्यभिप्रागाद्वा तत्र सर्वत्र सिद्धा सम्प्रदानसंज्ञा। **उपजीवन्ति** इति। कालस्याविवक्षायाम्। ये [3]उपजीविष्यन्ति ये चोपाजीविषुस्ते तल्लक्षणं प्राप्त(तल्लक्षणं प्राप्ताः ?)इति। **क्वचिच्च विवक्षा[4]** इति।

"गर्भाष्टमे ब्राह्मणमुपनयीत"

इति लिङ्गस्य विवक्षा। तेन स्त्रीनपुंसकयोर्नोपनयः।

"पशुना यजेत"

इति

"ङ्याप्प्रातिपदिकात्" (P. 4.1.1.)

इति संख्याया विवक्षा। तेन द्विबह्वोः कार्यं न क्रियते।

"तेन दीव्यति खनति जयति जितम्" (P. 4.4.2.)

---

3. ABD यांत्तोभविष्यति ये बन्धाजीविस्तुषुते.   4. ABD विवक्षया

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रक्ष्यतामित्युपघातप्रतिषेधस्य चिकीर्षितत्वात् काकेष्वसत्स्वपि श्वादिभ्यो रक्ष्यते। पात्राणि सम्मृज्यन्तामिति भुजिक्रियाङ्गोपसंहारपरत्वात्पात्राभावेऽप्यङ्गान्तराण्युपसंह्रियन्ते। लैङ्गिकी खल्वपि व्यक्तिः।

"अक्ताः शर्करा उपदधाति"

इति सर्वाञ्जनद्रव्यप्रसङ्गे

"तेजो वै घृतम्"

इति लिङ्गाद् विशेषप्रतिपत्तिरित्येवंप्रकारो न्यायस्तर्केण प्रविभज्य लक्षणं व्यवस्थाप्यते ॥ १२८ ॥

शब्दानामेव सा शक्तिस्तर्को यः पुरुषाश्रयः।
स [1]शब्दानुगतो न्यायोऽनागमेष्वनिबन्धनः ॥ १२९ ॥ [१३७]

इति कालस्य विवक्षा। पारार्थ्यस्योदाहरणं **नक्षत्रम्** इति। शब्दोपात्तो हि वाग्विसर्गो नक्षत्रदर्शनपूर्वकः, तत्र नक्षत्रदर्शनेन काल उपलक्ष्यते। यदा नक्षत्रमुदेति तदा वाचंयमेन वाग्विसर्गः कर्तव्य इति। **नक्षत्रदर्शनम्** इति। यदेतन्नक्षत्रदर्शनमुपात्तं [5]तत्कालोपलक्षणं न स्वतः कर्माङ्गं तदिति नक्षत्रदर्शनं **परार्थत्वात् क्रियते** इति संबन्धः। प्राधान्ये छोकास्यदयद्यपि शब्देन दर्शनमुपात्तं तत्तु परार्थत्वादप्रधानम्। **अन्यथासिद्धौ**[6] इति। यदा प्रच्छन्ने नभसि अन्यत एव कालावगतिः। यदाह **कालविशेषपरिच्छेदे** इति। यदा नानियते नक्षत्रदर्शनम् इति। **काकेभ्यः** इति। काकश्रुतेरुपघातकोपलक्षणत्वेन पारार्थ्यम्, उपघातप्रतिषेधो विधित्सितः। तत्रोपलक्षकत्वात् काकानां श्वादिभ्योऽपि रक्ष्यत इति। **पात्राणि** इति। भुजिक्रियाङ्गोपसंहारेऽभिसंहिते तदङ्गोपलक्षणार्था पात्रश्रुतिः। अथाविवक्षातः पारार्थ्यस्य को विशेषः। अविवक्षायां [7]शब्दोपात्तस्य नान्तरीयकमुपादानमिति न तस्योपयोगः। पारार्थ्ये त्वन्योपलक्षणार्थतेति। अञ्जनेन सर्वस्य स्नेहद्रव्यस्य सन्निधाने

"तेजो वै घृतम्"

इति वाक्यं घृतस्य तेजसि [8]प्रत्यासत्तिं कथयति। [9]प्रत्यासत्त्या च लिङ्गेन घृतमेव तेजोऽनुग्रहायोपादीयते ॥ १२८ ॥

अयमर्थप्रकरणादिर्विभागः [2]शब्दसमुत्थ एव, न पुरुषैः शक्तिमनपेक्ष्य कल्प्यत इति कथयति **शब्दानामेव** इति। **शक्तिः** इति। सामर्थ्यम्। एतदाह। शब्देनोपात्तः

---

5. AD om. तत्कालो ... दर्शनमुपात्तं. 6. ABD अन्यथापि सिद्धौ.
7. ABD नन्योपात्तस्य. 8. A प्रत्यापत्तिं, B प्रत्यापत्तिं. 9. B वृत्त्या, AL व्यक्त्या.
1. WW[2]L शब्दाननुगतो, S शब्दानुप्रगतो. 2. BD शब्दसमर्थ, L शब्दसमय.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शब्द एवोपदेष्टा। तत्सामर्थ्यमेवानुगच्छन्तो वक्तारो योग्यशब्दनिबन्धनयैव विवक्षया प्रवर्तन्ते। नियतां तु शब्दशक्तिमर्थप्रकरणलिङ्गवाक्यादिभिरनुगच्छति पुरुषे शब्दाश्रितमेव सामर्थ्यं पुरुषाश्रयोऽयं तर्क इति मन्यन्ते। शब्दशक्तिरूपापरिगृहीतस्तु साधर्म्यवैधर्म्यमात्रानुसारी सर्वागमोपघातहेतुत्वादनिबन्धनः शुष्कस्तर्क इत्युच्यते। तद्यथा

यदुदुम्बरवर्णानां घटीनां मण्डलं महत्।
पीतं न गमयेत् स्वर्गं किं तत् क्रतुगतं नयेत्॥ (M.Bhā.I.p.3.l.3.)

सोऽर्थो यमर्थप्रकरणादिभिरवगच्छति। शब्दसामर्थ्यमेव तत्, सादृश्येन पुरुषाः तथा तानर्थाननुमिमते[3]। ततस्तेनाभ्यूहित इति पुरुषाधारस्तत् मन्यते। **शब्दानुगतः** इति। शब्दमनुगतः शब्दशक्त्यनुसारेणावस्थापितो[4] यः स एव न्याय इति [5]द्रष्टव्यः। **अनागमेषु** इति। आगमनिरपेक्षेषु पुरुषेषु। तर्कोऽनुमानम्। स [नि ?] बन्धनेनाप्रतिष्ठितः। स्वविकल्पापादित इत्यर्थः। येषु चार्थेष्वागमो वेदाख्यो नास्ति। **अनिबन्धनः** इति। निर्विषयः। शब्दावस्थिता शक्तिस्तस्य विषयः।

शब्द एव इति। नान्यस्यार्थप्रतिपादनसामर्थ्यमनुमानादेः। **तत्सामर्थ्यम्** इति। यदिह समर्थास्तदा विशिष्टार्थप्रत्यायने शब्दः, ततः प्रयोक्तारो विशेषेषु प्रयुञ्जते, नानपेक्ष्य शब्दशक्तिं स्वविवक्षामात्रेण। [6]**नियताम्** इति। व्यवस्थिताम्। **अर्थप्रकरण** इति। स्वरूपमात्रात् सादृश्येन भ्रान्तात् प्रतिपद्यमानोऽर्थः, प्रकरणादिभिरवच्छिनत्तीति पुरुषस्य तत्र सामर्थ्यं कल्पयति। यतोऽर्थादयोऽपि शब्दाहितभावाननुगच्छति पुरुष इति सामानाधिकरण्यम्। [7]**शब्दशक्ति** इति। रूपेणापरिगृहीतौ न शब्दशक्तिमनुगच्छत इत्यर्थः। **साधर्म्य** इति। साधर्म्यवैधर्म्यमात्रग्रहणम्, आगमस्य(स्या ?)भावात्। **सर्वागम** इति। यतः सर्वत्रैवागमे तादृशानुमाने .... वास्ति। **शुष्कस्तर्कः** इति। आगम उपोद्बलको यस्य नास्ति स प्रतिपत्तिप्रसरसामर्थ्यविरहाच्छुष्कस्तर्कः शुष्ककाष्ठवत्। तं च दर्शयति **यदुदुम्बरवर्णानाम्** इति। अन्यत्र हेतुभूयस्त्वे फलभूयस्त्वमिति। तत्र यदि मद्यपानात् सौत्रामण्यां स्वर्गः फलं मद्यघटशतपानात् ततोऽपि भूयः फलं स्यात्। न च तथेत्यागमोपघाती शुष्कस्तर्कः। आगमेन च सौत्रामण्यां प्रतिनियतानि [8]यान्य-

---

3. D °मिमीते. 4. B °पिते, D °पितैः. 5. ABD न द्रष्ट°.

6. ABD नियतार्थिनि

7. Vṛṣabha seems to have had a different text of the sentence beginning with शब्दशक्तिः 8. ABD °नियता अन्ये त्वङ्गानीति विहितानि तानि प्रसङ्गः.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

" शब्देन वाच्यमित्युक्ते द्रामिलकेन भवति वक्तव्यम् ॥ "
इति ॥ १२९ ॥

रूपादयो यथा दृष्टाः प्रत्यर्थं यतशक्तयः ।
शब्दास्तथैव दृश्यन्ते विषापहरणादिषु ॥ १३० ॥ [१३८]

ज्ञाने शब्दपूर्वके वा प्रयोगेऽभ्युदयः इत्यागमात् प्रतिपन्नानामुपपत्तिमात्रमागमस्यैवोपोद्बलकमित्युच्यते। इहैषां रूपरसगन्धस्पर्शानां प्रत्येकं समुदितानां च दृष्टादृष्टफलाः प्रत्यर्थं यताः शक्तयः परिगृह्यन्ते। दृष्टफलास्तावद् विषौषध्ययस्कान्तवनस्पतिप्रभृतीनाम्। अदृष्टफला मद्यतीर्थोदकादीनाम्। शब्दानामपि केषाञ्चिदुच्चारणे

ज्ञानि विहितानि तानीति नातिप्रसङ्गः। [9]द्राविडकेन इति। साधुभिः शब्दैर्वाच्यमिति यदर्थप्रतिपत्त्यर्थमेतत् सार्थप्रतिपत्तिर्द्राविडकृतेष्वपभ्रंशेष्वविशिष्टा। अथ निष्प्रयोजनमेतदभ्युपेयते द्राविडकृते तत्तुल्यम्। अभ्युदयहेतुत्वमप्यनिबन्धनमविशिष्टमुभयोरिति शुष्कस्तर्कः। आगमस्तु न म्लेच्छितवै नापभाषितवै इति प्रत्यवायहेतुतामपभ्रंशानामाह ॥ १२९ ॥

रूपादयः इति। रूपरसगन्धस्पर्शाः। यतशक्तयः इति। प्रतिप[1]दार्थमेकेनेति, यद्यभिन्नकार्यजनका इति भिन्नजातीयो दृष्टान्तः। शब्दाः इति। अयमपि दृष्टान्त एव समानजातीयः। विषापहरणस्वर्गगमनादिकार्यजनकाः यथा शब्दा इति। दार्ष्टान्तिकमुत्तरश्लोकेन दर्शयिष्यति।

प्रतिक्षिप्तेन के(स्ते तर्के)? कः किमर्थस्तर्कोपन्यास इत्याह ज्ञाने [इति] [आगमात् इति ?]

" एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः "

(M. Bhā. on P. 6.1.84.)

इति स्मृतेः। रागमार्थं साधूनाम्। उपोद्बलकम् इति। दृढतरनिश्चयजनकत्वात्। प्रत्येकम् इति। तुल्ये रूपत्वे नीलं चक्षुषोऽनुग्राहकं भास्वरत्वं तूपघातकम्। तथा तुल्ये रसत्वे मधुरः श्लेष्माणं जनयति, कटुकः पित्तमिति दृष्टफलाः। अदृष्टफलाः इति। यथा तुल्ये रूपयोगेऽजः श्वेतगुण एवालभ्यते वायव्यः। विषौषधि इति। तुल्ये रूपादिसमुदायत्वे विषं मारयति, न शर्करा। आमलकादय ओषधयः श्लेष्मघ्नाः, अयस्कान्तमय आकर्षतीति। परिगृह्यन्ते[2] इति। प्रतिज्ञायन्ते[3]। मद्यतीर्थोदकादीनाम् इति।

---

9. ABD द्राविकृतेनेति 1. D प्रतिपादनार्थमेकेन. 2. ABD °गृह्यते. 3. ABD °ज्ञायते.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विषापहरणादि दृष्टं फलमुपलभ्यते। तथा सूक्तादीनामभ्यासादभ्युपगम्यते विशिष्टमदृष्टं फलम् ॥ १३० ॥

यथैषां तत्र सामर्थ्यं धर्मेऽप्येवं प्रतीयताम्।
साधूनां साधुभिस्तस्माद्वाच्यमभ्युदयार्थिनाम् ॥ १३१ ॥ [१३९]

सन्ति चेह दृष्टफलाः काश्चित् प्रतिशब्दं शक्तयः इत्यागमादेवावसीयते। सत्यागमे साधूनामपि तथैवावसीयतां धर्मसाधनत्वमित्यतोऽभ्युदयार्थिभिरनतिशङ्कनीयां स्मृतिमविच्छिन्नशिष्टसमाचारां परिगृह्य व्यवहारे साधव एव शब्दाः प्रयोक्तव्याः ॥ १३१ ॥

सर्वोऽदृष्टफलानर्थानागमात् प्रतिपद्यते ॥
विपरीतं च सर्वत्र शक्यते वक्तुमागमे ॥ १३२ ॥ [१४०]

मद्यस्पर्शादिभिरधर्मः, तीर्थोदकं तु धर्माय। केषाञ्चिद् इति। अथर्ववेदपठितानां मन्त्राणाम्। यद्यपि चार्थप्रतिपादने मन्त्राणामङ्गता तथापि तेऽर्थास्तैरेव शब्दैः प्रत्याय्यमाना विषं हरन्ति नान्यैः। सूक्तादीनाम् इति। पुरुषसूक्तादीनाम्। अयमपि दृष्टान्त एव ॥ १३० ॥

यथैषाम् इति। उक्ते (क्त ?) निदर्शनान्याह तत्र इति। स्वस्मिन् कार्यविशेषे। धर्मेऽपि इति। धर्मे साधूनामेव सामर्थ्यमिति संबन्धः। तस्माद् इति। यस्माद्धर्माङ्गत्वं साधूनां तस्मात्साधुभिर्वाच्यमभ्युदयकामेनेति।

सन्ति च इति। सूक्तादीनां शक्तयो धर्माङ्गतया 'यथागममवसीयते (न्ते ?)। तथैव इति। तुल्य आगम इति। अनतिशङ्कनीयाम् इति। व्याकरणाख्याम्। "एकः शब्दः सम्यग् ज्ञातः" [2]इत्याद्याः। वेदस्यापौरुषेयत्वान्नाप्रामाण्यशङ्का, तन्मूलत्वाच्च स्मृतीनाम्। अविच्छिन्न इति। अविच्छिन्नः शिष्टैः समाचारो यस्याः। ते हि साधूनेव प्रयुञ्जते नासाधूनित्याचरितः तैः। व्यवहारे इति। [3]अर्थप्रतिपादने ॥१३१॥

सर्वः इति[1]। [सर्वे]वादिनः[2]। अदृष्टफलान् इति। अदृष्टं फलं येषाम्। अर्थान् इति। [3]यान्यनुष्ठानानि [4]दानहिंसादीनि। आगमाद् इति। प्रत्यक्षादीनां [5]तत्राप्रवृत्तेः। विपरीतं च इति। यद्यपि शक्तिप्रतिनियमः पदार्थेषु दृष्टः तथापि

---

1. BD °गमावसी°. 2. AB इत्यन्यद्वा. 3. ABD °पदनेन.

1. ABD इत्यनेन. 2. ABD विवादिनः. 3. AB क्रियान्यनु°.

4. AL °ष्ठानानां दानहिंसादीनामिति. 5. BD तत्र प्र°.

Dr. Urmila Sharma Collection, Varanasi

तत्र केचिदाहुः—यथैषां विषापहरणादिषु सामर्थ्यमधर्मेऽप्येवं कस्मान्न प्रतीयते। एतस्मादेव दृष्टान्तादस्तु शक्तिविपर्ययप्रतिपत्तिरिति। एतस्मिन् पर्यनुयोगे प्रतिविधीयते। सर्वेष्वागमेषु दृष्टादृष्टफलासु प्रतिपत्तिषु विपरीतफलप्राप्तिः शक्यते प्रसङ्क्तुम्। तस्मादागमं कञ्चित् प्रमाणीकृत्य व्यवस्थिते तस्मिन् या काचिदुपपत्तिरुच्यमाना प्रतिपत्तावुपोद्बलकत्वं लभते ॥ १३२ ॥

साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः ।
अविच्छेदेन शिष्टानामिदं स्मृतिनिबन्धनम् ॥ १३३ ॥ [१४१]

यथैव भक्ष्याभक्ष्यगम्यागम्यवाच्यावाच्यादिविषया व्यवस्थिताः स्मृतयः यासु निबद्धं समाचारं शिष्टा न व्यतिक्रामन्ति तथेयमपि वाच्यावाच्यविशेषविषया

तस्माद्विपरीतफलजनकत्वेन शक्तिप्रतियोगो न व्यवस्थाप्यते येनासाधवो धर्माङ्गं साधवश्चानिष्टस्येति विपरीतम्। सर्वत्र इति। सर्वागमेष्वदृष्टफलजनकत्वं शक्यते तर्केणाध्यारोपयितुम्।

उत्तरपक्षस्थानीयस्य श्लोकस्य पूर्वपक्षं दर्शयति तत्र केचिद् इति। अधर्मेऽपि इति। शक्तिप्रतिनियममात्रमवसीयते, न विशिष्टकार्यजनकत्वेऽन्यसाधकत्वमनुमीयते। प्रतिपत्तिषु इति। [1]दानाद्यनुष्ठानेषु। या काचिद् इति। आगमेन [2]सिद्धोऽर्थः केवलमनुष्ठानेऽनुग्रहं विधत्ते। तत्रागमं कञ्चित् प्रमाणीकृत्य शक्तिप्रतिनियमदर्शनमुपोद्बलकम् ॥ १३२ ॥

कः पुनरसावागम इति श्रुतिस्मृतिरूपत्वादागमस्य स्मृतिरूपमुपन्यस्यति साधुत्वज्ञानविषया इति। साधुत्वज्ञानं विषयो यस्याः। तत्कार्यत्वाद्विषय उक्तः। अविच्छेदेन इति। समाचारस्येत्युपस्कारः। इदम् इति। व्याकरणशास्त्रम्। स्मृतिनिबन्धनम् इति। साधुत्वस्मरणनिबन्धनभूतां व्याकरणस्मृतिमभ्युपय .... याङ्गत्वे निबन्धनतया कथयति।

यथैव इति। [1]अन्याभिः स्मृतिभिस्तुल्य[2]तामाह। व्यवस्थिताः इति। [3]अविच्छेदमाह। [4]निबद्धम् इति। स्थितम्। एतदाह। तत्रापि नोच्यते-पञ्च पञ्चनखा भक्ष्यमाणा धर्माय, अधर्मायान्ये। केवलमिदं भक्ष्यमित्युच्यते। अथ चास्मादेव नियमाद्धर्माङ्गतावसीयते। यतो नेदं वचनं क्षुदपनयनाय, श्वमांसादिष्वपि तत्तुल्यत्वात्, क्षुत्-

---

1. B ज्ञानाद्य°. 2. B सिद्धमर्थं.

1. ABD आदिभिः. 2. ABD तुल्यमानमाह.

3. ABD मन्यवि°. 4. ABD निबन्धनम्.

CC0. In Public Domain, Digitizagtion by eGangotri

व्याकरणाख्या स्मृतिः। स्मृतो ह्यर्थः पारम्पर्यादविच्छेदेन पुनः पुनर्निबध्यते। प्रसिद्ध-समयाचारायां च स्मृतावनिबन्धनशब्दायां शिष्टसमाचाराविच्छेदेनैव स्मर्यते ॥ १३३ ॥

वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् ।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम् ॥ १३४ ॥ [१४२]

परैः संवेद्यं यस्याः श्रोत्रविषयत्वेन प्रतिनियतं श्रुतिरूपं सा वैखरी। श्लिष्टा

प्रयुक्तत्वाच्च [न ?] विधीयते[5]। यतो नापीदं वचनमनर्थकं व्यवस्थितप्रामाण्यत्वात् स्मृतीनाम्। [6]तथेहाप्येते साधवोऽमी नेति केवलमुच्यते। न चायमुपदेशोऽर्थप्रतिपादनाय, असाधुष्वपि तस्य तुल्यत्वात्। अर्थप्रयुक्तत्वाच्च न तत्र विधिः। न चानर्थक्यं स्मृतित्वादस्येत्यभ्युदयाङ्गतैवास्य[7]। यदाह **वाच्यावाच्यविशेषविषया** इति। ननु च पौरुषेयेष्वनाश्वास उक्तः, पुरुषकृतं च व्याकरणमित्याह **स्मृतो हि** इति। एतदाह। एतदेनच्छिष्टगतं स्मरणमविच्छिन्नं तदेवात्र प्रमाणं, तत्र शास्त्रमेव [8]तु केवलं निबध्यते। शास्त्रे नियोगस्य स्मरणस्यैव प्रामाण्यमिति। **स्मृतौ** इति। विनापि शब्दोपनिबन्धनं स्मरणमेव प्रमाणम्। यथाह **अनिबन्धनशब्दायाम्** इति। न विद्यते निबन्धनः शब्दो यस्यां स्मृतौ। **स्मर्यते**। अर्थ इति प्रकृतं सबन्धनीयम् ॥ १३३ ॥

एवं स्मृतित्वे प्रामाण्यं व्याकरणस्मृतेराख्याय सर्वशब्दनिबन्धनत्वमाह [1]**वैखर्याः** इति। **एतद्** इति। व्याकरणम्। **अद्भुतम्** इति। आश्चर्यम्। **परं पदम्** इति संबन्धः। अनेकप्रकरणस्य शब्दराशेरास्पदं प्रतिष्ठेत्याश्चर्यमेतत्। **अनेकतीर्थभेदायाः** इति। वैखरीमध्यमापश्यन्तीनामनेकमार्गभेदकतामाह। **त्रय्याः**[2] इति। त्रयोऽवयवा वैखर्यादयो यस्या इति त्रयी। **परम्** इति। उत्कृष्टम्। **पदम्** इति। तत्सारत्वाद् व्याकरणमाश्रयः।

वैखरीमाह **संवेद्यम्** इति। परिच्छेद्यम्। [3]करणस्थशब्दमाह [4]प्राणाद्बुद्धेश्च व्यवच्छेदाय। तत्त्व(नत्व?)सावपि न बुद्धिस्थः,एतमुच्चारयामीति पद्यत एवेत्यवच्छिनत्ति **परैः** इति। चिह्नादेरनुमानादपि स्यात्, न त्वेवमित्याह **श्रोत्रविषयत्वेन** इति। श्रोत्रग्राह्यत्वेन। श्रोत्रग्राह्येण रूपेण यत् संवेद्यते। **प्रतिनियतम्** इति। विशिष्टानुपूर्वीनियतं पदान्तरव्यवच्छिन्नम्। एवं वैखर्य्या रूपमाख्याय तद्भेदानाह [5]**श्लिष्टा** इति। अव्यक्ताक्षरा।

---

5. ABD विधेयेन. 6. ABD तथैवेहोच्यते. 7. ABD °ङ्गतैवाच्यस्य.
8. B न देव तु केवलं. 1. ABDL वैरवर्याम्. 2. BD तूर्या.
3, D करस्थश°. 4. D प्रमाणाद्. 5. AD सृष्टेति,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्यक्तवर्णसमुच्चारणा प्रसिद्धसाधुभावा भ्रष्टसंस्कारा च। तथा याऽक्षे या दुन्दुभौ या वेणौ(या)वीणायामित्यपरिमाणभेदा। मध्यमा त्वन्तःसंनिवेशिनी परिगृहीतक्रमेव बुद्धिमात्रोपादाना। सा तु सूक्ष्मप्राणवृत्त्यनुगता क्रमसंहारभावेऽपि व्यक्तप्राणपरिग्रहैव केषाञ्चित्। प्रतिसंहृतक्रमा सत्यप्यभेदे समाविष्टक्रमशक्तिः पश्यन्ती।

व्यक्तवर्ण इति। व्यक्तवर्णसमुच्चारणं यस्याम्। वर्णानुव्यक्ताक्षरेति यावत्। तस्या एव व्यक्ताक्षराया भेदमाह **प्रसिद्धसाधुभावा**[6] इति। व्याकरणस्य तद्विषयतामाह। **या**[7]**अक्षे** इति। शकटाक्षेऽपि परिवर्ततेऽयं शब्दः। ननु वाचो भेदकथनमेतत्, न शब्दमात्रभेदकथनम्। तत् कथं शकटाक्ष उपात्तः। उच्यते। अर्थवाददर्शनादिदमुपात्तम्। एवं हि श्रुतौ पठ्यते।

"वनस्पती त्राविं .... [8]सैषा वनस्पतौ पवनक्षि
या क्षेपा दुन्दुभौ यापि या वीणायाम्"

इत्यनेकप्रकारा वैखरी वाक्। मध्यमामाह **अन्तःसंनिवेशिनी** इति। न करणस्था, किं त्वेनं शब्दं समुच्चारयामीति बुद्धौ यः शब्दाकारः। **परिगृहीतक्रमेव** इति। यतस्तस्यां बुद्धौ विशिष्टक्रमपरिग्रहेण प्रत्यवभासत [इति] इव शब्दः। एकत्वाद् बुद्धेस्तदव्यतिरेकाच्च शब्दस्येवशब्दः। **बुद्धिमात्रोपादाना** इति। बुद्धिमात्रमुपादानं कारणं यस्याः। तस्याधारत्वात् अन्तर्ग्रहणं बाह्यावच्छेदाय। अन्तःसंनिवेशित्वे क्रमवत्तायां परमार्थतश्चाक्रमत्वे हेतूपदर्शनमेवैतत्। बुद्धिस्थत्वादन्तःसन्निवेशित्वं क्रमा(मव ?)दाकारेण प्रत्यवभासनात् क्रमवत्त्वमेकबुद्धितत्त्वादव्यतिरेकादक्रमत्वम्। **सा तु** इति। सूक्ष्मया प्राणवृत्त्या अनुगता अनुगृहीता। करणान्यभिघ्नतोऽस्य प्राणस्य स्थूला वृत्तिः। बुद्धौ पुनर्विशिष्टाकारपरिग्रहेण क्रमतः प्रत्यवभासमानः सव्यापार[9] उपलक्ष्यते। न चैतद्रूपं प्राणवृत्त्यनुग्रहमन्तरेणास्ति। बुद्धौ तु वर्तमानानां स सूक्ष्म इत्यपरे मन्यन्ते। **क्रमसंहारभावेऽपि** इति। यद्यप्येकबुद्धिनिष्ठत्वान्नास्ति क्रमः तथापि व्यक्तया प्राणवृत्त्या तदानीमप्यस्ति परिग्रहोऽस्याः। स्वयमप्यस्योपांशुतरं पठतः तत् स्पष्टम्। क्रमवानाभावः स्पन्दमानानीव करणानि संवेद्यन्ते। यथा प्राणस्थाया वाचः। अत्र पक्षे मध्यमामाह। तत्रापि हि क्रमसंहारेणावस्थाने विवृत्त एव प्राणवृत्त्यनुग्रह इति। पश्यन्तीमाह **प्रति-**

---

6. ABD प्रसिद्धभावा. 7. B च्चात्व इति, D अन्यात्व इति।

8. The Śruti passage quoted is incorrectly preserved. It may be compared to : वाग्वै देवेभ्योऽपाक्रामत्। यज्ञायातिष्ठमाना सा वनस्पतीन् प्राविशत्। सैषा वाग्वनस्पतिषु वदति, या दुन्दुभौ, या तूणवे, या वीणायाम्। (Tai. Saṁ. 6.1.4.).

9. L. संहार उप°.

Dr. Urmila Sharma Collection, Varanasi

सा चलाचला प्रतिलब्धसमाधाना चावृता च विशुद्धा च, सन्निविष्टज्ञेयाकारा प्रतिलीनाकारा निराकारा च, परिच्छिन्नार्थप्रत्यवभासा संसृष्टार्थप्रत्यवभासा प्रशान्तसर्वार्थप्रत्यवभासा चेत्यपरिमाणभेदा। तत्र व्यावहारिकीषु सर्वासु वागव-

---

संहृतक्रमा इति। यदा ह्येदन्तया निरूपयति तदैकान्ततः क्रमाभावो वर्णानाम्। **सत्यप्यभेदे** इति। यद्यप्यभेदः क्रमेण विरुध्यते अगृहीतक्रमाकारा तु मध्यमा तत्तदुत्पद्यत इति क्रमशक्तिस्तत्रापि नय .... भेदेन विरुध्यते, तत्कार्येण तु क्रमेण विरुध्यते। **चलाचला** इति। रूपादिषु विषयेषु अर्वाग्दर्शनानां या विक्षिप्तोत्पद्यते बुद्धिर्वागेव हि सा। **प्रतिलब्धसमाधाना च** इति। अविक्षिप्ता योगिनां शब्दपूर्वयोगेन समाहितत्वात्। प्रतिशकटाहितामक्रमवतां वाचं न वेदयते भेदावग्रहादिति तेषाम्। **आवृता** अपभ्रंशैर्वा समाकीर्णा तैरवलब्धेत्यावृता। **विशुद्धा च** इति। वाग्योगविदाम्। ते हि तामक्रमां वाचं वेदयन्ते। अपभ्रंशैर्वाचं विविक्तां यथा वैयाकरणाः। **सन्निविष्टज्ञेयाकारा** इति। ज्ञेयाकारेण यथानुस्यूतं सदा ज्ञानं तथा शब्दोऽप्यर्थाकारेण। तेन पश्यन्त्यामप्यभिधेयानुगतः तदेव तस्या ज्ञेयमिति। ननु मध्यमायामप्येतदस्ति, सापि श्रूयमाणा शब्दाकारे केवलमिन्द्रियेण परिच्छिद्यते। सेयं वान्ये ज्ञेयरूपेण विवर्तते इति सन्निविष्टस्तस्यां ज्ञेयाकारः। **प्रतिलीनाकारा** इति। सद्भावेऽप्या[10]काराणां न तेऽवधार्यन्ते। तस्या एव हि सूक्ष्मत्वादनवधारणं किं पुनस्तत्संन्निविष्टाकाराणामितिं प्रलयस्तेषाम्। मध्यमायां तु संवेदने नास्त्यनभवमत .... पर्यायान् का रूपद्वयमपि वचनात्रस्यायामसत्याकाराः सन्ति निमित्ताकारा। **परिच्छिन्नार्थ** इति। परस्परविरुद्धस्वभावा गवादयोऽर्थाः प्रत्यवभासन्ते यस्यां बुद्धौ। सावकाशात् प्रकृता इव दृश्यन्ते इति परिच्छिन्नाः। ततः **सन्निविष्टज्ञेयाकारा** इति। प्रथमे व्याख्याने शब्दे[11]ऽर्थाकार उक्तः। इह तु ज्ञाने ज्ञेयाकारः। द्वितीये तु ग्राह्यांशात् सं(शासं?)भवस्तत्र कथितः सन्निविष्टज्ञेयाकारा इति। सम्प्रति तु तथा प्रत्यवभासने न ग्राहकरूपतोक्ता। [12]मध्यमायास्तु सकाशाद् पूर्ववद्विशेषः। **संसृष्टार्थप्रत्यवभासा** इति। न हि तस्यां बुद्धिरूपायां पश्यन्त्यां पृथग्भावः [13]शब्दार्थयोरिति सैव बुद्धिः संभिन्नरूपा प्रत्यवभासते इति। **प्रशान्त** इति। अर्थत्वादर्थाकारभासमाना यथा सम्यग्दर्शितां सर्वेण सर्वाकारावगमस्तदा प्रसन्ने प्रत्यवभासः। अपरिणामभेदेऽपरोऽपि भेदोऽस्तीत्याह **व्यावहारिकीषु** इति।

---

10. BD सद्भावे व्याकरणा न°. 11. ABD शब्दोऽर्थ°
12. ABD मध्यमायां तु. 13. BD शब्दात् तत्रयोरिति.

CC0. In Public Domain, Digitizagtion by eGaṇgotri

स्थासु व्यवस्थितः साध्वसाधुप्रविभागः पुरुषसंस्कारहेतुरेकेषाम्। परं तु पश्यन्तीरूपमनपभ्रंशमसंकीर्णं लोकव्यवहारातीतम्। तस्या एव वाचो व्याकरणेन साधुत्वज्ञानलभ्येन वा शब्दपूर्वेण योगेनाधिगम्यत इत्येकेषामागमः।

तथेतिहासेषु[15] निदर्शनान्युपलभ्यन्ते

प्रवृत्तिनिवृत्ति[14]लक्षणे लौकिके व्यवहारे या उपयोगवत्योऽवस्थाः यथा वैखर्या व्यक्तवर्णरूपावस्था सार्थप्रतिपादिकेति व्यवहारानुपाती(तिनी ?)ति। तथा मध्यमायामपि स्वसंवेदितो व्यवहारानुपाती यतः परिच्छिद्य साधूनेव प्रयुङ्क्ते परिहरत्यसाधून्। अवस्थया इति। सन्निविष्टज्ञेयाकारा परिच्छिन्नार्थप्रत्यवभासा च व्यवहारस्य कारणं प्रत्यासन्नमिति। व्यवहारी(रे ?)वैखरीमध्यमयोर्वाकारः साक्षाद् व्यवहाराङ्गमिति विविध एव गृह्यते। **साध्वसाधुप्रविभागः** इति। साध्वसाधू[16] प्रविभज्येते अनेनेति लक्षणमुच्यते। व्यावहारिक्यां वाचि लक्षणं व्यवस्थितमिति। **पुरुषसंस्कारहेतुः** इति। को(यतो ?)हि ज्ञात्वा साधूनेव प्रयुङ्क्ते ततोऽस्य पुरुषे धर्मोत्पन्ने संस्कारः। **एकेषाम्** इति। वैखर्यादिभेदमाख्याय तत्र **व्यावहारिकीषु** इत्यत आरभ्य [17]**व्यवहारातीतम्** इति यावदिदमेकेषां दर्शनम्। अपरेषां तु दर्शनं इत्याह ग्रन्थकारेण नोपन्यस्तम्। एकेषामिति बहुवचनान्नेतव्यम्। **परन्तु** इति। यदुक्तं प्रतिलब्धसमाधाना विशुद्धा निराकारा प्रशान्तसर्वार्थप्रत्यवभासा इति। **असङ्कीर्णम्** इति। अव्यतिभि .... शुद्धत्वात्। तदेवाह **अनपभ्रंशम्** इति। **व्यवहारातीतम्** इति। परिच्छेदादतिक्रान्तत्वात्। अत एव तत्र नास्ति व्याकरणस्य व्यापारः। **तस्या एव** इति। येयं वैखरी वाक् तस्यां संस्क्रियमाणायां सर्वा एव संस्कृता भवन्ति, तज्जातीयकत्वात्। सैव हि सावगतिः। [18]**अवधारणेन** इति। परिच्छेदेन। **अधिगम्यत** इति वक्ष्यमाणेन संबन्धः। इत्येकोऽधिगमोपायः। **साधुत्वज्ञानलभ्येन** इति। द्वितीयोऽधिगमोपाय इति। पूर्वाधिगमोपायापेक्षया पक्षोऽयमित्याहेति केचित्। अथवा एकेषामित्येतान्(त्येतत् ?)

---

14. ABD प्रवृत्तिनिमित्त°.

15. The following verses are found in a very different form in the Mahābhārata Āsvamedhika 22.

16. BD साध्वसाधुः प्रविभज्यते.

17. D °हारस्थितं.

18. This was obviously the text which the Vṛtti had, instead of व्याकरणेन, to judge from the explanation परिच्छेदेन. But no Mss, of the Vṛtti has it.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गौरिव प्रक्षरत्येका रसमुत्तमशालिनी।
दिव्यादिव्येन रूपेण भारती गौः शुचिस्मिता ॥ क ॥
एतयोरन्तरं पश्यं सूक्ष्मयोः स्पन्दमानयोः।
प्राणापानान्तरे नित्यमेका सर्वस्य तिष्ठति ॥ ख ॥
अन्या त्वप्रेर्यमाणेव विना प्राणेन वर्तते।

पूर्वेण सहैकं य(हैकीय ?)मनदर्शनमात्रमेतावत्। साध्वसाधुप्रविभागो व्याकरणव्यापारोपदिन्त्यामिति। परन्तु इत्यत आरभ्य तस्या अप्यनेन प्रकारद्वयेनोपमो(यो ?)गं इत्यपरं दर्शनम्। [19]एतच्चेतिहासस्मृत्या प्रतिपादयति तथा इति। [20]तथेतिहासेषु इति। भारते हि वासुदेवेनार्जुनस्यैतदुपदिश्यते। गौः इति। गवा सादृश्यं वाचः। प्रक्षरति[21] इति। विमुञ्चति। तथावश्यम् इति। मध्यमां साक्षात् पारम्पर्येण वैखरीम्। ततो हि ते विवर्तेते। रसम् इति। कार्योपयोगितया वैखरीमध्यमे उक्ते। उत्तमशालिनी इति। उत्तमत्वेन श्लाघत इति। उत्तमत्वं च तस्याः सर्वकारणत्वात्। दिव्यादिव्येन इति। तस्या हि पश्यन्त्या रूपे, दिव्यं च योगिग्राह्यम्, अदिव्यं[22] च[शा ?]कटिकादिष्वत्रस्थितम्। यच्चलाचलेत्याद्युक्तम्। भारती गौः इति। भारती वाक्, सापि गौरित्युच्यते। ततोऽर्थतो नामतश्चोपमेत्याह शुचिस्मिता[23] इति। स्मितं विकासः, स च तयोः शुचिः। एकस्या भविष्यत्त्वादपरस्या भेदनिरूपणे विवृत्तत्वादिति पश्यन्त्याख्याता। एतयोः इति। उक्तवक्ष्यमाणे वाचावेकीकृत्य परामृशति। अन्तरम् इति। विशेषम्। पश्य इति। अर्जुन उच्यते वासुदेवेन। सूक्ष्मयोः इति। इन्द्रियविषयातिवृत्त्या वैखरीतो विशेषमाह। स्पन्दमानयोः[24] इति। वैखरीं पश्यन्तीं .... व्यक्तेकतै। प्राणापानान्तरे इति। अन्तरं छिद्रम्। तेन प्राणापानरहितायां बुद्धावेव प्रतितिष्ठति। मध्यमा सूक्ष्मप्राणवृत्त्यनुगमा। व्यक्तप्राणपरिग्रहेति पक्षेऽपि प्राणापानमध्ये प्राणस्थेत्येवं व्याख्येयम्। बुद्धिव्यतिरेकपक्षे च प्राणाधिष्ठानतास्त्येवेति। अप्रेर्यमाणेव इति। प्राणेनाप्रेर्यमाणा पश्यन्तीव। यदाह विना प्राणेन इति। ततः इति। अनन्तरम्। पश्यन्ती सर्वसामर्थ्ययोगात् तस्या[अ ?]यम्। अतो मध्यमायामपि तत एव प्राणवृत्त्यानुगम्यते इति। व्यवहिता वा मध्यते मध्यमानां प्राणे। जायते इति। एतं प्राणं प्रेरयति। स्वरूपनिविष्टस्य शब्दस्य कारणे निवे-

---

19. ABD एवं चेति। तद्वास स्मृ°. 20. BD मासेषु. 21. ABD प्रक्षरन्तीति विमुञ्चन्ति. 22. B अभिव्यं. 23. ABD श्रुतिस्मृता. 24. ABD °मानसाविति,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जायते हि ततः प्राणो वाचमाप्याययन् पुनः ॥ ग ॥
प्राणेनाप्यायिता सेयं व्यवहारनिबन्धना ।
सर्वस्योच्छ्वासमासाद्य न वाग्वदति कर्हिचित् ॥ घ ॥
घोषिणी जातिनिर्घोषा अघोषा च प्रवर्तते ।
तयोरपि च घोषिण्योर्निर्घोषैव गरीयसी ॥ ङ ॥

शार्थम् । **आप्याययन्** इति । [25]परिपोषयन् । स चायं पश्यन्तीप्रेरितः प्राणो मध्यमां परिपुष्णाति । परिपोषश्च तस्याः श्रोत्रोपलभ्यस्वरूपनिष्पत्तिः । यदाह **आप्यायिता** इति । सैव हि मध्यमा प्राणेन करणेषूपनिचिता श्रोत्रोपलभ्यतां याति वैखरी भवति । यदाह **व्यवहारनिबन्धना** इति । सा हि श्रोत्रेणोपलब्धा व्यवहारनिमित्तमिति । **उच्छ्वासम्** इति । ऊर्ध्वं प्रवृत्तं प्राणम् । **वाग्** इति । वैखरी । **वदति** उच्चरितार्थमभिधत्ते । **कर्हिचिद्** इति । न [26]कदाचिदुच्छ्वासं प्राप्य वदति । किं तत् सर्वत उच्छ्वासं प्राप्येति, अथवा सापराधत्वात् पुरुषाणामव्यक्ति(क्त?)रूपेणापि[27]वृत्तेर्न कदाचिदिति । अन्ये त्वेताः कारिका अन्यथा व्याचक्षते । **प्रक्षरति** इति तन्निबन्धनत्वादर्थप्रतिपत्तेरित्युक्ता । तत्र वरुण्यमाणे वाचाप्युच्येते । **स्पन्दमानयोः** इति । प्रवर्तमानयोः । **प्राणापानान्तरे** इति । प्राणस्थितिरिति यावत् । **सर्वस्य** इति । पुरुषं इयं वैखरी । **अप्रेर्यमाणा** इति । प्राणेनाप्रेर्यमाणा बुद्धिस्थत्वात् । तदेवाह **विना प्राणेन वर्तते** इति । यन्मध्यमाकथनम् । पुनर्मध्यमातो वैखर्या उत्पत्तिरित्याह **जायते हि** इति । सा बुद्धिः प्राणं प्रेरयति स्वरूपनिविष्टस्य शब्दस्य करणे निवेशायेति पूर्ववत् सर्वम् । **घोषिणी** इति वाचो वैविध्यमपि । घोषः सततं विद्यते यस्याः । काः पुनः सेत्याह [28]**जातिनिर्घोषा** इति । वैखरीमाह । **अघोषा च** इति । पश्यन्तीमध्यमे उपात्ते । **तयोः** इति । द्विविधयोर्वाचोर्घोषिण्यघोषयोः । [29]**घोषिण्याः** इति वैखर्याः । **निर्घोषैव** इति । पूर्ववत् । निर्गतो घोषो यस्या वाचः । का च सा ? । पश्यन्ती मध्यमा च । **गरीयसी** इति । तत उत्पत्तेः साक्षात् पारम्पर्येण च । ततश्च वैखरीतो मध्यमोत्तमा, तयोस्तु पश्यन्तीति । **स्थानेषु** इति । उरआदिषु । [30]**विवृते** इति । तत्र

---

5. BD पर्यपोषयत्. 26. ABD नरकादिच्चित्. 27. AB °नावि वृत्तिः.

28. In the Mahābhārata, Aśvamedhika, 20, 21, the text is जातनिर्घोषा.

29. Though the text in the Vṛtti is घोषिण्योः, Vṛṣabha had obviously षिण्याः which is the reading in the Mahābhārata verse.

30. The text in the Vṛtti is विघृते.

Dr. Urmila Sharma Collection, Varanasi

पुनश्चाह—

स्थानेषु विधृते वायौ कृतवर्णपरिग्रहा ।
वैखरी वाक् प्रयोक्तॄणां प्राणवृत्तिनिबन्धना ॥ च ॥
केवलबुद्ध्युपादाना क्रमरूपानुपातिनी ।
प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते ॥ छ ॥
अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा ।
स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी ॥ ज ॥
सैयमाकीर्यमाणापि नित्यमागन्तुकैर्मलैः ।
अन्त्या कलेव सोमस्य नात्यन्तमभिभूयते ॥ झ ॥
तस्यां दृष्टस्वरूपायामधिकारो निवर्तते ।

प्रतिघातात् विवृत इव सः । **वायौ** इति । प्राणाख्ये । **प्राणवृत्तिं** इति । प्राणप्रवृत्तिः, तेन स्थानाभिघातः, स निबन्धनम्, तत उत्पत्तेः । **बुद्ध्युपादाना** इति । प्रक्रान्तयोः करणवृत्तेरवच्छिनत्ति । **क्रमरूपानुपातिनी** इति । पश्यन्तीतो विच्छेदः । तस्या निष्क्रमत्वात् । **प्राणवृत्तिम्** इति । प्राणवृत्तेरवच्छेदः । **अविभागा** इति । भेदस्य तत्राभावात् । तत एव संमृ(हृ ?)नक्रमा, भेदनिबन्धनत्वात् क्रमस्य । **सर्वतः** इति । शब्दानामर्थानां च । तयोश्च परस्परतो भेदाभावात् । **स्वरूपज्योतिः** इति । स्वरूपप्रकाशनात् । यतो न स्वसंबन्धिगतेन[31] वा बुद्ध्यन्तरेण संवेद्यते । वैखर्यां स्वपरसंवेदनं प्रतीतमेव । मध्यमायां स्वसंवेदनमस्त्येव । परस्याप्यनुमानात्तत्र स्वसंवेदनाभिमानः । **अन्तः**[32] इति । वैखरीतो व्यतिरेकः । **सूक्ष्मा** इति । स्वसंवेद्यतयातीन्द्रियत्वेन च । **अनपायिनी** इति । स्वरूपभानम्[33] । **आकीर्यमाणापि** इति । संभिद्यमाना । **मलैः** इति । अपभ्रंशैः । ननु व्यवहारातीतत्वात् कथमपभ्रंशैः तस्याः संभेदः । उच्यते । वग्विभागमजानन्तस्तामेव संकीर्णां पश्यन्ति । न हि तस्यां परिशुद्धायां मलमस्तीति । यथाह **आगन्तुकैः** इति । अविद्याकल्पितैः । **कलेव**[34] इति । चन्द्रस्य हि चतुर्दशकलाः[35] सूर्येण प्रतिपद आरभ्याभिभूयन्ते । या त्वस्य पञ्चदशी कला सामावास्यायां सूर्येणैकीभावान्नाभिभूयते । भेदे ह्यभिभवितुरभिभाव्यस्य चैतद् भवति । एवं सा वागपभ्रंशैर्नाभिभूयते मलिनीक्रियते । **तस्याम्** इति । पश्यन्त्याम् । **दृष्टस्वरूपायाम्**[36] इति । यत् तस्या रूपमविपरीतमभिगतं यदा शब्दपूर्वेण योगेन दृष्टम् । **अधिकारः** इति । नियोगो बन्धाख्यः । यतो यन्नियुक्त इवाविद्यावशात् संसारे उत्पत्तिविनाशव-

---

31. ABD °न्धिनद्धा, गतेन वा बु°. 32. ABD अन्तरं. 33. BD °भानेः.
34. ABD किंलैव. 35. BD °शतधा सूर्यो प्र°. 36. D दृष्टविरूपायाम्.

CC0. In Public Domain, Digitizagtion by eGangotri

पुरुषे षोडशकले तामाहुरमृतां कलाम् ॥ ञ ॥
प्राप्तोपरागरूपा सा विप्लवैरनुबन्धिभिः[37] ।
वैखरी सत्त्वमात्रेव गुणैर्न व्यवकीर्यते ॥ ट ॥

सैषा त्रयी वाक् चैतन्यग्रन्थिविवर्तवदनाख्येयपरिमाणा तुरीयेण मनुष्येषु प्रत्यवभासते। तत्रापि चास्याः किंचिदेव व्यावहारिकम्, अन्यत्तु सामान्यव्यवहारातीतम्। आह[38] खल्वपि

नुभवन्नवतिष्ठते। अन्योऽपि देवदत्तादिः[39] नियोगतामेनाधिकारस्य वशात् कासु[चित्] क्रियासु [प्र?]वर्तते। **षोडशकले** इति। द्वे दर्शने सूर्यमयः पुरुषः सोममय इति च। सोममय इति दर्शनमङ्गीकृतमत्र। सोमश्च षोडशकल इति पुरुषोऽपि तथा। यथा च सोमः पञ्चदशभिः कलाभिर्वृद्धिमेवानुभवन्नुत्पत्तिव्यय उक्तस्तथा पुरुषोऽपि ताभिरेव संसरति। षोडशीति कला न कदिचावर्तते (न कदाचिदावर्तते?) सैषा पश्यन्ती वाक्। न तस्या मरणं विनाश इति व्यवहारापेक्षया प्रागन्तत्वमुक्तम। परमार्थतस्तु षोडश्येवान्त्या। **प्राप्तोपरागरूपा** इति। उपरज्यन्ते एभिरित्युपरागाः अपभ्रंशाः। प्राप्तमुपरागरूपं ययेति। नियतमेते[40] शाकटिकादयः तस्या वैखर्याः स्थाने तानपभ्रंशान् प्रयुञ्जते। तेनैतस्या वाचो रूपमिव दृश्यत इति प्राप्तमित्युच्यते। **विप्लवैः** इति। विप्लवो ह्यसत्याभासेनार्थस्वरूपसंस्पर्शी। अपभ्रंशास्तु साधुस्वरूपासंस्पर्शिन उपप्लवस्थानीया बालैस्तथात्वेन गृहीता उपप्लवा उक्ताः। **अनुबन्धिभिः** इति। अपभ्रंशैरनुबद्धत्वात् तस्याः उपरागप्राप्तौ च करणत्वात् तृतीया। **सत्त्वमात्रेव** इति। यथा सत्त्वं नित्यानुबद्धमुपरक्तं रजस्तमोभ्याम्। यतो रजसि प्रवर्तमाने प्रवृत्तिमिति वा दर्शयति। नमस्यतिष्ठमाने स्थनन्तवापि स्वरूपान्न प्रच्यवते। प्रत्यक्षमेव वैखरी वाक् पुनरुक्ता।

तदेवमागमं प्रमाणमुपन्यस्य प्रकृतमेव श्लोकं व्याचष्टे। यदुक्तम् **अनेकतीर्थभेदायाः** इति। **सैषा त्रयी** इति। वैखर्यादिका। **चैतन्यविवर्तवद्**[41] इति। [42]ये देवमनुष्यादयः। **अनाख्येय** इति। तेषामनेकभेदत्वादियत्ताख्यातुं न शक्यते। यत्रवागिति। **तुरीयेण** इति। नामाख्यातादिभेदाच्चतुर्विधायामपि प्रत्येकं चतुर्थो भागो मनुष्येषु भासते। त्रयस्तु मनीषिणामेवेति। **किञ्चिदेव** इति। यद्यप्यप्रयुक्ताः शब्दा न सन्त्येव तथापि तस्मिन् काले न शब्दा धर्माभिव्यक्तिहेतव इति

---

37. WW^{2}ML अनुषङ्गिभिः. 38. WW^{2}1 आह च. 39. ABD देवदत्तानदी, 40. ABD नियत एते. 41. ABD विवर्ताव, 42. BD यो दे°,

Dr. Urmila Sharma Collection, Varanasi

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥

RV. I. 164.45.

तस्याश्चासंकीर्णं वाचो रूपं कात्स्न्येंन सामान्यविशेषवत्यस्मिँल्लक्षणे व्याकरणाख्ये निबद्धम्। अर्वाग्दर्शनानां तु पुरुषाणां प्रायेण सातिशयाः प्रतिघातिन्यः सापराधाः शक्तयः। निरपराधस्तु लक्षणप्रपञ्चवाननेकमार्गोऽयं शब्दानां प्रतिपत्त्युपायो दर्शितः ॥ १३४ ॥

तद्विभागाविभागाभ्यां क्रियमाणमवस्थितम् ।
स्वभावज्ञैश्च भावानां दृश्यन्ते शब्दशक्तयः ॥ १३५ ॥ [१४३]

कदाचित् क्वचित् प्रयुज्यते यथान्यत्वं नैवं काद्यः। अन्यत्तु इति। यदपि तद् गुहाहितं रूपं, सामान्यव्यवहारे तथैवायमधर्मदर्शनासाधारणो व्यवहारस्तु अतीतं यतोऽर्वाग्दर्शना नैव तान् प्रयुञ्जते। **आह खल्वपि** इत्यागममाह। **तस्याः** इति व्याचष्टे। **असङ्कीर्णम्** इति। अपभ्रंशैरव्यतिभिन्नम्। **सामान्यविशेषवति** इति। उत्सर्गापवादवति। [43]**निबद्धम्** इति। वैखर्या स्वरूपं साक्षात्, पश्यन्तीमध्यमयोरपि पारम्पर्येण। ननु साधूनां विशिष्टस्मरणपारम्पर्यादेव प्रतिपदपाठवत् साधुत्वमवधार्यते, किं व्याकरणेनेत्याह **सातिशयाः** इति। शक्तयो हि तावत्यतिशयवत्यः। [44]तत्रार्वाग्दर्शनानामियं साधुशब्दज्ञानशक्तिरितिशयतीति। **प्रतिघातिन्यः** इति। साधुशब्दज्ञानेऽप्रवृत्तिः प्रतिघातः। [45]**सापराधाः** इति। साधूनामसाधुतया[46] परिज्ञानात्। **निरपराधस्तु** [इति]। शिष्टैः प्रणीतत्वात्। **लक्षणप्रपञ्चाभ्याम्** (लक्षणप्रपञ्चवान् ?)इति। विशेषणं विशेष्येण (P. 2.1.57.) इति लक्षणम्, तदुत्तरः प्रपञ्चः। **अनेकमार्ग** इति। एवं ह्युक्तं

"सर्ववेदपार्षदं हीदं शास्त्रं तत्र नैकः पन्थाः शक्य आस्थातुम्।" (M. Bhā. I. p. 409 l. 10.)

बहुलमन्यतरस्यां विभाषेत्यादिग्रहणं तत इति। उत्सर्गापवादस्थान्यादेशादिभेदो वा ॥ १३४ ॥

तद् इति। व्याकरणम्। **विभागाविभागाभ्याम्** इति। प्रथमं प्रकृतिप्रत्ययादिविभागेन दाधत्यादिवत्। प्रतिपदपाठादविभागेन। **क्रियमाणम्** इति। शास्त्रप्रबन्धाविच्छेदात् वर्तमानकालता। तथाहि कृतानि करिष्यन्ति च क्रियन्ते चापराणि।

---

43. ABD निबध्नम्.
44. ABD °दर्शनयि°.
45. BD यन्तापराध.
46. BD असाधुता वा असाधुतायाः व°.

CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

विभागो नाम परप्रतिपादनाय कल्पितः प्रकृतिप्रत्ययादिभेदः। तद्यथा धातोस्तव्यदादय इति। तथा चोक्तम्—

"यत्तावदयं सामान्येन शक्नोत्युपदेष्टुं तत्तावदुपदिशति"

(M. Bhā. I. p. 113, l. 10.)

इति। अविभागस्तु यत्र स्वरूपेणोच्चारणाम्। तद्यथा दाधर्त्तिदर्धर्त्तिदाश्वान् साह्वान् इति। कानिचिद् व्याकरणानि बहुविभागानि बहून् प्रत्यक्षपक्षेण शब्दान् प्रतिपादयन्ति। कानिचित्तु विभज्यानुमानपक्षेण बहूनां समुदायानां प्रतिपादनं कुर्वन्ति। सैषा स्मृतिर्यथाकालं पुरुषशक्त्यपेक्षया तथा तथा व्यवस्थाप्यते। सन्ति तु साधु-

---

[1]अवस्थितम् इति। अविच्छेदमाह। स्वभावज्ञैः इति। ये तु शिष्टाः [2]पदार्थशक्ति प्रत्यक्षेण[पश्यन्ति ?]ते पृषोदरादिवत् सर्वान् साधून् विदन्तीति तान् प्रत्यनर्थकं व्याकरणम्। तच्छिष्टपरिज्ञानार्थन्तु व्याकरणमिति। पृषोदरादीनां तत्प्रयोगादेव साधुत्वमितरैरप्यवसीयते[3]। शब्दशक्तयः इति। [4]साधूनामभ्युदयशक्तिः, असाधूनां प्रत्यवायजननी।

परप्रतिपादनाय इति। प्रयोगसमुदा(मवा ?)यिनः समुदायस्य प्रतिपादनाय परिकल्प्यत इति। बहूनां शब्दानामवयवसादृश्यं कल्पयित्वान्वयव्यतिरेकाभ्यामपोद्धारः प्रकृतिप्रत्ययादिविभागवचनेषु सत्यतो नास्तीति कल्पितः। यत्तावद् इति।

"आद्यन्तौ टकितौ" (P. 1. 1. 6.)

इत्यत्र भाष्ये उक्तम्

"यत्तावदयं सामान्येन शक्नोत्युपदेष्टुं तत्तावदुपदिशति प्रकृतिं ततो वलाद्यार्धधातुकम्, ततः पश्चादिकारम्। तेनायं विशेषेण शब्दान्तरं प्रतिपद्यते"

इति। काम .... मवयवकल्पना दर्शना सत्यानां अविभागस्तु इति। तत्र साधुशब्दे नानुमानिकी प्रतिपत्तिरपि तु प्रतिपदपाठोऽयमेव समुदायः साधुरिति। बहुविभागानि इति। बहुविभागाः प्रतिपदपठिताः येषु व्याकरणेषु बहवः प्रतिपदं पठ्यन्ते। तदेवाह [5]प्रत्यक्षपक्षेण इति। यथाकालम् इति। ये यथा धर्माङ्गतां प्रतिपद्यन्ते ते [6]तथा साधुत्वेनान्वाख्यायन्ते। पुरुषशक्त्यपेक्षया इति। ये [7]महाशक्तयस्तानपेक्ष्य बहुविभगानि, अल्पशक्तीनपेक्ष्याल्पविभागानि। यथा तमेव आ पाणिनीयं

---

1. ABD अवच्छिन्ननित्यवच्छेदमाह।
2. ABD पदार्थे शक्तिप्रत्यक्षेण ते°
3. A अवधीयते, B अव्यवधीयते.
4. ABD °दयश्रुति.
5. ABD प्रत्यक्षेण.
6. ABD तेनासाधु°.
7. BD येयमाहशक्यबहुविभागानि.

CC0. In Public Domain, Digitizagtion by eGangotri

प्रयोगानुमेया एव शिष्टाः सर्वज्ञेयेष्वप्रतिबद्धान्तःप्रकाशाः। ते विशिष्टकालावधिप्रविभागां यथाकालं धर्माधर्मसाधनभावेन समन्वितां शब्दशक्तिमव्यभिचारेण पश्यन्ति ॥ १३५ ॥

अनादिमव्यवच्छिन्नां श्रुतिमाहुरकर्तृकाम् ।
शिष्टैर्निबध्यमाना तु न व्यवच्छिद्यते स्मृतिः ॥ १३६ ॥ [१४४]

ये शब्दप्रमाणका एव केवलं सर्वमेव शास्त्रप्रत्ययमदृष्टफलेष्वर्थेषु अभिशङ्कनीयत्वादप्रमाणं पुरुषस्य दर्शनमिति मन्यन्ते तेषां श्रुतिस्मृत्योरविच्छेदाविशेषे तुल्ये

साधुप्रयोगं नियोगेन व्याकरणमधीयानाः साधून् प्रयुञ्जते। ते वैयाकरणैः शिष्टा इत्यनुमीयन्ते। **विशिष्टकाल** इति। येयं धर्माङ्गता व्यवस्थापिता यस्यां नैयङ्कवशब्दोऽपि इति ॥ १३५ ॥

एवं स्मृतित्वाद्व्याकरणस्य प्रामाण्यमाख्याय प्रसङ्गादन्या अपि स्मृतीस्तन्मूलभूतां[1] च श्रुतिं व्याचष्टे **अनादिम्** इति। उत्पादरहिताम्। उत्पादाभावादेवाह **अव्यवच्छिन्नाम्** इति। व्यवच्छेदो हि....इति। सैव तु कथमुत्पादरहितेत्याह **अकर्तृकाम्** इति। अपदेशवचनमेतत्। कर्तुरभावादिति यावत्। [2]स्मृतेर्हि सकर्तृकत्वादुत्पादविच्छेदौ[3] प्राप्नुत इत्याह **निबध्यमाना तु** इति। तत्रापि पुनः पुनः शास्त्रकरणेन प्रबन्धाविच्छेद इति।

शब्दप्रमाणकाः इति। शब्द एव प्रमाणं न प्रत्यक्षादीनि। ननु दृष्टा सूक्तादवगतिरन्वयव्यतिरेकाभ्यां च शब्दादवगतिरित्याह **अदृष्टफलेषु** इति। धर्माधर्मादौ शब्दानां सूक्ष्मार्थप्रकाशनशक्तियोगात्। कथं पुनरेवमित्याह **शास्त्रप्रत्ययम्** इति। **दर्शनम्** इति। यो मन्यन्ते इति (**'दर्शनमिति मन्यन्ते'** इति य ?) शब्दः स इहापि संबध्यते। तन्त्रेणोपात्तत्वात्। **सर्वमेव शास्त्रमत्ययम्** इति। तत्त्वा शब्दप्रमाणकाः, यतः शब्दाः स्वमर्थं योग्यतया प्रकाशयन्ति। नित्यत्वाच्चाशङ्काहेतुरपि नास्ति। ननु धर्माधर्मयोः प्रत्यक्षमपि कैश्चिदभ्युपगतं प्रामाण्येनेत्याह [4]**अभिशङ्कनीयत्वाद्** इति। यतो रागाद्यनुगमः पुरुषेषु प्रायेण दृष्टो रागादिवियुक्ते च पुरुषविशेषे प्रमाणा(ण ?) भाव इति रागादय आशङ्काहेतवः इति अप्रमाणं पुरुषस्य, अयमीदृशविषये यतो मोहसम्भवोऽत एव दर्शनस्य अथापि पश्येव रागद्वेषाभ्यामन्यथापि प्रतिपादयेरन्। **अविच्छेदाविशेषे** इति। अकृतकत्वाच्छिष्टैः पुनः पुनर्निबन्धनात् विशेषवाचि।

---

1. BD तन्मूलतां. 2. ABD स्मृतेस्तर्हि. 3. BD °च्छेदे.
4. ABD अविशङ्कनीयत्वात्.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चोभयोरर्थस्य नित्यत्वे श्रुतिरव्यभिचरितस्वरवर्णानूपूर्व्यदेशकालनियमा न केनचित् कर्त्रा प्रकारान्तरेणावस्थापितपूर्वा सर्वकालं सर्वदेशेषु प्रतिचरणं विभागेन व्यवस्थापिता। स्मृतिस्तु नित्यमविच्छिद्यमानार्था गद्यश्लोकवाक्यादिभेदेन प्रतिकालमन्यथा शिष्टैरेव निवध्यते।

तत्र केचिदाचार्या मन्यन्ते—न प्रकृत्या किञ्चित् कर्म दृष्टमदृष्टं वा। शास्त्रानुष्ठानात्तु केवलाद् धर्माभिव्यक्तिः। शास्त्रातिक्रमाच्च प्रत्यवाययोगः। येषामेव हि ब्राह्मणवधादीनां विषयान्तरे पातकत्वं तेषामेव विषयान्तरे प्रकृष्टाभ्युदयहेतुत्वं शास्त्रेण विधीयत इति।

अन्ये तु मन्यन्ते—भावशक्तिमेव प्रतिनियतविषयां शास्त्रमनुवदति। को हि

अव्यभिचरित इति। **स्वर** उदात्तादिः। स नियतो वैदिकेषु। तथा **वर्णानुपूर्व्यम्**। चतुष्पथे नाधीयीतेति देशनियमः। सन्ध्यायां नेति कालनियमः। **केनचित्** इति। कश्चित् कर्तानेन प्रकारेणावस्थापितवान्। **सर्वकालं सर्वेषु देशेषु** इति। कालतो [5]देशतश्चानन्यथात्वं कथयति। **प्रतिचरणम्** इति। यस्य चरणमिति यस्य यद्रूपं तत् तथैव सर्वत्र, साच व्यवस्थिता। तदेवाह **विभागेन** इति। विभागो भेदोऽन्यथात्वम्। तदभावे .... तु शाखाप्रविभागभावेन। स्मृतिविशेषमाह **नित्यम्** इति। अर्थस्याविच्छेदेन तथैव स्मर्यमाणत्वात्। **गद्यश्लोक** इति। सन्निवेशभेदेन। **प्रतिकालम्** इति। कालभेदमाह। **अन्यथा** इति। स्वराद्यनियमः।

एवं भेदमभिधाय धर्मं प्रति तयोर्दर्शनभेदमाह। **किंचित् कर्म** इति। पदार्थानां स्वत एवाभ्युदयाङ्गता स्थिता। आगमः केवलं तद्रूपप्रकाशक इति नास्ति, अपि तु पदार्थः स्वतो न दृष्टो [6]नादृष्टः, किन्तु शास्त्रोपदेशस्यानुवृत्त्यतिवृत्तिभ्यामेतदुभयम्, एते चानुवृत्त्यतिवृत्ती तदुक्तकरणः। कुत एतदित्यत्र युक्तिमाह [7]एवं हि (येषामेव हि ?) इति। यदि [8]वस्तुस्वभाव एव चेद् [9]वस्तुन एकत्वे कार्यनानात्वं न भवेत्। **ब्राह्मणवधादीनाम्** इति। आदिशब्दात् सुरापानस्य। **विषयान्तरे** इति। [10]पुरुषमेधे सौत्रामण्यां च स्वर्गाङ्गत्वम्। **भावशक्तिम्** इति। कर्मणः स्वभाव एषः, केवलमवबोधकं शास्त्रमिति। येषामेव हीति चोद्यं परिहरति **प्रतिनियतविषयाम्** इति। दृश्यते हि पदार्थानां सहकारिकारणवशाच्छक्तिभेदो यथा तदेव विषं मन्त्रौषधादिसहितमारोग्याय।

---

5. BD °श्चान्यथात्वं नेति.   6. ABDदृष्टान्तदुष्टाः.

7. All the Mss. of the Vṛtti and L have एव हि.

8. ABD वस्तुभावः.   9. ABD वस्तुत.   10. ABD पुरुषमते.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शास्त्रस्य क्रीडत इव कारणस्य पुरुषानुग्रहोपघाताभ्यामर्थः। शास्त्रस्वभावाभ्युपगमाद् द्रव्यस्वभावाभ्युपगम एव युक्ततरो दृश्यते। तथा हि दृष्टार्थासु चिकित्सादिषु स्मृतिषु विषौषधादीनामिवार्थक्रियासु सामर्थ्यमुपलभ्यते, न स्मृतिशास्त्राणाम्। तस्माच्छास्त्रस्वभाव इव पक्षान्तरे द्रव्यादिस्वभावोऽयं शास्त्रेणानूद्यते। यथैवोपघातनिमित्तान्यनुग्रहनिमित्तानि च लोके व्यवस्थितानि तथैव तत्प्रतिपत्त्युपायानामप्यविच्छेदेन व्यवस्था विद्यते॥ १३६॥

अविभागाद्विवृत्तानामभिख्या स्वप्नवच्छ्रुतौ।
भावतत्त्वं तु विज्ञाय लिङ्गेभ्यो विहिता स्मृतिः॥ १३७॥[१४५]

तत एकत्वेऽपि [11]नानात्वमिति। को हि इति। यथेष्टचरणमभ्युदय इति किं न शास्त्रं प्रवृत्तं येन कस्यचित् प्रत्यवायो न भवेत्। क्रीडत इव इति। अनुग्रहोपघातयोरिति निबन्धनां वृत्तिमाह। कारणस्य इति। धर्माधर्मनिमित्तस्य। तत्रैतत् स्यात् कस्यात्र पर्यनुयोगः। स्वभाव एष शब्दस्य यत् कर्तव्यतां चोदयति, अकर्तव्यतां च निवर्तयति। पदार्थेष्वपि स तुल्यः पर्यनुयोगः, किमर्थमेव ते व्यवस्थिता इत्याह स्वभाव इति। तुल्ये [12]स्वभावाभ्युपगमे द्रव्यस्वभावाभ्युपगमो युक्तः। अन्यत्रापि दर्शनादिति। तथा हि दृष्टार्थासु इति। एतच्च तत्रापि शास्त्रस्याराधनाविरोधाभ्यामारोग्यानारोग्यकल्पनमङ्गीकृत्योक्तम्। यद्वानुवदिच्छा दिव्यौषधीनामनुग्रहोपघातसामर्थ्यादर्शनमत्रापि तथेत्युपन्यस्तम्। तस्माद् इति। यथा प्रथमपक्षे शास्त्रस्य स्वभावस्तथा द्वितीयपक्षे पदार्थस्वभावोऽपर्यनुयोज्यः। यथैव इति। यथा तेऽर्थाः स्वत एव विशिष्टशक्तियुक्ताः स्थिताः तथा तत्प्रतिपादक आगम इति॥ १३६॥

अर्थवच्छब्दानामपि नित्यतामाह अविभागात् इति। अविभक्ताच्छक्तिः शब्दब्रह्मणः, तद्विवर्ताद्वा। विवृत्तानाम् इति। ब्रह्मैव ऋषिरूपेण विवर्तते इति [1]ख्यातम्। श्रुतौ इति। वेदे। स्वप्नवद् इति। यथा स्वप्ने [2]श्रोत्रनिरपेक्षमननुकृतबाह्यविषयं मानसं ज्ञानं[3] तथा तेषामृषीणां वेद इति। भावतत्त्वम् इति। पदार्थानामनुग्रहोपघातजनिता शक्तिः। [4]लिङ्गेभ्यः इति। वेद[5]व्यवस्थितानि च लिङ्गान्यवबुध्य। विहिता इति। उपनिबद्धा। कारिकोपन्यासफलं स्वयमेव विवरणे दर्शयिष्यति येषाम् इत्यादिना।

---

11. BD कानानात्वम्. 12. ABD तुल्येस्वभावाभ्युपगोयुक्तः.

1. A व्यक्तम्. 2. BD °मनुकृतपवि°. 3. ABD ज्ञानं शब्दो भवति तथा.

4. BD लिङ्गेऽन्यः. 5. BD °स्थिता न च°.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

येषां तावदियं नित्यैव लोकस्य विभागेन प्रवृत्तिर्नैव काचिद् युगमन्वन्तर-व्यवस्था, नापि ब्रह्मणोऽसाधारणः कश्चिदहोरात्रविभागो विद्यत इति दर्शनं तेषामुक्तः श्रुतिस्मृतिप्रवृत्तिधर्मः पुरस्तादनन्तरे श्लोके। येषां तु स्वप्नप्रबोधवृत्त्या नित्यं विभक्त-पुरुषानुकारितया कारणं प्रवर्तते तेषामृषयः केचित् प्रतिभात्मनि विवर्तन्ते सत्ता-लक्षणं महान्तमात्मानमविद्यायोनिं पश्यन्तः प्रतिबोधेनाभिसंभवन्ति। केचित्तु

नित्यैव इति। येषामिदं दर्शनं यथैते पदार्थाः सम्प्रति विविक्तस्वभावास्तथा सर्वकालम्, न त्वेव कदाचिदविभागावस्थेति। युगमन्वन्तर इति। कृतादीनि द्वासप्ततिश्चतुर्युगानि मन्वन्तरम्। ब्रह्मणः इति। चतुर्दश मन्वन्तराणि कल्पः। ते ब्रह्मणोऽहोरात्रः। तत्र यो दिवसः स सर्गो या रात्रिः सा प्रलय इति [6]येषामिदं दर्शनं नास्ति यथा मीमांसकानाम्। अनन्तर इति। अनादिमव्यवच्छिन्नाम् इत्यत्र। स्वप्न-प्रबोधवृत्त्या इति। कृतादिविवर्तः प्रबोधवृत्तिः, प्रतिलयः स्वप्नवृत्तिः। नित्यम् इति। शाश्वतम्। कारणम् इति संबन्धः। विभक्तपुरुष इति। विवृत्त्यवस्थायां संदृश्यमान एव देवदत्तादिविभागः। प्रतिलय इति शक्तिसमवायादनुकरोति, प्रत्येक-त्वाच्च कारणस्य तं विभागमनुकरोति वेति व्याख्यानम्। अस्मिन् दर्शने आद्यन्त-वत्वात् सर्गस्य विच्छेदः श्रुतिस्मृत्योः प्रतिपाद्य इति कारिकाफलम्। प्रतिभात्मनि इति। यदा प्रतिभा विवर्तते[7] तदैवेके ऋषयस्तया सहैव विवर्तन्ते। एवं तर्हि प्रतिभा-त्मना[8] सहेति वक्तव्यम्। किमुच्यते प्रतिभात्मनि[9] इति। ते प्रतिभास्वभावा बुद्धि-स्वभावा एते तया सहोत्पन्ना इति कथयति। प्रतिभात्मनीति तादर्थ्येन[10] प्रतीता-महल्लक्षणं तत्त्वं प्रथमो विवर्तः प्रधानस्येति। अनेनेति[11] दर्शनं चैतत्। तदेव ह्येकं भोक्तृभोक्तव्यतया विवर्तते इति विवृत्तम्। ऋषयो विवृत्तिकाल एव तां प्रतिभां सम्यगवबुध्यन्ते। तामेव प्रतिभां पर्यायैः स्वशास्त्रप्रसिद्धैः कथयति। सत्तालक्षणम् इति हि सत्तामाह। अनात्मे(आत्मे ?)ति च कथ्यते। अविद्यायोनिम् इति। योऽयं विकारग्राम उत्तरः सोऽसत्यस्वभावोऽविद्यात्मकः, तस्येयं योनिः कारणमिति। पश्यन्तः [12]प्रबोधेन इति। ते हि तां प्रतिभां पश्यन्तः संयुज्यन्ते प्रबोधेन। अभिसंभवन्ति, प्राप्नुवन्ति, ते एकीभवन्ति, तया चैकीभूय ते प्रधानं कारणं प्रवेक्ष्यन्तीति। यथायमागमः

6. D om. येषामिदं दर्शनं नास्ति .... पश्यन्तः प्रबोधेन इति। 7. B निवर्तते.
A 8. प्रतिभावत् सह, B प्रतिभासवान् सह. 9. BD प्रतिभासात्मनि.
10. L ताद्रूप्ये सप्तमी, but no Mss. has it. What the Mss. have is corrupt.
11. B अनेकिर्ष्वानं चैतत्. 12. All the Mss. of the Vṛtti have प्रतिबोधेन.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विद्यायां विवर्तन्ते। ते मनोग्रन्थिमात्मानमाकाशादिषु भूतेषु प्रत्येकं समुदितेषु वा विशुद्धमनिबद्धपरिकल्पं तथैवाभिसंभवन्ति। तेषाञ्चागन्तुरविद्याव्यवहारः सर्व एवौपचारिकः, विद्यामकत्वं तु नित्यमनागन्तुकं मुख्यम्। ते च स्वप्न इवाश्रोत्रगम्यं शब्दं प्रज्ञयैव सर्वमाम्नायं सर्वभेदशक्तियुक्तमभिन्नशक्तियुक्तं च पश्यन्ति। केचित्तु पुरुषानुग्रहोपघातविषयं तेषामर्थानां स्वभावमुपलभ्याम्नायेषु क्वचित्तद्विषयाणि लिङ्गानि दृष्ट्वा दृष्टादृष्टार्थां च स्मृतिमुपनिबध्नन्ति। श्रुतिं तु यथादर्शनमव्यभिचरितशब्दामेव प्रथममविभक्तां पुनः संगृहीतचरणविभागां समामनन्तीत्यागमः ॥ १३७ ॥

" विरिञ्चे नाम महतः सर्गकाले मुक्तः "

इति। तेषां विवर्तत्वादिन्द्रियाणां सम्भव एव। वेददर्शनस्य तदुपदेशस्य च प्रकृते प्रधानाख्याया। भोक्तारोऽपि प्रकृति दर्शन मुक्तम्। **विद्यायाम्** इति। यदेन्द्रियाणि विवर्तन्ते तदा तैः सह तद्रूपा एव विवर्तन्ते। मनसो ह्येकदेशो विद्या। तेषां चात्मा तत्स्वभावो विवर्तते इति विद्यायामित्युक्तम्। अस्य तु दर्शनमविकाराद् भोक्तारो विवर्तन्त इति। **मनोग्रन्थिम्** इति। मन एव ग्रन्थिः, दुर्मोचत्वात्। **आत्मानम्** इति। आत्मशब्दः स्वभाववाची। **अनिबद्धपरिकल्पम्** इति। परिकल्पोऽहंप्रत्ययविवर्तः। स च मनःस्वभावत्वात्तेषामात्मनि [13]अनिबद्धः। [14]स्वतो मन आकाशादिषु प्रत्येकं समुदितेषु चात्मपरिग्रहेणावतिष्ठमानं तत्राहङ्कारप्रत्ययं कुर्यात्। स चाप्यस्य निबन्धोऽयं तत्तत्कालेपृथिव्या तामिति चेह वृत्तेः तदाकारग्रहणम्। अत एव [वि]**शुद्धम्** इति। तेभ्यो विविक्तस्यावस्थानात्। **तथैव** इति। यदुक्तं पूर्वत्र प्रबोधेन इति। एवं तेऽपि ऋषयो न स्वभावपरिकल्पं [15]शुद्धमात्मानमवबुध्यन्ते। प्रबोधेनेति मनोऽभिसंभवन्ति तेनैकीभवती(न्ती ?)ति। एतेषु वृत्तत्वान्मुक्ता अपि तिष्ठन्त्युत्तरकालम्। ततश्च श्रुतिस्मृतिप्राणिनो ग्राहयतीति। **आगन्तुः** इति। करणेऽपि वृत्तिकाल एवमुक्तत्वादिषु .... रेषां नाविर्भूतैवेति। तदात्मस्वविद्या समुदाचरति अविद्यावारिगतैः सह संव्यवहारार्थं सत्यं वदनोऽपि(वदन्तोऽपि ?)तथा व्यवहरन्तीति। यदाह **औपचारिकः** इति। परमानुवृत्त्या व्यवहारनित्यमिति शुद्धेनात्मनोघन्नाकान्तदेन मुक्तत्वात्। **ते च** इति। ऋषयः। [16]**अश्रोत्रगम्यम्** इति। उपदेष्टुरन्यस्याभावात्। **प्रज्ञयैव** इति। शुद्धेन

13. A निबद्धः, D आत्मनिबन्धो. 14. AD यतो.

15. At this point D inserts ... छिन्नामित्यत्र। स्वप्नप्रबोधवृत्त्या इति .... to पश्यन्तः प्रबोधेन which was omitted in its right place. 16. BD अतोऽत्र गम्य,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कायवाग्बुद्धिविषया ये मलाः समवस्थिताः ।
चिकित्सालक्षणाध्यात्मशास्त्रैस्तेषां विशुद्धयः ॥ १३८ ॥ [१४६]

यथैव हि शरीरे दोषशक्तिं रत्नौषधादिषु च दोषप्रतीकारसामर्थ्यं दृष्ट्वा चिकित्साशास्त्रमारब्धम्, रागादींश्च बुद्धेरुपप्लवानवगम्य तदुपघातहेतुज्ञानोपायभूतान्यध्यात्मशास्त्राणि उपनिबद्धानि, तथेदमपि साधूनां वाचः संस्काराणां ज्ञापनार्थमपभ्रंशानां चोपघातानां त्यागार्थं लक्षणमारब्धम् ॥ १३८ ॥

शब्दः संस्कारहीनो यो गौरिति प्रयुयुक्षिते ।
तमपभ्रंशमिच्छन्ति विशिष्टार्थनिवेशिनम् ॥ १३९ ॥ [१४७]

मनसा । **सर्व[प्र]भेदशक्ति** इति । नानाफलजनककर्मप्रकाशत्वात् । **अभिन्नशक्ति** इति । [17]यदनेकमप्येकं कर्म प्रकाशयति । यदुक्तं 'सर्वशाखाप्रत्ययमेकं कर्म' इति । **पुरुषानुग्रहो** यथा तादीनाम् । **उपघातो** यथा प्रणिप्रधानाम् । **अर्थानां** दादीनां यः । **स्वभावमुपलभ्य** [18]शुद्धज्ञानेन । **लिङ्गानि** वेदपठितानि चिह्नानि । तदनेन स्थितमेवेदम् तेष्य(प्र ?)ज्ञयानुत्तरया पश्यन्तीति । कृतकत्वादनादिरव्यवच्छिन्नस्मृतिरपि ततः पारम्पर्य[अ ?]विच्छेदेन व्यवस्थितेः । **प्रथमम्** इति । प्रथमतो विभागमन्तरेण पश्यन्ति श्रुतिम्, ततश्चरणविभागेनावस्थितां पश्यन्तीत्यागमः ॥ १३७ ॥

तदेवं श्रुतिस्मृतीनां च स्वरूपमाख्याय व्याकरणस्मृतेरन्याभिः स्मृतिभिस्तुल्यतामाह **कायवाग्बुद्धिविषयाः** इति । ते हि [1]मला आस्थिताः पदार्थपरिच्छेदविरोधिनो बुद्धेः कालुष्यहेतव उपप्लवाः ।

तदुपघात इति । रागाद्युपघातहेतुभूतं वैराग्यादि, तस्य ये उपायास्तेषां लक्षणभूतान्यध्यात्मशास्त्राणि पातञ्जलादीनि । **साधूनाम्** इति । [2]**ज्ञापनार्थं लक्षणमारब्धम्** इति संबन्धः । **वाचः** इति । साधवो वाचः संस्कारः । अपभ्रंशाश्चोपघातका इति ॥ १३८ ॥

अपभ्रंशानां त्यागार्थमित्युक्तम् । कथंभूतः पुनरपभ्रंश इति द्रष्टव्यमित्याह **संस्कारहीन** इति । व्याकरणविहितेन प्रकृतिप्रत्ययादिविभागेनायुक्तः । वायुनः सत्यादिष्टया तस्या इत्याह **गौरिति प्रयुयुक्षिते** इति । गौरित्येतस्मिन् सास्नादिमत्यर्थे यो गावीशब्दः

---

17. ABD यदनेकमप्यनेक. 18. A शब्दज्ञानेन. 1. AD यदावस्थित, B यथाव°.

2. From this point till the words सर्वैः [इति] यथा in the Paddhati on verse 146, B is missing, AD ज्ञानार्थं,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"शब्दप्रकृतिरपभ्रंशः"

इति संग्रहकारः। नाप्रकृतिरपभ्रंशः स्वतन्त्रः कश्चिद् विद्यते। सर्वस्यैव हि साधुरेवापभ्रंशस्य प्रकृतिः। प्रसिद्धेस्तु रूढितामापद्यमानाः स्वातन्त्र्यमेव केचिदपभ्रंशाः लभन्ते। तत्र गौरिति प्रयोक्तव्ये अशक्त्या प्रमादादिभिर्वा गाव्यादयस्तत्प्रकृतयोऽपभ्रंशाः प्रयुज्यन्ते। ते च सास्नादिमत्येव लब्धस्वरूपाः साधुत्वं विजहति। अर्थान्तरे तु प्रयुज्यमानाः साधव एव विज्ञायन्ते। न ह्येतेषां रूपमात्रप्रतिबद्धमसाधुत्वम् ॥१३९॥

अस्वगोण्यादयः शब्दाः साधवो विषयान्तरे।
निमित्तभेदात् सर्वत्र साधुत्वं च व्यवस्थितम् ॥ १४० ॥ [१४८]

आवपने गोणीति स्वत्रिप्रयोगाभिधाने चास्व इत्येतयोरवस्थितं साधुत्वम्।

प्रयुज्यते तदेतेन साधुशब्दप्रकृतितामपभ्रंशानामाह। तच्छब्दप्रयुयुक्षुः कथवगम्यत इति चेत् तदवयवानामवगमदर्शनात्, तत्कार्यस्य च तदर्थप्रत्यायनस्य तत्र दर्शनात्। विशिष्टार्थनिवेशिनम् इति। न स्वरूपनि[ष्ठा]साध्वसाधुव्यवस्था, अपि [1]त्वर्थव्यपेक्षा चेति[आह]। सास्नादि इति। गोशब्दप्रयुयुक्षायामेवासाधुरित्यर्थः।

शब्दप्रकृतिः इति। साधव एव प्रकृतिरपभ्रंशानाम्। यतः साधव पशब्द (एव शब्दा ?) एकदेशभ्रंशादवयवान्तरः[2] स्याद्वा। (न्तरस्य सत्त्वाद्वा ?)। तदेवाह नाप्रकृतिः स्वतन्त्रः इति। यस्य साधुप्रकृतिर्नास्ति। यस्य तर्हि स्वल्पोऽप्यनुगत उपलभ्यते, यत्तावताप्यभेष्टना याति तस्य कथं शब्दप्रकृतिकत्वमित्याह प्रसिद्धेस्तु इति। तत्र तर्हि शब्दप्रकृतिः प्रथमोऽपभ्रंशो विद्यमानावयवानुगमोऽपि[3] पुनरवयवानुगता(म ?)समारोपाच्च शब्दलक्षणतामुपगतं पारम्पर्याच्छब्दप्रकृतिरेव[4]। स तु लोके भूयः प्रयुज्यमानो रूढितामुपगतः। अशक्त्या इति। का(क ?)रणाभावः। प्रमादादिः इति। अनियमात्रया अग्रहणा यस्येति न सास्नादिमत्येव यदादन्यादवयवसमारोपावननापि गौणी नायम्। अतो न स्वरूपमात्रप्रतिबद्धं साधुत्वम् ॥ १३९ ॥

तदेवाह अस्वगोण्यादयः इति। हि ते धातु(धनरहिते साधुः ?)अस्वशब्दो [1]वाहनेऽपभ्रंशः। तथा च[आवपने]गोणीशब्दः साधुरसाधुः सास्नादिमति। निमित्तभेदाद् इति। प्रवृत्तिनिमित्तान्तरसमाश्रयणात्साधुरेवासाधुः। सर्वत्र इति। स्वविषयेऽपि। सास्नादिमति इति। तथा सास्नादिस्वविषयमुपगतस्य च। साधुत्वमेव

---

1. AD अपि कथं व्यपेक्षा चेति। 2. A °न्तराद्वा...वाह. 3. D °गमः सोऽपि, 4. AD °तिमेव. 1. D पाद्वने.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तथा सास्नादिमति ह्रेषितादिलिङ्गे च निमित्तान्तरात् प्रवृत्तावेतयोरन्यत्र विषये लब्धसंस्कारयोः साधुत्वमेव विज्ञायते। गोणीवेयं गौर्गोणीति बहुक्षीरधारणादिविषयादावपनत्वसामान्यादभिधीयते। तथाविद्यमानं स्वमस्य सोऽयमस्व इति। तस्माद्वस्त्वपरिगृहीतकारणं न किंचिन्नियतमस्ति यत्र साधुत्वमसाधुत्वं वा व्यवतिष्ठते ॥ १४० ॥

ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः ।
तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः ॥ १४१ ॥ [१४९]

अपभ्रंशा हि साधूनां शब्दानां विषये प्रयुज्यमाना यथैवाक्षिनिकोचादयः परिचयादुपगृहीतस्वरूपा इव प्रसिद्धास्तथा साधुप्रनाडिकयार्थं प्रत्याययन्ति। तत्र साक्षादभिधानं नेति श्लोकान्तरोपन्यासः॥ १४१ ॥

विज्ञायते इत्यनेन संबन्धः। निमित्तान्तरात् इति। न ह्रेषिनादिमत्वेन गोत्वेन वा, अपि त्वावपनादिसाधर्म्येण वक्ष्यमाणेन। अन्यत्र इति। आवपने निर्धने च। यत्रार्थे स्थितयोर्लक्षणेनानुगमः क्रियते। निमित्तान्तरमाह गोणीवेयम् इति। बहुक्षीरधारणावावपनसामान्यात्। अविद्यमानम् इति। न विद्यते स्वमस्येति [2]अन्यपदार्थसामान्यवृत्तावन्तर्भावादस्वशब्दस्तत्र विशेषेण वर्तते। अपरिगृहीतकारणम् इति। यद्यपि वस्तुप्रतिबद्धः साध्वसाधुविभागः तथापि [3]विकारानुपादाय शब्दप्रवृत्तिकारणं, प्रवृत्तिनिमित्तसव्यपेक्षमेव वस्तु साधुत्वासाधुत्वयोः कारणमिति न तेऽपभ्रंशाः॥१४०॥

साधुषु इति। वाचकेषु शब्देषु। प्रत्ययोत्पत्तिहेतवः इति। साधुषु प्रत्ययमुत्पादयन्ति। कथमित्याह अनुमानेन इति। नाभिधेयवत्, अपि तु रूपसादृश्यानुगतेरनुमानतो गवादिप्रतिपत्तिहेतवः। तादात्म्यम् इति। साधुशब्दात्मतां प्रतिपद्य। भिन्नरूपत्वेऽपि शब्दवदपभ्रंशाः, तथाधिगमादेवमुक्तम्। अत एव च [इव] शब्दप्रयोगः। शब्दार्थस्य इति। साधुप्रतिपाद्यस्य। तद्रूपवत्ता स चाक्षादिवाचक इति। साधुषु वा प्रत्ययोत्पत्तिहेतवः। तादात्म्यमिवोपगम्य शब्दा अर्थस्यानुमानेन वाचका इति।

यथैव इति। [1]यथाक्षिनिकोचादयो[न ?]साक्षाच्छब्दार्थं प्रत्याययन्ति, अपि तु पूर्वं सङ्केतवाक्यम्। परिचयाद् इति। तथा [2]तस्य पुनर्दर्शनात्। उपगृहीतस्वरूपा इव इति। तस्य संकेतवाक्यस्य स्वरूपमात्मनि निवेश्य तद्रूपतामापाद्य साक्षादिव

---

2. A °स्येत्यर्थसामान्यवृत्तावन्तर्भावादस्वशब्दसहितं तत्र, D °स्येति अन्यपदार्थसामान्यपदार्थसामान्यवृत्तावन्तर्भावादस्वशब्दसहितस्तत्र. 3. D वितानुपदय.

1. D क्षितिकालादयो, A क्षितिको ... दयो. 2. तथा तथा.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ कस्मादेते गोशब्दस्य गाव्यादयः पर्याया न विज्ञायन्ते। न हि शिष्टसमाचारप्रसिद्धेरन्यदेवंप्रकारेषु स्मृतिनिबन्धनेष्वर्थेषु निमित्तमभिधीयते। गाव्यादयश्चेत् पर्यायाः स्युरेतेऽपि शिष्टैर्लक्षणैरनुगम्येरन् प्रयुज्येरंश्च। यश्च प्रत्यक्षपक्षेण प्रयोजकेष्वभिधेयेषु प्रवर्तते स साधुः। साक्षात्तु प्रयोजकं वाच्यमर्थरूपं साधुभिः प्रत्याय्यते। तस्मादाह—

न शिष्टैरनुगम्यन्ते पर्याया इव साधवः।
ते यतः स्मृतिशास्त्रेण तस्मात्साक्षादवाचकाः ॥ १४२ ॥ [१५०]

इत्ययमुक्तार्थः श्लोकः ॥ १ २ ॥

---

[3]प्रतिपादयन्ति। [4]प्रणाडिकया इति। तद्द्वारेण। श्लोकान्तरोपन्यास इति। [अः] साधूनां वाचकत्वे प्रतिपादितेऽपि साक्षादवाचकत्वकथनाय पुनरस्योपन्यास इति ॥१४१॥

अथ कस्माद् इति। [1]यथा वृक्षशब्दस्य पर्यायाः पादपादयः एकार्थत्वान्न वा साधवः तथा गोशब्दार्थप्रवृत्तिविषये प्रवृत्तेर्गाव्यादयोऽपि नापभ्रंशा इति। न हि नियो....भ्युदयाङ्गतां गताः प्रतिपद्यन्ते, स साधुरितरो विपरीत इति साध्वसाधुलक्षणम्। न च धर्माङ्गता विपरीतता वा आगममन्तरेणावसीयत इति न विशिष्टसमाचारेण व्यतिरेकेणान्यदपि प्रमाणम्। यदाह स्मृतिनिबन्धनेषु इति। ननु च शिष्टोपनिबन्ध ईदृशो नास्ति असाधव एत इत्याह [2]गाव्यादयश्चेद् इति। यदि गोशब्दपर्यायो गावीशब्दो वृक्षशब्दपर्यायतरुशब्दवल्लक्षणे[3]नानुगम्येत, तदननुगमादनुमीयते अपभ्रंश इति। प्रयुज्येरंश्च इति। अर्थप्रत्यायकत्वं साक्षादाह यदि गाव्यादयः साक्षात् प्रत्यायकाः किमिति शिष्टैर्न प्रयुक्ताः इति। यश्च इति। साध्वसाध्वोर्भेदं निगमयति। प्रयोजकेषु अर्थप्रयुक्तत्वाच्छब्दानाम्।

[4]न शिष्टैः इति। योगशिष्टैः। ये पर्यायाः साधवो ... शास्त्रेणेत्यसाधवः। तस्मादनुमीयते साक्षादवाचका इति।

उक्तार्थः। प्रथ[म]मेवास्योपनिबन्धनं भाष्यं गाव्यादय इत्यादि। [5]नापभ्रंशाः साधुशब्दाः ॥ १४२ ॥

---

3. AB प्रतिपादयति। 4. AB प्राणाल्वित एवेति.

1. AB यत्र 2. B गार्ग्यादयश्च. 3. AB लक्षणाना°.

4. AB न विशिष्टैः. 5. °भ्रंशानाम्.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अम्बाम्बेति यथा बालः शिक्षमाणः प्रभाषते ।
अव्यक्तं तद्विदां तेन व्यक्ते भवति निश्चयः ॥ १४३ ॥ [१५१]

बालो हि करणमात्रशक्तिवैकल्यायत्नवानपि साधुप्रयुयुक्षायामव्यक्तां श्रुतिं प्रयुङ्क्ते । तदा प्रतिपत्तारस्तत्प्रकृतिं व्यक्तं शब्दमवधारयन्ति । तमेवार्थसंबन्धिनं मन्यन्ते, न बालप्रयुक्तमपभ्रंशम् ॥ १४३ ॥

एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते ।
तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते ॥ १४४ ॥ [१५२]

सङ्कीर्णायां वाचि साधुविषयेऽपशब्दाः प्रयुज्यन्ते । तैः शिष्टा लक्षणविदः साधून् प्रतिपद्यन्ते । तैरेव साधुभिस्तदर्थमभिधीयमानं पश्यन्ति । अनुमानस्तु धूम इवाग्नेरसाधुरितरेषाम् ॥ १४४ ॥

पारम्पर्यादपभ्रंशा विगुणेष्वभिधातृषु ।
प्रसिद्धिमागता येषु तेषां साधुरवाचकः ॥ १४५ ॥ [१५३]

अम्बाम्बा इति प्रयोक्तव्ये बाल अम्बकेति प्रभाषते । तदपि न स्फुटमित्याह अव्यक्तम् इति । [1]कारणप्रागभावात् । अत एवाह शिक्षमाणः इति । [2]तद्विदाम् इति । शब्दविदाम् । तेन इति । [3]अपभ्रंशेन । [4]व्यक्ते, शब्दे ।

एतदाह । ततोऽस्फुटो वन्ध इति । शब्द इति स्फुटे अम्बाम्बेति शब्दे । विदुषां प्रवृष्टेतिवायौ । अव्यक्तां श्रुतिं प्रयुङ्क्ते इति संबन्धः । ये व्यक्तत्यावदित्युक्तम् ॥ १४३ ॥

अर्थाद् दार्ष्टान्तिके कथयति साधुव्यवहित इति । साधूननुमापयन्ति । साधुभ्यश्चार्थप्रतिपत्तिरिति ।

सङ्कीर्णायाम् इति । अपभ्रंशैः । अनुमानम् इति । यथा धूमोऽग्नेरनुमापकः, स त(तु ?)धूमादनुमितोऽग्निरिति कार्यं करोति तथापभ्रंशादनुमिताः साधवोऽर्थप्रत्यायनं कुर्वन्ति ॥ १४४ ॥

ननु च व्यवहार(व्यवधान ?)मन्तरेणापभ्रंशा भूयसार्थं प्रतिपादयन्तो [1]दृष्टा इति कथमनुमानमित्याह पारम्पर्याद् इति । एतदाह विगुणेषु इति । [अ]शक्तिप्रमादालस्य-

---

1. करण° would be a better text, but the Mss. have it as printed.
2. D नन्विदम्. 3. D °भ्रंशं न. 4. D पक्तशब्दे.

1. AD दृष्टान्त.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इहाभ्यासात् स्त्रीशूद्रचाण्डालादिभिरपभ्रंशाः प्रयुज्यमानाः तथा प्रमाद्यत्सु वक्तृषु रूढिमुपागता येन तैरेव प्रसिद्धतरो व्यवहारः। सति च साधुप्रयोगात् संशये यस्तस्यापभ्रंशस्तेन संप्रति निर्णयः क्रियते। तमेव चासाधुं वाचकं प्रत्यक्षपक्षे मन्यन्ते। साधुं चानुमानपक्षे व्यवस्थापयन्ति ॥ १४५ ॥

दैवी वाग्व्यतिकीर्णेयमशक्तैरभिधातृभिः ।
अनित्यदर्शिनां त्वस्मिन् वादे बुद्धिविपर्ययः ॥ १४६ ॥ [१५४]

श्रूयते पुराकल्पे स्वशरीरज्योतिषां मनुष्याणां यथैवानृतादिभिरसङ्कीर्णा वागा-

---

तृट्क्षुधादि । प्रयोगा एव पारम्पर्येणापभ्रंशा एव । प्रसिद्धिम् । उपागताः । एवं च साधुसिद्धिर्येन तेषां पुरुषाणां वाच एव च साधुशब्दाः । ते हि ततः साधुशब्दव्यवधानेनार्थं प्रतिपद्यन्ते ।

स्त्रीशूद्रबालादिभि(दिष्व?)शक्तिमाह प्रमाद्यत्सु वक्तृषु इति । लक्षणज्ञेष्वपि प्रमादः [2]प्रसिद्धः कारणमित्याह । प्रसिद्धतरः इति । सर्वत्र [3]प्रसिद्धेः प्रकर्षमाह । सति च इति । तथाभ्यासमेव प्रसिद्धो हेतुः समर्थयते । तेषामभ्यस्तत्वादेवार्थप्रतिपत्तिरिति । अपभ्रंशा एव प्रकृतिरसाधूनाम् । तमेव च इति । तेषां साधुरवाचक इति व्याचष्टे । यथा विदुषां साधवः प्रसिद्धा इति तेभ्यः प्रत्यक्षतोऽर्थप्रतीतिः, [4]असाधुभ्योऽनुमानं साधुमार्गेण तथा स्त्रीशूद्राणामसाधवः प्रसिद्धा इति तेभ्यः प्रत्यक्षतोऽर्थप्रतिपत्तिः, साधुभ्योऽनुमान इति । सर्वत्र शब्द उत्तरानुमाने कारणम् । तथा हि गोपालादयः शब्देभ्योऽपशब्दान् इति प्रसिद्धेः, पण्डिताश्चापशब्देभ्यः साधूनिति ॥ १४५ ॥

